श्रीबालचन्द्रसूरिप्रणीतवृत्तिसमुपेता

श्रीआसडकविविरचिता

विवेकमञ्जरी

(भाग-२)

नवीनसंस्करणसम्पादिका

साध्वी चन्दनबालाश्री

सम्पादकः

पण्डित हरगोविन्ददास

प्रकाशकः

जैनविविधसाहित्यशास्त्रमाला

वाणारसी-सिटी

नवीनसंस्करणप्रकाशकः

श्रुतरत्नाकर

अहमदाबाद

श्रीबालचन्द्रसूरिप्रणीतवृत्तिसमुपेता
श्रीआसडकविविरचिता

विवेकमञ्जरी

[भाग-२]

• सम्पादकः •
पण्डितहरगोविन्ददासः

• नवीनसंस्करणसम्पादिका •
परमपूज्यपादाचार्यभगवंतश्रीमद्विजय-
रामचन्द्रसूरीश्वरजीमहाराजस्य साम्राज्यवर्ती
तथा प.पू. प्रवर्त्तिनी सा.रोहिताश्रीजीमहाराजस्य शिष्या
साध्वी चन्दनबालाश्री

• प्रकाशकः •
जैनविविधसाहित्य-
शास्त्रमाला
वाराणसी-सिटी

• नवीनसंस्करणप्रकाशकः •
श्रुतरत्नाकरः
१०४, सारप, आश्रम रोड,
अहमदाबाद-१४

विवेकमञ्जरी

[भाग-२]

●

संशोधकः

पण्डितहरगोविन्ददासः

●

सम्पादिका

साध्वी चन्दनबालाश्री

●

प्रकाशकः

श्रुतरत्नाकरः

१०४, सारप, नवजीवन प्रेस सामे,

आश्रम रोड, अहमदाबाद-१४

●

वि.सं. : २०६६

ई.स. : २०१०

●

प्रतियाँ : ५००

●

मूल्य : ५००-०० रुपये

श्रीबालचन्द्रसूरिविरचितवृत्तिसमुपेता

श्रीआसडकविकृता

विवेकमञ्जरी

दर्शनप्रभावक श्रुतस्थविर

आगमादिग्रन्थसंशोधक परमश्रुतोपासक

प्रवर्तकपूज्यमुनिराजश्री जम्बूविजयमहाराजनी

पुण्यस्मृतिने

सादर अर्पण

પરમપૂજ્ય જંબૂવિજયજી મહારાજ એટલે...!!

પ્રભુભક્ત, ગુરુભક્ત, માતૃભક્ત, પિતૃભક્ત !!

સમ્યગ્જ્ઞાનની દેદીપ્યમાન જ્વલંત જ્યોતિ !

અદ્‌ભુત મેધા, પ્રજ્ઞા અને પ્રતિભાના સ્વામી !!

દર્શનશાસ્ત્ર, ન્યાયશાસ્ત્ર, બૌદ્ધશાસ્ત્રના ધુરંધર વિદ્વાન્ !!

તપ, ત્યાગ, તિતિક્ષાની અદ્વિતીય મૂર્તિ !!

સમ્યગ્જ્ઞાન, દર્શન, ચારિત્રરૂપ રત્નત્રયીના અજોડ ઉપાસક !!

નમ્રતા, નિરભિમાનિતા, નિખાલસતાના સ્વામી !!

શ્રુતપરંપરાના એક ઉજ્જ્વલ નક્ષત્ર !!

નયચક્ર, દ્રવ્યાલંકાર, ન્યાયપ્રવેશક, આચારાંગ, સ્થાનાંગ, સમવાયાંગ, અનુયોગદ્વારસૂત્ર, નંદીસૂત્ર, પંચસૂત્ર, યોગશાસ્ત્ર, ધર્મબિંદુ આદિ અનેક દાર્શનિક ગ્રંથો, આગમ ગ્રંથો અને પ્રકરણ ગ્રંથોના બેનમુન સંશોધક !!

આગમજ્ઞ, આગમસંશોધક, સંપાદકકલાવિશેષજ્ઞ
પરમપૂજ્ય જંબૂવિજયમહારાજની પુણ્યસ્મૃતિને વિવેકમંજરીનું નવીન સંસ્કરણરૂપ સુમન અર્પણ કરીને કૃતાર્થતા અનુભવું છું.

— સાધ્વી ચંદનબાલાશ્રી

શ્રુતભક્તિ-અનુમોદના

લાભાર્થી

પરમપૂજ્ય, પરમોપકારી, સુવિશાલગચ્છાધિપતિ, વ્યાખ્યાનવાચસ્પતિ પૂજ્યપાદ આચાર્યભગવંતશ્રીમદ્વિજય રામચંદ્રસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન અધ્યાત્મયોગી પૂજ્યપાદ પંન્યાસપ્રવર શ્રીભદ્રંકરવિજયજી મહારાજસાહેબના શિષ્યરત્ન હાલારદેશે સદ્ધર્મરક્ષક પૂજ્યપાદ આચાર્યભગવંત શ્રીમદ્વિજય કુંદકુંદસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન વર્ધમાનતપોનિધિ ૧૦૦+૬૯ ઓળીના આરાધક પૂજ્યપાદ ગણિવર્ય શ્રીનયભદ્રવિજય મહારાજસાહેબના સદુપદેશથી

શ્રી નવાડીસા શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ જૈનસંઘ અંતર્ગત શ્રી નેમિનાથનગરના શ્રાવિકા બહેનોના ઉપાશ્રયમાં થયેલી જ્ઞાનખાતાની ઉપજમાંથી

આ ગ્રંથ પ્રકાશનનો સંપૂર્ણ લાભ લીધેલ છે.

આપે કરેલી શ્રુતભક્તિની અમો હાર્દિક અનુમોદના કરીએ છીએ અને ભવિષ્યમાં પણ આપ ઉત્તરોત્તર ઉત્તમકક્ષાની શ્રુતભક્તિ કરતાં રહો એવી શુભેચ્છા પાઠવીએ છીએ.

લિ. શ્રુતરત્નાકર

मनःशुद्धिबीजानि

''इह जीवाण विवेगो परमं चक्खू अकारणो बंधू ।
जइ कहमवि पाविज्जइ असरिसकम्मक्खओवसमा'' ॥

''तस्स विभूसणमेगं मणसुद्धी मंजरीव रुक्खस्स ।
तीइ समिद्धो एसो सुहफलरिद्धिं पयच्छेइ'' ॥

''तम्हा खलु आयहियं चिंतंतेणं विवेगिणा एसा ।
कायव्वा मणसोही न होइ जह दुल्लहा बोही'' ॥

''चउसरणे पडिवत्ती सम्मं अणुमोअणा गुणाण तहा ।
दुक्कडगरिहा तह भावणा य मणसुद्धिबीआइं'' ॥

[विवेकमञ्जरी/गाथा-३-४-५-६]

પ્રકાશકીય

કવિસભાશૃંગાર મહાકવિશ્રી આસડકૃત વિવેકમંજરી ગ્રંથનું પ્રકાશન કરતા અમે અત્યંત હર્ષની લાગણી અનુભવીએ છીએ. છેલ્લા કેટલાંય વર્ષોથી આ ગ્રંથ અપ્રાપ્ય હતો તેથી જ અલ્પ પરિચિત બની ગયો હતો. પ્રાકૃતપદ્યમય આ ગ્રંથ ઉપર વાગ્દેવી પ્રતિપન્નસૂનુ આચાર્યશ્રી બાલચંદ્રસૂરિ (સં. ૧૨૭૭) એ સંસ્કૃત ભાષામાં વૃત્તિ રચી છે. આ વૃત્તિ સહિત મૂળ ગ્રંથ અહીં પ્રકાશિત કરવામાં આવી રહ્યો છે.

કવિસભાશૃંગાર મહાકવિ આસડ (સં.૧૨૪૮) જૈન શ્રાવક હતા. તેમણે કલિકાલ ગૌતમ આચાર્યદેવશ્રી અભયદેવસૂરિ પાસેથી જૈન સિદ્ધાન્તનો સાર પ્રાપ્ત કર્યો હતો. તેમનો વિદ્વાન પુત્ર રાજડ યુવાવસ્થામાં જ મૃત્યુ પામ્યો હતો અને તેથી આસડ કવિને આઘાત લાગ્યો હતો. તે સમયે આચાર્યશ્રી અભયદેવસૂરિએ બોધ આપી શોકમુક્ત કર્યો હતો. કવિ આસડે પોતાના ગુરુના બોધવાક્યોમાંથી જ આ ગ્રંથની રચના કરી છે.

કવિએ વિવેકમંજરી ગ્રંથના આરંભમાં જ ગ્રંથના નામની અને વિષયની મહત્તા દર્શાવી છે. વિવેક ઉત્તમચક્ષુ સમાન અને અકારણબંધુ સમાન છે. આ વિવેકનું ભૂષણ મનશુદ્ધિ છે. મનશુદ્ધિ વગર વિવેકનો કોઈ અર્થ સરતો નથી. વળી જેમ વૃક્ષ ઉપર મંજરી આવતા જ વૃક્ષની શોભા ખીલી ઊઠે છે અને તે મંજરી ભવિષ્યમાં ઉત્તમ ફળ આપનારી બને છે તેવી જ રીતે વિવેકરૂપી વૃક્ષ ઉપર મનશુદ્ધિ મંજરી સમાન છે. આ મનશુદ્ધિ સ્વર્ગ અને મોક્ષરૂપી ઉત્તમ ફળ આપે છે. જેમણે મનશુદ્ધિ કરી છે તે ઉત્તમ બોધિ પ્રાપ્ત કરે છે.

મનશુદ્ધિ ઉત્તમ ફળ આપનાર વિવેકવૃક્ષની મંજરી સમાન છે. આવી મનશુદ્ધિની પ્રાપ્તિ મુખ્યત્વે ચાર કારણોથી થાય છે. (૧) ચારના શરણનો સ્વીકાર, (૨) ગુણોની અનુમોદના (૩) દુષ્કૃતની ગર્હા અને (૪) ભાવના. આ ચારેય કારણોનું વિસ્તારથી વિવેચન આ ગ્રંથમાં કરવામાં આવ્યું છે.

સ્વર્ગ અને અપવર્ગની પ્રાપ્તિમાં કારણભૂત તત્ત્વોનું સુંદર વર્ણન આ ગ્રંથમાં કરવામાં આવ્યું છે. સરળ પ્રાકૃત પદ્યમાં આ તત્ત્વોનું ગુંફન કરવામાં આવ્યું છે અને આચાર્ય

બાલચંદ્રસૂરિએ આ તત્ત્વોને સમજાવવા સરળ સંસ્કૃત ભાષામાં સુંદર શાસ્ત્રીય દૃષ્ટાંતો વર્ણવ્યા છે, તેથી આ ગ્રંથની મહત્તા અનેકગણી વધી છે. પ્રત્યેક આત્માર્થી માટે આ ગ્રંથ અવશ્ય વાંચવા લાયક છે.

આ ગ્રંથનું પ્રકાશન પૂર્વે હરગોવિંદદાસ પંડિતે કર્યું હતું પરંતુ તે અપ્રાપ્ય હતો અને પોથી આકારમાં નાના ટાઈપમાં છપાયો હતો તેથી વાંચનારને ઉપયોગી થયો ન હતો. તે જ ગ્રંથને આધુનિક શૈલીથી પુનઃ સંપાદન કરી પ્રકાશિત કરવામાં આવી રહ્યો છે. અમને આશા છે કે આ પ્રકાશન વાચકોને / અભ્યાસુ તથા જિજ્ઞાસુઓને ઉપયોગી નિવડશે.

પ્રસ્તુત નવીન સંસ્કરણનું સંપાદન પૂ. સાધ્વીશ્રી ચંદનબાળાશ્રીજીએ કર્યું છે. પૂ.સાધ્વીજી શરીરથી અસ્વસ્થ ઉપરાંત અનેક પ્રકારની શારીરિક તકલીફ હોવા છતાં સદા ય જ્ઞાનમગ્ન રહે છે અને સતત સંપાદનકાર્યમાં વ્યસ્ત રહે છે. તેમણે આ ગ્રંથને સંપાદન કરવામાં તથા પરિશિષ્ટો તૈયાર કરવામાં અથાગ મહેનત કરી છે. તેમજ ગ્રંથમાં આવતા અવતરણોના મૂળ સ્થાનો પણ શોધી આ ગ્રંથમાં તે તે સ્થળોએ રજૂ કર્યા છે. ગ્રંથ નિર્ભૂલ પ્રગટ થાય તે માટે તેમણે ખૂબ જ ચીવટ રાખી છે. આ કામ કરવા બદલ અને આવો ઉત્તમ ગ્રંથ તૈયાર કરવી આપવા બદલ અમે તેમના અત્યંત ઋણી છીએ.

આ ગ્રંથ આત્માર્થી જીવોને તથા જિજ્ઞાસુઓને ઉપયોગી થશે. ગ્રંથપ્રકાશનમાં આર્થિક સહયોગ કરનાર સંસ્થા / સંઘની સાભાર નોંધ લઈએ છીએ તથા પ્રકાશનકાર્યમાં સહયોગ કરનાર તમામનો આભાર માનીએ છીએ.

૨૦૧૦, અમદાવાદ. જિતેન્દ્ર બાબુલાલ શાહ

સંપાદકીય

જૈન મહારાષ્ટ્રીમાં[1] રચાયેલા ૧૪૪ પદ્યોની આ કૃતિ **આસડ**કવિએ વિ.સં.૧૨૪૮માં લખેલ છે. પ્રસ્તુત **'વિવેકમંજરી'** ગ્રંથના પહેલા પદ્યમાં મહાવીર પરમાત્માને વંદન કરેલ છે, ત્યાર પછી વિવેકનો મહિમા સમજાવ્યો છે અને તેના ભૂષણરૂપ મનની શુદ્ધિનો ઉલ્લેખ કર્યો છે. આ શુદ્ધિના ચાર કારણો જણાવી તેમનું વિસ્તારથી નિરૂપણ કર્યું છે. એ ચાર કારણો આ પ્રમાણે છે : (૧) ચાર શરણોની પ્રતિપત્તિ અર્થાત્ તેમનો સ્વીકાર, (૨) ગુણોની સાચી અનુમોદના, (૩) દુષ્કર્મોની-પાપોની નિંદા અને (૪) બાર ભાવનાઓ.

તીર્થંકર, સિદ્ધ, સાધુ અને ધર્મ - આ ચારેને મંગલ કહીને તેમનું શરણ લેવા કહ્યું છે. વર્તમાન ચોવીસીના નામ આપી તેમને તથા અતીત ચોવીસી વગેરેના તીર્થંકરોને નમસ્કાર કર્યા છે. પ્રસંગોપાત્ત દૃષ્ટાન્તોનો પણ નિર્દેશ કર્યો છે. ગાથા-૫૦-૫૩માં ભિન્ન ભિન્ન મુનિઓના તથા ગાથા-૫૬-૫૮માં સીતા વગેરે મહાસતીઓનાં નામો આવે છે. પ્રારંભની સાત ગાથાઓમાંથી છ ગાથાઓ તીર્થંકરોની સ્તુતિપરક છે.

પ્રસ્તુત **'વિવેકમંજરી'** ગ્રંથ ઉપર પરમપૂજ્ય આચાર્યભગવંત **બાલચંદ્રસૂરિ** મહારાજે વૃત્તિની રચના કરેલ છે. મૂળમાં સૂચિત દૃષ્ટાંતોના સ્પષ્ટીકરણ માટે સંસ્કૃત શ્લોકોમાં નાની-મોટી કથાઓ વૃત્તિમાં આપવામાં આવેલ છે. તે કથાઓના નામો આ પ્રમાણે છે :

(૧) ભરત-બાહુબલી કથા, (૨) સનત્કુમાર કથા, (૩) ગજસુકુમાર કથા, (૪) ઢંઢણકુમાર કથા, (૫) સ્થૂલભદ્રમુનિ કથા, (૬) દૃઢપ્રહારી કથા, (૭) સ્કંદકાચાર્ય કથા, (૮) ચિલાતીપુત્ર કથા, (૯) અવન્તીસુકુમાર કથા, (૧૦) સુકોશલમુનિ કથા, (૧૧) શાલિભદ્રમુનિ કથા, (૧૨) વજ્રસ્વામી કથા, (૧૩) મેતાર્યમુનિ કથા, (૧૪)

---

૧. સંપાદકીય લખાણમાં 'જૈન સાહિત્યનો બૃહત્ ઇતિહાસ' ગુજરાતી આવૃત્તિમાંથી ગ્રંથ અંગેનો પરિચય સાભાર લીધેલ છે.

સુદર્શનશ્રેષ્ઠી કથા, (૧૫) દશાર્ણભદ્ર કથા, (૧૬) પ્રસન્નચંદ્રરાજર્ષિ કથા, (૧૭) કુરગડુમુનિ કથા, (૧૮) અભયકુમાર કથા, (૧૯) જંબૂસ્વામી કથા, (૨૦) વિષ્ણુકુમાર કથા, (૨૧) અન્નિકાપુત્ર કથા, (૨૨) અતિમુક્તક કથા, (૨૩) નાગદત્ત કથા, (૨૪) શય્યંભવસૂરિ કથા, (૨૫) માષતુષમુનિ કથા, (૨૬) કેશીગણધર કથા, (૨૭) ઇલાતીપુત્ર કથા, (૨૮) મેઘકુમાર કથા, (૨૯) પુંડરીક કથા, (૩૦) નંદિષેણ કથા, (૩૧) કરકંડુ કથા, (૩૨) કૂર્માપુત્ર કથા, (૩૩) સીતાદેવી કથા, (૩૪) રાજીમતી કથા, (૩૫) મદનરેખા કથા, (૩૬) દવદંતી કથા, (૩૭) વિલાસવતી કથા, (૩૮) અંજનાસુંદરી કથા, (૩૯) નર્મદાસુંદરી કથા, (૪૦) કલાવતી કથા, (૪૧) સુભદ્રા કથા, (૪૨) ઋષિદત્તા કથા, (૪૩) મૃગાવતી કથા.

પરમપૂજ્ય આચાર્યભગવંત **બાલચંદ્રસૂરિ** મહારાજનો તથા **આસડ**કવિનો પરિચય વગેરે ભાગ-૧માં પંડિત **હરગોવિંદદાસ**ની સંસ્કૃત પ્રસ્તાવના અને સંપાદકીય લખાણમાં આપવામાં આવેલ છે.

પૂર્વ સંપાદન અંગે :-

સટીક આ ગ્રંથ પંડિત **હીરાલાલ હંસરાજે**-જામનગરમાં પ્રકાશિત કરેલ, પરંતુ તેમાં મૂલગ્રંથાંશનો અમુક ભાગ ટીકામાં રહી ગયેલો. તેથી આ ગ્રંથના પુનર્મુદ્રણ માટે જૈનાચાર્યશ્રી **વીરસૂરીશ્વરજી મહારાજ**સાહેબે ગુર્જર દેશાન્તર્ગત રાજધન્યપુરમાં રહેતા શ્રેષ્ઠિ ત્રિકમચંદ્રના પુત્ર કલિકાતા વિશ્વવિદ્યાલયમાં સંસ્કૃત-પ્રાકૃત અધ્યાપક ન્યાય-વ્યાકરણતીર્થ પદવીથી વિભૂષિત પંડિત **હરગોવિંદદાસ**ને પ્રોત્સાહિત કર્યા અને તેમણે છ આદર્શ પ્રતોની સહાયથી આ ગ્રંથનું સંશોધન કરી સંસ્કૃત છાયાથી વિભૂષિત કરી આ ગ્રંથ ફરી તૈયાર કર્યો અને **'જૈન વિવિધસાહિત્ય શાસ્ત્રમાલા'**ના ૯મા ગ્રંથાંક તરીકે વિ.સં.૧૯૭૫, વી.સં. ૨૪૪૫માં આ ગ્રંથ પ્રતાકારે બે ભાગમાં પ્રકાશિત થયેલ છે.

નવીનસંસ્કરણ સંપાદન અંગે :-

આજથી લગભગ ૯૦ વર્ષો પૂર્વે પ્રકાશિત થયેલ આ ગ્રંથની આવૃત્તિ જીર્ણપ્રાયઃ થયેલ હોવાથી અને પ્રતાકારે મુદ્રિત થયેલ ગ્રંથમાં ઘણા નાના અક્ષરો હોવાથી સુવાચ્ય અક્ષરોમાં આ ગ્રંથનું પુનર્મુદ્રણ થાય તો સમાધિ માટે અને આાત્મસાધના માટે અતિઉપયોગી આ ગ્રંથ હોવાથી અનેકોને વાંચવા માટે ઉપયોગી બને. આવી ઉત્તમ ભાવના **લાલભાઈ દલપતભાઈ વિદ્યામંદિર**ના નિયામકશ્રી **જિતેન્દ્રભાઈ શાહ**ના મનમાં

ઉદ્‌ભવી અને એકવાર તેઓ મારી નાદુરસ્ત રહેતી તબિયતમાં સુખશાતા પૃચ્છા માટે આવેલ, ત્યારે વાત કરી કે **'વિવેકમંજરી'** ગ્રંથના પુનઃસંપાદનની ભાવનાને સાકાર કરવા માટે આપશ્રીજીનો સહયોગ મળે તો આ ગ્રંથનું પુનઃસંપાદન કાર્ય અતિ ઉપકારક થાય તેવું છે. તેમની ભાવનાને સહર્ષ વધાવી તેમના આ સંપાદનકાર્યમાં સ્વસ્વાધ્યાયના ઉદ્દેશથી સહયોગ આપવાનું થયેલ છે અને આ ગ્રંથનો સ્વાધ્યાય કરતાં જે સંવેગગર્ભિત શુભભાવો ઉલ્લસિત થયા છે, તે માટે તેમની ખાસ ઋણી છું.

આ નવીન સંસ્કરણ સંપાદનમાં ઉદ્ધરણો બધા બોલ્ડ ફોન્ટમાં આપેલ છે. ઉદ્ધરણોના સ્થાનો જેટલા ઉપલબ્ધ સામગ્રીના આધારે અમને મળ્યા છે, તે ચોરસ કાંઉસમાં આપેલ છે. તેમજ પરિશિષ્ટો - ૯ નવા તૈયાર કરેલ છે.

પ્રસ્તુત પુસ્તકાકારે **વિવેકમંજરી** ભાગ-૧માં ચતુઃશરણપ્રતિપત્તિદ્વારનું વર્ણન તથા ગુણાનુમોદનાદ્વારમાં મહાપુરુષોના ચરિત્રોનું વર્ણન આપવામાં આવેલ છે. ત્યાર પછી **વિવેકમંજરી** ભાગ-૨માં મહાસતીઓના ચરિત્રોનું વર્ણન, દુષ્કૃતગર્હાદ્વારનું વર્ણન અને ભાવનાદ્વારનું વર્ણન આપવામાં આવેલ છે.

ઉપકારસ્મરણ :-

મારી સંયમસાધના અને શ્રુતોપાસનામાં સહાયક બનનાર સૌ કોઈનું કૃતજ્ઞભાવે સ્મરણ કરું છું. વિશેષમાં આ ગ્રંથના પ્રકાશન કાર્યમાં પરમપૂજ્ય પરમોપકારી **રામચંદ્ર-ભદ્રંકર-કુંદકુંદસૂરીશ્વરજી** મહારાજના શિષ્યરત્ન પરમપૂજ્ય પંન્યાસપ્રવરશ્રી **વજ્રસેનવિજય** મહારાજના શુભાશીર્વાદ પ્રાપ્ત થયેલ છે તથા તેઓશ્રીના ગુરુબંધુવર્ય વર્દ્ધમાનતપોનિધિ પરમપૂજ્ય ગણિવર્યશ્રી **નયભદ્રવિજય** મહારાજની શુભ પ્રેરણાથી આ ગ્રંથપ્રકાશનનો સંપૂર્ણ લાભ **નેમિનાથનગર-નવાડીસા** શ્રાવિકા સંઘની બહેનોના જ્ઞાનખાતાની ઉપજમાંથી લીધેલ હોવાથી આ ગ્રંથ પ્રકાશનના સુઅવસરે કૃતજ્ઞભાવે તેમનું સ્મરણ કરું છું તથા આ ગ્રંથના નવીન સંસ્કરણના સંપાદન કાર્ય માટે **જિતુભાઈ**એ મને શ્રુતભક્તિનો જે લાભ આપ્યો તે બદલ તેમની ઋણી છું.

આ **'વિવેકમંજરી'** ગ્રંથનું નવીનસંસ્કરણ પરમપૂજ્ય, પરમોપકારી, પરમશ્રુતોપાસક, આગમસંશોધક, શ્રુતસ્થવિર, પ્રવર્ત્તક **શ્રીજંબૂવિજય** મહારાજની પુણ્યસ્મૃતિને સાદર અર્પણ કરી કૃતાર્થતા અનુભવું છું.

મારી નાદુરસ્ત રહેતી તબિયતમાં પણ ઘણો પરિશ્રમ કરીને યથાશક્ય ગ્રંથ સુવાચ્ય

અને શુદ્ધિકરણપૂર્વકનો તૈયાર થાય તે બદલ પૂરતો પ્રયત્ન કરેલ છે. આમ છતાં અનાભોગથી કે દૃષ્ટિદોષના કારણે કે મુદ્રણાદિ દોષના કારણે જે કોઈ ક્ષતિઓ રહેલ હોય તે વિદ્વજ્જનો સુધારીને વાંચે અને તે બદલ મિચ્છા મિ દુક્કડં માંગું છું.

પ્રાંતે અંતરની એક જ શુભભાવના વ્યક્ત કરું છું કે અરિહંતાદિ ચારના શરણોનો સ્વીકાર કરીને, મહાપુરુષોના જીવનમાં રહેલા ગુણોની અનુમોદના-સંસ્તવના કરીને સ્વદુષ્કૃતોની ગર્હા કરીને જેમ પૂર્વના મહાપુરુષોએ આત્મહિત સાધ્યું તેમ આપણે પણ આત્મહિત સાધવા કટિબદ્ધ બની બાર ભાવનાઓથી ભાવિત બની સમાધિને આત્મસાત્ કરી અપૂર્વકરણ, ક્ષપકશ્રેણિ, કેવલજ્ઞાનને પામી યોગનિરોધ દ્વારા સર્વ કર્મનો ક્ષય કરીને આપણે સૌ કોઈ ભવ્યાત્માઓ સાદિ અનંતકાળ સુધી શાશ્વત સુખમાં મ્હાલીએ એ જ શુભકામના !!

- સાધ્વી ચંદનબાલાશ્રી

એફ-૨, જેઠાભાઈ પાર્ક,
નારાયણનગર રોડ,
પાલડી, અમદાવાદ-૭
ચૈત્ર સુદ-૧૩, વિ.સં.૨૦૬૬
રવિવાર, તા.૨૯-૩-૨૦૧૦

विषयानुक्रमणिका
[भाग-२]

विषयः	गाथा/पृष्ठाङ्कः
प्रकाशकीय	७-८
प्रस्तावना	९-१४
संपादकीय	१५-२०
विषयानुक्रमणिका	२१
परिशिष्टानि	२२
गुणानुमोदनाद्वारम्	
तीर्थकरजननीस्तुतिः	५५/३४१
सतीनाममन्त्राक्षराणि	५६-५८/३४१
सीतादेवीकथा	५६/३४२-३८८
राजीमतीकथा	५६/३८९-३९७
मदनरेखाकथा	५६/३९८-४०५
दवदन्तीकथा	५६/४०६-४३२
विलासवतीकथा	५६/४३३-४७६
अञ्जनासुन्दरीकथा	५७/४७७-४९३
नर्मदासुन्दरीकथा	५७/४९४-५११
कलावतीकथा	५७/५१२-५३७
सुभद्राकथा	५८/५३८-५४३
ऋषिदत्ताकथा	५८/५४४-५८०
मृगावतीकथा	५८/५८१-५८७
सतीसामान्यस्तुतिः	५९/५८८
अर्हदादिगुणानुमोदनम्	६०-६१/५८८-५८९

विषयः	गाथा/पृष्ठाङ्कः
दुष्कृतगर्हाद्वारम्—	
आशातनागर्हणम्	६२/५९०
जिनवाणीक्षमणा	६३/५९०
संघक्षमणा	६४-६६/५९०-५९२
धर्मक्षमणा	६७-६९/५९२-५९३
दानानुमोदनम्	७०-७१/५९३-५९८
सर्वजीवक्षमणा	७२-८१/५९८-६०५
उपसर्गतितिक्षा	८२/६०५
आत्मदुष्कृतगर्हा	८३-८४/६०५-६०६
पापस्थानकव्युत्सर्जनम्	८५-८८/६०६-६०७
सावद्ययोगपरिहारः	८९-९२/६०८-६०९
वपुर्व्युत्सर्जनम्	९३/६०९
सर्वयोगपरिहारः	९४/६१०
पर्यन्ताराधनाफलम्	९५-९६/६१०
बोध्युत्कर्षः	९७/६११
भावनाद्वारम्—	
प्रस्तावः	९८/६१२
अनित्यभावना	९९-१००/६१२-६१३
अशरणभावना	१०१-१०५/६१३-६१४
संसारभावना	१०६-१०७/६१५
एकत्वभावना	१०८-११३/६१५-६१७

विषयः	गाथा/पृष्ठाङ्कः
अन्यत्वभावना	११४-११५/६१७-६१८
अशुचित्वभावना	११६/६१८-६१९
आश्रवभावना	११७-११८/६१९
संवरभावना	११९/६१९-६२०
निर्जराभावना	१२०/६२०
लोकभावना	१२१-१२२/६२०-६२२
बोधिभावना	१२३/६२२-६२३
स्वाख्यातधर्मभावना	१२४-१२५/६२३-६२४
धर्ममाहात्म्यम्	१२६-१२९/६२४-६२७
अन्तरङ्गकुटुम्बनिर्देशः	१३०-१३२/६२७-६२९
प्रमादपश्चात्तापः	१३३-१३५/६२९-६३१
मिथ्यात्वत्यागोपदेशः	१३६/६३१-६३२
तत्त्वरहस्यम्	१३७-१३८/६३२
सम्यक्त्वोपदेशः	१३९/६३३
चारित्रोपदेशः	१४०/६३३
प्रमादत्यागोपदेशः	१४१/६३३-६३४
नमस्कारोपदेशः	१४२/६३४
समाप्तिमङ्गलम्	१४३/६३४-६३५
प्रशस्तिः	१४४/६३५-६३७

● ● ●

परिशिष्टानि

[१] परिशिष्टम्-विवेकमञ्जरीमूलगाथा ६३९/६४९

[२] परिशिष्टम्-विवेकमञ्जरीमूलगाथानामकाराद्यनुक्रमः ॥ ६५०/६५२

[३] परिशिष्टम्-विवेकमञ्जरीवृत्तिगतप्राकृतउद्धरणानामकाराद्यनुक्रमः ॥ ६५३/६५४

[४] परिशिष्टम्-विवेकमञ्जरीवृत्तिगतसंस्कृतउद्धरणानामकाराद्यनुक्रमः ॥ ६५५/६५८

[५] परिशिष्टम्-विवेकमञ्जरीकथागतसुक्तीनामकाराद्यनुक्रमः ॥ ६५९/६६४

[६] परिशिष्टम्-विवेकमञ्जरीकथागततात्त्विकपद्यानामकाराद्यनुक्रमः ॥ ६६५/६६६

[७] परिशिष्टम्-विवेकमञ्जरीवृत्तिगतकथानामकाराद्यनुक्रमः ॥ ६६७

[८] परिशिष्टम्-विवेकमञ्जरीवृत्तिगतप्रशस्तीनामकाराद्यनुक्रमः ॥ ६६८

[९] परिशिष्टम्-विवेकमञ्जरीवृत्तिगतविशेषनाम्नामकाराद्यनुक्रमः ॥ ६६९-६९१

● ● ●

विवेकमञ्जरी

[भाग-२]

अथ महासतीगुणानुमोदनां कर्तुकामः पुरस्तीर्थकरजननीभिष्टुवन्नाह —

जणविम्हयजणणीओ जयंति तित्थंकराण जणणीओ ।
पसवंति पुत्तरयणं जाओ तेलुक्कसिरितिलयं ॥५५॥

[जनविस्मयजनन्यो जयन्ति तीर्थकराणां जनन्यः ।
प्रसवन्ति पुत्ररत्नं यास्त्रैलोक्यश्रीतिलकम् ॥]

व्याख्या — तीर्थं भवाम्बुधेरवतारमार्गं, यद्वा, चतुर्वर्णं श्रीश्रमणसङ्घम्, अथवा, प्रथम-गणधरं कुर्वन्तीति तीर्थंकरा अर्हन्तस्तेषामतीतानागतवर्तमानविहरमाणानां जनन्यो मातरस्**तीर्थङ्करजनन्य**स्ता **जयन्ति** सर्वोत्कर्षेण वर्तन्ते । किंविशिष्टाः ? 'जणविम्हय त्ति' **जनानां** त्रिलोकीलोकानां **विस्मयाश्चर्यं जनयन्ति** यास्तास्तथा । विस्मयकारणमुत्तरार्धेनाह—'पसवंति त्ति' याः पुत्ररत्नं जातावेकवचनं सुतमाणिक्या- नीति, **प्रसवन्ति** जनयन्ति । किंविशिष्टम् ? 'तेलुक्क त्ति' **त्रैलोक्यस्य** स्वर्भूर्भुवो रूपस्य **श्रीर्ल**क्ष्मीस्तस्याः **शिरस्तत्तथा** सिद्धिपदमिति भावः तत्र **तिलकं** मण्डनं यदुक्तमागमे—"[1]**नमो त्थु ते रयणकुक्खिधारिए । नमो त्थु ते जगपईवदाइए**" ॥ [ ] इत्यादि ॥५५॥

अथ गाथात्रयेण सतीनाममन्त्राक्षरैरात्मानं पवित्रयन्नाह —

सीयादेवी सुलसा राइमई मयणरेह दमयंती ।
अज्जा चंदणबाला मणोरमा तह विलासवई ॥५६॥
अंजणासुंदरी चेव नम्मयासुंदरी सिवा ।
धारिणी चिल्लणादेवी पभावई कलावई ॥५७॥
रेवई देवई जिट्ठा सुजिट्ठा पउमावई ।
नंदा भद्दा सुभद्दा य रिसिदत्ता मिगावई ॥५८॥

[सीतादेवी सुलसा राजीमती मदनरेखा दमयन्ती ।
आर्या चन्दनबाला मनोरमा तथा विलासवती ॥

---

१. नमोस्तु ते रत्नकुक्षिधारिके ! नमोऽस्तु ते जगत्प्रदीपदायिके ! ।

अञ्जनासुन्दरी चैव नर्मदासुन्दरी शिवा ।
धारिणी चिल्लणादेवी प्रभावती कलावती ॥
रेवती देवकी ज्येष्ठा सुज्येष्ठा पद्मावती ।
नन्दा भद्रा सुभद्रा च ऋषिदत्ता मृगावती ॥]

आसां पदार्थो व्यक्त एव ।

व्यासार्थस्तु कथानकेभ्योऽवसेयस्तान्येतानि –

§§ अस्तीह **मिथिला** नाम पुरी देवपुरीनिभा ।
तस्यां **जनक** इत्यासीदसीमसुकृतो नृपः ॥१॥
प्रिया श्रद्धेव धर्मस्य तस्यानन्दैकमन्दिरम् ।
विदेहा भुवि देहाभिरामा लक्ष्मीरिवाभवत् ॥२॥
सरस्वतीव सद्बोधकविते विश्वविश्रुते ।
साऽसूत समयेऽन्यत्र युगपत् पुत्रदारिके ॥३॥
जातामात्रादतो युग्माज्जहार किल **कश्चन** ।
देवस्तत्पूर्ववैरेण दारकं दारुणाशयः ॥४॥
वैताढ्यशिरसि व्योम्नस्तं बालं त्रिदशोऽमुचत् ।
द्योतयन् दिङ्मुखान्यत्र नक्षत्रमिव सोऽपतत् ॥५॥
पतन्तं च तमद्राक्षीत् तदा **चन्द्रगतिः** स्वयम् ।
दक्षिणश्रेणिनगर**रथनूपुर**नायकः ॥६॥
किमेतदिति संभ्रान्तः सैष विद्याधरेश्वरः ।
तन्निपातानुसारेण **नन्दनो**द्यानमाययौ ॥७॥
ददर्श तत्र तं बालं पतितं पुष्परेणुषु ।
पुत्रीयन्नाददे चायमपुत्रः खेचरेश्वरः ॥८॥
पुष्पवत्याः स्वकान्तायास्तं समर्प्याथ सोऽर्भकम् ।
देव्यसूत सुतं गूढगर्भेत्याघोषयत् पुरे ॥९॥

जन्मोत्सवं विधायाथ हृद्यं विद्याधराग्रणीः ।
तं **भामण्डल**सम्बन्धाद् नाम्ना **भामण्डलं** व्यधात् ॥१०॥

धात्रीभिः पञ्चभिः पाल्यमानोऽसौ ववृधे क्रमात् ।
नन्दाद्याभिर्यथा शुक्लतिथिभिर्बालचन्द्रमाः ॥११॥

इतश्चापहृते तत्र **विदेहा** रोदिति स्म हा । 5
जनकोऽन्वेषयन्नाप तत्प्रवृत्तिं च न क्वचित् ॥१२॥

हृते सुते **सिते**यं तदज्जसेतीव नामतः ।
पितृभ्यां युग्मजा पुत्री सा **सीते**ति निरौच्यत ॥१३॥

पुत्रापहारभीताभ्यां पितृभ्यां साथ भूमये ।
कल्पिता लोठयित्वाऽस्यांभू सुतेति स्मृता ततः ॥१४॥ 10

कालेन भूयसा शोकस्तयोः स्तोकत्वमीयिवान् ।
शोक-हर्षौ हि जन्तूनामरघट्टघटीभ्रमौ ॥१५॥

व्यवहारव्यतीर्णेव लक्ष्मीरथ कलान्तरैः ।
सीता विववृधे धात्रीपञ्चकेनोपलालिता ॥१६॥

नितम्बस्थलमुल्लसिभ्रूवल्लि कुचपर्वतम् । 15
साथ पञ्चेषुपञ्चास्यवनं यौवनमासदत् ॥१७॥

अनुरूपो वरः कः स्यादस्या इति दिवानिशम् ।
चिन्तयामास चित्ते तज्जनको **जनको** नृपः ॥१८॥

राज्ञोऽस्य मण्डलं राहुरिव म्लेच्छमहीपतिः ।
तदाऽग्रसद् बलै रङ्गन्नातरङ्गतमाभिधः ॥१९॥ 20

इतश्चादिमहीभर्तु**रादिनाथ**स्य हेतवे ।
स्वस्तिमत्यस्त्य**योध्ये**ति पुरन्दरकृता पुरी ॥२०॥

तत्रादिभूमिभृन्नप्त्रादित्यगोत्राब्धिचन्द्रमाः ।
अभूज्ज**नक**भूपालसृहृद **दशरथो** नृपः ॥२१॥

दुःशासनस्य तस्यासंश्चतस्रः प्राणवल्लभाः ।
कौशल्या च **सुमित्रा** च **कैकेयी** किञ्च **सुप्रभा** ॥२२॥
राज्ञोऽस्य तासु चत्वारः समभूवंस्तनूभुवः ।
रामो लक्ष्मण-भरतौ शत्रुघ्नः क्रमशोऽप्यमी ॥२३॥
पद्मनामा हली तेषु **रामो** रम्यगुणास्पदम् ।
नारायणाक्षः किञ्चार्धचक्रभृल्**लक्ष्मणो**ऽष्टमः ॥२४॥
अथास्थानस्थितस्यास्य राज्ञो वेत्री व्यजिज्ञपत् ।
स्वामिन् ! **जनक**दूतोऽस्ति सिंहद्वारि निवारितः ॥२५॥
'प्रवेश्य' नृपेणोक्ते वेत्रिणासौ प्रवेशितः ।
ऐक्ष्वाकं प्रणनामैव पुरस्ताद् निषसाद च ॥२६॥
नृपोऽपि दूतमुद्भूतहर्षोत्कर्षो जगाद तम् ।
मैथिलस्य सराष्ट्रस्य कुशलं सुहृदो मम ? ॥२७॥
जानामि प्रेषितोऽसि त्वं मन्निर्वृत्तिकृतेऽमुना ।
विशेषण पुनर्ब्रूहि किमागमनकारणम् ? ॥२८॥
दूतोऽप्यवक्त गणशः सन्त्याप्ताः स्वामिनो मम ।
देव ! त्वमेव किन्त्वेकः सुहृदात्मा च किं बहु ? ॥२९॥
जनकस्य सुखैर्दुःखैरिन्दोरिन्दीवरं यथा ।
गृह्यसे त्वं ततस्तेन स्मृतोऽसि रिपुसङ्कटे ॥३०॥
अस्ति **वैताढ्यकैलाश**नगयोरन्तरालगः ।
देशो**ऽर्धबर्बरो** नाम जन्मभूरिव पाप्मनः ॥३१॥
मायूरमालनगरे तस्य देशस्य मण्डेन ।
आतरङ्गतमो नाम म्लेच्छराजोऽस्ति दारुणः ॥३२॥
सुताः सहस्रशस्तस्य नृपीभूयोपभुञ्जते ।
देशान् **काम्बोजवाल्हीकशुकमङ्कनका**दिकान् ॥३३॥

इदानी**मातरङ्ग**स्तैस्तरङ्गैरिव वारिधिः ।
भीषणोऽक्षौहिणीनाथैरभाङ्क्षीज्**जनक**क्षितिम् ॥३४॥
प्रतिस्थानं च मातङ्गास्ते चैत्यानि न्यपातयन् ।
शृङ्गाणीव सुतुङ्गानि धर्मविश्वम्भराभृतः ॥३५॥
तत् कुरुष्व परित्राणं धर्मस्य **जनक**स्य च । 5
अतिमात्रमभीष्टौ ते यदेतौ जीवितादपि ॥३८॥
श्रुत्वेति तत्क्षणात् पङ्क्तिरथो म्लेच्छजिगीषया ।
सुहृत्त्राणप्रयाणाय जयढक्कामदापयत् ॥३७॥
अथो दशरथं प्राह रामो नत्वा कृताञ्जलिः ।
म्लेच्छमात्रजये यूयं तात मा यात, याम्यहम् ॥३८॥ 10
मयापि सानुजेनायं जेतव्यो युष्मदाज्ञया ।
इक्ष्वाकवो यदाजन्मविक्रमा **भरता**दयः ॥३९॥
इत्थं कथञ्चिदासाद्य पितुराज्ञां स**लक्ष्मणः** ।
रामश्चमूसमूहेन वृतोऽगाद् मिथिलामथ ॥४०॥
म्लेच्छभूपांस्तमोरूपान् **रामचन्द्रः** स**लक्ष्मणः** । 15
तत्र वित्रासयामास करैरिव शरैः क्षणात् ॥४१॥
हृष्टोऽथ **जनको**ऽभ्येत्य **रामचन्द्रं** स**लक्ष्मणम्** ।
पुरीं प्रवेशयामास स्वयं त्वेष मनोऽविशत् ॥४२॥
रामेणागत्य **जनको** म्लेच्छातङ्काद् न केवलम् ।
स्वसुताया वरावाप्तिचिन्ताया अपि मोचितः ॥४३॥ 20
§§ जनेभ्यो **जानकी**रूपं श्रुत्वा द्रष्टुं तदागमत् ।
कौतुकी **नारदः** कन्यान्तःपुरे प्रविवेश च ॥४४॥
आपीनं धृतकौपीनं पिङ्गेशदृशं भृशम् ।
तुन्दिलं छत्रिकादण्डकमण्डलुवृषीधरम् ॥४५॥

भयङ्करं तमालोक्य **सीता** भीता सवेपथुः ।
आरटन्ती हहा मातरिति गेहान्तराविशत् ॥४६॥

धृत्वा बाहुशिखाकण्ठकच्छकर्णेषु दासिकाः ।
रुरुधुस्तं क्रुधोत्ताला द्वारपाला अपि द्रुतम् ॥४७॥

श्वभ्यः स्वं कीरवत्तेभ्यो मोचयित्वा कथञ्चन ।
ययावुत्पत्य **वैताढ्यं** तत्र कोपादचिन्तयत् ॥४८॥

अस्तीह दक्षिणश्रेणीभर्तुश्चन्द्रगतेः सुतः ।
युवा **भामण्डलो** दोष्मान् विद्याधरधुरन्धरः ॥४९॥

सीतां चित्रपटे कृत्वा दर्शयाम्यस्य येन ताम् ।
हठादपहरत्येष क्षते प्रतिकरोम्यदः ॥५०॥

चिन्तयित्वेति विदधे तत्तथा **नारदो** मुनिः ।
भामण्डलोऽपि तां दृष्ट्वा मन्मथग्रहिलोऽभवत् ॥५१॥

बुबुधे **नारदानी**तचित्रालिखितयोषिति ।
कामं **भामण्डल**स्यैतद्वयस्येभ्योऽथ तत्पिता ॥५२॥

आहूय **नारदं चन्द्रगति**र्भक्तिपुरस्सरम् ।
काऽसौ कस्यात्मजेत्यादि पप्रच्छ पटयोषिति ॥५३॥

आचख्यौ **नारदो**ऽप्येतामुष्मै पटयोषितम् ।
यथानाम यथाधाम यथारूपं यथागुणम् ॥५४॥

विसृज्य **नारदं** राजा **भामण्डल**मथावदत् ।
त्वां तयोद्वाहयिष्यामि ततो वत्स ! विषीद मा ॥५५॥

तत**श्चपलगत्या**ख्यो विद्याभृत् तदनुज्ञया ।
बद्ध्वा **जनकमा**नीयाऽऽर्पयच्च**न्द्रगते**र्निशि ॥५६॥

अथाशूत्थाय **जनकं रथनूपुर**पार्थिवः ।
आश्लिश्योच्चैर्निवेश्यापि सगौरवमदोऽभवत् ॥५७॥

लोकोत्तरगुणौर्गीता **सीता** ते विद्यते सुता ।
भामण्डलश्च मे सूनुरनूनो रूपसम्पदा ॥५८॥
योगस्तदेतयोर्जात्यरत्नहेम्नोरिवोचितः ।
मिथो भवतु सम्बन्धादावयोरपि सौहृदम् ॥५९॥
जनकोऽथ जगादेति दत्ता **रामाय** सा मया ।
'सकृत् कन्याः प्रदीयन्ते' तदन्यस्मै ददे कथम् ? ॥६०॥
अथ **चन्द्रगतिः** प्राह मया सौहृदहेतवे ।
प्रार्थितोऽसि त्वमानीय क्षमस्तां हर्तुमप्यहम् ॥६१॥
रामाय कल्पिता **सीता** स्वसुता यद्यपि त्वया ।
तथापि नः पराजित्य परिणेष्यति तामयम् ॥६२॥
इत्थं सत्यपि सामर्थ्येऽथवा कार्यं द्वयं मया ।
रक्षणीयापकीर्तिश्च ग्राह्या च तव कन्यका ॥६३॥
वज्रावर्त्तार्णवावर्ते धनुषी देवताज्ञया ।
पृथग्यक्षसहस्रेणाधिष्ठिते दुःसहौजसी ॥६४॥
पूज्येते प्रत्यहं गोत्रदेवतावद् गृहे पुनः ।
कृते भविष्यतोः शीरिशार्ङ्गिणोस्तद् गृहाण ते ॥६५॥
आभ्यामारोपयत्येकमपि **दाशरथिः** स चेत् ।
तदा वयं जितास्तेनोद्वहतां ते सुतामयम् ॥६६॥
एकं सेवकसौजन्यादपरं भुजविक्रमात् ।
मद्भूरुभयथाप्येतन्न भयं नाम पश्यति ॥६७॥
श्रुत्वेति **मैथिलो** दध्यौ हा ! वैषम्यमुपस्थितम् ।
मया **रामाय** देया सा विघ्नस्त्वयमुपस्थितः ॥६८॥
अभीष्टः क्ष्माचरो **रामो**ऽनभीष्टः खेचरस्त्वयम् ।
न वेद्मि विकटं कर्म हा **सीते** ! किं भविष्यति ? ॥६९॥

चिन्तयित्वेति **जनकः** कालक्षयकृते कृती ।
विहस्य खेचराधीशमब्रवीदेवमस्त्विति ॥७०॥

ततो **वज्रार्णवा**वर्त्ते अर्पयित्वा स ते धनू ।
मिथिलां प्रापयामास **मैथिलं** खचरेश्वरः ॥७१॥

आत्मनापि नभश्चारिसभा-मण्डलनन्दनः ।
तत्र **चन्द्रगतिः** प्राप स **भामण्डल**नन्दनः ॥७२॥

मिथिलां परितो विद्याधरसैन्यैरनुद्दुतः ।
आवासानग्रहीदेष दत्तस्वर्गभ्रमान् भुवि ॥७३॥

अथो कथितवृत्तान्तो **विदेहायै विदेह**राट् ।
प्रातर्व्यधत्त **सीता**यायाः स्वयंवरणमण्डपम् ॥७४॥

तत्र ते धनुषी वीरलक्ष्मीभ्रूलतिके इव ।
चर्चयित्वाऽर्चयित्वा च मण्डपान्तरमण्डयत् ॥७५॥

सीतास्वयंवरकृते **जनके**न निमन्त्रिताः ।
तत्रेयुः कौतुकोत्तालभूपाला भूचरा अपि ॥७६॥

भूचराः खेचरास्तत्र भुजदण्डोन्मदिष्णवः ।
एत्य मञ्चेषु पञ्चेषुरूपा भूपा उपाविशन् ॥७७॥

रामश्च लक्ष्मणश्च द्वावपि तौ पितुरात्मनः ।
पुष्पदन्तौ पदोपान्ते मेरोरिव निषेदतुः ॥७८॥

सखीभिः सहिता **सीता** रत्नाभरणभारिणी ।
अथागात् तत्र मूर्त्ताभिः कलाभिरिव शारदा ॥७९॥

धनुषी पूजयित्वा सा **रामं** मनसि बिभ्रती ।
जनकस्य पदोपान्तेऽम्बुधेर्लक्ष्मीरिव स्थिता ॥८०॥

सर्वेषामपि भूपानां निपेस्तुस्तत्र दृष्टयः ।
प्रत्यग्रविकसज्जातीकलिकायामिवालयः ॥८१॥

अथाह **जनकद्वा**:स्थः क्ष्माचराः खेचरा अपि ।
भो भोः शृण्वन्तु भूपाला मद्विभुर्वेदयत्यदः ॥८२॥
आरोपयति यः कश्चिदेकमप्येतयोर्धनुः ।
जयलक्ष्मीरिवावन्यां कन्यामुद्वहतां स मे ॥८३॥
एकैकशोऽथ दोष्मन्तः खेचराः क्ष्माचरा अपि ।
उपधनुः समागच्छंस्तदारोपणकाम्यया ॥८४॥
नाशकन् द्रष्टुमप्येके नैके स्प्रष्टुमपि क्षमाः ।
आरोपयन्तो न्यपतन् केऽपि केऽप्यनमंश्च ते ॥८५॥
अथो **दशरथा**नुज्ञामाप्य **रामो** महाभुजः ।
वज्रावर्ताभिधानस्य धनुषः सविधे ययौ ॥८६॥
सोत्प्रासं खेचरैर्दृष्टः साशङ्कं **जनके**न च ।
लक्ष्मणेन च सोत्कर्षं सहर्षं चापि **सीतया** ॥८७॥ युग्मम् ॥
पितुः पुलकदण्डेन सहोद्धृतमथो धनुः ।
रामेण नामितं चैतद् भूपानामाननैः समम् ॥८८॥
कोटिमारोप्य तत् कीर्त्या सार्धमध्वनयद् धनुः ।
वैदेहीमनसा साकमाचकर्ष च **राघवः** ॥८९॥
संशयेन समं राज्ञो **जनक**स्योदतायर्त ।
रामेण तद् धनुश्चके पाणौ च सह **सीतया** ॥९०॥
द्वितीयमर्णवावर्त्तं धनुरारोप्य तत्क्षणात् ।
कन्या विद्याभृतामष्टादशोपायंस्त **लक्ष्मणः** ॥९१॥
अथ **सीता**कृते ताम्यन्मना **भामण्डल**स्तदा ।
युग्मजेयं तवेत्युक्त्वा मुनिनैकेन बोधितः ॥९२॥
ततो **भामण्डले**नौच्चैः सानुतापेन **जानकी** ।
नताभिनन्दितश्चायं **जनके**न प्रमोदिना ॥९३॥

क्षरन्ती प्रस्रवं हर्षबाष्पाभ्भश्च समं तदा ।
नता **भामण्डले**नाथ **विदेहा** जननी निजा ॥९४॥

स्थानं स्वं स्वमथो यथागतमगुः क्षोणीचराः खेचरा
राजानो **जनके**न वाजिवसनैर्मासनैः सत्कृताः ।
ऐक्ष्वाकोऽपि वधूवरेण सहितो मित्रेण भूमीभृतां
सम्पूज्यानुगतो निवर्त्य तमथ स्वां राजधानीमगात् ॥९५॥

॥ इति सीताचरितनामनि महाकाव्ये सीतोत्पत्तिविवाहर्वणनो नाम प्रथमः सर्गः ॥

● ● ●

अथो नृपः पङ्क्तिरथो महात्मा तपोवनेषु प्रवया यियासुः ।
रामं निजे राज्यपदेऽभिषेक्तुमुच्चैरुपाक्रंस्त शुभे ग्रहेऽह्नि ॥१॥

कैकेय्यथो **मन्थरया** तमाह न्यासीकृतो योऽस्ति वरस्त्वया मे ।
तेनाद्य भर्त**र्भरत**स्य राज्यं प्रयच्छ सत्यं यदि **राघवे**षु ॥२॥

श्रुत्वेति वाक्यं नृपतिः सदभ्भं दम्भोलिनेव प्रहतो गिरीन्द्रः ।
पपात मूर्च्छाकुलितो नृसिंहः सिंहासनाद् मीलितलोचनान्तः ॥३॥

श्रीखण्डतोयैर्व्यजनानिलैश्च मूर्च्छापनीतास्य परिच्छदेन ।
आस्थाय सिंहासनमन्तरेति नरेश्वरश्चिन्तितवान् विवेक्ता ॥४॥

स्त्रीवाचया चेद् **भरतं** स्वराज्ये निवेशये स्यादयशस्तदा मे ।
प्रतिश्रुतं चेच्च न पालये स्वं तदा कलङ्कः प्रथमः कुलेऽस्मिन् ॥५॥

तदस्त्वकीर्त्तिर्मम, किन्तु मा भूदभूतपूर्वाऽत्र कुले कलङ्कः ।
ध्यात्वेति निःश्वस्य च दीर्घमुष्णमाकारयामास नृपोऽथ **राम**म् ॥६॥

आहूतमात्रः समुपेत्य **रामः** प्रणम्य तातस्य पुरो न्यविक्षत् ।
स्नेहस्पृशा साश्रुदृशाऽभिपश्यन् पितापि तं गद्गदवागुवाच ॥७॥

स्वयंवरे वत्स ! पुरा मयाऽस्याः सारथ्यतुष्टेन वरः प्रदत्तः ।
तं याचते **केकय**राजपुत्री स्वपुत्रराज्येन किमत्र युक्तम् ? ॥८॥

रामोऽप्यभाषिष्ट सुहृष्टचेतास्तातार्थितं युक्तभिदं जनन्या ।
यद् बन्धवे मे **भरताय** राज्यं धिनोति योऽस्मान् विधुनोति शत्रून् ॥९॥

तथापि तातः सुतवत्सलत्वादतिप्रसादादिति मामपृच्छत् ।
रघुप्रसूतेर्विनयातिपातसंसूचकं तत्तु मनो दुनोति ॥१०॥
यस्मै च कस्मैचन राज्यमेतत् तातः प्रसादीकुरुतेऽर्थिनेऽपि ।
कश्चिद् निषेधेऽनुमतौ च तत्र त्वत्पत्तिमात्रस्य न मे विकारः ॥११॥
सुतावुभौ ते **भरतो**ऽप्यहं च दृशाविवावां तुलितानुभावौ । 5
निवेश्यतां तद् **भरतो**ऽत्र राज्ये प्रमोदसम्पद्भरतो मतं मे ॥१२॥
श्रुत्वेति **राम**ाद् मुदितोऽथ यावदादिक्षदिक्ष्वाकुपतिर्नियुक्तान् ।
तावद् बभाषे **भरतो**ऽस्तु राज्यं तातानुयास्यामि तपोवनं त्वाम् ॥१३॥
उवाच राजा मम च प्रतिज्ञां स्वमातुराज्ञां च मनुष्व वत्स !
असौ वरं दत्तवरं मयाद्य त्वद्राज्यदानेन यतो ययाचे ॥१४॥ 10
अथाह **रामो भरतं** विभिन्नं सद्वृत्तिशोभस्तव चेन्न लोभः ।
सुसत्त्व ! सत्यापयितुं तथापि तातं गृहाणेदमनिन्द्यराज्यम् ॥१५॥
अथो सबाष्पं **भरतः** प्रणम्य सगद्गदं **राम**मिदं जगाद ।
तातार्ययोर्युक्तमिह प्रदातुं साम्राज्यमादातुमिदं तु मे न ॥१६॥
अथाह **रामो** नृपतिं मयीह सत्येष राज्यं न ग्रहीष्यते तत् । 15
वनं प्रयामीति वदंश्च नत्वा विनिर्ययौ तूणधनुःसहायः ॥१८॥
वनं प्रयान्तं तनयं विलोक्य राजा सुतस्नेहविमोहितात्मा ।
भूयोऽपि भूयोऽपि जगाम मूर्च्छामुद्वीज्यमानो व्यजनैर्जनेन ॥१९॥
नत्वा निजाम्बा**मपराजिता**ख्यां जगाद **रामो**ऽञ्जलिबन्धपूर्वम् ।
मातः ! सुतस्ते **भरतो** यथाहं पश्येस्ततस्त्वं ननु मामिवैतम् ॥२०॥ 20
यतोऽद्य सत्यापयितुं स्वसन्धामदत्त राज्यं **भरता**य तातः ।
मय्यत्र सत्येष न तद् बिभर्ति वनाय तद् यातुमहं यतिष्ये ॥२१॥
श्रुत्वेसि **राम**स्य वचांसि मूर्च्छाभराद् धरायां निपपात देवी ।
मूर्च्छाविरामे विहिते सखीभिरुत्थाय बाढं रुदतीत्युवाच ॥२२॥

आः केन मूर्च्छा व्यपरोपिता मे येनेयमासीद् सुखमृत्युहेतुः ।
कथं कथं **राम**वियोगदुःखं जीवत्यहं दैवहता सहिष्ये ? ॥२३॥

रामोऽब्रवीत् कातरता तवेयं मातः । कथं पत्यसि मत्पितुर्यत् ? ।
सिंहीसुतो याति न किं वनान्तं सिंही तु किं ताम्यति लेशतोऽपि ? ॥२४॥

समस्ति तातेन ऋणं प्रदेयं यतो वरः **केकय**नन्दनायै ।
मय्यत्र सत्यम्ब ! पवित्रसत्यव्रतस्य तस्यानृणता कथं स्यात् ? ॥२५॥

युक्त्याऽनया तां प्रतिबोध्य **रामः** पराश्च मातृः प्रणिपत्य यातः ।
सीतापि नत्वा नृपमेत्य देवीं **राम**नुयानाय रयादपृच्छत् ॥२६॥

देव्यङ्कमारोग्य सगद्गदं तां **सीता**मशीताश्रुजला जगाद ।
पितुर्नियोगेन वनाय वत्से ! याता नृसिंहोऽस्य न दुष्करं तत् ॥२७॥

त्वं बालजातीकलिकेव वत्से ! म्लानिं कठोराद् मरुतोऽपि यासि ।
पद्भ्यां समं यातुमपारयन्ती स्वभर्तुरप्यातनुषे च खेदम् ॥२८॥

वत्से ! निजस्यानुगमेन भर्तुरनिष्टकष्टागमनेन वापि ।
तव प्रयान्त्याः प्रतिषेधमद्य विधिं च कर्तुं न हि पारयामि ॥२९॥

अथाह **सीता त्वपराजितां** तां नितान्तसंफुल्लमुखी प्रणम्य ।
त्वद्भक्तिरेवास्तु शुभङ्करा मे पथि स्वभर्तारमनुप्रयास्ये ॥३०॥

सन्माननं तत् किल कामनं मे स्वर्गाभिरामा ननु ते च मार्गाः ।
ते सानुमन्तोऽनुमताश्च यत्र त्वत्पुत्रपादा निवसन्ति मातः ! ॥३१॥

उक्त्वेति नत्वा च निजप्रियाम्बां **सीता** ततो **राम**मनुप्रयाता ।
सतीशिरोरत्नमुदश्रुपौरनारीभिरध्वन्यवलोक्यमाना ॥३२॥

निर्यान्तमाकर्ण्य वनाय **रामं सौमित्रि**रुत्तम्भितकोपकम्पः ।
विश्रान्तदृष्टिः किल चापदृष्टौ दध्यौ सवैलक्ष्यमिदं हृदन्तः ॥३३॥

प्रायः पुमांस सरलस्वभावा रण्डास्तु कौटिल्यकलाकरण्डाः ।
तातात् ययाचे कथमन्यथाऽस्मिन् काले वरं **केकय**संभवेयम् ? ॥३४॥

ततो ददौ यद्भरताय राज्यमेतावताऽसावनृणीबभूव ।
अहं त्विदं मातृमुखादमुष्मादाच्छिद्य सद्यो रचयामि **रामे** ॥३५॥
आर्योऽथवा यत् तृणवद् विमुच्य नादास्यते राज्यमिदं सुसत्त्वः ।
तातस्य दुःखं भविता तु तस्मात् पदातिवद् **राम**मनुव्रजामि ॥३६॥
ध्यात्वेति धीमान् प्रणिपत्य तातमम्बां **सुमित्रापराजितां** च ।
सौमित्रिरप्यात्तधनुर्निषङ्गं **सीता**न्वितं **राम**मथान्वियाय ॥३७॥
त्रयोऽपि ते फुल्लमुखारविन्दा विनिर्ययुः **कोशल**राज्यपुर्याः ।
प्राकारसौधाग्रतलप्रतिष्ठैः पौरैरपाराश्रुभिरीक्ष्यमाणाः ॥३८॥
सौमित्रि-सीतानुमतोऽथ **रामः** क्रामन् धरित्रीवलयं क्रमेण ।
वनीमपाच्यां दिशि **दण्डका**ख्यां गत्वा गृहे वा गिरिगह्वरेऽस्थात् ॥३९॥
तत्र द्विमासानशितौ परेद्युरुपागतौ द्वौ नभसा महर्षी ।
रघूद्वहाभ्यां नतयोरदत्त **सीता** तयोः प्रासुकवस्तुभिक्षाम् ॥४०॥
गन्धाम्बुवर्षं विदधुस्तदानीं तस्मिन् सुरा दुन्दुभिनाद्पूर्वम् ।
तद्गन्धतोऽभ्येत्य मुनी ननाम रोगी खगो गृध्र इति प्रसन्नः ॥४१॥
तयोः पदस्पर्श वशादरोगो सुवर्णपक्षश्च सुचारुचञ्चुः ।
रत्नाङ्कुरच्छायजटाभिरासीत् ततः प्रसिद्धः । स **जटायु**नाम्ना ॥४२॥
रामोऽब्रवीत् तौ यतिनौ प्रतीदं क्रव्यादयं दुष्टमतिश्च पक्षी ।
पूज्यौ ! भवत्पादसमीपवर्ती स्थित्वा कथं शान्ति इवाजनिष्ट ? ॥४३॥
तौ शंसतः स्माजनि **कुम्भकारकृता**ख्यमस्मिन् नगरं गरीयः ।
तत्राभवद् **दण्डक**नामधेयो राजा द्विषद्दण्डनचण्डशक्तिः ॥४४॥
तन्मन्त्रिणा **पालक**सञ्ज्ञितेन मिथ्याद्दशैतन्मतमाप्य दभ्मात् ।
निपीलितः **स्कन्दक**सूरिरासीद् निदानतो **वह्निकुमार**देवः ॥४५॥
भ्रान्त्वा भवं **दण्डक**भूपतिस्तु वनेऽत्र पक्षी समभूदयं सः ।
कुष्ठी परं पूर्वविर्कमणाऽस्मानालोक्य जातिस्मरणादिहागात् ॥४७॥

अस्मत्पदस्पर्शवशादभूच्च संप्रत्ययं रोगविमुक्तदेहः ।
श्रुत्वेति पक्ष्यप्यजनिष्ट सोऽर्हद्धर्मैकतानः करुणाप्रधानः ॥४८॥
अशंसतां चाथ तयोर्महर्षी साधर्मिकोऽयं युवयोः पतत्री ।
तं **राघवौ** बन्धुपदेऽनयेतां यथागतं चापि गतौ मुनिं तौ ॥४९॥
सीतान्वितौ **दाशरथी जटायु**निषेवितौ **पञ्चवटीं** प्रयान्तौ ।
कृताश्रयौ तत्र लतागृहेषु स्थितौ मृगेन्द्राविव दुष्प्रधर्षौ ॥५०॥
§§ अथैकदा **दाशरथिः** कनिष्ठः क्रीडंस्तटे क्रौञ्चरवात् तटिन्याः ।
ययौ ददर्शात्र च वंशजालीमालीनमस्यां च कृपाणमेकम् ॥५१॥
साश्चर्यमादाय तमाशु कोशादाकृष्य वेणीमिव कालरात्रिम् ।
विधूय चानेन स वंशजालीं मृणालमालामिव तं लुलाव ॥५२॥
ददर्श तस्यामथ धूपकुण्डं मुण्डं च तत्र स्फुरदोष्ठमेकम् ।
तदा कबन्धं स्रवदस्रमेष वंशान्तरे वल्गुलिकासनस्थम् ॥५३॥
अचिन्तयश्चैष विषण्णचेता मया हतो हा हतकेन कश्चित् ।
पुमानशस्त्रोऽमयुध्यमानः संसाधयन् किञ्चिदवाग् मुधापि ॥५४॥
स्वं शोचयित्वेति चिराय गत्वा **रामा**य सर्वं तदशंसताऽयम् ।
संदर्शयामास च मण्डलाग्रं निर्वर्ण्य तं चेदमुवाच **रामः** ॥५५॥
वत्सैष भासा कृतसूर्यहासः खड्गोऽभिधानेन च **सूर्यहासः** ।
त्वया हतो यः स तु साधकोऽस्य संभाव्यते वोत्तरसाधकोऽपि ॥५६॥
अत्रान्तरे **चन्द्रणखे**ति कान्ता **पाताललङ्का**धिपतेः **खर**स्य ।
स्वसा च **लङ्का**धिपतेरियाय द्रष्टुं स्वपुत्रं किल **दण्डका**याम् ॥५७॥
सा छिन्नवंशेषु शिरः स्वसूनोर्लुठद् विलोक्यातिशुचा व्यलापीत् ।
हा वत्स ! मातुः कथय स्वकायाः **सम्बूक सम्बूक** ! हतोऽसि केन ? ॥५८॥
दृष्ट्वा ततः पादलिपिं **सुमित्रा**सूनोरनूनोत्तमलक्षणां सा ।
ययौ पथा तेन ददर्श चाग्रे **सीता**न्वितौ **दाशरथी** मनोज्ञौ ॥५९॥

विलोक्य **रामं** त्रिदशाभिरामं सा विस्मृतस्वाङ्गजमृत्युशोका ।
समेत्य कन्याकृतिरात्मपाणिग्रहं ययाचे ग्रहिला स्मरेण ॥६०॥

रामेण साऽवादि ममास्ति भार्या निर्भार्यमङ्गीकुरु मे कनिष्ठम् ।
सौमित्रिरप्येतदवोचदेनामार्याश्रयाद् मे भवसि त्वमार्या ॥६१॥

ततोऽर्थनाखण्डनतः स्वपुत्रवधाच्च जातद्विगुणप्रकोपा । 5
ताभ्यां कृतं सा तरसा व्रजित्वा **खराय सम्बूक**वधं शशंस ॥६२॥

ततः सहस्राणि चतुर्दशैष रक्षोभटानुद्भटबाहुवीर्यान् ।
आदाय हन्तुं **रघु**नन्दनौ तौ क्रुधा **खरः** प्राप खरस्तदेव ॥६३॥

किं योत्स्यते सत्यपि मय्यमीभिरार्यः प्रबन्धोऽपि मया कृतोऽयम् ।
इति प्रणम्यार्थयति स्म रामं **सौमित्रि**रेतान् कुतुकेन हन्तुम् ॥६४॥ 10

रामोऽभ्यधाद् वत्स ! रणाय गच्छ यदा तु ते सङ्कटमेति किञ्चित् ।
तदा त्वमक्षेपकृतेन सिंहनादेन मां ज्ञापयितुं यतेथाः ॥६५॥

आदाय साक्षादिति **राम**शिक्षां गत्वा च **सौमित्रि**रमूनमित्रान् ।
प्रावर्ततााहीनिव हन्तुभेकोऽप्येतान् गरुत्मानिव चापचञ्चुः ॥६६॥

प्रवर्तमाने च रणे तमेक्ष्य तथा प्रवृतं त्वरया त्रिकूटे । 15
गत्वा स्वयं **चन्द्रणखा दशास्यं** विश्वत्रयीकन्दकमित्युवाच ॥६७॥

देवागतौ सम्प्रति **दण्डका**यां वीरावुभौ **दाशरथी** मदोग्रौ ।
सखित्वहेतोरिव तावकीनं यमाय यामेयमिमावदत्ताम् ॥६८॥

श्रुत्वेति कोपात् तव यामिभर्ता **सौमित्रि**णाऽऽस्ते सह युध्यमानः ।
स्वभ्रातृवीर्याद् निजवीर्यतश्च **राम**स्तु वेलन् सह **सीतया**ऽस्ति ॥६९॥ 20

भ्रातर्जितं किं भवताऽत्र विश्वदासीकरौ **दाशरथी** यदि स्तः ।
राज्येन किं ते वद यन्न **सीता** स्त्रीरत्नमास्ते भुवनाभिरामम् ? ॥७०॥

श्रुत्वेति **लङ्का**धिपतिर्विशङ्को वेगाद् निजं **पुष्पक**मादिदेश ।
विमानराजं त्वरितं प्रयाहि तत्राद्य यत्रास्ति **विदेहपुत्री** ॥७१॥

इत्युक्तमात्रोऽप्यतिमात्रवेगाद् **दशास्य**चेतः समसीर्षयेव ।
अमानशक्तिः स विमानराजः **सीतो**पकण्ठं गत एव हृष्टः ॥७२॥

दृष्ट्वापि **सीता**ममरीभिवाग्रेऽशकद् न हर्तुं **दशकन्धर**ोऽपि ।
तस्थौ च दूरे **रघु**वंशकेतोर्बिभ्यद् हुताशादिव चित्रकायः ॥७३॥

सीतां स्वयं हर्तुमथाबलोऽनुसस्मार विद्यामवलोकिनीं सः ।
तत्कालमेवोपगता **दशास्यं** सोचे प्रभो ! मां दिश किं करोमि ? ॥७४॥

अथादिशत् तां मुदितो **दशास्यः** सदाप्यमोघाऽस्यवलोकिनि ! त्वम् ।
हरिष्यतो **दाशरथेः** कलत्रं ममाद्य साहाय्यमुरीकुरुष्व ॥७५॥

सा सङ्कुचन्ती प्रभुशङ्कयाऽऽह स्वामिन् ! महाहेरपि मौलिरत्नम् ।
तवाज्ञयाऽऽहृत्य समानयामि **सीतां** तु नो **राम**समीपतोऽहम् ॥७६॥

किन्त्वस्त्युपायो ननु येन यायादयं **सुमित्रा**तनयं प्रवीरः ।
तस्यैव सिंहध्वनिना तयोः श्रीनिकेतसङ्केतवचो यदेतत् ॥७७॥

एवं विधेहीति **दशानन**स्य निदेशतः साऽकृत सिंहनादम् ।
श्रुत्वा च तं **दाशरथि**ः सशङ्कमनङ्कदोःशक्तिरदो व्यमृक्षत् ॥७८॥

ममानुजोऽयं जगदेकवीरः प्राप्येत केनापि पराभवं न ।
आकर्ण्यते किन्तु पराभवाप्तिसङ्केतसिंहध्वनिराः किमेतत् ? ॥७९॥

इत्थं वितर्कान् विततान **रामो** यावज्जवात् तावदवाप्तकम्पा ।
अतुल्यवात्सल्यवती **सुमित्रा**पुत्रे तदा तं निजगाद **सीता** ॥८०॥

इत्यादि**सीता**वचनेन सिंहनादेन चापि त्वरितं प्रणुन्नः ।
अमन्यमानोऽशकुनानपि ज्यामारोपयन् धन्वनि **राघवो**ऽगात् ॥८२॥

अभ्रादथोत्तीर्य**दशानन**ोऽपि व्यग्राशयां **लक्ष्मण**सङ्कटात्त्यां ।
विमानमारोपयितुं रटन्तीं **सीता**मतीवारभतोपगृह्य ॥८३॥

अत्रान्तरेऽस्या रुदितोपहूतः साट्टोपमभ्येत्य पुरो **जटायुः** ।
प्रोवाच **सीता**महमागतोऽस्मि प्रतिव्रते ! मा स्म भयं दधीथाः ॥८४॥

साक्षेपमूचे च **दशाननं** स रे रे क्व दारान् **रघु**नन्दनस्य ।
हरस्यहं ते पुरतो **जटायु**रायुर्विकर्षामि नखाङ्कुटीभिः ॥८५॥

इत्थं वदन्नुन्मदपक्षघातैरमुं चपेटाभिरिवाजघान ।
वक्षोऽस्य चञ्चूनखरैर्व्यलेखीत् क्षेत्रं हलाग्रैरिव पक्षिवीरः ॥८६॥

क्रुद्धोऽथ **लङ्का**धिपतिस्तमुग्रकृपाणघाताद् भुवि पातयित्वा । 5
सीतामथारोप्य विमानमुच्चैश्चचाल पूर्णाश इवाम्बरेण ॥८७॥

श्येनेन चिल्लीव **दशानने**न सा नीयमाना विललाप **सीता** ।
भामण्डलं भ्रातरहं क्व नीये हा **राम** ! हा देवर ! तात ! मातः ! ॥८८॥

श्रुत्वेति **सीता**रुदितं द्युमार्गे **भामण्डल**स्याथ पदातिरेकः ।
उपागतो योद्धुमखेचरत्वं नीतो **दशास्ये**न पपात भूमौ ॥८९॥ 10

गच्छन् समुद्रोपरिवर्त्मनाऽथ **दशाननः** सान्त्वयति स्म **सीता**म् ।
विश्वैकभर्तुर्महिषीपदं मे प्राप्तासि किं रोदिषि देवि ! **सीते** ! ॥९०॥

त्वां योजयन् देवि ! वनेचरेण चक्रे विधाता खलु नानुरूपम् ।
तन्न्यूनमुन्मूलितमद्य तस्य मया तु दासीभवता भवत्याः ॥९१॥

मन्यस्व तद् मां दयितं मृगाक्षि ! कुरुष्व दासं निजसंनिभं च । 15
इत्थं कृतेऽन्ये पतयस्त्रिलोक्या दासानुदासास्तव वासवाद्याः ॥९२॥

चटु ब्रुवाणे पटु**रावणे**ऽदः **सीता** स्थिता द्वैधमवाङ्मुखी सा ।
श्रीराम ! **रामे**ति हृदि स्मरन्ती पञ्चाक्षरीमन्त्रमरीणशीला ॥९३॥

चाटूनि तन्वन् मदनातुरोऽस्या मुहु**र्दशास्यः** क्रमयोः पपात ।
सा तु स्वपादौ परतश्चकार **सीता**ऽन्यपुंस्पर्शभयेन भूम्ना ॥९४॥ 20

अत्यर्थमभ्यर्थनयाऽस्य दूना **सीता** शशापेति **पुलस्त्य**पुत्रम् ।
निर्लज्ज ! मृत्युं लघु लप्स्यसे त्वं फलं परस्त्रीजनकामनायाः ॥९५॥

असावमात्यैरथ सारणाद्यैरनेकशो राक्षसराजलोकैः ।
अभ्यागतैः सार्धमतीव हृष्टः पुरीमकीर्तिं च परां प्रविष्टः ॥९६॥

श्रीरामचन्द्रस्य सलक्ष्मणस्य लप्स्ये न यावत्कुशलप्रवृत्तिम् ।
तावद् न भोक्ष्ये शुचिशीलगीता सीताऽग्रहीदेवभिग्रहं सा ॥९७॥

लङ्कानगर्युपवने दशकन्धरोऽथाह्वानेन देवरमणे रमणीयभासि ।
गुप्तां सदा त्रिजटयाऽपि च यामिकैस्तां सीतामशोकतरुखण्डतले मुमोच
॥९८॥

॥ इति सीताचरितनाम्नि महाकाव्ये रामप्रवास-सीतापहारवर्णनो नाम द्वितीयः सर्गः ॥

● ● ●

दृष्ट्वेतश्च सुमित्रापुत्रो रामं जगाद संभ्रान्तः ।
आर्य ! किमार्यामेकाकिनीं विहाय त्वमप्यागाः ? ॥१॥

रामोऽभ्यधत्त भवतः श्रुत्वाक्ष्वेडामिहाहमायातः ।
सोमित्रिराह न मम क्ष्वेडा, केनापि वञ्चितोऽसि त्वम् ॥२॥

आर्यामपहर्तुमार्यामुपायतस्त्वमसि नूनमपनीतः ।
सिंहध्वनितविधाने शङ्के स्तोकं न कारणं किमपि ॥३॥

तद् व्यावृत्त्य जवेन त्रायस्वार्यां व्रजार्य ! निजमुटजम् ।
अहमपि निहत्य रिपुकुलमायातः पृष्ठतो भवतः ॥४॥

सैमित्रिणेति गदितो रामः स्वस्थानमागतः सपदि ।
तत्रादृष्ट्वा सीतां क्षितिपीठे मूर्च्छितः पतितः ॥५॥

पवनेन लब्धसञ्ज्ञः पश्यंश्चेतस्ततः प्रियां मोहात् ।
दृष्ट्वा जटायुमसिहतमिति रामश्चिन्तयामास ॥६॥

केनापि कपटपटुना जह्रे जानामि जानकी सा मे ।
तेनैवैष महात्मा निषूदितस्तदापहृतिकुपितः ॥७॥

परमार्हतोऽस्य रामः प्रत्युपकृतये ददौ नमस्कारम् ।
मृत्वा जटायुरपि स त्रिदशो माहेन्द्रकल्पेऽभूत् ॥८॥

रामस्तु दण्डकाया गिरितरुटिनीनिकुञ्जपुञ्जेषु ।
दर्शं दर्शमपश्यन् सीतां निपपात मूर्च्छितो भूयः ॥९॥

अत्रान्तरे सुमित्रासूनुः संहृत्य रिपुबलं सकलम् ।
रामवाप विराधेनानुगतः पौरुषेणेव ॥१०॥

दृष्ट्वा मूर्च्छितमग्रे **रामं सौमित्रि**राकुलीभूतः ।
सिञ्चन्नश्रुजलैस्तलनीलदलैर्वीजयामास ॥११॥

मूर्च्छान्तेऽथ **सुमित्रा**तनयमपश्यन् पुरःस्थमपि **रामः** ।
सीतावियोगखेदग्रहिलोऽवददन्तरिक्षेऽदः ॥ १२॥

भ्रान्तं वनमिदमखिलं तथापि दृष्टा न **जानकी** मयका । 5
सा दृष्टा युष्माभिः किमिति नहि ब्रूथ वनदेव्यः ! ? ॥१३॥

विपिने श्वापदरक्षोयक्षोरगभूतभीषणेऽमुष्मिन् ।
एकाकिनीं विहाय प्रियामहं **लक्ष्मणा**याऽगाम् ॥१४॥

रक्षःसहस्रघोरे संयत्येकं च **लक्ष्मणं** मुक्त्वा ।
भूयोऽप्यहमत्रागां धिग् धिक् कुधियो धियं तद् मे ॥१५॥ 10

हा ! **वैदेहि** ! मयाऽस्मिन् कान्ते ! कथमुज्झिताऽसि कान्तारे ? ।
हा वत्स ! **लक्ष्मण** ! कथं मुक्तोऽसि च सङ्कटे द्विषताम् ? ॥१६॥

एवं विलपन् **रामो** न्यपतत् पुनरपि मूर्च्छितो भूमौ ।
क्रन्दद्भिः करुणतरं पक्षिभिरपि वीक्ष्यमाणोऽयम् ॥१७॥

सौमित्रिरपि गद्गदमवोचदार्यार्य ! कथय ननु किमिदम् ? । 15
भ्रातास्मि **लक्ष्मण**स्ते जित्वाऽरीनागतः पुरतः ॥१८॥

सुधयेव तेन वचसा सिक्तः संजातचेतनो **रामः** ।
दृष्ट्वाऽग्रे निजमनुजं सहर्ष बाष्पः समालिङ्गत् ॥१९॥

सौमित्रिरपि सबाष्पं जगाद कस्यापि मायिनो नियतम् ।
ननु सिंहनादकारणमिह **सीता**हरणमिदमजनि ॥२०॥ 20

तस्य प्राणैः सममहभिहाहरिष्यामि **जानकी**मधुना ।
तत्प्रवृत्त्युपलम्भास्म्भाय यतावहे तावत् ॥२१॥

एष **विराधः** प्रणमत्यार्यप्रदान् राज्यमवटलङ्कायाम् ।
पैत्र्यममुष्य निवेश्यस्तत्र मयाऽङ्गीकृतं यस्मात् ॥२२॥

सौमित्रिणेति **रामो** विज्ञप्तस्तूर्णम**वटलङ्का**याम् ।
गत्वा **विराध**मेनं न्यवेशयत् पैतृके राज्ये ॥२३॥

सुन्दः खरस्य सूनु**श्चन्द्रणखा** चाप्य**वटलङ्का**यां ।
नंष्ट्वा **राम**भयेनागमत् तदा **रावणं** शरणम् ॥२४॥

किष्किन्धायां दुर्धरशक्त्यभिरामः परेद्युरथ **रामः** ।
विट**सुग्रीवं** हत्वा **सुग्रीवं** स्थापयामास ॥२५॥

अष्टादशाथ कन्या धन्या रूपेण दातुमात्मीयाः ।
सुग्रीवः कपिनाथो **दाशरथिं** प्रार्थयामास ॥२६॥

स्मित्वा जगाद **रामः** सखे ! तवेच्छामि सत्कृतिं नान्याम् ।
सीताप्रवृत्तिमेकामानेतुं सम्प्रति यतस्व ॥२७॥

इति **राम**ेण **कपीन्द्रः** स्वयमादिष्टः स्वसैन्यकपिवीरान् ।
सीताप्रवृत्तिहेतोर्दिशि दिशि गणशः प्रवर्तयामास ॥२८॥

दाशरथेरिव मूर्ता मनोरथाः सर्वतोऽपि ते कपयः ।
नगनगरविपिनवार्धिषु पश्यन्तो **जानकीं** चेरुः ॥२९॥

सुग्रीवः स्वयमगमत् **कम्बु**द्वीपं दिशैकया गच्छन् ।
रत्नजटी विद्याभृद् भूपतिना तेन दृष्टोऽत्र ॥३०॥

सुग्रीवस्तमपृच्छद् विद्याभृत् त्वमसि **रत्नजटि**नामा ।
तद् व्योमयानविषयेऽलस इव किमु दृश्यते कथय ? ॥३१॥

सोऽभाषिष्ट समस्ता विद्या मे संहृता **दशास्ये**न ।
समुदस्थायिषि यदहं **सीतां** हरतोऽस्य युद्धाय ॥३२॥

कपिकेतुनाऽथ नीतो **रत्नजटी रामभद्र**पादान्ते ।
विज्ञापति इति चैष व्यजिज्ञपज्**जानकी**शुद्धिम् ॥३३॥

हा **राम** ! **राम** ! **लक्ष्मण** ! **भामण्डल** ! **जनक** ! तात ! हा मातः ! ।
इति विलपन्तीं देवीमहरद् **दशकन्धरः** स्वामिन् ! ॥३४॥

सीतोदन्तमिमं तं **दाशरथिः** समधिगम्य मुदितोऽस्मात् ।
तं **रत्नजटिन**मुच्चैर्भूयो भूयः समालिङ्गत् ॥३५॥

भूयो भूयः **सीतो**दन्तः पप्रच्छ **राघवो** जटिनम् ।
सोऽपि तत्प्रीतिहेतोर्भूयो भूयस्तमाचख्यौ ॥३६॥

सौत्सुक्यं **दाशरथिः सुग्रीवा**दीनथेति पप्रच्छ । 5
दूरे कियतीतः सा कथयत रक्षःपुरी **लङ्का** ? ॥३७॥

तेऽप्यूचुः किं नु तया पुर्या दूरस्थया निकटयापि ।
सर्वे तृणवट् यद्वयमिह विश्वजितो **दशमुख**स्य ॥३८॥

रामोऽभ्यधत्त कृतमिह जेयाजेयत्वचिन्तया तस्य ।
दर्शयत कवलं तं **सौमित्र**र्ज्ञास्यते पश्चात् ॥३९॥ 10

सौमित्रिराह कः किल स **रावणः** पौरुषं क्वचन तस्य ।
कान्दविकशुनक इव यश्छलेन पापी चकारैवम् ॥४०॥

क्षत्राचारेणाहं तस्य शिरः समिति पातष्यामि ।
सभ्यीभूय भवद्भी रणनाटकमीक्षणीयं तु ॥४१॥

अथ **जाम्बवा**नवोचद् भवत्सु हन्तोपयुज्यते सर्वम् । 15
किन्तु **दशवदन**कदनः स यः करे करति **कोटिशिलाम्** ॥४२॥

अस्तेवमिति वदन्तं निन्युः कपयोऽथ **लक्ष्मणं** तत्र ।
यत्रास्ते **कोटिशिलो**दपाटि चानेन सा तरसा ॥४३॥

आशासन्तो देवाः **सौमित्रिं** विचिकिरुस्तदा कुसुमैः ।
कपयः पुनरानिन्युः संजातप्रत्ययाः स्वपुरीम् ॥४४॥ 20

कपिवृद्धा जगदुरिदं युष्मत्तो **रावण**स्य खलु मरणम् ।
दूतः प्रेष्यस्त्वादौ द्विषत्सु महतामियं नीतिः ॥४५॥

संदेशहारकैरपि सिध्यति यदि कार्यमहितमभि विहितैः ।
उद्योगेन तदानीमुद्वेगो भूभुजां क इव ? ॥४६॥

तद् दूतोऽद्भूतवचनः प्रस्थाप्यस्तत्र कश्चन समर्थः ।
सा दुष्प्रवेशविगमा **लङ्का** हि श्रूयते विहिता ॥४७॥

दूतेन कार्यसिद्ध्यै गत्वा वाच्यो **बिभीषण**स्तत्र ।
कोणपकुले किलास्मिन् निखिलेऽपि स नीतिमानेकः ॥४८॥

लघु मोचयितुं **सीतां** बोधयिता रहसि **रावणं** सोऽपि ।
तेनावज्ञातोऽयं देव ! त्वां नियतमभिसर्ता ॥४९॥

रामेणानुमतेऽस्मिंस्तेषां मन्त्रेऽथ **कपिमहीनाथः** ।
प्रेष्यादित्यपुरे श्रीभूतिं **हनुमन्त**माह्वास्त ॥५०॥

रामं लक्ष्मणकपिपतिभामण्डलमुख्यपरिवृतं सदसि ।
हनुमानुपेत्य भानुप्रतिमरुचिः प्रणमति स्माथ ॥५१॥

देवाय**माञ्जनेयः पवनञ्जय**सूनुरतुलबलकलितः ।
विधुरे परमो बन्धुर्विनयी मम जीवितं राज्ये ॥५२॥

अपरोऽस्य नास्ति तुल्यस्तदमुं **सीता**प्रवृत्तिलाभार्थम् ।
प्रहिणु स्वामिन्निति च प्रोवाच **कपीश्वरो रामम्** ॥५३॥ युगमम् ॥

रामोऽभ्यधत्त **हनुमन्** ! सम्प्रत्यप्रतिम ! याहि **लङ्का**याम् ।
सीतां गवेषयेरिह मदूर्मिकामर्पयेस्तस्यै ॥५४॥

तच्चूडारत्नभिज्ञानं प्रत्यानयेः पुनश्चात्र ।
मद्वाचिकमपि चैतज्**जनकभुवे** सन्दिशेस्तस्यै ॥५५॥

देवि ! त्वया वियुक्तो ध्यायंस्त्वामेव वर्तते **रामः** ।
सुभगां त्वदधिष्ठानादुत्पश्यन् नैर्ऋतीं च दिशम् ॥४६॥

मद्विरहकातरा त्वं प्राणान् । प्राणेशि मा ! परित्याक्षीः ।
सौमित्रिनिहतं त्वं द्रक्ष्यसि रक्षःपतिं सपदि ॥५७॥

हनुमानपीदमूचे स्वामिन्नाज्ञां विधाय ते यावत् ।
एमि **त्रिकुटपुर्या**स्तिष्ठेस्तावत् त्वमत्रैव ॥५८॥

इत्युक्त्वा नत्वापि च **रामं** सद्यो विमानमधिरुह्य ।
लङ्कां गतो **हनूमान्** प्रविवेश **बिभीषणा**वासे ॥५९॥
सत्कृत्यागमकारणमपृच्छ्यताभी**र्बिभीषणे**नायम् ।
हनुमानिति च बभाषे स्मितपुष्पाभ्यर्चितां वाचाम् ॥६०॥
दशवदनस्य यदि त्वं भ्रातेच्छसि चास्य यदि शुभोदर्कम् । 5
तत् पत्नीं **दाशरथे**रेतस्माद् मोचयापहृताम् ॥६१॥
त्वद्भ्रातुर्बलिनोऽपि हि नूनं काराधृतान्तकस्यापि ।
रघुपुत्रपत्नीहरणं मरणं **दशमस्तक**स्यापि ॥६२॥
दशवदनबन्धुरूचे **हनुमन्** ! ननु साधु भाषितं भवता ।
सीतां मोचयितुं स्वाग्रजोऽयमग्रे मयाभिहितः ॥६३॥ 10
भूयोऽपि सनिर्बन्धं निजबन्धुं नियतमर्पयिष्यामि ।
सीतां मुञ्चति यदि पुनधुनापि गतं न नः किमपि ॥६४॥
श्रुत्वेति **पावनञ्जयि**रुत्पत्य जगाम **देवरमण**वने ।
तत्राशोकानोकहस्तले स **सीता**मलोकत च ॥६५॥
रुदतीं वामकरस्थं लम्बालकपिहितमाननं दधतीम् । 15
निःश्वासान् मुञ्चन्तीं विरहकृशां मलिनतरवसनाम् ॥६६॥
निरपेक्षां देहेऽपि ध्यायन्तीमपि च **राम रामे**ति ।
निष्कम्पां परमवलयं पश्यन्तीं योगिनीमिव ताम् ॥६७॥ विशेषकम् ॥
दध्यौ चैवं **हनुमानये** ! पुरस्ताद् महासती **सीता** ।
अस्या दर्शनमात्रात् पावित्र्यं कस्य नो भवति ? ॥६८॥ 20
अस्या वियोगविधुरः स्थानेऽन्वहमेव खिद्यते **रामः** ।
ईदृक् कस्य कलत्रं सुरूपमनुरूपशीलगुणम् ? ॥६९॥
लङ्केश्वरो वराकः स्फुटमिह निपतिष्यते द्विधाप्येषः ।
रामप्रतापमहसा स्वपापलीलायितेनापि ॥७०॥

विद्यातिरोहितवपुः **सीतोत्सङ्गेऽथ** मुद्रिकां **हनुमान्** ।
मुमुचे तां दृष्ट्वा साऽस्नपयत् प्रमदाश्रुतोयेन ॥७१॥
अपि तां जगाद ननु सखि ! मुद्रे ! कुशली स**लक्ष्मणो रामः** ? ।
आविर्भूय **हनूमानू**चे मातस्तदस्ति यद् वदसि ॥७२॥
आदिष्टः प्रभुणाहं **रामेण** तव प्रवृत्तिमधिगन्तुम् ।
तत्र गते मयि देवः समेष्यतीह च्छिदे द्विषतः ॥७३॥
रोमाञ्चिता सबाष्पा **सीता** निजगाद वत्स ! कोऽसि त्वम् ? ।
पारावारमपारं लङ्घितवानसि च कथय कथम् ? ॥७४॥
कश्चित् प्राणहितो मे प्राणिति वत्सेन **लक्ष्मणे**न सह ।
दृष्टस्त्वया च कुत्र स्थाने कालं च नयति कथम् ? ॥७५॥
हनुमानथाह **पवनञ्जनयो**रहमस्मि नन्दनो देवि ? ।
कपिखेचरविद्याऽम्बुधिमलङ्घयं गगनयानेन ॥७६॥
सुग्रीवं तदरिवधात् पत्तीकृत्यात्मनोऽधि**किष्किन्धम्** ।
तव विरहधाम **रामः** स**लक्ष्मणो**ऽस्त्येव कुशलेन ॥७७॥
विद्याधरै**र्महेन्द्र**प्रमुखैः सममेत्य तावको भ्राता ।
भामण्डलोऽपि तद्वद् दुःखी तमुपासमानोऽस्ति ॥७८॥
रामेण प्रहितोऽहं **कपिपतिसुग्रीव**दर्शितो देवि ! ।
त्वत्प्रत्ययाय मुद्रां समर्प्य शुद्धिं तवानेतुम् ॥७९॥
त्वत्तश्चूडारत्नं त्वानायितमस्ति देवि ! देवेन ।
मामत्र समायातं प्रत्येष्यति तेन येनायम् ॥८०॥
सकरुणावात्सल्यं सा जगाद चूडामणिं ममादाय ।
व्रज वत्स ! तूर्णमत्र स्थितस्य कश्चित् तवानर्थः ॥८१॥
मा शङ्किष्ठा मातस्त्वं मयि वात्सल्यकातराऽनर्थम् ।
अस्येह **राम-लक्ष्मण**पत्तित्वं दर्शयिष्यामि ॥८२॥

इत्युक्त्वा नत्वापि च **हनुमान्** भङ्क्त्वा वनं च तदशेषम् ।
रक्षांस्यक्षादीनि प्रहृत्य लङ्कागृहाणि विनिपात्य ॥८३॥
निर्धूय चात्मबन्धान् दशवदनकिरीटकुट्टनं कृत्वा ।
रामं समेत्य **सीता**चूडामणिमार्पयत् तस्मै ॥८४॥ विशेषकम् ॥
सीताचूडारत्नं **सीता**मिव तत्त्वतः समायातम् ।
रामो न्यधत्त वक्षसि भूयो भूयस्तदस्प्राक्षीत् ॥८५॥
आलिङ्ग्य **दाशरथि**ना पृष्टः **सीता**वृत्तिमथ **हनुमान्** ।
तस्मै शशंस निखिलां **दशवदन**विमाननां चापि ॥८६॥
प्रीतोऽथ **रामभद्रः सुग्रीवा**द्यैरनुद्रुतः सपदि ।
लङ्कामभि निःशङ्काशयोऽचलद् व्योमयानेन ॥८७॥
भामण्डलनीलाङ्गदपवनविराधजाम्बवन्मुख्याः ।
विद्याधराः स्वसैन्यैः समन्विता **राम**मनुचेरुः ॥८८॥
नानायानविमानैर्यात्रातूर्यस्वनैस्तदद्वैतम् ।
रचयन्ती **राम**चमूर्नभसाऽगाद् वारिधेरुपरि ॥८९॥
अधिजलधि वेलन्धर**वेलन्धर**नगरनायकौ तत्र ।
नाम्ना **समुद्रसेतू नलनीला**भ्यां समितिबद्धौ ॥९०॥
सेवापतितावेतौ **रामः** पुनरेव विनिवेश्यं ।
गत्वा **सुवेल**मजयद् नृपं **सुवेला**द्रिशिरसि गतम् ॥९१॥
उपल**ङ्कम**नङ्कौजा **हंसद्वी**पेऽथ **हंसरथ**नृपतिम् ।
जित्वा तत्रैवास्थाद् **दाशरथि**र्मोचितावासः ॥९२॥
रामोद्दीपिततेजःकाष्ठाकीर्णत्रिकूटचुल्लीस्था ।
लङ्कास्थाली कलकलमचकलदथ जातुधानाद्याः ॥९३॥
समनीनहंस्तथोच्चैः सामन्ता **रावण**स्य रणकरणे ।
हस्तप्रहस्तसारणमारीचमयादयो गणशः ॥९४॥

अत्रान्तरे **दशास्यं** नत्वा प्रोचे **बिभीषणः** सदसि ।
देव ! प्रसीद विमृश क्षणमिति वचनं शुभोदर्कम् ॥९५॥

लोकद्वितयविरुद्धं परदारापहरणं यदविमृश्य ।
चक्रे पूर्वं भवता कुलमखिलं लज्जितं तेन ॥९६॥

आदातुमात्मदयितामुप**लङ्क**मुपस्थितोऽद्य काकुत्स्थः ।
तत्कान्ताप्रत्यर्पणमातिथ्यं विधेहि तदमुष्मै ॥९७॥

नूनं ग्रहीष्यति निजां गृहिणीं त्वत्तोऽन्यथापि **काकुत्स्थः** ।
निग्रहीष्यति च कुलं ते सकलं सकलङ्क ! सह भवता ॥९८॥

दूरे स्तां **दाशरथी** त्रिशिरः**खरदूषणा**न्तकावेतौ ।
देवेन किं न **हनुमान्** दृष्टस्तत्पत्तिरेकोऽपि ? ॥९९॥

क्रुद्धो हितोपदेशाद् **दशानन**ोऽधावताथ तं हन्तुम् ।
सोऽप्युत्तस्थौ योद्धुं सदसः स्तम्भं समुत्पाट्य ॥१००॥

कुम्भकर्णेन्द्रजिद्भ्यां भूत्वा द्रुतमन्तरा तदानीं तौ ।
युद्धाद् निषिध्य नीतौ करिणाविव निजनिजं स्थानम् ॥१०१॥

मत्पुर्या निर्याहि स्वाश्रयघातिन्नरे कुलङ्गार ! ।
इत्थं **दशास्य**गदितो भेजेऽथ **बिभीषणो रामम्** ॥१०२॥

रिपुबन्धवेऽपि तस्मै **रामो**ऽनुसृताय विश्रुतविवेकः ।
लङ्काराज्यममन्यत **'सन्तो नतवत्सला यस्मात्'** ॥१०३॥

हंसद्वीपादुदचलदथ बलसन्दोहपूरितदिगन्तः ।
रामोऽकलङ्कजयनिधिरधि**लङ्क**मियाय चास्खलितः ॥१०४॥

दशकन्धरसेनान्यः शुकसारणसञ्ज्ञितास्तदा सर्वे ।
लङ्काया निःसृत्यायुध्यन्त मदोद्धुराः **कपि**भिः ॥१०५॥

कपिभिः क्ष्वेडापूरितककुब्भिरभितोऽपि युध्यमानैस्तैः ।
मृगयूथमिव मृगेन्द्रै रक्षोबलमखिलमक्षोभि ॥१०६॥

भग्नेऽरिभिः स्वसैन्ये सामर्षौ **दशमुख**स्य सेनान्यौ ।
हस्त-प्रहस्तसंज्ञौ **नल-नीला**भ्यामयुध्येताम् ॥१०७॥

कुन्ताकुन्ति गदागदि विधाय चिराममरवीक्षितं समरम् ।
हस्तो **नले**न निहतो **नीले**न पुनः प्रहस्तोऽथ ॥१०८॥

स्वयमथ चचाल योद्धुं संनद्धो **दशानना** बलसमुद्रः । 5
रणतूर्यनादतर्जितघनगर्जितभीषणः सपदि ॥१०९॥

रामोऽभ्यषेणयदमुं दुर्दमभुजदण्डचण्डिमारोपम् ।
निःस्वानशङ्खभेरीरवोपहूतारि**जय**लक्ष्मीः ॥११०॥

तुल्यं मिलितयोस्तयोरथो रणः सैन्ययोरभूदुभयोः ।
सभ्यीभूय त्रिदशैर्निरीक्ष्यमाणो द्युतलस्थैः ॥१११॥ 10

रामोऽथ **कुम्भकर्ण** **रावण**मथ **लक्ष्मणो नलः शम्भुम्** ।
कुम्भं च **पवनतनयः किष्किन्धेशः सुमाला**ख्यम् ॥११२॥

भामण्डलश्च **केतुं नीलः सिंहा**ख्यमङ्गदश्च **मयम्** ।
इत्यपरानप्यसुरान् **कपयो**ऽरौत्सुः परे परितः ॥११३॥

शस्त्रैरस्त्रैः सुचिरं योधं योधं भटाः प्रतिभटांस्तान् । 15
जीवग्राहं धृत्वा निन्यू **रामा**ज्ञया शिबिरम् ॥११४॥

दृष्ट्वा तद् **दशवदनः** क्रुद्धः शूलं **बिभीषणे**ऽमुञ्चत् ।
तत् कणशोऽकृत विशिखैः **सौमित्रि**स्त्वन्तरालेऽपि ॥११५॥

सौमित्रये दशास्यः शक्त्यस्त्रं प्रौढमत्सरो मुमुचे ।
तेनायमुरसि भिन्नश्छिन्नः शाखीव भुवि पतितः ॥११६॥ 20

सौमित्रौ शक्तिहते **रामा**नीकं सशोकमजनिष्ट ।
तदनीश इव विलोकितुमगमद् द्वीपान्तरं तरणिः ॥११७॥

जितकाशीव **दशास्यो** विवेश **लङ्कां** निशम्य **सीते**ति ।
वज्राहतेव मूर्च्छानिमीलिताक्षी पपातोर्व्याम् ॥११८॥

विद्याधरीभिरुदकैः सिक्ता संजातचेतनोत्थाय ।
रुदती विललापेत्थं **जनक**सुता कुट्टयन्ती स्वम् ॥११९॥

"हा वत्स ! विनयलक्षण ! **लक्ष्मण** ! मुक्त्वाग्रजं निजं क्वाऽगाः ? ।
त्वद्दते मुहूर्तमपि न प्राणानेष क्षमो धर्तुम् ॥१२०॥

अहमहह मन्दभाग्या यस्याः कार्येऽभिताम्यतोरधुना ।
देवेभ्योऽप्यतिवरयोः पतिदेवरयोर्दैवमापतितम् ॥१२१॥

पतिदेवरनिधनकरी जातैव किमस्मि दैव ! रे ! कथय ।
किं न मृता बाल्ये वा यद्वा किं न स्थलीभूता ?" ॥१२३॥

रुदतीमिति सुदतीं तां काचिद् विद्याधरीति निजगाद ।
अक्षतदेहः प्रातर्भविता तव देवरो देवि ! ॥१२४॥

स्वस्थावस्था साऽस्थात् **काकुत्स्थ**प्रेयसीतिवचनेन ।
ध्यायन्ती सूर्योदयामिष्टाप्त्यै चक्रवाकीव ॥१२५॥

सौमित्रिशक्तिभेदाद् बान्धववधाच्च हर्ष-शोकाभ्याम् ।
नक्तं नक्तंचरपतिक्रान्तमनाः समजनिष्ट ॥१२६॥

शक्त्याहते **सुमित्रा**पुत्रे **राम**ोऽप्यनाहतोऽमूर्च्छत् ।
सुग्रीवाद्युपचरितो मूर्च्छान्ते **लक्ष्मणं** च जगौ ॥१२७॥

तूष्णीं स्थितोऽसि किं त्वं प्रसीद वद वत्स ! बाधते किं ते ? ।
आख्याहि संज्ञयाभिप्राणय निजमग्रजं देव ! ॥१२८॥

एते त्वन्मुखवीक्षां **सुग्रीवा**द्या वितन्वते वत्स ! ।
तदमूननुगान् वचसा दृशापि किं नानुगृह्णासि ? ॥१२९॥

प्रतिपन्नमस्ति भवता **लङ्का**राज्यं **बिभीषणा**यास्मै ।
हा वत्स ! वद किमेवं तत् त्वं निश्चिन्त इव शेषे ? ॥१३०॥

हा वत्स ! गच्छ मा मामनुपालय तावदञ्जसा यावत् ।
हत्वा **दशास्य**मस्मै **लङ्का**राज्यं प्रयच्छामि ॥१३१॥

इत्युक्त्वाऽऽस्फाल्य धनुर्यावद् **रामो**ऽभि **रावणं** चलितः ।
तावद् **बिभीषणे**न प्रोचे नत्वा सबाष्पेन ॥१३२॥

संरम्भं त्यज नायक ! मा भज **सौमित्रि**शक्तिहतिखेदम् ।
शक्त्याहतोऽपि जीवति यावद् भानूदयं पुरुषः ॥१३३॥

तद् मन्त्रतन्त्रविधिना प्रतिकाराय प्रयत्यतां नाथ ! 5
यावद् विभावरीयं विगलत्याशेव नास्माकम् ॥१३४॥

रामेणामेत्युक्ते **सुग्रीवाद्या**स्तु **राघवो**परितः ।
संनद्धाः सप्त चमूवप्रांस्तेनुश्चतुर्द्वारान् ॥१३५॥

अत्रान्तरे समेत्य **प्रतिचन्द्रः** खेचरः समाचख्यौ ।
स्वयमनुभूतं निर्गममुच्चैः शक्ते**र्विशल्या**तः ॥१३६॥ 10

श्रुत्वेत्थं **राम**गिरा **भामण्डलहनुमदङ्गदाः** सपदि ।
गत्वाऽऽनिन्यु**र्दोण**क्षोणीधरतो **विशल्यां** ताम् ॥१३७॥

तस्याः स्नानजलौघैरुक्षणतस्तत्क्षणाज्ज्वलन्त्युच्चैः ।
शक्तिर्निरगाल्**लक्ष्मण**हृदयादुदगाच्च मार्तण्डः ॥१३८॥

मङ्गलतूर्यनिनादप्रमदः क्ष्वेडाकरम्बितः प्रातः । 15
समजायत **कपि**सैन्ये **रावण**वधनाट्यनान्दीव ॥१३९॥

इत्थं **राघव**कटके **पौलस्त्यः** प्रमदकलकलं श्रुत्वा ।
क्रुद्धो योद्धुमचालीदपशकुनैर्वार्यमाणोऽपि ॥१४०॥

भूयोऽपि **राम-रावण**बलयोरजनिष्ट समरसंरम्भः ।
उद्भटसुभटभुजाहतिरवचकितदिगन्तदन्तीन्द्रः ॥१४१॥

कुर्वन्तो जयकेलिं **कपि**वीराः समरकानेन तस्मिन् । 20
रक्षःशीर्षाण्युच्चैरपातयंस्तूलफलानीव ॥१४२॥

कृतोड्डीना ज्वालावती रजस्तमसि वैरिवदनाली ।
दीपालयपालिरिवाराजत **रामं** जयश्रियो द्रष्टुम् ॥१४३॥

उत्तिष्ठमानमग्रजमुग्रजवेनाहवाय **सौमित्रिः** ।
नत्वा निषिध्य युद्धश्रद्धालुः स्वयमथोत्तस्थे ॥१४४॥

शक्तिविगमादपीद्धं **सौमित्रेः** समितिशौर्यमालोक्य ।
सस्मार विजयरूपां बहुरूपां **रावणो** विद्याम् ॥१४५॥

स्मृतमात्रायां तस्यामुपस्थितायां निजानि रूपाणि ।
बहुधा विचकारायुधवन्ति **दशास्यो**ऽतिभीमानि ॥१४६॥

भूमौ नभसि पुरस्तात् पृष्ठे पार्श्वद्वयेऽपि **सौमित्रिः** ।
अदाक्षीत् **पौलस्त्या**नेवायुधवर्षिणो निबिडम् ॥१४७॥

एकोऽप्यनेक इव तांस्ताक्ष्यस्थो **लक्ष्मणः** शरैर्निशितैः ।
लघुसन्धानी दूरापातीव निपातयामास ॥१४८॥

सौमित्रिणा विधुरीकृतोऽथ **दशकन्धरो**ऽर्धचक्री सः ।
सस्मार चक्रमस्त्रं तच्चागात् तत्करे सपदि ॥१४६॥

भ्रमयित्वा शिरसि रुषाऽरुणेक्षणः पश्चिमाद्रिरिव भानुम् ।
पौलस्त्यस्तद् मुमुचे **लक्ष्मण**मभि पूवशलमिव ॥१५०॥

चक्रं परीय **लक्ष्मण**मस्य करे दक्षिणे समारोहत् ।
नारायणोऽयमष्टमहरिरित घुष्टं च दिवि देवैः ॥१५१॥

निहन्यतेऽसौ जगतां समक्षमक्षत्रकारी युधि जल्पतेति ।
तेनैव मूर्धा **दशकन्धर**स्य **सौमित्रिणा**ऽलूयत लीलयैव ॥१५२॥

हृष्यद्भिस्त्रिदशगणैः प्रसन्नवृष्टिः **सौमित्रेः** शिरसि तदा व्यधीयतोच्चैः ।
साऽऽयान्ती गगनतलादलिप्रणादैस्तद्दोष्णोरिव गुणगीतमाततान ॥१५३॥

॥ इति सीताचरितनाम्नि महाकाव्ये
रामसीताविप्रलम्भरावणवधवर्णनो नाम तृतीयः सर्गः ॥

● ● ●

§§ अतो **दाशरथी लङ्का**राज्ये न्यस्य **बिभीषण**म् ।
आत्मदर्शनसुप्रीतां कर्तुं **सीता**मगच्छताम् ॥१॥
सा **देवरमणो**द्याने **रामं** वीक्ष्य स**लक्ष्मण**म् ।
जुगोप लज्जितात्मानं तन्वी वेण्यातिरूक्षया ॥२॥
प्रीतिफुल्लतनोरस्या भिन्नकङ्कणकैतवात् ।
स्पर्धमानस्तदास्येन तदेन्दुः शटितोऽपतत् ॥३॥
इयं महासती **सीता** जयत्विति नभोऽङ्गणे ।
तदानीं सिद्धगन्धर्वाः स्फुरत्तोषमघोषयन् ॥४॥
लक्ष्मणोऽश्रुजलैः प्रीतमानसः क्षालयन्निव ।
सीतादेव्या नमश्चक्रे क्रमाभ्भोजद्वयीं तदा ॥५॥
चिरं जय चिरं जीव चिरं नन्द मदाशिषा ।
इति ब्रुवाणा **वैदेही** जघ्रौ शिरसि **लक्ष्मण**म् ॥६॥
भामण्डलो नमश्चक्रे **सीतां** सापि तमञ्जसा ।
आशिषा नन्दयामास महासाध्वीशिरोमणिः ॥७॥
स्वनामाख्यानपूर्वं च **लङ्केश्वर-कपीश्वरौ** ।
हनुमानङ्गदोऽन्येऽपि नेमु**र्जनक**नन्दिनीम् ॥८॥
पार्वणेन शशाङ्केन चिरात् कुमुदिनीव सा ।
रामेण जानकी रेजे विकस्वरमुखी तदा ॥९॥
धर्मार्थाविव सत्कीर्त्या **सीतया**ऽथ समन्वितौ ।
आरुह्य **पुष्पकं** प्रीतौ प्रतस्थाते **रघू**द्वहौ ॥१०॥
समदोद्ग्रीव**भामण्डल-बिभीषणैः** ।
अन्वीयमानौ नगरी**मयोध्या**मीयतुश्च तौ ॥११॥
अभ्येत्य **भरतः** प्रीतः सानुजोऽप्यतिरंहसा ।
ननाम **राम**मुद्दामभक्त्या स न्यस्तमस्तकः ॥१२॥

पादयोः पतितं **रामो भरतं** साश्रुलोचनम् ।
परिरेभे समुत्थाय मूर्ध्नि चुम्बन् मुहुर्मुहुः ॥१३॥
शत्रुघ्नमपि पादान्ते लुठन्तं **रघुपुङ्गवः** ।
उत्थाप्य परिमृज्य स्वांशुकेन परिषस्वजे ॥१४॥
ततो **भरत-शत्रुघ्नौ** नमन्तौ **लक्ष्मणो**ऽपि हि ।
प्रसारितभुजो गाढमालिलिङ्ग ससंभ्रमम् ॥१५॥
अथो **भरत-शत्रुघ्नौ** सास्रौ **सीतां** प्रणेमतुः ।
सापि तौ प्रीणयामास सर्वसंपज्जुषाशिषा ॥१६॥
तूर्येषु व्योम्नि भूमौ च वाद्यमानेषु भूरिशः ।
अयोध्यां राम-सौमित्री प्रीतौ प्राविशतामथ ॥१७॥
सोत्कण्ठमुन्मुखैः पौरैर्मयूरैर्मुदिराविव ।
वीक्ष्यमाणावनिमिषैः स्तूयमानौ च साश्रुभिः ॥१८॥
पौरीभिर्दीयमानार्घौ क्रियमाणनिरुञ्छनौ ।
स्वं प्रासादं प्रसन्नास्यौ जग्मतू **राम-लक्ष्मणौ** ॥१९॥
रामोऽपराजितां देवीं मातृवर्गमथापरम् ।
नमश्चक्रे स**सौमित्रि**स्ताभिराशीर्भिरैध्यत ॥२०॥
अथ **सीता** नता श्वश्रूजनायाश्रूणि मुञ्चते ।
तेनाभिनन्दिता वत्से ! भूया वीरप्रसूरिति ॥२१॥
सौमित्रेरर्धचक्रि त्वाभिषेकेऽथ कृते हली ।
रामो व्यसृजदात्मात्मदेशेभ्यः सुहृदो नृपान् ॥२२॥
सीतेकदा ऋतुस्नाता स्वप्ने दृष्टवती निशि ।
च्युतौ विमानाच्छरभौ प्रविशन्तौ निजानने ॥२३॥
रामोऽप्याख्यत् तयाऽऽख्याते वीरौ ते भाविनौ सुतौ ।
च्युतौ विमानाच्छरभौ यत्तु तद् न मुदे मम ॥२४॥

धर्मस्य ते च माहात्म्यात् सर्वं भावि शुभं प्रभो ! ।
इत्यूचे **जानकी** देवी तदा गर्भ बभार च ॥२५॥

सम्मेतशैलयात्रायै जातं दोहदमात्मनः ।
रामाय सा तदाचख्यौ सोऽपि तत्पूर्त्तिमिष्टवान् ॥२६॥

§§ अत्रान्तरे च **सीता**या दक्षिणं चक्षुरस्फुरत् । 5
आचचक्षे च सद्योऽपि साशङ्का **राघवा**य सा ॥२७॥

नेदं साध्विति **राम**ेणाख्याते **सीता**ऽब्रवीदिति ।
किं **रक्षोद्वीप**वासाद् मे संतुष्टोऽद्यापि नो विधिः ? ॥२८॥

त्वद्वियोगभवाद् दुःखाद् दुःखमद्यापि मेऽधिकम् ।
किमसौ दास्यति विधिर्निमित्तं नैतदन्यथा ॥२९॥ 10

रामोऽपि तामुवाचैवं देवि ! मा खेदमुद्वह ।
अवश्यमेव भोक्तव्ये कर्माधीने सुखासुखे ॥३०॥

तद् गच्छमन्दिरे स्वस्मिन् देवानामर्चनां कुरु ।
प्रयच्छ दानं पात्रेभ्यो धर्मः शरणमापदि ॥३१॥

सीतापि सदने गत्वा संयमेन महीयसा । 15
अर्हतोऽपूजयद् दानमवदातवती ददौ ॥३२॥

रघुनाथमथाजग्मू राजधानीमहत्तराः ।
यथाभूतपुरीवृत्तकीर्त्तनैकाधिकारिणः ॥३३॥

''नत्वा **राम**ाय ते तस्थुः कम्पमानाङ्गयष्टयः ।
न तद् विज्ञपयामासू **'राजतेजो हि दुस्सहम्'** ॥३४॥ 20

तानूचे **रामभद्रो**ऽपि भो भोः पुरमहत्तराः ! ।
अभयं वो ब्रुवाणानामेकान्तहितवादिनाम् ॥३५॥

तेष्वाद्यः सर्वसंवित्त्या **विजया**ख्यो महत्तरः ।
इति विज्ञपयामास सावष्टम्भः प्रभोर्गिरा ॥३६॥

स्वामिन्नवश्यविज्ञप्यं यदि विज्ञप्यते न हि ।
वञ्चितः स्यात् तदा स्वामी विज्ञप्तं चातिदुःश्रवम् ॥३७॥
देव ! देव्यां प्रवादोऽस्ति घटते दुर्घटोऽपि हि ।
युक्त्यापि यद् घटामेति श्रद्धेयं तद् मनीषिणा ॥३८॥
तथा हि **जानकी** हृत्वा **रावणे**न रिरंसुना ।
एकैव निन्ये तद्वेश्म न्यवात्सीच्च चिरं प्रभो ! ॥३९॥
सीता रक्ता विरक्ता वा संवित्त्या वा प्रसह्य वा ।
स्त्रीलोलेन **दशास्ये**न नूनं स्याद् भोगदूषिता ॥४०॥
लोकोऽपि प्रवदत्येवं प्रवदामो वयं तथा ।
युक्तियुक्तं प्रवादं तद् मा सहस्व **रघू**द्वह ! ॥४१॥
आजन्मोपार्जितां कीर्त्तिं निजं कुलमिवामलम् ।
प्रवादसहनेन त्वं मा देव ! मलिनीकृथाः'' ॥४२॥
कलङ्कस्यातिथीभूतां **सीतां** निश्चित्य **राघवः** ।
सद्योऽभूद् दुःखतूष्णीकः **''प्रायः प्रेमातिदुस्त्यजम्''** ॥४३॥
धैर्यमालम्ब्य **काकुत्स्थ**स्तानुवाच महत्तरान् ।
साधु व्यज्ञपि युष्माभिर्न भक्ताः क्वाप्युपेक्षकाः ॥४४॥
न स्त्रीमात्रकृते जातु सहिष्येऽहमिहायशः ।
इति **रामः** प्रतिज्ञाय विससर्ज महत्तरान् ॥४५॥
निशायामथ **काकुत्स्थः** प्रच्छन्नोऽसिलतासखः ।
जनापवादं **जानक्याः** स्वयं श्रोतुं पुरेऽभ्रवत् ॥४६॥
यावच्चर्मकृतः शालासमीपे कस्यचिद् ययौ ।
तावदस्याङ्गना प्राप चिरेण प्रतिवेश्मनः ॥४७॥ युगमम् ॥
पादयोर्व्यङ्गकेनैतां हत्वा चर्मकृदूचिवान् ।
अरे ! त्वं कियतीं वेलामस्था रण्डे ! निवेदय ॥४८॥

सोचे कीदृग् वराकस्त्वं **रामे**ण रमणी निजा ।
षण्मास्या **रावण**गृहादानीयान्तःपुरी कृता ॥४९॥

मुहूर्त्तमात्रमपि न क्षमते तु भवान् मम ।
सोऽप्यूचे क्षमतां **रामः** स्त्रीजितोऽहं तु नेदृशः ॥५०॥

श्रुत्वेति **जानकीजानिः** संतापी हृद्यचिन्तयत् ।
स्त्रीकृते धिक्कृतं नीचेभ्योऽपि **रामः** शृणोति हा ॥५१॥

जाने महासती सीता स्त्रीलोलः स च **रावणः** ।
कुलं च निष्कलङ्कं मे हा **रामः** किं करोत्वसौ ? ॥५२॥

ध्यात्वेति गृहमागत्य **सीतां** त्युक्तुमना बलः ।
मन्त्रयामास **सौमित्रिं** तत्तथाख्यानपूर्वकम् ॥५३॥

ऊचे च **लक्ष्मणो** लोकगिरा **सीतां** स्म मा त्यज ।
यथा तथापवदित्रा यदबद्धमुखो जनः ॥५४॥

लोकः सौराज्यस्वस्थोऽपि राजदोषपरो भवेत् ।
शिक्षणीयो न चेत् तन्नोपेक्षणीयः स भूभुजाम् ? ॥५५॥

रामोऽप्यूचे सत्यमेतदीदृग्लोकः सदापि हि ।
सर्वलोकविरुद्धं तु त्याज्यमेव यशस्विना ॥५६॥

इत्युक्त्वोवाच सेनान्यं **कृतान्तवदनं** बलः ।
अरण्ये त्यज्यतां क्वापि **सीते**यं गर्भवत्यपि ॥५७॥

पतित्वा **राम**पादेषु बभाषे **लक्ष्मणो** रुदन् ।
सीतादेव्या महासत्यास्त्यागोऽयमुचितो न हि ॥५८॥

नातः परं त्वया वाच्यमिति **रामे**ण भाषिते ।
लक्ष्मणोऽगाद् निजावासं वासश्छन्नमुखो रुदन् ॥५९॥

रामोऽन्वशाच्च सेनान्यमरे **सीतां** वने नय ।
कृत्वा **सम्मेत**यात्राश्छद्म तस्याः स दोहदः ॥६०॥

गङ्गापरतटे **राम**स्त्वामस्ति प्रतिपालयन् ।
इति वाच्यं पुरस्तस्या यथैतीयं त्वया सह ॥६१॥
सेनानीरपि **सम्मेत**यात्रादि स्वामिशासनम् ।
आख्याय **सीता**मारोप्य रथे रथ्यानतत्वरत् ॥६२॥
गङ्गासागरमुत्तीर्यारण्ये **सिंहनिनाद**के ।
गत्वा **कृतान्तवदन**स्तस्थौ किञ्चिद् विचिन्तयन् ॥६३॥
सास्रं म्लानमुखं तं च वीक्ष्य **सीता**ऽब्रवीदित ।
कथमित्थं स्थितोऽसि त्वं सशोक इव दुर्मनाः ॥६४॥
कृतान्तः कथमप्यूचे दुर्वचं वच्म्यहं कथम् ? ।
दुष्करं कृतवांश्चैतत् प्रेष्यभावेन दूषितः ॥६५॥
राक्षसावाससंवासनिर्वादाल्लोकजन्मनः ।
भीतेन देवि ! देवेन वनेऽस्मिंस्त्याजितासि हा ! ॥६६॥
जनापवादमाकर्ण्य **रामं** त्वत्त्याजनोद्यतम् ।
न्यषेधील्**लक्ष्मणो** देवि ! निपत्य पदयोश्चिरम् ॥६७॥
सिद्धाज्ञया निषिद्धश्च **राम**ेण स रुदन्नगात् ।
अहं तु हन्त ! कार्येऽस्मिन् हतकः प्रेषितोऽस्मि हा ! ॥६८॥
वनेऽस्मिन् श्वापदाकीर्णे मृत्योरेकनिकेतने ।
जीविष्यसि मया त्यक्ता स्वप्रभावेण केवलम्'' ॥६९॥
श्रुत्वेति रथतः **सीता** मूर्च्छिता न्यपतद् भुवि ।
मृतेति बुद्ध्या सेनानीः पापम्मन्यो रुरोद सः ॥७०॥
सीतापि वनवातेन कथञ्चित् प्राप चेतनात् ।
भूयो भूयोऽप्यमूर्च्छच्च चेतनामाससाद च ॥७१॥
महत्यामथ वेलायां सुस्थीभूयेत्युवाच सा ।
इतो**ऽयोध्या** कियद्दूरे **राम**स्तिष्ठति कुत्र वा ? ॥७२॥

सेनानीरवदद् दूरेऽयोध्या किं पृष्टया तया ? ।
उग्राज्ञस्य च **राम**स्य पर्याप्तं देवि ! वार्त्तया ॥७३॥

इति श्रुत्वापि सा **राम**भक्ता भूयोऽप्यभाषत ।
भद्र ! मद्वाचिकमिदं शंसे **राम**स्य सर्वथा ॥७४॥

"यदि निर्वादभीतस्त्वं परीक्षां नाकृथाः कथम् ? । 5
शङ्कास्थाने हि सर्वोऽपि दिव्यादि लभते जनः" ॥७५॥

इत्युक्त्वा मूर्च्छिता भूमौ पतितोत्थाय चाब्रवीत् ।
मया विना कथं **रामो** जीविष्यति हतास्मि हा ? ॥७७॥

रामाय स्वस्त्यथाशंसेराशिषं **लक्ष्मण**ाय च ।
शिवास्ते सन्तु पन्थानो वत्स ! गच्छोप**राघव**म् ॥७८॥ 10

इयमेव सतीधुर्या भक्ता येदृश्यपि प्रभौ ।
चिन्तन्निति सेनानीर्नत्वैनां ववले बलात् ॥७९॥

§§ अथ **सीता** भयोद्भ्रान्ता बभ्रामेतस्ततो वने ।
आत्मानमेव निन्दन्ती पूर्वदुष्कर्मदूषितम् ॥८०॥

भूयो भूयश्च रुदती स्खलन्ती च पदे पदे । 15
गच्छन्ती पुरतोऽपश्यद् महासैन्यं समापतत् ॥८१॥

मृत्युजीवितयोस्तुल्याशया वीक्ष्यापि तद्बलम् ।
सीता तस्थावभीतेव नमस्कारपरायणा ॥८२॥

तां दृष्ट्वा बिभयाञ्चक्रुः सैनिकाः प्रत्युतापि ते ।
का नाम दिव्यरूपेयं भूस्थितेत्यभिभाषिणः ॥८३॥ 20

सीताया रुदितं श्रुत्वा स्वरवित् तच्चमूनृपः ।
इयं महासती कापि गुर्विणी चेत्यवोचत ॥८४॥

कृपालुः स महीपालः **सीतो**पान्तं जगाम च ।
सीताप्याशङ्किता तस्य स्वं नेपथ्यमढौकयत् ॥८५॥

"राजाप्येवभाषिष्ट मा भैषीस्त्वं मनागपि ।
तवैव भूषणान्येतान्यङ्गे तिष्ठन्तु हे स्वसः ! ॥८६॥
का त्वं कस्त्वामिहात्याक्षीद् निर्घृणेभ्योऽपि निर्घृणः ।
आख्याहि मा स्म शङ्किष्ठास्त्वत्कष्टेनास्मि कष्टितः ॥८७॥
तन्मन्त्री **सुमति**र्नाम **सीता**मेत्याब्रवीदिति ।
गजवाहनराजस्य **बन्धुदेव्या**श्च नन्दनः ॥८८॥
नृपति**र्वज्रजङ्घो**ऽयं **पुण्डरीक**पुरेश्वरः ।
महार्हतो महासत्त्वः परनारीसहोदरः ॥८८॥
गजान् ग्रहीतुमत्रैत्य कृतार्थीभूय च व्रजन् ।
त्वद्दुःखितोऽत्रागाद् दुःखमाख्याहि तद् निजम्" ॥९०॥
सीतापि स्वस्य वृत्तान्तं विश्वस्याभिदधेऽखिलम् ।
रुदती रोदयन्ती तौ कृपालु राज-मन्त्रिणौ ॥९१॥
निर्व्याजो व्याजहारैवं राजा धर्मस्वसासि मे ।
एकधर्मे प्रपन्नाः स्युर्मिथो बन्धव एव यत् ॥९२॥
मम **भामण्डल**स्येव भ्रातुरेहि तदौकसि ।
स्त्रीणां पतिगृहादन्यत् पदं भ्रातृनिकेतनम् ॥९३॥
रामोऽपि लोकवादेन त्वामत्याक्षीद् न तु स्वयम् ।
पश्चात्तापेन सोऽप्यद्य मन्ये त्वमिव कष्टभाक् ॥९४॥
गवेषयिष्यत्यचिरात् त्वां सोऽपि विरहातुरः ।
चक्रवाक इवैकाकी ताम्यन् **दशरथात्मजः** ॥९५॥
इत्युक्त्वा निर्विकारेण तेनामेत्यभिधायिनी ।
सीता रुरोह शिबिकां सद्यस्तदुपनायिताम् ॥९६॥
पुण्डरीकपुरं चागाद् **मिथिला**मपरामिव ।
अस्थाच्च सततं धर्मशीला तद्दत्तवेश्मनि ॥९७॥

§§ इतश्च **रामः** सेनान्यस्तत् तथाकर्ण्य मूर्च्छितः ।
संभ्रमाल्**लक्ष्मणे**नैत्य सिषिचे चन्दनाम्भसा ॥९८॥
उत्थाय विललापैवं क्व सा **सीता** महासती ? ।
सदा खलानां लोकानां वचसा हा ! मयोज्झिकता ॥९९॥
अथोचे **लक्ष्मणः** स्वामिंस्तस्मिन्नद्यापि सा वने । 5
सती निजप्रभावेण त्राता नूनं भविष्यति ॥१००॥
गत्वा गवेषयित्वा च स्वयमानीयतां प्रभो ! ।
सीतादेवी वियोगार्ता नैव यावद् विपद्यते ॥१०१॥
श्रुत्वैवं सह तेनैव सेनान्याऽन्यैश्च खेचरैः ।
रामोऽगाद् व्योमयानेन तत्रारण्येऽतिदारुणे ॥१०२॥ 10
प्रतिस्थलं प्रतिजलं प्रतिशैलं प्रतिद्रुमम् ।
रामो गवेषयामास ददर्श न तु **जानकी**म् ॥१३०॥
सीताप्राप्तौ विमुक्ताशो निवृत्य स्वपुरी ययौ ।
प्रेतकार्यं च **सीता**या **रामो**ऽकार्षीदुदश्रुदृक् ॥१०४॥
सैका हृदि दृशोरग्रे तस्थौ **राम**स्य वाचि च । 15
क्वापि तिष्ठति स्त्रीतेति तथापि न विवेद सः ॥१०५॥
§§ इतश्च तत्र **वैदेही** सुषुवे युग्मिनौ सुतौ ।
नामतोऽनङ्गलवणं **मदनाङ्कुश**मप्यथ ॥१०६॥
वज्रजङ्घस्तयोश्चक्रे जन्मनाममहोत्सवौ ।
स्वपुत्रलाभादधिकं मोदमानो महामनाः ॥१०७॥ 20
तावुल्लापनसञ्ज्ञाभ्यां ख्यातौ कुशलवाविति ।
सीतासुतावजायेताकयोक्त्या **कुसीलवौ** ॥१०८॥
धात्रीभिः पञ्चभिः पाल्यमानौ बाल्यवयोऽतिगौ ।
कलाग्रहणयोग्यौ तावजायेतां महाभुजौ ॥१०९॥

तावधीताखिलकलौ प्रपेदाते च यौवनम् ।
नूतनाविव चन्द्रार्काविन्दोपेन्द्राविवाथवा ॥११०॥

वज्रजङ्घः शक्तिचूलां पुत्रीं **लक्ष्मीवती**भवाम् ।
कन्या द्वात्रिंशतं चान्या **लवणेनो**दवाहयत् ॥१११॥

सोऽङ्कुशाय ययाचे तु **पृथ्वीपुर**पतेः **पृथो**ः ।
जाता**ममृतवत्या**थो कन्यां **कनकमालिका**म् ॥११२॥

वंशो न ज्ञायते यस्य तस्मै स्वदुहिता कथम् ? ।
दीयतामित्यभाषिष्ट **पृथु**ः पृथुपराक्रमः ॥११३॥

वज्रजङ्घस्तदाकर्ण्य तं क्रोधादभ्यषेणयत् ।
परैरतिबलै**र्वज्रजङ्घ**सैन्यं त्वभज्यत ॥११४॥

संक्रुद्धौ मातुलचमूभङ्गेन **लवणाङ्कुशौ** ।
निरङ्कुशाविव गजौ प्रणिघ्नन्तावधावताम् ॥११४॥

तयोरोजस्विनो रंहो मनागपि न सेहिरे ।
प्रतिकूला भुजभृतो द्रुमा भिद्योध्ययोरिव ॥११६॥

अभज्यत ससैन्योऽपि **पृथु**र्यावद् नरेश्वरः ।
ऊचतुस्तावदेवं तौ विस्मरौ **राम**नन्दनौ ॥११७॥

अपरिज्ञातवंशाभ्यामप्यावाभ्यामिहाहवे ।
विज्ञातवंशजा यूयं पलायध्वे कथुं नु भोः ? ॥११८॥

इति तद्वचनं श्रुत्वा वलित्वा **पृथु**रब्रवीत् ।
व्यज्ञायि वंशो युष्माकं विक्रमेणामुना मया ॥११९॥

सन्धानं **वज्रजङ्घे**न समक्षं भूभुजां ततः ।
चक्रे **पृथु**नृपः पुत्र्याः स्पृहयन्**नङ्कुशं** वरम् ॥१२०॥

शिबिरं न्यस्य तत्रास्थाद् **वज्रजङ्घ**नरेश्वरः ।
आगाच्च **नारद**मुनिः सच्चक्रे तेन चोच्चकैः ॥१२१॥

वज्रजङ्घो निषण्णेषु राजसूवाच **नारदम्** ।
अङ्कुशाय पृथुर्दास्यत्यसौ कन्यां निजां मुने ! ॥१२२॥
लवणाङ्कुशयोर्वंशमस्मत्सम्बन्धिनोऽस्य तत् ।
आख्याहि ज्ञातजामातृवंशो येनैष तुष्यति ॥१२३॥
अथोचे **नारदः** स्मित्वा वंशं को वेत्ति नानयोः ? ।
यस्योत्पत्त्यादिकन्दः स भगवान् **वृषभध्वजः** ॥१२४॥
पौलस्त्यवधनाट्यैकसूत्रधारौ धरातले ।
को वेत्ति नानयोस्तातौ दक्षिणौ **राम-लक्ष्मणौ ?** ॥१२५॥
गर्भस्थयोरप्ययो**रयोध्या**लोकजन्मनः ।
निर्वादाच्चकितेनोच्चैस्त्यक्ता **रामेण जानकी** ॥१२६॥
अ**थाङ्कुशो** हसित्वोचे ब्रह्मन् ! न खलु साधु तत् ।
चक्रे **रामेण वैदेहीं** त्यजता दारुणे वने ॥१२७॥
भूयांसि ह्यपवादस्य कारणानि निराकृतौ ।
भवन्ति तत्र किन्त्वेतद् विद्वानपि चकार सः ॥१२८॥
पप्रच्छ **लवणो**ऽथैवं दूरे कियति सा पुरी ।
यस्यां वसति मे तातः सानुजः सपरिच्छदः ? ॥१२९॥
मुनिरूचे तव पिता यस्यां विश्वैकनिर्मलः ।
सा**ऽयोध्या** पूरितः षष्टियुग्योजनशतं खलु ॥१३०॥
वज्रजङ्घमथोवाच **लवणः** प्रश्रयं श्रयन् ।
इच्छावस्तत्र गत्वावां प्रेक्षितुं **राम-लक्ष्मणौ** ॥१३१॥
प्रतिपद्य स तद्वाच**मङ्कुशं** पर्यणाययत् ।
महोत्सवात् **पृथो** राज्ञः पुत्र्या **कनकमालया** ॥१३२॥
वज्रजङ्घ-पृथुभ्यां तावन्वितौ **लवणाङ्कुशौ** ।
साधयन्तो बहून् देशान् **पुण्डरीकपुरं** गतौ ॥१३३॥

जग्मतुः स्वगृहं वीरौ भूपवीरैर्वृताविमौ ।
प्रणेमतुश्च **जानक्या**श्चरणौ विश्वपावनौ ॥१३४॥

चुचुम्ब मूर्ध्नि तौ **सीता** स्नपयन्ती मुदश्रुभिः ।
राम-लक्ष्मणयोस्तुल्यौ भूयास्तमिति चावदत् ॥१३५॥

ऊचतुर्**वज्रजङ्घं** तौ मातुल ! प्राक् त्वयाऽऽवयोः ।
मेने यान**मयोध्याया**मिदानीमनुतिष्ठ तत् ॥१३६॥

प्रयाणभम्भा वाद्यन्तां च दिशो बलैः ।
त्यक्ता येनावयोर्माता वीक्ष्यस्तस्याद्य विक्रमः ॥१३७॥

सीतापि सद्यो रुदती जगादेदं सगद्गदम् ।
वत्सौ ! केयमनर्थेच्छा युवयोः कर्मणाऽमुना ? ॥१३८॥

वीरौ पितृ-पितृव्यौ वां दुर्जयो द्युसदामपि ।
यकाभ्यां निहतो रक्षःपतिस्त्रैलोक्यकण्टकः ॥१३९॥

उत्कण्ठा पितरं द्रष्टुं युवयोर्यदि बालकौ !
विनीतीभूय तद् यातं **'पूज्ये हि विनयोऽर्हति'** ॥१४०॥

ततस्तावेवमूचाते विनयः क्रियते कथम् ? ।
तस्मिन् वैरिपदं प्राप्ते त्वत्त्याजिनि पितर्यपि ? ॥१४१॥

पुत्रौ तवावामायाताविति तस्य पुरः कथम् ।
गत्वा स्वयं वदिष्यास्तस्याप्येतत् त्रपाकरम् ॥१४२॥

आनन्दजनकं तस्य जनकस्यापि दोष्मतः ।
युद्धाह्वानं तु युज्येत कुलद्वयशस्करम् ॥१४३॥

अभिधायेति **सीता**यां रुदत्यामपि चेलतुः ।
महोत्साहौ महासैन्यौ तौ **राम**नगरीं प्रति ॥१४४॥

क्रमेण गत्वा सेनाभी रुन्धानौ सर्वतौ दिशः ।
तावूषतुरु**पायोध्यं** योद्धुकामौ महाभूजौ ॥१४५॥

श्रुत्वाऽकस्मात् पुरापान्ते तत्पार्श्वमुपागतम् ।
सङ्गरायोदतिष्ठेतां ससैन्यौ **राम-लक्ष्मणौ** ॥१४६॥

इतश्च तौ क्षणेनापि दोषमन्तौ **लवणाङ्कुशौ** ।
रामसैन्यमगाहेतामिन्द्रोपेन्द्राविवार्णवम् ॥१४७॥

पेततुर्यत्र यत्रैतौ वने मत्ताविव द्विपौ । 5
रथी सादी निषादी वा न तत्रास्थाद् धृतायुधः ॥१४८॥

हतविद्रुतमेवं च **राम**सैन्यं विधाय तौ ।
राममस्खलितौ गत्वाऽयोधिषातां स**लक्ष्मण**म् ॥१४९॥

भ्राभ्यदर्कभ्रमकरं भ्रमयित्वाऽथ **लक्ष्मणः** ।
मुमोच कुपितश्चक्र**मङ्कुशाय** जयेच्छया ॥१५०॥ 10

आपतत् ताडयामासानेकशोऽस्त्रैस्त**दङ्कुशः** ।
लवणोऽपि तथैवौच्चैर्न तु तत् प्रत्यहन्यत ॥१५१॥

वेगेनापत्य तच्चक्र**मङ्कुश**स्य प्रदक्षिणाम् ।
कृत्वा **लक्ष्मण**हस्तेऽगात् पुनर्विद्युदिवाम्बुदे ॥१५२॥

चिन्तयामासतुश्चैवं विषण्णौ **राम-लक्ष्मणौ** । 15
किं शीरिशार्ङ्गिणावेतौ न त्वावामिह भूतले ? ॥१५३॥

नारदोऽत्रान्तरे तत्राभ्येत्य **भामण्डला**न्वितः ।
विहस्य निजगादेति खिन्नं **रामं** स**लक्ष्मण**म् ॥१५४॥

हर्षस्थाने विषादोऽयं युवयोः किं **रघूद्वहौ** ? ।
पुत्रात् पराजयो वंशोद्द्योतनाय न कस्य हि ? ॥१५५॥ 20

सीताकुक्षिभवौ पुत्रौ तवेमौ **लवणाङ्कुशौ** ।
त्वां द्रष्टुमागतावत्र युद्धव्याजाद् द्विषौ तु न ॥१५६॥

अभिज्ञानमिदं तेऽत्र यच्चक्रं प्रबभूव न ।
मुधाऽभूद् **भारतं** चक्रं पुरा **बाहुबला**वपि ॥१५७॥

त्यागात् प्रभृति **सीता**या वृत्तान्तं **नारदो**ऽखिलम् ।
पुत्रयुद्धान्तमाचख्यौ विश्वविस्मयदायकम् ॥१५८॥

रामोऽथ विस्मयव्रीडाखेदहर्षसमाकुलः ।
मुमूर्च्छ चन्दनाम्भोभिः सिक्तः सञ्ज्ञामवाप च ॥१५९॥

लक्ष्मणेन सहोदश्रुः पुत्रवात्सल्यपूरितः ।
जगाम **रामो लवणाङ्कुशयो**ः सन्निधौ जवात् ॥१६०॥

स्यन्दनादवतीर्याशु विनीतौ **लवणाङ्कुशौ** ।
राम-लक्ष्मणपादेषु मुक्तास्त्रौ पेततुः क्रमात् ॥१६१॥

तावालिङ्ग्य निजोत्सङ्गे निवेश्य च **रघूद्वहः** ।
मूर्ध्नि चुम्बन् रुरोदोच्चैः शोकस्नेहवशंवदः ॥१६२॥

रामोत्सङ्गाद् निजोत्सङ्गं तावारोप्याथ **लक्ष्मणः** ।
चुम्बन् शिरसि बाहुभ्यां परिरेभेऽश्रुपूर्णदृक् ॥१६३॥

अपरेऽपि हि भूपालाः सैन्ययोरुभयोरपि ।
प्रमोदन्ते स्म सम्भूय विवाहमिलिता इव ॥१६४॥

भामण्डलनृपाख्यातो **वज्रजङ्घ**नृपोऽपि हि ।
ननाम **राम-सौमित्री** विनीतश्चिरपत्तिवत् ॥१६५॥

रामस्तमाललापैवं त्वं **भामण्डल**सन्निभः ।
पुत्रौ यो वर्धयंस्त्वं मेऽनैषीः काष्ठामिमां च यः ॥१६६॥

इत्युक्त्वा **पुष्पका**रूढः **पद्मनाभः सलक्ष्मणः** ।
अर्धासनोपविष्टाभ्यां पुत्राभ्यां प्राविशत् पुरीम् ॥१६७॥

पौरैरालोक्यमानश्च स्तूयमानश्च साङ्गजः ।
जगाम **रामः** स्वं धाम **पुष्पका**दुत्ततार च ॥१६८॥

§§ अथ रामं **सुमित्रा**भूः **कपीश्वर-बिभीषणौ** ।
हनुमानङ्गदश्चान्ये सम्भूयैवं व्यजिज्ञपन् ॥१६९॥

परदेशे स्थिता देवी त्वयैव रहिताऽधुना ।
विनामूभ्यां कुमाराभ्यामतिकष्टेन तिष्ठति ॥१७०॥
यद्यादिशसि तद् भर्तरानयामोऽद्य तामिह ।
विपत्स्यतेऽन्यथा सा तु पतिपुत्रोज्झिता सती ॥१७१॥
रामः किञ्चिद् विचिन्त्योचे **सीते**हानीयते कथम् ? ।
लोकापवादोऽलीकोऽपि बलवानन्तरायकृत् ॥१७२॥
प्रत्यक्षं सर्वलोकानां दिव्यं देवी करोतु सा ।
शुद्धया च तया सार्धं गृहवासोऽस्तु मे पुनः ॥१७३॥
एवमस्त्वित्युदित्वा ते पूर्या बहिरकारयन् ।
विशालान् मण्डपानुच्चैस्तदन्तर्मञ्चधोरणीः ॥१७४॥
तेषु चोपाविशन् भूपाः पौरामात्यादयोऽपि च ।
ते **बिभीषण-सुग्रीव**प्रमुखाः खेचरा अपि ॥१७५॥
ततो **रामा**ज्ञयोत्थाय **पुण्डरीकपुरे** रयात् ।
गत्वा नत्वा च **वैदेही**मित्युवाच **कपीश्वरः** ॥१७६॥
त्वत्कृते प्रैषि **रामे**ण विमानं देवि ! **पुष्पक**म् ।
इदानीमिदमध्यास्स्व **रामो**पान्तमुपेहि च ॥१७७॥
साप्यूचेऽद्यापि मेऽरण्यत्यागदुःखं न शाम्यति ।
तत् कथं **राम**मायामि भूयो दुःखान्तरप्रदम् ? ॥१७८॥
नत्वा भूयोऽपि स प्राह मा कुपस्तव शुद्धये ।
समं पौरैर्नृपैः सर्वैर्मञ्चारूढोऽस्ति **राघवः** ॥१७९॥
तेनेत्युक्ते पुराप्येषा **जानकी** शुद्धिकाङ्क्षिणी ।
आरुरोह विमानं तदयोध्यामाजगाम च ॥१८०॥
महेन्द्रोदयमुद्यानं समुपेत्योत्ततार सा ।
दत्तार्घा **लक्ष्मणे**नैत्य नमश्चके नृपैरपि ॥१८१॥

अग्रे निषद्य **सौमित्रि**र्नृपैः सममदोऽवदत् ।
निजां पुरीं निजं वेश्म प्रवेशाद् देवि ! पावय ॥१८२॥

सीताप्यूचे प्राप्तशुद्धिः प्रवेक्ष्यामि पुरीमिमाम् ।
गृहं च नान्यथा वत्स ! निर्वादो यदि[1] शाम्यति ॥१८३॥

श्रुत्वेति **राघवो**ऽभ्येत्य **मैथिली**मथ शुद्धये ।
अन्वशाद् नन्वसावेनं स्मितपूर्वमदोऽवदत् ॥१८४॥

दण्डमादौ विधायाद्य कुरुषे मत्परीक्षणम् ।
विचक्षणोऽसि **काकुत्स्थ** ! सज्जा तत्रापि नन्वहम् ॥१८५॥

ऊचे विलक्षो **रामो**ऽपि जाने दोषस्तवास्ति न ।
जनोत्पादितदोषस्योत्तारणायेदमुच्यते ॥१८६॥

''जगाद जानकी दिव्यपञ्चकं स्वीकृतं मया ।
विशामि वह्नौ ज्वलिते भक्षयाम्यथ तन्दुलान् ॥१८७॥
तुलां समधिरोहामि तप्तं कोशं पिबामि च ।
गृह्णामि जिह्वया फालं किं तुभ्यं रोचते वद ?'' ॥१८८॥ युग्मम् ॥

अत्रान्तरेऽभ्यधुः पौरा दूरादभ्येत्य **राघवम्** ।
इयं महासती **सीता** देव ! किं दिव्यकर्मणा ? ॥१८९॥

रामोऽप्युवाच हे लोकाः ! मर्यादा कापि नास्ति वः ।
संकल्प्य दोषं युष्माभिरेवेयं दूषिता पुरा ॥१९०॥

भूयोऽपि गृह्णता दोषमर्गला कापि नास्ति वः ।
प्रत्ययाय ततः **सीता** विशतु ज्वलितेऽनले ॥१९१॥

इत्युक्त्वाऽखानयद् **रामो** गर्तं हस्तशतत्रयम् ।
पुरुषद्वयदध्नं चापूरयच्चन्दनेन्धनैः ॥१९२॥

तं दीप्रदहनं भृत्यैः कारयित्वैष भीषणम् ।
दध्यौ मनसि हा ! कष्टं किं ममेदमुपस्थितम् ? ॥१९३॥

---

१. अत्र 'जातु' इति हेमचन्द्रकृतरामायणोक्तः पाठः सुयुक्तः प्रतिभाति ।

''इयं महासती नूनं निःशङ्काग्नौ प्रवेक्ष्यति ।
दैवस्येव हि दिव्यस्य प्रायेण विषमा गतिः ॥१९४॥
मया सहास्या निर्वासो हरणं **रावणे**न च ।
वने त्यागो मया भूयो भूयोऽप्येतच्च मत्कृतम्'' ॥१९५॥
एवं सोऽचिन्तयद् यावत् तावत् **सीतो**पपावकम् ।
स्थित्वा स्मृत्वा च सर्वज्ञं चक्रे सत्यापनामिति ॥१९६॥
''**हे लोकपाला लोकाश्च सर्वे शृणुत यद्यहम् ।**
अन्यमभ्यलषं रामात् तदाग्निर्मां दहत्वयम् ॥१९७॥
अन्यथा तु सुखस्पर्शो वारीवास्त्विति वादिनी ।
झम्पां स्मृतनमस्कारा ददौ तस्मिन् हुताशने'' ॥१९८॥
सा यावत् प्राविशत् तावद् विध्यातोऽग्निः स च क्षणात् ।
गर्तः स्वच्छपयःपूर्णः क्रीडावापीत्वमाययौ ॥१९९॥
सीता त्वधिजलं पद्मोपरिसिंहासनस्थिता ।
तस्थौ पद्मेव सद्भावपुष्टशीलानुभावतः ॥२००॥
ननृतुर्**नारदा**द्याः खे **सीता**शीलप्रशंसिनः ।
सीतोपरिष्टात् तुष्टाश्च पुष्पवृष्टिं व्यधुः सुराः ॥२०१॥
अहो शीलमहो शीलं **राम**पत्न्या यशस्करम् ।
इति लोकप्रघोषोऽभूद् रोदःकुक्षिम्भरिः क्षणात् ॥२०२॥
मातुः प्रभावं तं दृष्ट्वा मुदितौ **लवणाङ्कुशौ** ।
हंसाविव तरन्तौ तौ गत्वा **सीतां** प्रणेमतुः ॥२०३॥
गत्वा **सौमित्रिशत्रुघ्नभामण्डलबिभीषणाः** ।
सुग्रीवाद्याश्च **वैदेहीं** नमश्चक्रुः सभक्तयः ॥२०४॥
सीतां समेत्य **रामो**ऽपि गीतां त्रिभुवनैरपि ।
पश्चात्तापत्रपापूर्ण इत्यूचे रचिताञ्जलिः ॥२०५॥

"त्यक्तोग्रश्चापदेरण्येऽजीवस्त्वं स्वप्रभावतः ।
एकं दिव्यं तदप्यासीद् नाज्ञासिषमहं पुनः ॥२०६॥
क्षान्त्वा सर्वं ममेदानीमिदमध्यास्स्व **पुष्पकम्** ।
चल स्ववेश्मने प्राग्वत् कुरु राज्यं मया सह" ॥२०७॥

"**सीताप्यूचे न ते दोषो न च लोकस्य कश्चन ।**
न चान्यस्यापि कस्यापि किन्तु मत्पूर्वकर्मणाम् ॥२०८॥
निर्विण्णा कर्मणामीदृग्दुःखावर्त्तप्रदायिनाम् ।
उत्तमार्थं श्रयिष्यामि तदुच्छेदनिबन्धनम् ॥२०९॥
इत्युक्त्वाऽथ क्षमाङ्कं किल **जनक**भुवः प्रव्रजन्त्याः स केशा-
नाधत्तैषापि तप्त्वा चिरममरपतिः प्रान्तकल्पे बभूव ।
तस्मात् कूलेन केनाप्यसमतशमध्याननिर्धौतकर्मा,
शर्माद्वैतं प्रपेदे कृतविषयविपल्लाघवो **राघवो**ऽपि ॥२१०॥

॥ इति सीताचरितनामनि महाकाव्ये चतुर्थः सर्गः ॥

॥ इति सीताकथा ॥

● ● ●

सुलसा तु महासती श्री**महावीर**परमश्राविका क्षायिकसम्यक्त्वधारिणी **नाग**रथ-कारगेहिनी **राजगृह**राज**श्रेणिक**मित्रद्वात्रिंशत्पुमाता**ऽभयकुमार**कथायामुपदिष्टैव । सम्प्रति तु **राजमती**कथा —

§§ **रैवता**धो **गिरिपुरं** नामास्ति पुरमद्भुतम् ।
यत्रासिरेव निस्त्रिंशो बाण एव च मार्गणः ॥१॥

भोजवृष्णिकुलाम्भोजनभोमणिनिभो नृपः ।
उग्रसेनोऽभवत् तस्मिन्नुग्रतेजोऽरिभूभुजाम् ॥२॥

राजीमतीति राजीववदना तस्य नन्दना ।
बभूव **धारिणी**कुक्षिसरसी कलहंसिका ॥३॥

यदङ्गे युगरूपं यत् तद् मिथः प्रथितोपमम् ।
एकरूपं तु यत् तस्योपमानं मुकुरे यदि ॥४॥

अनुरूपो वरोऽमुष्याः कः स्यादित्युग्रचिन्तया ।
उग्रसेनोऽभवद् व्यग्रमानसोऽनिशमेव सः ॥५॥

§§ इतश्च **द्वारका**नाथो **नेमिनाथा**न्वितस्तदा ।
ग्रीष्मे सान्तःपुरो रन्तुं **रैवतो**द्यानमागमत् ॥६॥

चन्द्रार्काविव ताराभिस्तत्र तौ स्त्रीभिरावृतौ ।
सरो विविशतुः स्नातुं विरच्यः कुसुमोच्चयम् ॥७॥

स्त्रीणां नितम्बसम्बन्धवृद्धेऽम्बुनि तदाम्बुजैः ।
अमज्जि लज्जयेवासां मुखलक्ष्मीविलोकनात् ॥८॥

जले गर्जति पर्जन्य इवासां करताडने ।
नृत्ता ग्रीष्ममपि प्रावृट्कालयन्ति स्म केकिनः ॥९॥

गौरीषु तासु खेलन्तौ **कृष्णौ** तौ **विष्णु-नेमिनौ** ।
चारुचम्पकमालासु रोलम्बाविव रेजतुः ॥१०॥

मनोमुदे वरं सिक्त्वा देवरं प्रति **नेमि**नम् ।
तास्ततश्चक्रिरे नीरप्रपञ्चं नर्मकर्मठाः ॥११॥

समन्ततः समं ताभिः करिणीभिरिव द्विपः ।
चिक्रीड **नेमिनाथो**ऽपि पाथोभिः करलालितैः ॥१२॥
इति खेलन्तमालोक्य तदानीं **नेमि**नं मुदा ।
कृतार्थीकृतदृक् तस्थौ चिरं पयसि **केशवः** ॥१३॥
निर्गत्य सरसस्तीरे तस्थुस्ता जिष्णुयोषितः ।
तासु प्रभुरभात् पुण्ड्रमुक्तास्विव हरिन्मणिः ॥१४॥
तदा पूर्वैर्जलस्तुत्याऽरोदीव प्रभुणोज्झितैः ।
अङ्कीकृतैरपूर्वैश्चाहासीव महसांशुकैः ॥१५॥
अथ तत्रोत्सुकस्त्रैणन्यस्ते हेमासने **हरिः** ।
निवेश्य **नेमि**नं प्राह सुमाहात्म्यकिरा गिरा ॥१६॥
"वाच्यं देव ! त्वदग्रे यत् तद् वार्धौ वृष्टिसन्निभम् ।
नापराध्यामि तज्जल्पन् मान्यश्चास्मि त्वया कियत् ॥१७॥
पित्रोर्मनोरथौ स्यातां दुष्पूरावादिमस्तयोः ।
जातस्यास्येक्षणं सूनोः परिणीतस्य चापरः ॥१८॥
ततः **समुद्रविजय-शिवादेव्योः** स्वपूज्ययोः ।
जाते त्वयि जगद्दीपे पूर्वं पूर्णे मनोरथः ॥१९॥
राजकन्यां तदुद्वाह्य धन्यां काञ्चन सम्प्रति ।
पित्रोर्मनोरथं देव ! द्वितीयमपि पूरय ॥२०॥
श्री**नाभेया**दयस्तीर्थकराः के न मुमुक्षवः ।
परिणीय समुत्पन्नसूनवो दधिरे व्रतम् ? ॥२१॥
त्वमप्यतो विवाहेन पितृभ्रातृसुहृज्जनम् ।
आनन्दय दयासार ! दयास्थानमिदं महत् ॥२२॥
इत्थं **कृष्णः** सतृष्णोऽस्य पाणिग्रहमहं प्रति ।
कुर्वन्नभ्यर्थनां **नेमेः** पाणौ दीन इवालगत्" ॥२३॥

रुक्मिणीसत्यभामाद्याः सर्वा अपि **हरिप्रियाः** ।
तदेवाभ्यर्थयन्त्योऽस्य पादयोः पेतुरातुराः ॥२४॥

अन्येऽपि **यादवः** सर्वे विवाहे विहितादराः ।
बभूवुर्**नेमिनाथस्य** पुरः पटुचटूक्तयः ॥२५॥

अमी मूढाः स्त्रियश्चैतास्तदेतसदाग्रहे । 5
कालनिर्गमनं कर्तुं युक्तं वचनमाननम् ॥२६॥

कदाचिदपि लप्स्येऽहमिहार्थे सन्धिदूषणम् ।
ध्यात्वेदमोमिति प्रोच्य श्री**नेमि**स्तानमोदयत् ॥२७॥ युग्मम् ॥

शिवा-समुद्रविजयौ तत्कथाकथके नरे ।
दातुं नापृश्यतां वस्तु राज्येऽप्यानन्दमानतः ॥२८॥ 10

स्वबन्धोरुचितां कन्यामन्विष्यन्नथ **केशवः** ।
अभाषि **भामया**ऽऽस्ते यद् मम **राजीमती** श्वसा ॥२९॥

हरिः स्मृत्वाथ तां स्मित्वा ययौ **यदु**भिरन्वितः ।
निवास**मुग्रसेन**स्य ग्रहाधीशो ग्रहैरिव ॥३०॥

अभ्युत्था**योग्रसेनो**ऽपि **विश्वसेनं** ससंभ्रमः । 15
भद्रपीठे निवेश्याग्रे तस्थावादेशलालसः ॥३१॥

याचितो **नेमये राजीमती**मेतेन स स्वयम् ।
तथेति प्रतिपद्याथ सच्चक्रे चक्रिणं मुदा ॥३२॥

ततः **कृष्णे**न विज्ञप्तः **समुद्रविजयो** नृपः ।
विवाहलग्नमासन्नं पृष्ठवान् क्रोष्टुकिं तदा ॥३३॥ 20

दत्तेऽथ श्रावणश्वेतषष्ठ्यां क्रोष्टुकिना दिने ।
उग्रसेन-समुद्रोर्वीनाथौ तूर्णमसज्जताम् ॥३४॥

अथ पाणिग्रहासन्नदिने **नेमिं यदु**स्त्रियः ।
प्राङ्मुखं स्थापयामासुर्भासुराब्धगीतयः ॥३५॥

तमस्नपयतां प्रीत्या **राम-दामोदरौ** स्वयम् ।
बद्धप्रतिसरं **नेमिनाथं** नाराचधारिणम् ॥३६॥
आगाद**थोग्रसेन**स्य निकेतं तार्क्ष्यकेतनः ।
स्वयं तद्विधिना **राजीमती**मप्यध्यवासयत् ॥३७॥
शर्वरीं सर्वरीतिज्ञो निर्वाह्यैतां गृहागतः ।
हरिः संवाहयामास विवाहाय विभुं मुदा ॥३८॥
अथ श्वेतांशुवत्कान्तश्वेतच्छत्रविराजितः ।
श्री**नेमि**ः श्वेतशृङ्गारः श्वेताश्वं रथमास्थितः ॥३९॥
तूर्यनिर्घोषसंहृत्या पुराहृतवधूजनः ।
बन्दिवृन्दमुखोन्मुक्तैः सूक्तैर्मुखरिताम्बरः ॥४०॥
गीर्यमाणगुणग्रामो हृष्टैर्बन्धुवधूजनैः ।
कार्मयामिसमूहेन क्रियमाणावतारणः ॥४१॥
परीतो **यदु**भिः सर्वैः पार्वणेन्दुरिवोडुभिः ।
उग्रसेनगृहासन्नो जगाम जगदीश्वरः ॥४२॥ **कलापकम्** ॥
"वयस्याभिरभिप्रायविद्भिः सा प्रेरिता ततः ।
उत्थाय संभ्रमाद् मातृगृहादुज्जृम्भितस्पृहा ॥४३॥
हारकेयूरकोटीरकर्णपूराद्यलङ्कृता ।
वासोभिः शोभितानल्पैः कल्पवल्लीव जङ्गमा ॥४४॥
हर्षपीयूषवर्षेणोद्भिन्नरोमाङ्कुरोत्करा ।
आरुरोह वरारोहा गवाक्षे वीक्षितुं विभुम् ॥४५॥ विशेषकम् ॥
तस्यातिशायि लावण्यं पिबन्ती सा दृशा भृशम् ।
अनिमेषतया पूर्णं सा देवीभूयमन्वभूत् ॥४६॥
विवोढुमप्युपायान्तं सा तं वीक्ष्य व्यचिन्तयत् ।
एतत्पाणिग्रहे योग्यं भाग्यं किं मे भवेदिति" ॥४७॥

§§ इतश्चाकर्णयन् नानाजीवानां करुणं स्वरम् ।
जानन्नपि जिनोऽपृच्छत् कमेतदिति सारथिम् ॥४८॥
अथ सारथिनाऽभाषि देवातिथ्यकृते तव ।
उग्रसेनोऽग्रहीज्जीवाञ्जलस्थलनभश्चरान् ॥४९॥
तत्सर्वेऽपि कृपाकान्त ! वाटकान्तः स्थिता अमी । 5
तन्वते तुमुलं प्राणभयं येन महाभयम् ॥५०॥
अथोवाच **यदु**स्वामी यत्रामी सन्ति जन्तवः ।
स्यन्दनं नय तत्रैतं तदकार्षीच्च सारथिः ॥५१॥
अथ व्यलोकि दीनास्यैः प्राणिभिः स्वस्वभाषया ।
रक्ष रक्षेति जल्पद्भिः पितेव तनुजैः प्रभुः ॥४२॥ 10
करुणाकदलीमूलकन्देन विभुना ततः ।
अमी सर्वेऽप्यमोच्यन्त जवादादिश्य सारथिम् ॥५३॥
मुक्तेषु तेषु जीवेषु शमेनेव वपुष्मता ।
स्यन्दनो जगतां पत्या प्रत्यावासमवाल्यत ॥५४॥
शिवा-समुद्रविजय-कृष्ण-रामादयोऽप्यथ । 15
स्वं स्वं यानं समुत्सृज्य वेगाद् **नेमि**नमन्वगुः ॥५५॥
तं चाथ नाथमूचाते पितरौ साश्रुलोचनौ ।
त्वया जात ! किमारब्धमिदं नः प्रातिलोमिकम् ? ॥५६॥
प्रभुः प्राह मयारब्धमेतद् विश्वानुकूलिकम् ।
पशुवद् मोचयिष्यामि यद् युष्मान् स्वं च बन्धनात् ॥५७॥ 20
तदाकर्ण्याथ मूर्च्छालौ पितरौ पेततुः क्षितौ ।
चन्दनादिभिराश्वास्य **कृष्ण**स्तौ, प्रभुमभ्यधात् ॥५८॥
धिक् ते विवेकतामेतान् पशूनप्यनुकम्पसे ।
दोदूयसे पुनर्मातृ-पितृ-भ्रातृ-सुहृज्जनान् ॥५९॥

"ततोऽभ्यधात् प्रभुः **कृष्ण** ! नोक्तं युक्तमिदं त्वया ।
विचारय चिरं बन्धो ! निर्बन्धस्यायतिं मम ॥६०॥
संसारसुखापातमधुरं स्यादपथ्यवत् ।
मुखाप्रीतिः प्रियाकारी शमस्तु कटजायुवत् ॥६१॥
सर्वेषां तत् प्रियाकर्तुं प्रशमोऽयं श्रितो मया ।
हितं यत् परिणामे हि हितं तत् पारमार्थिकम्" ॥६२॥
इत्युक्त्वा स्वजनेष्वश्रुगद्गदेषु वदत्स्वपि ।
श्री**नेमि**राययावात्मगेहमुद्वाहनिःस्पृहः ॥६३॥
तीर्थं प्रवर्त्तयेत्युक्तस्वदा**लोकान्तिका**मरैः ।
दत्त्वैष वार्षिकं दानं **रैवते** प्रावजत् ततः ॥६४॥
§§ इतश्च दर्शनं दत्त्वाऽयन्यत्रास्मिन् गोपतौ गते ।
तदा **राजीमती** मूर्च्छां भेजे राजीविनीव सा ॥६५॥
चन्द्रपादैरिवाशाभिरालीभिश्चन्दनद्रवैः ।
सिक्ता कुमुद्वतीवाप्तबोधेति व्यलपीच्च सा ॥६६॥
"रे दैव ! यदि भाले मे न **नेमि**र्लिखितः पतिः ।
ततः किमियतीं भूमिं त्वयाऽहमधिरोपिता ? ॥६७॥
यदि **नेमि**र्न मे भावी भर्त्ता किं ढौकितस्ततः ? ।
तद् नालब्धनिधेर्दुःखं दृष्टनष्टनिधेर्हि यत् ॥६८॥
क्वाहं क्व **नेमि**स्त्यासीत् त्वत्पत्तित्वे मनोऽपि न ।
त्वद्गिरैव विवाहार्थे स्वामिन्नस्मि प्रतारिता ॥६९॥
त्वयारोपि ममोद्वाहमनोरथतरुः स्वयम् ।
उन्मूलयन्नमुं स्वामिन्नात्मनोऽपि न लज्जसे ॥७०॥
स्वामिन् ! मामपहायैवमात्मैकशरणमपि ।
सर्वसाधारणां सिद्धिं लिप्सोस्ते कीदृशी मतिः ?" ॥७१॥

विलपन्तीति **धारिण्या** धृत्वोत्सङ्गेऽथ सा स्वयम् ।
बभाषे वसनान्तेन मार्जयन्त्यश्रु तद्दृशोः ॥७२॥

प्रिये वत्से ! स्म मा रोदीर्लभ्यः क्व क्वेदृशः पतिः ।
किं करे किङ्करेन्द्रस्य तिष्ठेच्चिन्तामणिः क्वचित् ? ॥७३॥

निजमानमतिक्रम्य चलतां सिद्धिरस्ति न । 5
राहोराहारितोऽपीन्दुर्गलादपि पलायते ॥७४॥

तद् वत्से ! त्वत्समं राजकुमारं कञ्चन त्वया ।
अह्नायोद्वाहयिष्यामि मनो वालय **नेमि**तः ॥७५॥

"अथ **राजीमती** प्राह त्वं मातर्मेदमभ्यधाः ।
पतिर्मे **नेमि**रेवात्र पङ्कजिन्या इवार्यमा ॥७६॥ 10

ज्ञाता दाता च पाता च ततो नान्योऽस्ति कश्चन ।
यादृशस्तादृशो वास्तु स एव शरणं मम ॥७७॥

इति चेतो दृढीकृत्य ध्यायन्ती प्रभुपादुकाम् ।
तस्थौ **राजीमती** भावयतीभूय पितुर्गृहे" ॥७८॥

§§ **रथनेमि**रथ भ्राता कनीयाञ्जगदीशितुः । 15
राजीमतीमियायैत्पाणिग्रहमनाः सना ॥७९॥

अहो प्रजावतीमोहाद् मामुपासितुमेत्यसौ ।
इति **राजीमती** मत्वा तमायान्तमुपाचरत् ॥८०॥

स पुनः सम्भ्रमाद् मत्वा तामात्मन्यनुरागिणीम् ।
भाणयामास दासीभिरात्मोद्वाहाय दुर्मतिः ॥८१॥ 20

"**राजीमत्यपि** तद् बुद्ध्वाऽचिन्तयद् धुन्वती शिरः ।
प्रभोरस्य च सौदर्येऽप्यहो ! सत्त्वान्तरं कियत् ? ॥८२॥

दिष्ट्या तत्याज मां राज्यश्रियं चोच्छिष्टवत् प्रभुः ।
असौ त्वशौचः श्वेवैतद्वयं काङ्क्षति धिग् विधिम् ॥८३॥

तदेनं स्नेहलं स्नेहोपायेनैव प्रबोधये ।
निमित्तीकृत्य मां मज्जत्वसौ मा भवसागरे'' ॥८४॥
ध्यात्वेति सा पयः पीत्वा वामयित्वौषधाच्च तत् ।
ददौ प्रातरुपेताय स्थालस्थं **रथनेमये** ॥८५॥
सोऽब्रवीद् किमिदं मुग्धे ! वान्तं पायसेऽद्य माम् ।
वस्तुना रुचिरेणापि किमुच्छिष्टेन धीमताम् ? ॥८६॥
सोचे यद्यपि वेत्सीदं त्वममुग्ध ! महामते ! ।
वान्तां श्री**नेमि**ना तद् मां परिणेतुं किमिच्छसि ? ॥८७॥
रथनेमि: पतित्वाथ तत्पदोरिदमभ्यधात् ।
त्वयाहं बोधितो मुह्यन् साधु साधु महासति ! ॥८८॥
अथैतौ शुद्धसंवेगौ जाते केवलिनि प्रभौ ।
आददातेऽस्य पादान्ते दान्तेन मनसा व्रतम् ॥८९॥
रथनेमिरथान्येद्युरध्यास्ताध्यात्मलालसः ।
गुहां काञ्चिदिहागाच्च वृष्टिदू**नोग्रसेन**जा ॥९०॥
रथनेमिमजानन्ती तमस्तोमतिरोहितम् ।
उद्वापयितुमत्रासौ वस्त्राण्यूर्ध्वाप्यमुञ्चत ॥९१॥
कामस्येव विकोशासिलतामालोक्य तां मुनिः ।
गतधैर्यः पुरोभूय स्खलद्वागिदमभ्यधात् ॥९२॥
पुरापि प्रार्थितासि त्वमद्य मे कुरु वाञ्छितम् ।
सर्वेषामर्थिनामर्थं पूरयेत् कल्पवल्ल्यपि ॥९३॥
रथनेमिमथो मत्वा लज्जित्वा **भोज**नन्दनी ।
संवृताङ्गी जवाद् बोधभङ्गीभिस्तमबोधयत् ॥९४॥
स्वदृशा दूषितः पूर्वं धृतो योऽर्थस्त्वयोदरे ।
अद्यापि तदजीर्णस्य क्षारोद्गाराः स्फुरन्त्यमी ॥९५॥

''स्कन्देयुर्ज्वलितं ज्योतिर्धूमकेतुदुरासदम् ।
नेच्छन्ति वान्तमापातुं कुले जाता अगन्धने ॥९६॥
धिगस्तु ते यशःकाम्या यस्त्वं जीवितकारणात् ।
वान्तमिच्छस्यहो ! पातुं भविताऽन्तेऽपि ते मृतिः ॥९७॥
अहं च भोजराजस्य त्वं चास्यन्धकवृष्णजः ।
मा कुले गन्धने भूत्वाऽसंयमं निभृतश्चर ॥९८॥
यदि त्वं कुरुषे भावं या या द्रक्ष्यसि नायिकाः ।
वात्याधूतो हठ इवानियतात्मा भविष्यति ॥९९॥
तस्याः स वचनं श्रुत्वा संयत्याश्च सुभाषितम् ।
अङ्कुशेन यथा नागो धर्मं संप्रतिपन्नवान्'' ॥१००॥

नेमिं विजेतुमसृजद् महनो महास्त्रं **राजीमती**मयमनेन तु नायकेन ।
तेनैव सैष **रथनेमि**रथाधिरूढो जिग्येतरां विहितमोक्षगुणोदयेन ॥१०१॥

॥ इति राजीमतीकथा ॥

● ● ●

अथ **मदनरेखा** यथा –

§§ अस्त्यवन्तिषु विख्यातं **सुदर्शनपुरं** पुरम् ।
यत्र देव्या न भारत्या कमला कलहायते ॥१॥
अपनीतद्विषच्चूडाणि**र्मणिरथो** नृपः ।
तत्रासीद् यदसिव्योम्नि विललास यशःशशी ॥२॥
बभूव युवराजोऽस्य तापबाहुबलोत्कटः ।
युगबाहुरिति ख्यातः क्षात्रतेज इवाङ्गयुक् ॥३॥
तस्यासीज्जिनधर्मैकरतानेकनगुणान्विता ।
प्रिया **मदनरेखे**ति रूपरेखावती सती ॥४॥
मम देवेन पत्यापि स्वरूपेण जितः स्मरः ।
इतीव सापि तत्कान्तमजैषीद् वीरवासिता ॥५॥
तयो**श्चन्द्रयशाः** कीर्त्या तारकेशविजित्वरः ।
सुतोऽभूच्छक्तिदुर्वारः कुमारः शिवयोरिव ॥६॥
कदाचिदेतां श्वेतांशुमुखीं वातायनस्थिताम् ।
दृष्ट्वा **मणिरथ**श्चके कामकेलिमनोरथम् ॥७॥
ततोऽस्यै गन्धमाल्यादि प्रेषयामास भूपतिः ।
निर्विकारा तु सा सर्वमग्रहीज्जयेष्ठभक्तितः ॥८॥
ततो मानितमात्मानं मन्यमानं स दुर्मतिः ।
दूतीमुखेन तां रन्तुमर्थयामास पार्थिवः ॥९॥
सापि दूतीमुखेनैवं पार्थिवाय व्यजिज्ञपत् ।
युज्यते नेदृशं वक्तुमपि देव ! भवादृशाम् ॥१०॥
कुललज्जा न चेल्लोकलज्जा च तव भूपते ! ।
वदन्नेवं कथं नैव स्वबन्धोरपि लज्जसे ? ॥११॥
श्रुत्वेति भूपतिश्चित्ते चिन्तयामासिवानिति ।
इयं मय्यनुरक्तैव ध्वनितार्थं वदत्यदः ॥१२॥

यावत् ते बन्धुरस्त्येष तावद् नोचितमीदृशम् ।
एनं केनाप्युपायेन हन्मि तत् किमनेन मे ? ॥१३॥

इति दुष्टमतेरस्य **युगबाहुं** निशुम्भितुम् ।
छलं मृगयमाणस्य ययौ कालः कियानपि ॥१४॥

इतो **मदनरेखा** तु चन्द्रस्वप्नेन सूचितम् । 5
गर्भं कादम्बिनीबाधाद् **युगबाहो** रवेरिव ॥१५॥

जिनार्चासङ्घसम्मानरूपान् भूपानृजो बहून् ।
तस्याश्च पूरयामास तृतीये मासि दोहदान् ॥१६॥

युगबाहुर्यमाहूत इव चैत्रोत्सवेऽन्यदा ।
जगाम रन्तुमुद्याने समं **मदनरेख**या ॥१७॥ 10

क्रीडतः कान्तया साकं तया साकम्पया स्मरात् ।
दिनान्तेऽस्तमगात् तस्य प्राच्यपुण्यमिवांशुमान् ॥१८॥

क्षणं स्थित्वा च सन्ध्यास्यलक्ष्मीरिव तिरोदधे ।
रुरोध च तमस्तस्य दशा इव दिशो दश ॥१९॥

युगबाहुरसौ तस्मिन्नेवोवास निशां वने । 15
येन संजायते पुंसां बुद्धिः कर्मानुसारिणी ॥२०॥

उद्दामयुद्धान् विमुच्यैष यामिकान् परितो वनम् ।
रम्भाकेलिगृहेऽशेत समं **मदनरेखया** ॥२१॥

अथो **मणिरथो** दध्यावसाववसरो वरः ।
सुप्रसन्नाद् विधेः प्राप्तः सुचिरं वाञ्छता मया ॥२२॥ 20

एकं तावत्प्रसङ्गेन **युगबाहु**र्बहिर्वने ।
द्वितीयमेष कतिचित्पादातपरिवारितः ॥२३॥

तृतीयं साम्प्रतं रात्रिश्चतुर्थं वनमस्ति तत् ।
हन्मि गत्वा प्रियासङ्गविघ्नं मूर्त्तमिवाशुभम् ॥२४॥

चिन्तयित्वेत्यसौ दुष्टो मुष्टिना कलयन्नसिम् ।
गतो बहिर्वनेऽपृच्छद् यामिकानित्यनामिकः ॥२५॥
भो भोः ! शंसत मे बन्धुर्**युगबाहुः** क्व वर्तते ? ।
श्रुत्वेति तद्वचस्तेऽपि शशंसुः कदलीगृहे ॥२६॥
मैनं कश्चिच्छलाग्वेषी द्वेषी हन्यादिह स्थितम् ।
इत्यागामित्यसौ जल्पन्नथ केलिगृहेऽविशत् ॥२७॥
ससम्भ्रममथोत्थाय **युगबाहु**स्तमानमत् ।
अलमत्रोषितेनैहि पुरमित्यनुमोदितः ॥२८॥
तदादेशादसौ गन्तुं पुराय प्रगुणीभवन् ।
हतो हतात्मना तेन कन्धरायां शितासिना ॥२९॥
युगबाहुस्ततो मूर्च्छामीलिताक्षोऽपतद् भुवि ।
तारं तारं च पूच्चक्रे शुचा **मदनरेखया** ॥३०॥
किमेतदिति संभ्रान्ताः पत्तयः परितोऽमिलन् ।
ऊचे राज्ञा च्युतः पाणेर्दैवादसिरसौ मम ॥३१॥
नूनमेतद् नृपस्यैव चेष्टितं पापवेष्टितम् ।
विभृश्येति बलादेनं पत्तयः पत्तनेऽनयन् ॥३२॥
ते चन्द्रयशसोऽप्याख्यन् **युगबाहो**स्तथाकथाम् ।
सोऽपि वैद्यानुपादायोद्यानं तूर्णमुपाययौ ॥३३॥
व्रणकर्मणि वैद्येषु वितन्वत्सु प्रयत्नतः ।
युगबाहोस्तदा तारायनभङ्गोऽभवत् पुनः ॥३४॥
ततो **मदनरेखा**ऽस्मै परलोकाध्वयायिने ।
धृत्वा विवेकिनी धैर्यं विदधे धर्मशम्बलम् ॥३५॥
"महासत्त्व ! न ते कश्चित् त्वं च कस्यापि न ध्रुवम् ।
कुटुम्बे देहिनां योगः पक्षिणामिव शाखिनि ॥३६॥

सर्वः स्वकर्मणां पूर्वकृतानामश्नुते फलम् ।
परो निमित्तमात्रं स्यात् तद्दोषेषु गुणेषु च ॥३७॥

तद् दधीथा मनः साम्ये सुगतेर्मुख्यकारणम् ।
शरणं च तव चत्वारोऽर्हन्मुख्यास्ते च मङ्गलम् ॥३८॥

अज्ञानाच्च कुसङ्गाच्च यत् त्वयाऽकारि कर्हिचित् ।
पुण्यार्ह ! दुष्कृतं गर्ह तद् मङ्गलनिवर्हणम् ॥३९॥

सुगृहीतां च कुर्वीथाः सुगतिद्वारकुञ्चिकाम् ।
अप्रपञ्चमते ! पञ्चपरमेष्ठिनमस्क्रियाम्'' ॥४०॥

इत्येतया शुभध्यानसोपानमधिरोपितः ।
युगबाहुर्ययावुच्चैःपदं प्राणविनाकृतः ॥४१॥

ततः पितृशुचा **चन्द्रयशाः** सहपरिच्छदः ।
रुदन्नमन्दं प्रधानै रोदसीमप्यरोदयत् ॥४२॥

''दध्यौ **मदनरेखा** तु धिग् धिग् मे रूपसम्पदम् ।
ययास्मि गमिता हन्त हताशानर्थमीदृशम् ॥४३॥

असौ च शीलविध्वंसमशौचो मे करिष्यति ।
निहंस्यति च मे पुत्रमपि कान्तो यथा हतः ॥४४॥

साम्प्रतं साम्प्रतं तद् मे स्थानमत्र लवोऽपि न ।
गत्वा विदेशमाधास्ये परलोकहितं व्रतम्'' ॥४५॥

चिन्तयित्वेति सा पुत्रमप्यनापृच्छ्य सत्वरा ।
निःसृत्योद्यानतस्तस्मात् प्रचचाल दिशैकया ॥४६॥

पादयोः कण्टकैर्बाढं हृदये शोकशङ्कुना ।
पीड्यमाना ययौ मार्गे निशीथेऽह्नीव सा जवात् ॥४७॥

क्रमात् प्रापाटवीमेकां सानेकतरुगह्वराम् ।
तत्र मार्गमिवादेष्टुमुदियाय च भास्करः ॥४८॥

प्राचीमुखी प्रयान्ती सा **गङ्गे**वाङ्गवती सती ।
मध्याह्ने क्षीरनीरेशमिवैकं प्राप्य पल्वलम् ॥४९॥

प्रक्षाल्य मुखहस्तांह्रिं तत्र स्मृत्वा जिनक्रमान् ।
व्यधाद् वनफलैः प्राणवृत्तिं स्वापतितैः स्वयम् ॥५०॥

प्रत्याख्यायाथ सागारं लतागारगता क्वचित् ।
एषा **मदनरेखा**ध्वखिन्ना शयनमातनोत् ॥५१॥

अस्तं गते विभाकान्ते निशाध्वान्तेऽथं माद्यति ।
सिंहशार्दूलबूत्कारैर्निद्राऽस्या द्रागपासरत् ॥५२॥

ततो भिया नमस्काराञ्जपन्ती सा निशान्तरे ।
असूत मूर्त्तिमत्पुण्यमिव लोकस्तुतं सुतम् ॥५३॥

प्रातः कम्बलरत्नेन वेष्टयित्वा तमर्भकम् ।
कण्ठेऽस्य मुद्रिकां **यौगबाहवी**मवलम्ब्य च ॥५४॥

सरो **मदनरेखा**ऽगात् क्षालयित्वात्र वाससी ।
स्नातुं विवेश तोयान्तस्तोयदेवीव सा तदा ॥५५॥ युग्मम् ॥

ततो जलगजेनासौ लीलयोत्क्षिप्य शुण्डया ।
क्षिप्त्वा नभस्यरुन्धत्या द्वैराज्यं विदधे क्षणम् ॥५६॥

याता **नन्दीश्वरं** विद्याभृता केनापि सा दिवः ।
पतन्ती चातकेनेव तोयधारा प्रतीषिता ॥५७॥

क्रन्दन्ती करुणं तेन नीता **वैताढ्य**पर्वते ।
सोपरोधममुं दीना सा जगाद सगद्गदम् ॥५८॥

अद्याहं भो महासत्त्व ! प्रसूता निशि कानने ।
सुतं लतागृहे मुक्त्वा हताशाऽगां सरोवरे ॥५९॥

ततो जलगजेनाहमक्षेप्सि नभसि क्षणात् ।
निपतन्ती ततो दैवादासादयिषि च त्वया ॥६०॥

तदेको बालकः सोऽयं हंस्यते श्वापदेन हा !
आहाररहितो मृत्युं लप्स्यते स्वयमेव वा ॥६१॥
तदक्षेपाद् महासत्त्व ! पुत्रभिक्षां प्रयच्छ मे ।
तत्र मां नय तं वाऽत्र कृपापात्रं समानय ॥६२॥
विद्याधरोऽब्रवीत् कान्तं यदि मां प्रतिपद्यसे । 5
कर्ता तदा त्वदादेशमस्मि सारङ्गलोचने ! ॥६३॥
अन्यश्च सुभ्रु ! **गान्धार**देशे **रत्नावहे** पुरे ।
खगेन्दु**र्मणिचूडो**ऽभूत् प्रियास्य **कमलावती** ॥६४॥
तयो**र्मणिप्रभा**ख्योऽहमस्मि सूनुः शुचिस्मिते ! ।
तद् मां श्रेणीद्वयाधीशं कृत्वा तातोऽग्रहीद् व्रतम् ॥६५॥ 10
क्रमेण विहरन् सैष ह्य एवात्रागतोऽभवत् ।
साम्प्रतं तु गतो **नन्दीश्वरं** चैत्यानि वन्दितुम् ॥६६॥
मयापि गच्छता तत्र नभस्याऽऽसादि सुन्दरि ! ।
तद् मां पतिमुरीकृत्य भव विद्याधरेश्वरी ॥६७॥
अन्यच्च ते सुतं प्राप्य विपिनाद् **मिथिला**नृपः । 15
प्रीत्याऽऽर्पयद् महादेव्यै पाल्यमानोऽस्ति शोभने ! ॥६८॥
प्रज्ञप्त्येदं मयाऽज्ञायि विद्यया तत् प्रसीद मे ।
भुङ्क्ष्व भोगान् मया साकं पौलोमीव मरुवता ॥६९॥
श्रुत्वेत्यचिन्तयदसावहो ! मे कर्मणां दशा ।
यद् भवामि हहान्यान्यतरव्यसनभागिनी ॥७०॥ 20
विभूतयोऽपि मा भूवञ्शीलम्लानिपचेलिमाः ।
गेहदाहसमुद्भूतमुद्द्योतं कः समीहते ? ॥७१॥
ऋते पतिं सुशीलानां दारिद्र्यमपि मण्डनम् ।
न्याय्य एव सरोजिन्याः सङ्कोचस्तपनं विना ॥७२॥

तत् किमत्र विधेयं मे हुं कालहरणं किल ।
मिथ्यापि सत्यसन्धाया यत् तथ्याद् नातिरिच्यते ॥७३॥
निर्धार्येति जगादैनं **युगबाहु**पतिव्रता ।
नय **नन्दीश्वरं** मां तत् प्रियं तेऽपि विधास्यते ॥७४॥
ततः श्रुत्वेति विद्याभृद्ग्रामणीः स मणीमये ।
विमाने तां समारोप्यानन्दी **नन्दीश्वरं** ययौ ॥७५॥
तत्र प्रीतां द्विपञ्चाशञ्चैत्यानां शाश्वतार्हतः ।
ननामानर्च तुष्टाव सा भावरसिताशया ॥७६॥
मणिप्रभेण साकं सा **मणिचूड**मुनीश्वरम् ।
गत्वा नत्वा पुरोऽमुष्य निषसाद यथाविधि ॥७७॥
ततो **मदनरेखा**या मत्वा व्यतिकरं मुनिः ।
ज्ञानलोकाच्चतुर्ज्ञानी **मणिप्रभ**मबोधयत् ॥७८॥
अथो **मणिप्रभे**णैषा प्रबुद्धेन महात्मना ।
क्षामिता यामितां नीता प्रोक्ता किं तेऽधुना प्रियम् ? ॥७९॥
सोचे नातः परं किञ्चित् प्रियं बान्धव ! यत् त्वया ।
इदं **नन्दीश्वरं** तीर्थं समानेषि सुदुर्लभम् ॥८०॥
विमानमेकमायासीदसमानमिहान्तरे ।
तन्मणीकिङ्किणीक्वाणडामरं चलचामरम् ॥८१॥
तस्माद् विनिर्ययावेकः प्रभया भासुरः सुरः ।
हार-केयूर-कोटीर-कुण्डलादिविभूषणः ॥८२॥
तां सतीं त्रिः परीयासौ पुरो नत्वातिभक्तितः ।
ततोऽनमद् मुनिं तस्य पुरतो निषसाद च ॥८३॥
अथ विद्याधरेणैव विस्मितेनेति भाषितः ।
देव ! कोऽयं त्वया चक्रे विनयातिक्रमः क्रमः ? ॥८४॥

''अथ देवोऽब्रवीदेवं **युगबाहु**रहं पुरा ।
भ्रात्रा **मणिरथे**नोर्वीभृताऽसिलतया हतः ॥८५॥
ततः कण्ठगतप्राणोऽनया **मदनरेखया** ।
प्रियया प्रीणितो जैनधर्माख्यामृतधारया ॥८६॥
ततः समाधियोगेन मुक्तमर्त्यकलेवरः ।
ब्रह्मलोकेऽभवं सोऽहमिन्द्रसामानिकः सुरः ॥८७॥
धर्माचार्या ममेयं यत् तेनादौ प्रणता मया ।
श्रुत्वेति खेचरो धर्ममहिमानममोदत'' ॥८८॥
मुदा **मदनरेखां** च **युगबाहु**सुरो जगौ ।
साधर्मिके ! प्रियं किं ते क्रियतामद्य शाधि माम् ? ॥८९॥
सापि तं निजगादेति प्रियं मुक्तिपदं मम ।
तद् नान्तरेण सर्वज्ञमपरो दातुमीश्वरः ॥९०॥
तथापि **मिथिला**पुर्यां नय मां त्रिदशोत्तम ! ।
तत्र पुत्रमुखं दृष्ट्वा यतिष्ये यतिकर्मणि ॥९१॥
ततोऽसौ तत्क्षणादेव देवेन **मिथिला**पुरीम् ।
नीता नत्वात्र चैत्यानि ययौ साध्वीप्रतिश्रये ॥९२॥
तत्र प्रवर्त्तिनीपादानसौ नत्वोपविश्य च ।
शुश्राव देशनां मोहतमःकदनकौमुदीम् ॥९३॥
ततः पुत्रमुखं द्रष्टुं देवेन भणितांहसा ।
किं मोहहेतुनाऽनेनेत्युक्तः सोऽपि दिवं ययौ ॥९४॥
आदाय **मदनरेखा** व्रतमथ तत्र प्रवर्त्तिनीपार्श्वे ।
तपसा कर्मविनाशादासादयति स्म मुक्तिं सा ॥९५॥

॥ इति मदनरेखाकथा ॥

● ● ●

अथ **दवदन्ती**कथा —

§§ आस्ते पुरं **कुण्डन**मित्यपाचीदिगङ्गनाभालविभूषणाभम् ।
यत्रोरमुक्तापरिवेषवेषं प्राकारसानूनि समाश्रयन्ति ॥१॥

विहाय रम्यं पुरमेतदज्ञाः किमत्र यूयं वसथेति यस्य ।
चैत्यानि लेगुर्दिवि दण्डबाहूनुदस्य सन्देष्टुमिवामरेभ्यः ॥२॥

प्रक्रीडमानाः स्वगृहाङ्गणेषु कुमारिकास्तारकतारभांसि ।
रत्नान्यहो ! खेलनकर्करत्वं कर्केतनादीनि नयन्ति यत्र ॥३॥

सुतम्बकीभावकलामलावस्तनावनभ्रान्तरमुष्टिकत्राम् (?) ।
गुणप्रवीणां रचयन्ति वीणां प्रियां च पौरा न हि यत्र दूरात् ॥४॥

त्रिवर्गसारेऽत्र **विदर्भ**देशे विकस्वराभ्भोरुहकर्णिकाभे ।
राजाऽभवद् **भीम** इति प्रसिद्धः सिद्धाङ्गनागीतगुणाप्रशक्तिः ॥५॥

यस्य द्विषत्क्षत्रकुलापकीर्तिभृङ्गीभृतो दिग्वनितावसंतान् ।
यशःप्रसूनोपचितानकार्षीत् करालवाले करवालवल्ली ॥६॥

गङ्गेव सिन्धो रुगिवाब्जबन्धोः शचीव जिष्णोः कमलेव विष्णोः ।
तस्य प्रशस्या किल पुष्पदन्ती दन्तीश्वरस्याभ्रमुवत् प्रियाऽऽसीत् ॥७॥

तस्यां च तस्याङ्गभवा दवार्त्तदन्त्यागमस्वप्ननिवेदितर्द्धिः ।
बभूव नाम्ना **दवदन्त्य**भिज्ञा कलासु सर्वास्वपि शारदेव ॥८॥

प्राग्भाग्यसर्वावसरासनं तद्भालेऽतिभास्वांस्तिलकश्चकाशे ।
भ्रूचीनचारुणि जगन्ति जेतुमाविष्कृतं चक्रमिव स्मरेण ॥९॥

प्राक्पुण्यतः शासनदेवताऽऽविर्भूयैकदा तामिदमब्रवीच्च ।
श्री**शान्तिनाथ**स्य भविष्यतीर्थकृतस्त्वमेतां प्रतिमां यजेथाः ॥१०॥

इतीरयित्वा करपद्मकोशे तस्या जिनार्चामपि तां निवेश्य ।
तिरोदधे शासनदेवता सा भेजे च **भैमी** शिरसा तदाज्ञाम् ॥११॥

सा पूजयन्ती जिनमार्यिकाभ्यो जैनं च धर्माक्षरमाददाना ।
द्वेधापि बाल्यं परिहृत्य भेजे वयो मनश्चापि समं प्रबुद्धम् ॥१२॥

तदीयरूपर्द्धिकलानुरूपं **विदर्भनाथे** वरमीक्षमाणे ।
बभूव साष्टादशवर्षदेश्या विज्ञानलेश्यानिकषो विधातुः ॥१३॥
वरं विदग्धा नृवरेषु वीक्ष्य भृङ्गीव पद्मेषु नवारविन्दम् ।
गृह्णात्वसावित्यथ पार्थवेन्द्रः स्वयंवरामण्डपमाततान ॥१४॥
विदर्भराजार्थितया दिगन्तभूपाललोकः सकलोऽपि तत्र । 5
सम्प्रापदेतां परिणेतुकामः श्रियं यथा स्वर्गिगणः पयोधौ ॥१५॥
एकैकशस्तानभियानपूर्वं सम्मान्य सर्वान् नृपतीनुपेतान् ।
निवासयामास नृवासवोऽयं स्वपत्तनोपान्तवनावनीषु ॥१६॥
गर्जन्तमूर्जस्वलतूर्यनादैर्नृत्यन्तमुच्चैर्ध्वजधोरणीभिः ।
उद्धूपधूमैः पुलकं दधानं हसन्तमुल्लोचमणिप्रभाभिः ॥१७॥ 10
वायूल्लसद्वन्दनमालिकाभिर्भ्रूक्षेपनर्माणि विपञ्चयन्तम् ।
तं मूर्त्तमानन्दमिवाथ भूपाः स्वयंवरामण्डपमभ्यपेयुः ॥१८॥ युग्मम् ॥
तस्मिन्नमी दत्तमहासनेषु मञ्चेषु पञ्चेषुरसोत्तरङ्गाः ।
शृङ्गारभाजो विविधेङ्गितेन वैदग्ध्यभङ्गीमवतारयन्तः ॥१९॥
कश्चित् तदा स्वप्रतिबिम्बलक्ष्मीं तिर्यग्मणिस्तम्भगतां दिदृक्षुः । 15
त्रिकं विवित्यैकभुजाभिषङ्गी सुहृज्जनालापमिषं सिषेवे ॥२०॥
कश्चित् रत्नाञ्चितमुष्टिरम्यां क्षुरीं परेषामभिदर्शयिष्यन् ।
दृष्ट्या च मुष्ट्यावधृतां तदानीमनीनृतद् व्योमनिबद्धलक्षः ॥२१॥
कश्चित् तदा गुम्फितपुष्पगुच्छमुच्छालयामास मुहुः करेण ।
भैमीकरग्राहकदाग्रहेण दिवः कलानाथमिवापतन्तम् ॥२२॥ 20
कश्चिच्च सिंहासनसंनिविष्टस्तटस्थमात्मीयकरङ्कवाहम् ।
तत्कन्धरान्यस्तभुजस्तदानीं स्मरप्रहारार्त्त इवाललम्बे ॥२३॥
कश्चित् तदापाणिपुटस्थनालमुद्भ्रामयंश्चक्रमिवारविन्दम् ।
क्षरन्मरन्दच्छलतः श्रियोऽब्धिभुवोऽभितः श्रोत्रजलं निरास्थत् ॥२४॥

कश्चित् कराङ्गुष्ठनखेन रेखास्तदाऽकरोत् केतकपत्रिकायाम् ।
भीमात्मजावीक्षणशर्मणोऽर्वाक्संख्यानिव स्वोच्छ्वसितान्तरायान् ॥२५॥

अत्रान्तरेऽधिष्ठतयाप्ययाना लक्ष्मीर्यथा मन्दरकन्दरस्था ।
उद्वीज्यमानावसरैरुदारैर्वृता सखीभिर्विधृतातपत्रा ॥२६॥

चीनैर्नवीनैरनणीयसीभिः प्रणीतवेषा परितो मणीभिः ।
भैमी दधाना वरदाम पाणौ स्वयंवरामण्डपमाजगाम ॥२७॥ युग्मम् ॥

ततोऽखिलानां समकालमेव तस्यां दृशः पेतुरिलापतीनाम् ।
पुष्पद्रुमाणां परितोऽपि भृङ्गा नवोदितायामिव हेमजात्याम् ॥२८॥

देवि ! प्रसादं कुरु दृष्टिदानादितो**ऽरिसिंहो जितशत्रु**सूनुः ।
रूपेण मारः किल **सुंसुमारपुरे**श्वरोऽयं **दधिपर्ण**नामा ॥३०॥

असाव**पीक्ष्वाकु**कुलावतंस**श्चन्द्राङ्ग**जन्मा ननु **चन्द्रराजः** ।
चम्पेश्वरोऽयं च **सुबाहु**नामा भोगान्ववायी **धरणेन्द्र**सूनुः ॥३१॥

अयं च **रोहीतक**देशनाथश्चन्द्रानने ! **चन्द्रकिरीटन**ामा ।
निर्लाञ्छनोऽसौ शशलाञ्छनाख्यो**ऽरिकेसरि**क्षोणिपतेस्तनूजः ॥३२॥

स्वच्छाशयेऽसौ **भृगुकच्छ**नाथो नृदेवरत्नं ननु **यज्ञदेवः** ।
सौराष्ट्रभूमीपतिरत्युदारः क्षोणितटेऽसौ **मुकुटेश्व**राख्यः ॥३३॥

अमीषु यस्मिन् मनसो रसस्ते पतिंवरे ! तं पतिमाद्रियस्व ।
इति ब्रुवाणा प्रतिहाररक्षीं भ्रूसञ्ज्ञया प्रेरयति स्म **भैमी** ॥३४॥

तत्कौमुदीवेन्दुमुखी प्रयान्ती यं यं व्यतीयाय पतीयती सा ।
स स क्षमाभृत् तिमिरैर्निमीलद्दृक्कैरवो गुण्ठितमाततान ॥३५॥

गत्वाथ मञ्चान्तलसंचितभ्रूयुगां जगौ तामिति वेत्रधारी ।
अदभ्रधीपात्रि ! **विदर्भ**पुत्रि ! दृष्टिप्रसादादवधारयेस्त्वम् ॥३६॥

युगादिनाथान्वयभूर्नयात्तसुकौशलः **कोशल**भूमिपालः ।
ज्ञेयस्तवायं तपनीयवर्णे ! द्विषां निषेधो **निषधा**भिधानः ॥३७॥

जानूपवर्ती प्रबलो **नलो**ऽयं श्रीदक्षिणो बाहुरिवास्य सूनुः ।
अयं च वामो द्विषतां द्वितीयोऽप्यक्रूरधीः **कूबर**नामधेयः ॥३८॥
तदेतयोः कामवतंसयोर्वा चन्द्रार्कयोर्वाहरिचक्रिणोर्वा ।
वुवूर्षसे यं वरवर्णिनि ! त्वं तत्कण्ठपीठे वरदाम धेहि ॥३९॥
नलस्य भैमी गलकन्दलेऽथ न्यास्थत् प्रमोदाद् वरदाम सद्यः । 5
अग्रे गुरुणां त्रपया स्वबाहुगाढोपगूहप्रतिहस्तकोहम् ॥४०॥
तदा व्यजृम्भन्त च साधु साधु वृतं **विदर्भा**ङ्गभुवेति वाचः ।
बद्धक्रुधोऽपि क्षितिपा **नले**ऽन्येशाम्यंश्च तस्याः सुकृतप्रभावात् ॥४१॥
अथाशु **भीमे**न महीभुजस्ते सम्मान्य सम्मान्य महोपदाभिः ।
निजार्थसंसिद्धिमता विसृष्टाः स्वमण्डलाद् मन्त्रविदेव चेटाः ॥४२॥ 10
ततः शुभेऽह्नि स्मरमीशदग्धमुज्जीवयन्तीषु वधूषु गीत्या ।
कलृप्तातिदृप्तोत्सवतः स्वपुत्रीमुद्वाहयामास **नले**न **भीमः** ॥४३॥
नलाय तेजोविजितानलाय **भीमः** स्वपुत्रीकरमोचनेऽथ ।
ददौ सदौचित्यविदेष हस्तिहयादिहेमादिकमात्मशक्त्या ॥४४॥
तौ कङ्कणोद्भासिकरौ कुलार्यागीतौ गृहे चैत्यमवन्दिषाताम् । 15
ततश्च **भीमो निषधश्च** भूपौ तत्कङ्कणोच्छोटनमाचरेताम् ॥४५॥
अथ प्रयान्तं **निषधं** सपुत्रमपि स्वदेशाय **विदर्भराजः** ।
अनुप्रयातो विधिवद् निवृत्स्यन् कृतप्रणामामशिषत् स्वपुत्रीम् ॥४६॥
वत्सेऽनुशास्तिस्त्वयि पूष्णि दीपस्तथापि मोहात् कियदादिशामि ।
त्याक्षीर्नलं मा व्यसेनऽपि यस्मात् **"कुलाङ्गनानां पतिरेव देवः"** ॥४७॥ 20
§§ **भीमे**ऽनुशास्येति सुतां निवृत्तेऽधिरोप्य तामात्मरथं **नलो**ऽपि ।
~~चचाल सेनाश्वखुरक्षतक्ष्मारजोभिराशास्तिरयन् दशापि~~ ॥४८॥
ततः स्वपुर्यां **निषधा**धिपस्य यातोऽन्तराऽस्तं तरणिः प्रपेदे ।
ब्रह्माण्डभाण्डं परितोऽप्यपूरि नीलीरसेनेव च तामसेन ॥४९॥

तथापि नासौ गमनाद् व्यरंसीद् बलीयसी हि स्वभुवो दिदृक्षा ।
निजाङ्कपल्यङ्कतले शयाना **नलेन भैमी**ति ततो बभाषे ॥५५॥

देवि ! प्रबुध्यस्व बलं न यातुमीष्टे बतान्धङ्करणैस्तमोभिः ।
प्रकाशय स्वं तिलकं तदुच्चैः सहस्रभानोर्युवराजकल्पम् ॥५१॥

देव्या ललाटं परिमृज्य क्लृप्ते तमःप्रतीपे तिलकप्रदीपे ।
ततोऽचलत् तस्य चमूस्**तमिस्रा**मध्येऽपि सा चक्रिवरूथिनीव ॥५२॥

नलो महात्मा तमलोकताथ मुनीन्द्रमेकं प्रतिमास्थमग्रे ।
वनेभघर्षाहितदानलेपलीलैः सहस्राक्षभिव द्विरेफैः ॥५३॥

भक्त्या सभार्योऽपि **नलो**ऽवतीर्य रथादथामुं मुनिमाननाम ।
ध्यानाद् निरस्तैरिव कर्मवीरैर्व्याख्यायमानं भ्रमरै रणद्भिः ॥५४॥

ततः पुनस्तद्गुणकीर्तनेन निकृत्तपापः सपरिग्रहोऽपि ।
रथं समारुह्य महारथोऽसावरीणसैन्यः स्वपुरीमियाय ॥५५॥

विवेश तस्यामथ **कोशला**यां पुरस्कृतोऽसौ **निषधे**न पित्रा ।
भैम्या समं स्वं पुरभामिनीभ्यो व्याख्यापयन् पूर्णिमयेव चन्द्रः ॥५६॥

नलं तथा **कूबर**मात्मपुत्रं निवेश्य राज्येऽपि च यौवराज्ये ।
निषिद्धकल्को **निषधः** क्रमेण शमैकसाम्राज्यमुरीचकार ॥५७॥

ततोऽष्टदिग्गोपुरशालमानविशालवेलावनशैलशालाम् ।
पयोधिलेखापरिखां सुखेन **नलः** शशासैकपुरीमिवोर्वीम् ॥५८॥

येनाजिभूमौ नृपकुञ्जरेण धनुर्लतायाः करकम्पितायाः ।
शिलीमुखैराशुगतिप्रयातैर्वंशा व्यकीर्यन्त महीधराणाम् ॥५६॥

तं **कूबरः** क्रूरमनाश्छलज्ञः सुवत्सलं द्यूतपथे निनाय ।
भैम्या निषिद्धोऽपि हि **नैषधि**स्तन्नैष व्यरंसीदिह शीर्णबुद्धिः ॥६०॥

मोहाकुलः सैष **नलः** क्रमेण प्रकीडमानः सह **कूबरे**ण ।
अहारयत् प्राज्यमपीह राज्यमहो ! विधातुर्विषमं चरित्रम् ॥६१॥

कालेन साक्षादिव **कूबरे**ण वसूनि सर्वाण्यपनीय मुक्तः ।
नलोऽथ शीतांशुरिवैक एव क्रन्दत्सु पक्षिष्विव नागरेषु ॥६२॥

देशान्तरं याति **नले**ऽथ **भैमी** छायामिवास्यानुपदं प्रयान्ती ।
नलानुजः प्राह मृगाक्षि ! मा गा **नले**न यस्मादसि हारिता त्वम् ॥६३॥

वदन्निदं सोऽभिदधे प्रधानैः किं **कूबर** ! क्रूरमते ! करोषि ।
यद् भ्रातृजाया जननीव मान्याऽस्याः शापतो वा भवितासि भस्म ॥६४॥

तैरेवमुक्तः स जवेन **भैमी** रथे निवेश्यानुनलं न्ययुङ्क्त ।
नलोऽप्यथ त्यक्तरथः सभार्यश्चचाल पादैः पृथिवीं पुनानः ॥६५॥

हा हा हताः स्मो हतवेधसेति विलापिनीनां परितः प्रजानाम् ।
बाष्पाम्बुभिस्तन्निगमस्तदानीमाजानुजम्बालसमाकुलोऽभूत् ॥६६॥

पुरोपकण्ठेऽथ **नला**नुयातानमात्यपौरप्रभृतीन् निवर्त्य ।
कुती पुरस्कृत्य च सत्यमेव **भैम्या**ऽनुयातोऽभि वनं प्रतस्थे ॥६७॥

मार्गः सदर्भो मसृणं प्रयाहि धर्मः कठोरश्च शिरः पिधेहि ।
भैमीति साश्रुः पथिकाङ्गनाभिः सा शिक्षिता वर्त्मनि वीक्षिता च ॥६८॥

अशिश्वयत् पद्ममपीप्यदम्भो व्यशिश्रमत् प्रीतिकलो **नलो**ऽपि ।
दत्त्वा च बाहां दत मन्दमन्दमचीचलच्चञ्चललोचनां ताम् ॥६९॥

उपेयतुस्तावटवीमथैकामेकान्तभीमां तरुमालिकाभिः ।
आगोत्रजन्माविदितेन्दुसूर्यः पातालवासीव जनो यदीयः ॥७०॥

विनीतवाक् तत्र **विदर्भ**पुत्री **नलं** निपत्य क्रमयोरवादीत् ।
प्रसीद संपादय नाथ ! पादन्यासेन मत्तातपुरं पवित्रम् ॥७१॥

नलोऽथ तामाह यदात्थ देवि ! करिष्यते श्वस्तनवासरे तत् ।
सापि प्रियेण प्रतिपन्नमेतद् निशम्य सम्यग् हृदि पिप्रिये च ॥७२॥

इहान्तरे न्यस्तसमस्तवैभवो नवोदितो राजनि सज्जलाञ्छने ।
नलो यथा **भीमभुवा** दिनश्रिया श्रितोऽभि देशान्तरमंशुमानगात् ॥७३॥

तमो नीलीनीलं यदशितमनेनाङ्कभिषतस्,
तदन्तःस्थं काचात्मक इव करीरः प्रकटयन् ।
ततोऽंशुप्रस्तारैर्नलसहचरीशीलविशदै-
र्दिशश्चक्रे चन्द्रः समदकुमुदामोदमुदिताः ॥७४॥

॥ इति दवदन्तीललितनामनि महाकाव्ये प्रथमः सर्गः ॥

● ● ●

§§ अथोत्तरीयमाधाय पल्यङ्कं पार्थिवाग्रणीः ।
भुजोपधानमेवाप स्वापमङ्गनया सह ॥१॥
निशीथे पृथिवीनाथो निद्रास्पृशि मृगीदृशि ।
अचिन्तयच्चिरं चित्ते नियत्वा निहतोद्यमः ॥२॥
आकारयिष्यति प्रातः प्रिया निजपितुर्गृहे ।
श्रयन्ते श्वशुरं नीचास्तत् क्व यामि करोमि किम् ? ॥३॥
श्वः करिष्यामि यद् देवि ! वक्तासीति प्रतिश्रुतम् ।
वाक्यं दाक्षिण्यसम्भूतं तद् मनोऽतिदुनोति मे ॥४॥
यदि सुप्तां त्यजाम्येतां तद्दिशाऽपैति दुर्यशः ।
अन्यथा मामियं प्रातः प्रापयत्येव **कुण्डिनम्** ॥५॥
स्वशीलरक्षितामेतां वरं मुञ्चामि भामिनीम् ।
न **कुण्डिनी**गतो दैन्यमन्दो मन्दाक्षमुद्वहे ॥६॥
निश्चित्येति **नलः** कान्ताकपोलतलतः करम् ।
मन्दं चकर्ष निर्यातुमवाञ्छन्तमिव प्रियाम् ॥७॥
उत्तरीयस्य पर्यङ्कीकृतस्य ग्रहणेच्छया ।
आचकर्ष ततः शस्त्रीं निस्त्रिंशत्वेन सत्रपः ॥८॥

बाष्पोर्मिरुद्धदृग्वर्त्मा शुचा गलितचेतनः ।
वसनाय करं व्योम्नि न्ययुक्त व्याकुलो **नलः** ॥९॥

तस्य ध्यात्वा क्षणेनाक्ष्णी परिमार्ज्यैकपाणिना ।
चेलं चिकर्त्तिषोः कम्पाद् निपपात क्षुरी करात् ॥१०॥

पुनः कृपाणिकां पाणौ गृहीत्वा दुर्मनायितः । 5
मन्दस्वरं जगौ दुःखोत्सेधरुद्धगलो **नलः** ॥११॥

दमयन्त्या वनत्यागे स्वपत्न्या मत्करग्रहात् ।
अपि निस्त्रिंशपुत्रीयं पपात भुवि धिग् **नलम्** ॥१२॥

धाराधिरूढविज्ञाने ! सद्वंशे ! स्निग्धतानिधे ! ।
निष्कृपस्य कुकार्येऽपि कृपाणि ! कुरु मे कृपाम् ॥१३॥ 10

इत्युक्त्वा क्षणमुद्धृत्य धैर्यं वैक्लव्यतो **नलः** ।
चकर्त्त चीवरं प्रेमबन्धनेन समं तदा ॥१४॥

अथ देव्या मुखाम्भोजमालोकयितुमुन्मनाः ।
ममार्ज पाणिना भालमुन्मीलत्तिलकप्रभम् ॥१५॥

अथाध्यायद् **नलो** मुग्धामुखस्याहो महो महान् । 15
येन जागर्त्ति शेते वा नेति निश्चिनुते मतिः ॥१६॥

''उवाच देवि ! त्वद्वक्त्रालोके भाग्यं न मे दृशोः ।
न च त्वत्परिचर्यायां योग्यतापि हतात्मनः ॥१७॥

प्रियाननोपरिन्यस्तदृष्टिरेवं वदन् **नलः** ।
दधौ हस्तेन बाष्पाम्भस्तत्प्रबोधभयाद् मुहुः ॥१८॥ 20

अकृपः सकृपे ! गोत्रकलङ्कः कुलदीपिके !
दुराचारः सदाचारे ! कृर्वे नतिमपश्चिमाम् ॥१९॥

देवि ! त्वच्चरितेनेन्दुरकलङ्कः किलाभवत् ।
अन्ववायगुरुः किन्तु मद्वृत्तेन कलङ्कितः ॥२०॥

अहो ! अभीरुर्बलवान् यद् भीरुमबलां **नलः** ।
मुक्त्वा वनान्तरे याति स्वयं वसति पत्तने'' ॥२१॥

ब्रुवन्निति क्षतस्वाङ्गक्षरत्क्षतजरेखया ।
अक्षराण्यलिखद् दीनो देव्याश्चेलाञ्चले **नलः** ॥२२॥

''**विदर्भे**षु वटेनाध्वा वामे ! वामेन गच्छति ।
दक्षिणे ! दक्षिणैरेतैः **कोशला**यां तु किंशुकैः ॥२३॥

यत्र ते प्रतिभात्येव तत्र देवि ! स्वयं व्रजेः ।
आत्मानं दर्शयिष्येऽहमुत्तमे ! न तवाधमः'' ॥२४॥

लिखित्वेति **नलो** मन्दपदपातमथाचलत् ।
पिबन् मुखाम्बुजं देव्या दृग्भ्यां वलितकन्धरः ॥२५॥

रक्षामि शयितां यावद् यामिनीं स्वामिनीमिति ।
नलः पश्यन् प्रियां वल्लीमण्डलान्तरितः स्थितः ॥२६॥

बिभातायां विभावर्यां देव्या जागरणक्षणे ।
मृदुद्रुतपदापातमचलद् **नल**भूपतिः ॥२७॥

''अथो हृदयसन्तापं स्फुटीभूतमिवात्मनः ।
नलो व्यलोकयद् दावानलं ज्वलितमग्रतः ॥२८॥

सूर्यवंशनरोत्तंस ! निषधक्ष्मापनन्दन ! ।
महाबल ! नल ! त्राणदक्ष ! संरक्ष मां दवात्'' ॥२९॥

इत्याकर्ण्य गिरं दावानलमध्ये स्थितां **नलः** ।
अचिन्तयदिदं वेत्ति कोऽत्र मां निर्जने वने ? ॥३०॥

अथोवाच नृपः कस्त्वं मां परिज्ञाय भाषसे ? ।
इत्युक्ते पुनरुद्भूता भारती दावपावकात् ॥३१॥

भुजगोऽहमदग्धायां वल्लौ संकुचितः स्थितः ।
निर्गन्तुं भूमितापेन न शक्नोमि दवानलात् ॥३२॥

उपकारं करिष्यामि महान्तं ते महीपते ! ।
मूर्त्तादिव यमक्रोधादग्नेस्तत् कर्ष कर्ष माम् ॥३३॥
इत्याकर्ण्य विलोक्यानाथ पटप्रान्तं नृपोऽक्षिपत् ।
सर्पे तदग्रमारूढे क्षणेन पुनराकृषत् ॥३४॥
अथ निःसृत एवास्य भुजाग्रं भुजगोऽदशत् ।
तदात्वमेव कुब्जत्वमाससाद ततो **नलः** ॥३५॥
दृष्ट्वाऽथ भूपः स्वं रूपं दध्यौ दृष्टं मया रयात् ।
धिग् देवीत्यागपापद्रुफलोत्पत्तिप्रसूनकम् ॥३६॥
अधुना वनमायान्त्या देव्या यादृक् कृतो मया ।
उपकारोऽमुना तादृग् दवाकृष्टेन मे कृतः ॥३७॥
"सवैलक्ष्यं हसन्नाह सरीसृपमथो नृपः ।
उपकारस्त्वयाऽकारि स्वस्ति ते गम्यतामिति ॥३८॥
अथ कोऽप्यग्रतो भूत्वा प्रीतः प्राह नरो नृपम् ।
वत्स ! जानीहि मां देवीभूतं पितरमात्मनः ॥३९॥
भास्वन्तं दुर्दिनेऽपि त्वां तेजसा मा स्म शत्रवः ।
जानन्तु हन्त तेन त्वं मया नीतोऽसि कुब्जताम् ॥४०॥
करण्डकं च बिल्वं चादत्स्वैतत् प्रयतोऽंशुके ।
कुण्डले परिधाय त्वं निजं रूपमिवाप्स्यसि" ॥४१॥
इत्थं समर्पयन्नेव देवः प्राह पुनः सुतम् ।
क्व भवन्तं विमुञ्चामि पादचारो हि दुःखदः ॥४२॥
सुंसुमारपुरे मुञ्च **नले**नेत्थमथोदिते ।
देवः क्वचिद् ययौ स्वं च तत्रापश्यदसौ नृपः ॥४३॥
अकस्माद् विस्मयस्मेरस्तत् पश्यन् पुरतः पुरम् ।
यावच्चलति सोऽश्रौषीत् तावत् कलकलं पुरः ॥४४॥

ततः किमेतदित्यन्तश्चिन्तयत्याकुले **नले** ।
नश्यतां नश्यतामित्थमूचुरुच्चैस्तुरङ्गिणः ॥४५॥
स्पर्धयेव प्रधावन्तीं घ्नन्तं छायामपि स्वकाम् ।
मुहुः कृताकृतस्पर्शं वायुनापि भयादिव ॥४६॥
उदस्तशुण्डमुड्डीनानपि खण्डयितुं खगान् ।
क्षयोत्क्षिप्तमहादण्डमिव दण्डधरं क्रुधा ॥४७॥
धर्मपुत्रानिवाब्दस्य स्वशब्दस्पर्धिनोऽध्वनि ।
भिन्दन्तं दन्तघातेन पादपांश्च पदे पदे ॥४८॥
मूर्धातिधूननैर्गण्डप्रोड्डीनालिकुलच्छलात् ।
क्षिपन्तं खण्डशः कृत्वा व्योमाङ्गणमपि क्षणात् ॥४९॥
क्वचित् कुञ्चितभूखण्डमुद्दण्डगतिडम्बरैः ।
व्यालं विलोकयामास **नलः** प्रबलविक्रमम् ॥५०॥ पञ्चभिः कुलकम् ॥
ऊर्ध्वीकृत्य भुजामुर्वीभुजा बाहुयुजा ततः ।
व्याहृतं **दधिपर्णेन** क्षणाव्याकुलचेतसा ॥५१॥
यः कोऽपि कोपिनममुं करिणं कुरुते वशे ।
लक्ष्मीं तनोमि तद्गेहोत्सङ्गरङ्गकनर्त्तकीम् ॥५२॥
अथाकर्ण्येति कुतुकात् सत्वरं प्राचलद् **नलः** ।
कालप्रायमपि व्यालं मन्यमानः शृगालवत् ॥५३॥
भो कुब्ज कुब्ज ! कीनाशमुखे मा विश मा विश ।
इत्युक्तोऽपि जनैर्धीरः केशरीव ययौ गजम् ॥५४॥
रे रे शुण्डाल ! मा बालविप्रधेनुवधूर्वधीः ।
एह्येहि मददुर्दान्त ! दान्ततां दर्शयामि ते ॥५५॥
चलन्तमिति वाचालं कोपादनुचचाल तम् ।
करी कराग्रविक्षेपप्राप्ता (प्रा ?)प्तशरोरुहम् ॥५६॥

पतन्नुद्यन् मिलन् नश्यन् निघ्नन् घातं च वञ्चयन् ।
अङ्गुष्ठाङ्गुलिसम्मर्दैरर्दयन् पुष्करं छलात् ॥५७॥
भ्रान्त्वा दक्षिणपक्षेण चक्रवद् भ्रामयन् मुहुः ।
चतुर्णामपि पादानां प्रविश्याधो विनिःसरन् ॥५८॥
निमेषार्धात् पुरः पश्चात् पक्षयोश्च स्फुरन् **नलः** । 5
खेदयामासिवानेकोऽप्यनेकवदनेकपम् ॥५९॥ विशेषकम् ॥
सोऽथ खिन्नमपि क्रोधाद् धावन्तं द्विपमुन्मदम् ।
वशीकर्तुं पटीं मूर्त्तामिव प्रज्ञां पुरेऽक्षिपत् ॥६०॥
रूपबुद्ध्याऽथ तां हन्तुं विलसन्तं मतङ्गजम् ।
दन्तन्यस्तपदः शैले केशरीवारुरोह सः ॥६१॥ 10
कलापकान्तरन्यस्तपदस्तदनु दन्तिनम् ।
सृणिमादाय रोमाञ्चकववी तमवीवलत् ॥६२॥
पुरस्य कृपया कोऽपि किमसावाययौ सुरः ।
स्वयम्भूरथवा पौरपुण्यपूरैरसावभूत् ॥६३॥
अभ्रमूवल्लभस्पर्धिवर्धितद्विपराक्रमः । 15
ययौ भुवनभीमोऽपि गजोऽयं यस्य वश्यताम् ॥६४॥
इत्थं परस्परं पौरैः प्रीतिगौरैः पदे पदे ।
कुब्जोऽपि स्तूयमानश्च वीक्ष्यमाणश्च रेजिवान् ॥६५॥ विशेषकम् ॥
प्रजात्मा स्वयमारुह्य गोपुरं पुरनायकः ।
तस्याधो गच्छटतः कण्ठे दाम रत्नमयं न्यधात् ॥६६॥ 20
अथोपनीय शालायां गजमाकलयन्**नलः** ।
लीलाविलोलशुण्डाग्रग्राहिताहारपिण्डकम् ॥६७॥
प्रीतः प्रदाय रत्नानि वसनाभरणानि च ।
अथ मित्रगिरोर्वीशः पुरः कुब्जं न्यवीविशत् ॥६८॥

कुतस्तव कलाभ्यासः कस्त्वं वससि कुत्र च ।
पृष्टो राज्ञेति हृष्टेन **नल**भूपतिरभ्यधात् ॥६९॥

सूपकारो **नलस्या**हं प्रियो हुण्डिकसञ्ज्ञकः ।
[शिक्षितास्तत्समीपे च कलाः कतिपया मया ॥ ७०॥

नलो भ्रात्रा **कूबरे**ण जितो द्यूतेऽखिलां महिम् ।
दवदन्तीमुपादाय प्रपेदेऽरण्यवासिताम् ॥७१॥

सभार्यः स मृतस्तत्र ततोऽहं त्वामुपागमम् ।
मायाविनमपात्रज्ञं श्रितोऽस्मि न तु **कूबर**म् ॥७२॥]

इति श्रुत्वा **नल**क्ष्मापवार्तामार्त्तारवोऽरुदत् ।
दधिपर्णेऽंशुकच्छन्नवदनः सपरिच्छदः ॥७३॥

कृत्वा **नल**स्य पर्यन्तकृत्यानि कृतिनां वरः ।
अधारयच्चिरं चित्ते **दधिपर्ण**नृपः शुचम् ॥७४॥

रसवत्या **नलः** सूर्यपाकया नृपमन्यदा ।
अप्रीणयद् यथायुक्तरसप्रसरपुष्टया ॥७५॥

अथ वासांसि रत्नानि तस्मै भूरिणी भूपतिः ।
ग्रामपञ्चशतीं टङ्कलक्षं च नृपतिर्ददौ ॥७६॥

राज्यं ययौ **नल**स्यापि ग्रामैर्नाम करोमि किम् ? ।
तं कुब्जमिति जल्पन्तं प्रीतः प्राह पुनर्नृपः ॥७७॥

प्रीतोऽस्मि तव सत्त्वेन सत्त्वाधिकशिरोमणे ! ।
याच्यतां रुचितं किञ्चिदित्युक्तेऽभिदधे **नलः** ॥७८॥

मृगव्यमदिराद्यूतव्यसनानि तव सीमनि ।
यावज्जीवं निषेध्यानि, श्रुत्वेदं तद् व्यधाद् नृपः ॥७९॥

दधिपर्णमहाभुजाः **नलः** कृतसौहार्दसुशीतलो बहिः ।
चिरमस्थित **भीमनन्दिनी**विरहर्त्तिज्वलितोऽन्तरा पुनः ॥८०॥

॥ इति दमयन्तीललितनाम्नि महाकाव्ये द्वितीयः सर्गः ॥

● ● ●

§§ अथागतः संसदि **सुंसुमार**भूपं द्विजन्मेति जगाद कश्चन ।
उपेत**भैमी**वचसा ससर्ज मां **विदर्भराजो नल**शुद्धये त्वयि ॥१॥
विदर्भजा जीवति यत्किलोत्तमा **नलो**ऽपि तज्जीवति विश्वजीवितम् ।
इति प्रमोदाद् **दधिपर्ण**पार्थिवस्तमाह विप्रं स्मितबन्धुराधरः ॥२॥
ममैव राज्ये **नल**सूपकृद् गुणी किलास्ति कुब्जोऽस्य गिरा मया श्रुतम् । 5
कनीयसा हारितवैभवो **नलः** प्रियान्वितो यद् विपिने व्यपद्यत ॥३॥
तवैतया तु श्रवसोः सुधाकिरा गिरा द्विजाते ! मुदितोऽस्मि तद् वद ।
कथं वियोगोऽभवदेतयोः पितुर्गृहे कथं वा **दवदन्त्यु**पाययौ ? ॥४॥
अथाह विप्रः शृणु देव ! **नैषधि**र्वनं प्रपेदे सह कान्तया तया ।
निशि प्रसुप्तां च विमुच्य तामयं कुतोऽपि दैवोपहतः प्रयातवान् ॥५॥ 10
निशाविरामेऽथ कृशोदरी तु सा क्षतश्रमा स्वप्नमिमं निरैक्षत ।
रसालमारोहमखादिषं फलान्यतोऽपतं व्यालविलोडिताच्च यत् ॥६॥
प्रगे प्रबुद्धाथ मृगेक्षणा क्षणादवीक्ष्य कान्तं विधुरेत्यचिन्तयत् ।
हृतः प्रियो देवतया कयापि मे विभातकृत्याय गतः स्वयं स वा ॥७॥
स्थितोऽथवा नर्मकृते कुतोऽप्यमुं गवेष्यामीति ययौ यतो यतः । 15
ततस्ततोऽप्यप्रसमीक्ष्य सा **नलं** विलक्षभावेन भृशं व्यदूयत ॥८॥
इयं चरन्ती विटपांश्च पांसुलारवोत्थितान् वीक्ष्य मृगान् मृगेक्षणा ।
पतिभ्रमेणाभ्रमुजानिगामिनी मुमोद तन्निश्चयतो रुरोद च ॥९॥
उदस्य बाहुं **दवदन्त्य**थावदत् प्रिय प्रियैह्येहि नु देहि दर्शनम् ।
न शर्म नर्माप्यतिनिर्मितं करोत्यतिर्हि सर्वत्र जनेन गर्ह्यते ॥१०॥ 20
इति प्रतिध्वानमियं **नल**प्रिया निजोदितस्यैव निशम्य हर्षिता ।
प्रियो नु माम्माह्वयतीति सत्वरक्रमा जगामाद्रिगुहाद्रुगह्वरम् ॥११॥
तत्राप्यनालोक्य पतिं निशात्यये विलोकितं स्वप्नमियं व्यचारयत् ।
नले रसाले फलमृद्धिमाप्नवं ततोऽस्मि दैवेभविलोडिता च्युता ॥१२॥

तदर्थतः स्वप्ननिवेदितागदतः सुदुर्लभो वल्लभसङ्गमो मम ।
इति प्रधार्य प्ररुदत्यगानपि व्यरोदयद् वज्रहृदोऽप्यदारयत् ॥१३॥

धिगत्र मामाश्रितवत्सलोऽपि यां मुमोच तादृग् दयितो दयानिधिः ।
मनस्विनं नेनुममुं पितुर्गृहे कदाग्रहं ह्यो मम तं च धिगं हहा ! ॥१४॥

अगन्तुकामः श्वशुरस्य मन्दिरे ममाग्रहं मानधनोऽवधार्य सः ।
मुमोच मां प्राणसमामपि त्यजन्त्यसून् न मानं हि मनस्विनः क्वचित् ॥१५॥

हहा महासत्त्व ! महामते ! महायशोनिधे ! कान्त ! महाक्षमाम्बुधे !
स्वदासिकायाः कथमेक एव वा जन्मापराधोऽयमसह्यत त्वया ? ॥१६॥

कदाप्यभूवं हृदयेश ! दूरतः सितासितादेशगिरामहं तव ।
यदुज्झिता भाद्रपदस्य गोमयं यथा निषिद्धा न कदाग्रहीत् ततः ? ॥१७॥

मयाऽथवा ज्ञातमिदं भवान् व्यधाद् ममान्यथा न क्वचनापि भाषितम् ।
ततोऽहमस्मि त्वयकोज्झितेह वाऽवमाननातो न कृता विमानिता ॥१८॥

ममेदृशी दैव ! कथं कदाग्रहे कृता **नल**स्येव दुरोदरे मतिः ? ।
विलापिनीति प्रसभं पपात सा वियुक्तवृक्षा लतिकेव मूर्च्छिता ॥१९॥

अथोज्झिता शङ्कितयेव मूर्च्छया प्रयाहि मा नायक नायकेतिवाक् ।
वियोगवैक्लव्यवती रुरोद साऽनुरोदयन्ती वनदेवता अपि ॥२०॥

नलप्रियाया अनलस्य मित्रमप्युदस्य वासः कृपयेव मारुतः ।
अदीदृशत् तां सुदृशोऽक्षरावली विलोक्य सापि प्रियवद् दधे हृदि ॥२१॥

अचिन्तयञ्च प्रमदादसावहो ! विद्येऽहमद्यापि **नल**स्य चेतसि ।
यदादिशद् मे पितृवेश्मवर्तनीमिमैर्निजासृग्लिखितैरिहाक्षरैः ॥२२॥

सह प्रियेणापि यियासितं पितुर्गृहं प्रयास्यामि विशेषतोऽधुना ।
कुलाङ्गनानां हि शिवाय पालितं भवेदिहामुत्र च भर्तृशासनम् ॥२३॥

इयं विचिन्त्येति वटाध्वनाऽचलद् निजांह्रिवीङ्खाध्वनितेऽपि बिभ्यती ।
भुवः सपत्न्या अपि सूनुषु स्थितिं वितन्वती स्निग्धतरेषु शाखिषु ॥२४॥

मृगद्विषोऽस्याः सुललामदीधितेर्धगद्दवाग्नेरिव दूरतोऽभवन् ।
उपाद्रवंश्चापि वनेचरा न तां पराभवन् क्वापि न कौणपा अपि ॥२५॥

§§ अथैक्षतासौ पुरतो निवासितं सुसार्थमेकं शकटालिमालितम् ।
अनेन साकं गहनस्य गंस्यते मयाऽन्तमित्यन्तरधत्त नोद्भयम् ॥२६॥

जगाम तं यावदियं महासती मलिम्लुचैस्तावदसावरुध्यत ।
स्वशीलसत्यापनयाऽनया पुनर्निराकृतास्ते त्रिभिराशु हुङ्कृतैः ॥२७॥

ससार्थलोकोऽथ **वसन्त**सार्थभूद् ननाम देवीं कुलदेवतामिव ।
तुष्टाव कोशीकृतहस्तपङ्कजोऽपृच्छच्च काऽसि त्वममोघदर्शने ! ॥२८॥

अथास्य सर्वं निजदुःखसंविदा विदारयन्ती हृदयं शशंस सा ।
अनीयतानेन च भक्तितो निजं गुरुं दरं सद्गुरुवच्च पूजिता ॥२९॥

सुखं स्थितायामिह तत्र पर्वतावलीनिचोलीभवदम्बुदावलिः ।
घनागमोऽजायत वारिवृष्टिभिर्नितान्तभोजायितवल्लरीवनः ॥३०॥

नलप्रिया पङ्किलतः किलामुतो निःसृत्य सार्थादथ शुद्धभूमये ।
पथि प्रयाती पललादमग्रतो ददर्श पाथोदमिव च्युतं दिवः ॥३१॥

तामाह गर्जन्नयमस्थिभूषणावलीबलाको रसनातडिल्लतः ।
स्थिरीभव त्वं मृदुलाङ्गि ! मेऽशनं जातासि राहोरिव वैधवी कला ॥३२॥

उवाच **भैमी** भयवर्जिताथ तं विरूपमस्मिन् विषये किमस्ति भोः ! ।
विनाशिनाऽमेध्यमयेन साध्यते परोपकारो यदि वर्ष्मणाऽमुना ? ॥३३॥

ततः स तामाह तवामुना शुभ ! तुष्टोऽस्मि सत्त्वेन वृणीष्व तद् वरम् ।
तुष्टोऽसि चेत् तद् वद मे **नलः** कदा मिलिष्यतीत्येनमपीयमब्रवीत् ॥३४॥

दिनादितो द्वादश एव वत्सरे तवोपनेता मिलिता पितृगृहे ।
तस्यै निवेद्यावधिनेति तद्गिरा तिरोदधेऽकारणकौणपः सुरः ॥३५॥

§§ अथाददे **भीमसुते**त्यभिग्रहान् न मेऽत्र यावद् भवितेष्टसङ्गमः ।
तावद् न भोक्ष्ये विकृतीर्न वारुणं वासो न ताम्बूलमहं कदाचन ॥३६॥

ततोऽभिगृह्येति नगस्य कस्यचिद् गुहागृहे सिंहवधूरिवास्थित ।
अर्चामियं **शान्ति**जिनस्य मृण्मयीं कृत्वार्चयन्ती गलितैः स्वयं सुमैः ॥३७॥
इयं चतुर्थादितपांसि तन्वती सतीवरेण्या विततान पारणम् ।
शुकादिनिष्कोषितबीजसंपुटैर्वनस्पतीनां पतितैः स्वयं फलैः ॥३८॥
इतश्च तां सार्थपतिः समन्ततोऽन्विष्यन् **वसन्तो**ऽनुपदं समागतः ।
दृष्ट्वार्चयन्तीं जिनमानमद् मुदाऽपृच्छच्च हे अम्ब ! क एष देवता ? ॥३९॥
"**विदर्भजा**ऽस्मै निजगाद षोडशः **श्रीशान्ति**नामैष जिनोऽर्च्यते मया ।
समस्तदुःखार्णवपारगामिनी यदर्चनेच्छापि सुदुर्लभाऽङ्गिनाम् ॥४०॥
श्रुताधिदेव्यामिव धर्ममार्हतं ततो दिशन्त्यामिह तस्य बोधये ।
उपेत्य साश्चर्यमुपान्तवाससिनस्तपस्विनोऽपि न्यषदन् मृगा इव ॥४१॥
इमां गुरुकृत्य तपस्विभिः समं सुश्रावकोऽभूदथ सार्थपार्थिवः ।
समाख्यया तत्र च तापसादियुक्पुरं तदाख्यास्थितये चकार सः ॥४२॥
तदन्तरं तेन च **भीमनन्दिनी**निदेशतः । **शान्ति**जिनेन्द्रमन्दिरम् ।
अकारि यत्केतुमिषादलम्बयत् प्रमाणपत्रं कुलपर्वतेष्वपि ॥४३॥
दृष्ट्वा सुरानापततोऽन्यदा नगे समं समस्तै**र्नलकान्तया** तया ।
अयायि तत्रैक्षि च **सिंहकेशरी** तदात्वमुन्मीलितकेवलो मुनिः ॥४४॥
प्रणम्यं तं केवलिनं सुरार्चितं पुरोऽस्य देवी निषसाद सादरम् ।
तदाप्युपेतो मुनिरप्युपाविशत् कश्चित् परीवारयुतः परीय तम् ॥४५॥
केवल्यथो निर्मितधर्मदेशनोऽभ्यधाद् व्रतीयर्न्तमिमं तपस्विनम् ।
भोः ! **कूबरो**ऽस्याः सुदृशोऽस्ति देवरस्तस्याङ्गजोऽहं किल **सिंहकेशरी** ॥४६॥
सङ्गापुरीन्द्रस्य विवाह्य नन्दनीं मया निवृत्तेन निजायुरध्वनि ।
पृष्टो **यशोभद्र**गुरुर्न्यवेदयद् दिनानि पञ्चैव तवायुरित्ययम् ॥४७॥
ततो निशम्येति विरागवानहं व्रतं गृहीत्वाऽकरवं तपस्तथा ।
यथोद्ययौ केवलमद्य मे शिवं व्रतं तु ते सूरिरयं प्रदास्यति ॥४८॥

इदं गदित्वा शिवमाप केवली शिवोत्सवं चास्य सुरा वितेनिरे ।
तपस्विमुख्यः सपरिच्छदश्च सव्रतं **यशोभद्र**गुरोरूपाददे ॥४९॥

देवी तु सार्थेशपुरस्कृता पुरे प्रान्त**र्यशोभद्र**गुरुन् व्यजीहरत् ।
प्रातिष्ठपत्तज्जिनराजमन्दिरं स्वयं च सम्यक्त्वमुपाददे ततः ॥५०॥

तत्र स्थिताया इति सप्तवत्सरीं **नलप्रिया**यां पुर एत्य कश्चन । 5
आचष्ट तुभ्यं पथि तिष्ठते **नलो** यास्यामि सार्थो यदयं प्रयाति मे ॥५१॥

अथाशु निःसृत्य च साऽन्वधावत प्रियो मम क्वेति रवं वितन्वती ।
पपात चैषा गहने पिशाचिकामेकां पुरस्ताद् विकृतां ददर्श च ॥५२॥

इयं च तामाह कपालमेकतः करे दधानां परतश्च कर्त्तरीम् ।
मयाऽसिकृष्टाशितुमद्य जीवितेश्वरान्तिकं वां गमयामि मा व्रज ॥५३॥ 10

अनाकुला देव्यथ विघ्नशान्तये सस्मार **शान्ते**ः परमेशितुः कामान् ।
ततः पिशाच्याऽपसृतं हताशया त मिश्रयेवोदयतो विवस्वतः ॥५४॥

ततः कुतश्चिद् वनदेवसञ्ज्ञितः कुत्रापि यान् सार्थपतिः पितेव ताम् ।
नीत्वा मुमो**चाचलपत्तने** तृषातुरा तु सा कामपि वापिकां ययौ ॥५५॥

दिवापि तामिन्दुमुखीं चकोरीकालेलिह्यमानास्यदिशामिहागताः । 15
विलोक्य याता **ऋतुपर्ण**भूपतेर्महेलिकायै न्यगदन् महल्लिकाः ॥५६॥

सा पुष्पदन्ती भगिनी कनीयसी समाख्यया **चन्द्रयशा**स्तदैव ताम् ।
ताभिः समानाय्य जगाद मद्भुवस्त्वं **चन्द्रमत्या**ः सदृशासि कासि तत् ? ॥५७॥

तां मातृजामिं **दमयन्त्य**पि स्वकामविन्दती प्राह कुलादिगोपनात् ।
वणिक्सुताऽहं गलितास्मि सार्थतः पत्या वियुक्ता च निशीव कोकिका ॥५८॥ 20

अथाह तां **चन्द्रयशा** विषीद मा तिष्ठात्र नन्दन्यपरेव मेऽसि यत् ।
इतीरिता साऽस्थित सुस्थिता **नल**प्रवृत्तयेऽस्याः किल सत्रमन्दिरे ॥५९॥

तत्रैकदा तां शरणं प्रपन्नवान् मां रक्ष देवीति वदन् मलिम्लुचः ।
तन्मुक्तये चेयमुवाच रक्षकांस्ते चामुचंस्तं न भयाद् महीपतेः ॥६०॥

अथ त्रिरम्भश्चुलुकाभिषेकतो बिभेद बन्धानिह मृण्मयानिव ।
ततः प्रभावाच्च जनो विसिष्मिये नृपोऽपि तामेत्य जगाद संमदी ॥६१॥

पुत्रि ! त्वया **चन्द्रयशो**विभूषणस्तेयापराधी किमसावमुच्यत ? ।
साप्याह चौरोऽपि मृ(?)येत नो पितर्दृष्टो विशिष्टार्हतया(?) मया खलु ॥६२॥

तस्याः स्वपुत्र्या इव तादृशाग्रहाद् मुमोच भूमानपि तं मलिम्लुचम् ।
देव्या च सेवानिरतोऽयमन्वहं पृष्टोऽन्यदेति स्वकथामचीकथत् ॥६३॥

दासोऽस्म्यहं **तापसपत्तन**प्रभो**र्वसन्त**नाम्नः किल **पिङ्गला**भिधः ।
तद्द्रव्यमादाय निशि प्रणश्यन् विलुण्टितोऽन्यैरिह भूपमागमम् ॥६४॥

इहापि चौर्यव्यसनप्रभावतो बद्धस्त्वयाऽमोचयिषि स्वलीलया ।
अन्यच्च मातस्तव निर्गमे तदा स सार्थवाहस्त्यजति स्म भोजनम् ॥६५॥

असौ **यशोभद्र**गुरुप्रबोधितः कथञ्चनाऽश्नादथ सप्तमेऽहनि ।
सोपायनः **कूबर**पार्थिवं गतः कृतश्च राट् **तापसपत्तने**ऽमुना ॥६६॥

श्रुत्वेति साऽस्यादित पारितोषिके महाव्रतेच्छां जिनधर्मदेशनात् ।
व्रतं तदादेशवशादसावपि प्रपद्य तेपे गुरुसन्निधौ तपः ॥६७॥

§§ अथाययौ **कुण्डिनतो**ऽत्र सश्रुतस्तत्र द्विजन्मा **हरिमित्र**संज्ञितः ।
स वीक्ष्य वेगाद्दतुपर्णपार्थिवं विनिद्रवाक् **चन्द्रयशो**ऽन्तिकं गतः ॥६८॥

पप्रच्छ तं **चन्द्रयशा** भृशायितप्रमोदभाक् क्षेममसावचीकथत् ।
ऊचे च जानीथ **विदर्भजानल**प्रवृत्तिमस्यै समुपागतोऽस्मि यत् ॥६९॥

श्रुत्वेति तस्माद् **नलभीमजा**वनप्रवासवार्तामियमार्तमानसा ।
रुरोद सर्वानुचरीवृता तथा यथा किलारोदि गृहाण्डजैरपि ॥७०॥

तथाकुले राजकुले ऽथ स द्विजः क्षुधातुरः सत्रमियाय जेमितुम् ।
दृष्ट्वाऽथ **भैमीं** मुदितः प्रणम्य तामागत्य राज्ञ्यै त्वरितं न्यवेदयत् ॥७१॥

कर्णामृतं सापि निशम्य तत्तथा तस्मै प्रदायाभरणानि भूरिशः ।
क्व सा क्व सेति प्रवदन्त्युपाययौ पद्भ्यां प्रमोदाद् निजसत्रसद्मनि ॥७२॥

गृह्णामि दुःखं तव पुत्रि ! वञ्चिताऽस्म्यहं त्वया किं निजनामगोपनात् ? ।
मातृष्वसा मातुरपि प्रशस्यते जने त्वयैतद् वितथं व्यधायि च ॥७३॥

इति ब्रुवाणा परिरभ्य सम्भ्रमादाघ्राय मौलो शिबिकां निवेश्य च ।
निनाय तां **चन्द्रयशा** गृहे मुदा विभूष्य च क्षोणिपतेरदीदृशत् ॥७४॥

प्रणम्यं तं तातमिवोपविष्टया तत्पृष्टयाऽऽख्यायि कथा तयात्मनः ।
तदा स्ववंशस्य **नल**स्य धिक्कृतिं श्रुत्वेव चार्कः प्रययौ रसातलम् ॥७५॥

द्विधापि तस्मिंस्तमसि प्रसर्पति स्वमातृजामेर्वचसा **विदर्भजा** । 5
प्रमृज्य भालं तिलकं तमोऽन्तकं व्यकाशयत् तेन नृपो विसिष्मिये ॥७६॥

इहान्तरे कोऽपि सुरः समेत्य तां प्रणभ्य बद्धाञ्जलिरेवमूचिवान् ।
यस्तस्करोऽग्राह्यत संयमं त्वया स हंसगामिन्यहमस्मि **पिङ्गल**ः ॥७७॥

उक्त्वेति कोटीः कनकस्य सप्त स प्रवृष्य देवस्त्रिदिवाय यातवान् ।
नृपोऽपि राज्ञ्या स तया समं तदा दृष्ट्वेति दृष्टान्तमजायतार्हतः ॥७८॥ 10

अथो नृपः सैन्यभरेण **भीमजा**मघाय भेत्ता प्रजिघाय **कुण्डिन**म् ।
वर्धापितौ तत्कथया द्विजन्मना प्रमोदतोऽस्याः पितरावभीयतुः ॥७९॥

विलोक्य साग्रे पितरौ स्ववाहनादुत्तीर्य सास्रौ रुदतो नमोऽकरोत् ।
समस्तलोकेन नतां च तामिमौ प्रवेशयामासतुरुत्सवात् पुरे ॥८०॥

सपूत्कृताम्भःसममश्रुवर्षणं ज्वलद्वियोगानलतो वितन्वती । 15
भैमीतिपित्रोः स्वकथामचीकथद् मया श्रुतेयं च तवोदिता पुरः ॥८१॥

दूतस्त्विदानीं तव कोऽपि **कुण्डिनेश्वरं** जगौ यद् **दधिपर्ण**सन्निधौ
समस्ति कुब्जो **नल**सूपकृद् गुणी स सूर्यतः पाचयते यथा **नल**ः ॥८२॥

श्रुत्वेदं **दवदन्त्यु**वाच मुदिता यत्तात ! जामातृतो,
नान्यः कोऽपि च सूर्यपाकरसवत्याम्नायवेदी खलु । 20
तद्भावेति नृपोऽपि वीक्षितुममुं तत्सन्निधौ प्रैषयद,
मामाः कुब्जक एष कुत्र स **नल**ः कन्दर्परूपः क्व च ? ॥८३॥

॥ इति दवदन्तीललितनाम्नि महाकाव्ये तृतीयः सर्गः ॥

● ● ●

§§ शुश्राव **दधिपर्णो**ऽयमिति विस्तरतः कथाम् ।
श्रुतां कुब्जेन सास्रेण यथोक्तरसनाटिना ॥१॥
शरीराभरणस्तोमदानेनानन्द्य संमदी ।
प्रेषीत् तं ब्राह्मणं राजा कुब्जस्तु जगृहे गृहे ॥२॥
अभोजयत् स कुब्जेन रसवत्याऽर्कपाकया ।
स्वर्णादिकं नृपाल्लब्धं दत्त्वा प्रीतिं च लम्भितः ॥३॥
अथायं कुब्जमापृच्छ्य गतः **कुण्डिनपत्तन**म् ।
तदीयदानभोज्यादि सर्वमुर्वीभुजेऽभ्यधात् ॥४॥
तद् निशम्यावदद् **भैमी** मुदिता मेदिनीपतिम् ।
नल एव स कुब्जत्वं ययौ केनापि हेतुना ॥५॥
तद् दानं सा मतिः सूर्यपाका रसवती च सा ।
सन्ति नान्यत्र कुत्रापि युष्मज्जामातरं विना ॥६॥
तामालोच्य ततस्तात ! समुन्मेषय शेमुषीम् ।
नलो यया रयादेव प्रकटीभवति स्वयम् ॥७॥
सोत्साहमाह भूपस्तां चरं संप्रेष्य कञ्चन ।
आकार्यो **दधिपर्णो**ऽयं त्वत्स्वयंवरणच्छलात् ॥८॥
गत्वा दूतो यथादिष्टं कथयिष्यति तं प्रति ।
श्वस्तने यद् दिने भावी **दवदन्त्याः** स्वयंवरः ॥९॥
तत्पार्श्वे यदि कुब्जोऽयं **नलः** स्यादवनीधवः ।
तदश्वहृदयाभिज्ञस्तमानेष्यति स द्रुतम् ॥१०॥
इति निश्चित्य **भीमेन** भूमुजा प्रेषितश्चरः ।
सुंसुमारपुरं गत्वा **दधिपर्ण**मदोऽववत् ॥११॥
न प्रापि **नल**वार्त्तापि क्वापि तेन करिष्यति ।
भूयः स्वयंवरो **भैमी** प्रभुणा प्रेषितोऽस्मि तत् ॥१२॥

किन्तु मार्गविलम्बोऽभूद् देहस्यापाटवाद् मम ।
प्रत्यासन्नतरं जातं तल्लग्नं श्वस्तने दिने ॥१३॥
तूर्णं देव ! तदेतव्यमित्युक्त्वास्मिन् गते चरे ।
आचिन्तयद् **नल**श्चित्ते किमेतदिति विस्मयात् ॥१४॥

"वर्षिष्यति विषं चन्द्रः पूषा ध्वान्तं वमिष्यति ।
किमन्यमपि भर्तारं दवदन्ती करिष्यति ? ॥१५॥
विवोढुं प्रौढिमा कस्य मत्पत्नीं मयि जीवति ? ।
फणामर्णिं समादित्सेत् को हि जाग्रति पन्नगे ?" ॥१६॥

इति ध्यात्वा चिरं **दधिपर्ण** जगाद सः ।
आसन्नलग्नदूरोर्वीगतिचिन्तापरायणाम् ॥१७॥
समर्पय हयाञ्जात्यान् रथं गाढं च कञ्चन ।
यथाहमश्वहृद्वेदी नये झटिति **कुण्डिने** ॥१८॥
इति प्रीतमथाकर्ण्य **दधिपर्णो**न भूभुजा ।
उक्तोऽग्रहीच्चतुर्वाहीं रथं चाहीनमोजसा ॥१९॥
अथ चामरभृद्युग्मच्छभृद्भूपभासुरम् ।
नियुक्तवाजिनं कुब्जो रथं तूर्णमवाहयत् ॥२०॥
नुन्नैरथ रथेवाहैर्जवनैः पवनैरवि ।
अपतद् भूभृतः स्कन्धात् पटी शृङ्गादिवापगा ॥२१॥
राजा तदवदत् कुब्जं स्थिरीकुरु हयानिमान् ।
एतदादीयते यावद् वासो वसुमतीगतम् ॥२२॥
जगाद कुब्जको राजन् ! न्यपतत् पत्रं तंऽशुकम् ।
पञ्चविंशतियोजन्याः साऽमुच्यत वसुन्धरा ॥२३॥
अक्षवृक्षमथो वीक्ष्य कलां दर्शयितुं निजाम् ।
कियन्त्यत्र फलानीति राजा कुब्जकमब्रवीत् ॥२४॥

अजानति ततः कुब्जे फलसंख्या धराधवः ।
आख्यदस्मै परिस्पष्टमष्टादशसहस्रिकाम् ॥२५॥

मुष्टिघातेन दन्तीन्द्रघातघोरेण तन्नलः ।
अपातयदशेषाणि फलानि कलपादपात् ॥२६॥

यावद् गणयते तावत् तावन्त्येवाभवंस्ततः ।
अश्वहृद्विद्यया संख्याविद्यां कुब्जः समाददे ॥२७॥

कुब्जेन **कुण्डिनो**पान्ते रथोऽनायि निमेषतः ।
भीमश्चाभ्येत्य तत् तूर्णं **दधिपर्णं** गृहेऽनयत् ॥२८॥

ऊचे मिथःकथागोष्ठ्यां **दधिपर्णं विदर्भराट्** ।
कुब्जाद् रसवतीं सूर्यपाकां कारय मन्मुदे ॥२९॥

तदुक्तो **दधिपर्णे**न कुब्जो रसवतीं व्यधात् ।
इन्दुपुष्टिकरार्कांशुसंपर्कसुरभीकृता ॥३०॥

लोकैः साकं रसवतीं बुभुजे भूभुजाऽथ सा ।
विचाराक्षम**वैदग्ध्यै**र्मिथः पश्यद्भिराननम् ॥३१॥

आनाय्य तां परीक्षार्थमथैतां **भीमनन्दनी** ।
स्वादयित्वा रसवतीं कुब्जं निरचिनोद् **नलम्** ॥३२॥

तद् **वैदर्भी विदर्भेशं** प्रत्याह प्रीतिपूरिता ।
आस्तां कुब्जोऽपि खञ्जोऽपि निश्चितः सैष **नैषधिः** ॥३३॥

अभिज्ञानान्तरं तात ! पुनरेकं समस्ति मे ।
नलस्पर्शेन विपुलपुलकं यद् भवेद् वपुः ॥३४॥

तद् मदङ्गमयं कुब्जः स्तोकं स्पृशतु पाणिना ।
इत्युक्ते **भीम**वचसा तामङ्गुल्या **नलो**ऽस्पृशत् ॥३५॥

वपुः सपुलकं तस्यास्तन्**नल**स्पर्शतः क्षणात् ।
आनन्देन्दुबहिःक्षिप्ततमःपुञ्जमिवाभवत् ॥३६॥

अन्तर्भैमी **नलं** निन्ये तद्बलादबलाप्यसौ ।
अतूतुषत् तथा चाटुप्रेमामृतकिरा गिरा ॥३७॥

''नाथ ! निह्नुतरूपोऽपि मया त्वमनुभाव्यसे ।
घनच्छन्नोऽपि माद्यन्त्या कमलिन्येव भास्करः ॥३८॥
कियदद्यापि दुःखार्त्तां दैवतो मामुपेक्षसे ।
अवग्रहादिवाम्भोदो भीष्मग्रीष्मद्रुतां लताम् ? ॥३९॥
नाथ ! प्रसीद सीदन्तमात्मैकशरणं जनम् ।
संजीवय यथावस्थस्वदर्शनसुधारसैः'' ॥४०॥

इति **भैम्यु**पराधेन **नल**श्छन्न इवानलः ।
जज्ञे बिल्वकरण्डाभ्यामाविष्कृतनिजाकृतिः ॥४१॥
धृतस्वरूपं तद्रूपं वीक्ष्य कं कं रसं न सा ।
भेजे **भीमसुता** धार्ष्ट्यत्रपासम्पातकातरा ? ॥४२॥
अभितो वीज्यमानाङ्गी **नले**नेवाञ्चलैश्चलैः ।
सद्यः स्वेदोदकस्नाता सा चकम्पे चकोरदृक् ॥४३॥
अदर्शि दर्शनीयश्रीरथयातो बर्हिर्जनैः ।
नैषधिस्त्यक्तकुब्जत्वो राहुमुक्त इवार्यमा ॥४४॥
अपराद्धं यदज्ञानाद् मया नाथ ! क्षमस्व तत् ।
दधिपर्णो वदन्नेवमपतद् **नल**पादयोः ॥४५॥
स्वयं वेत्रीभवन् **भीमो** भद्रपीठे निवेश्य तम् ।
अभ्यषिञ्चद् **नलं** नाथस्त्वमस्माकमिति ब्रुवन् ॥४६॥
ऋतुपर्णः प्रियायुक्तः स **वसन्त**श्चसार्थभृत् ।
सुखदुःखदायादावाहूतौ **नलकान्तया** ॥४७॥
वसन्तदधिपर्णर्तुपर्णभीमैः समं **नलः** ।
चिक्रीड लोकपालैः स चतुर्भिरिव पञ्चमः ॥४८॥

धनदेवोऽपि सार्थेशः कुतोऽपि प्राप **कुण्डिनम्** ।
तस्य प्रत्युपकारं सा कारयामास **भीमजा** ॥४९॥

§§ कश्चिदेत्य दिवोऽन्येद्युर्देवः पश्यत्सु राजसु ।
भैमीं नत्वाऽवदद् देवि ! त्वत्प्रसादोऽयमीदृशः ॥५०॥

सम्बोध्य तापसेन्द्रोऽहं पुरा प्रव्राजितस्वया ।
विमाने **केशरे**ऽभूवं **सौधर्मे केशरः** सुरः ॥५१॥

इत्युक्त्वा सप्त कल्याणकोटीर्वर्षन् पुरः सुरः ।
विद्युद्दण्ड इवोद्दण्डो झगित्यथ तिरोदधे ॥५२॥

नलादेशेन देशेभ्यः स्वेभ्यः स्वेभ्यस्ततो नृपाः ।
ऋतुपर्णादयः स्वं स्वं सैन्यमानाययञ्जवात् ॥५३॥

नलस्तदैव दैवज्ञदत्तेऽह्नि प्रति**कोशल**म् ।
प्रयाणं कारयामास वासवोपमवैभवः ॥५४॥

कम्पयन् सैन्यचारेण स्थावरानपि भूभृतः ।
कैश्चित् प्रयाणैः स प्राप **कोशलो**पवनावनीम् ॥५५॥

पुनर्लक्ष्मीं पणीकृत्य द्यूतार्थे दूतभाषया ।
नलः कूबरमाकार्य दीव्यञ्जित्वाऽग्रहीद् महीम् ॥५६॥

अथानन्दी **नलो** मन्दीकृतक्रोधो निजानुजम् ।
अपि क्रूरं व्यधाद् यौवराज्ये प्राज्यमहोत्सवात् ॥५७॥

अथ संप्रेष्य निःशेष राजकं राजकुञ्जरः ।
दवदन्त्याऽन्वितो राज्यं चक्रे लक्ष्म्येव केशवः ॥५८॥

§§ **जिनसेना**भिधं सूरिं विज्ञातागममेकदा ।
ययौ **नलो** नमस्कर्तुं तया दयितया सह ॥५९॥

प्रणम्य **नैषधिः** सूरिं निविष्टः क्षितिविष्टरे ।
पप्रच्छ स्वस्य देव्याश्च कारणं सुखदुःखयोः ॥६०॥

निरस्तमन्मथो वाचमथोवाच मुनीश्वरः ।
राजन्**नष्टापदो**पान्तेऽस्ति **सङ्गरपुरं** पुरम् ॥६१॥
तत्रासीद् **मम्मणो** राजा तस्य **वीरमती** प्रिया ।
अन्यदा खेटके गच्छन् भूपोऽपश्यत् पुरो मुनिम् ॥६२॥
मन्वन्नशकुनं सोऽथ धारयामास तं क्रुधा ।
तं द्वादशघटीप्रान्ते कृपयाऽमूमुचत् पुनः ॥६३॥
तदहिंसामयो धर्मः साधुनास्मै निवेदितः ।
राज्ञाप्यङ्गीकृतो **वीरमत्या** दयितया समम् ॥६४॥
ताभ्यां राजसभावेन तद् व्रती प्रतिलाभितः ।
अपराधं क्षमस्वैतमुक्त्वा जगाम सः ॥६५॥
सेवाप्रसाधिता **वीरमतीं** शासनदेवता ।
धर्मस्थैर्यकृते निन्येऽन्येद्यु**रष्टापदो**परि ॥६६॥
अकृत प्रतितीर्थेशं विंशतिं विंशतिं ततः ।
आचाम्लानि तथैकैकमम्लानरुचि पुण्ड्रकम् ॥६७॥
तदुद्यापनकं कृत्वा प्रीता कान्ता महीपतेः ।
मुनीनानन्द्य दानेन चारणान् पारणं व्यधात् ॥६८॥
तत्तीर्थेशप्रदान् नत्वा राजधानीमियाय सा ।
चक्रे पत्या समं चार्हद्धर्मं निर्मलमानसा ॥६९॥
ततः पूर्णायुषावेतौ देवीभूय बभूवतुः ।
आभीरदम्पती **धन्य-धूसर्या**ख्यौ सुधार्मिकौ ॥७०॥
सप्ताहं प्रावृषि च्छत्रं धृत्वा ध्यानधने मुनौ ।
दत्त्वा च पायसं तस्मै धन्यो धर्ममुपार्जयत् ॥७१॥
दम्पती **हिमवच्छै**ले भूत्वा तौ युग्मधर्मिणौ ।
अभूतां **क्षीर-डिण्डीरा**भिधानौ त्रिदशावथ ॥७२॥

ततश्च्युत्वा **क्षीरडिण्डीर**जीवोऽभूद् **नैषधि**र्भवान् ।
प्रिया ते **क्षीरडिण्डीरा**देवीजीवश्च **भीमजा** ॥७३॥

यद् द्वादश घटीर्दध्रे **मम्मणे**न त्वया मुनिः ।
तत् प्रियाविरहो राज्यभ्रंशश्च द्वादशाब्दिकः ॥७४॥

यच्छत्रधारणं क्षीरपारणं च मुनेः कृतम् ।
त्वया धनेन धन्येन तेन राज्यस्य संपदः ॥७५॥

भैमी त्वद्वल्लभा **वीरमती**जन्मनि यद् ददौ ।
तिलकान्यर्हतां भाले तेनाऽस्यास्तिलकोऽद्भुतः ॥७६॥

श्रुत्वेत्थं नृपदम्पती स्वचरितं तौ जातजातिस्मृती,
कृत्वा **पुष्कल**पुत्रसाद् वसुमतीं तप्त्वा ततोऽन्वेतयोः ।
जज्ञे यक्षपति**र्नलः कनकवत्या**ख्या **दशारा**नुजस्त्री
भूत्वाऽप्यगृहस्थकेवलिकलां **भैमी** तु भेजे शिवम् ॥७७॥

इति दवदन्तीललितनामनि महाकाव्ये चतुर्थः सर्गः ॥

॥ इति दवदन्ती कथा समाप्ता ॥

● ● ●

आर्या **चन्दनबाला** तु **मृगावती**कथायामुपदेक्ष्यते; **मनोरमा** च श्रेष्ठि**सुदर्शन**-कथायां तत्प्रियात्वेन पूर्वकथितैव । अथ **विलासवती**कथा —

§§ अस्तीह **तामलिप्ती**ति पुरी दत्तीकृता श्रिया ।
हसन्तीवाऽ**मरपुरीं** या चैत्यविशदध्वजैः ॥१॥

तस्या**मीशानचन्द्र**ः क्ष्मामण्डलाखण्डलः किल ।
आसीन्नासीरवीरासिजलप्लावितशात्रवः ॥२॥

शृङ्गारमञ्जरीवास्य प्रिया **शृङ्गारमञ्जरी** ।
भृङ्गश्रेणीव यन्मूर्ध्नि वेणीरदण्डो व्यराजत ॥३॥

अस्या**मीशानचन्द्र**स्य राज्ञश्चन्द्रसमानना ।
श्रीविलासवती तस्यासीद् **विलासवती** सुता ॥४॥

यथाकालमथामुष्यां पुरि शृङ्गारजीवितम् ।
प्रावर्तत वसन्तर्तुर्नर्तयन् कामिनां मनः ॥५॥

मञ्जरीभिरनुस्यूताश्चूताः पल्लविता बभुः ।
तूणाः शोभाजिनमयाः पुष्पेरिव पूरिताः ॥६॥

भ्रेमुरारुह्य वाताश्वानङ्गीकृतशिलीमुखाः ।
तदा मलयजामोदाः स्मरस्येव चमूचराः ॥७॥

किञ्जल्काङ्कुरचन्दालिमूर्त्तिभिर्विश्वमानशे ।
पीतरक्तसितश्यामैर्ध्यानैरिव तदा स्मरः ॥८॥

प्रमाणोत्तरमातेनुः कृहूकण्ठीरवास्तदा ।
अनित्यतां कुरङ्गो वा द्वैतं शबरसूदने ॥९॥

वसन्तेऽत्र जगन्नेत्रनिर्माणैकफलं विधेः ।
सा **विलासवती** वातानयनस्थानमशिश्रियत् ॥१०॥

शुभंयुबकुलस्यान्तः सुमनोवृन्दमात्मना ।
वेधं वेधं गुणेनोच्चैर्दामयन्ती सुलोचना ॥११॥

मूर्त्तं स्मरमिव स्वीयपरिवारमियं तदा ।
कञ्चिद् युवानमुद्यानमभियान्तमुदैक्षत ॥१२॥ युग्मम् ॥
तदात्वसात्त्विकोन्मेषा पश्यन्त्येषानिमेषदृक् ।
अनङ्गसुन्दरीमाह सखि ! कोऽयं पुमानिति ॥१३॥
तयेति सादरं पृष्टा बभाषेऽ**नङ्गसुन्दरी** ।
देव्यस्ति **श्वेतवी** नाम पुरी देवपुरीनिभा ॥१४॥
राजा तस्यां **यशोवर्मा**ऽयशोवर्मास्ति विश्रुतः ।
सनत्कुमार इत्यस्य सुतो विश्वश्रुतोदयः ॥१५॥
नृपाज्ञातोऽन्यदा चौराः केऽप्यनीयन्त हिंसितुम् ।
वाह्यालीगतमेनं ते कुमारं शरणं श्रिताः ॥१६॥
मोचिताः शोचितारा अप्येतेऽनेन महात्मना ।
तद् निशम्य नृपेणैते गर्त्तापूरीकृताः पुनः ॥१७॥
तज्ज्ञात्वाऽथ कुमारोऽपि रुष्टः सह महीभूजा ।
रात्रौ मितपरिवारो नगर्या निरगदयम् ॥१८॥
आक्रामन् क्रमतः पृथ्वीमाजगामेह पत्तने ।
त्वत्तातेनातियानादिप्रतिपत्त्याऽयमर्चितः ॥१९॥
देशग्रामादिकं दीयमानमद्यापि नेच्छति ।
सोऽयं देवि ! नृदेवाङ्गजन्माभ्येति पुरस्तव ॥२०॥
तयोरिति वितन्वत्योः किंवदन्तीं परस्परम् ।
यावद् वातायनस्याधः कुमारोऽथं समागतम् ॥२१॥
कुमारी तावदेतस्य कण्ठे तां बकुलस्रजम् ।
न्यधत्तात्मभुजाश्लेसत्यङ्कारमिव क्षणात् ॥२२॥
क्षिप्ता केनेयमित्यूर्ध्वं यावदैक्षत विस्मितः ।
कुमारस्तावद्राक्षीद् मृगाक्षीमुखपङ्कजम् ॥२३॥

ततोऽसौ हर्षसोत्कर्षश्चकोर इव तर्षितः ।
पपौ मुखशशिज्योत्स्नां तस्यास्तस्यापि सा पुनः ॥२४॥
विधाय सुस्थितां कण्ठे भुजाभ्यामुपगृह्य च ।
कराभ्यामथ संगृह्याचुम्बत् तामिव स स्रजम् ॥२५॥
जातु मा यातु निस्सृत्य प्रियोऽयं मे हृदोऽन्तरात् ।
स्वाङ्गे वृतिमितीवाधात् कुमारी स्फुटकण्टकैः ॥२६॥
कुमारस्त्वाक्षिकः सार्धं कुमार्यां सारितस्रजा ।
हारयन् स्वं सुहृद्विश्वभूतिना प्रेरितोऽग्रतः ॥२७॥
ततः स्वं हारितमपि मतिमानप्रकाशयन् ।
अनङ्गनन्दनोद्यानं सवयोभिः समं ययौ ॥२८॥
उष्ट्रवल्लज्जया धृत्वा धैर्यं गत्वरमप्यसौ ।
तत्र चिक्रीड स ध्यानम् सनीडमिव तन्मुखम् ॥२९॥
अत्रान्तरेऽनुरक्तात्मा प्रतीचीं मोक्तुमक्षमः ।
दिनेन प्रेरितो भानुरपि द्वीपान्तरं ययौ ॥३०॥
आजगाम निजं धाम स्मरेणाग्नेयसायकैः ।
भिद्यमानः कुमारोऽपि समारोपितधन्वना ॥३१॥
विसृज्य सुहृदस्तेन साध्यकृत्यं विधाय च ।
शयनीयमलञ्चक्रे चक्रेणेवाथ सैकतम् ॥३२॥
पल्यङ्कचन्द्रिकावापीष्वेहिरेयाहिराकृतः ।
तस्य कामाभितप्तस्य सा निशा कथमप्यगात् ॥३३॥
विभातायां विभावर्यां प्रातःकृत्यं विधाय सः ।
उन्मना भवनाराम्ये सहारंस्त सुहृज्जनैः ॥३४॥
माधवीमण्डपे नीत्वा ततोऽसौ **वसुभूति**ना ।
पृष्टः किं बाधते तेऽद्य मित्र ! येनासि दुर्मनाः ॥३५॥

न किञ्चिदिति तेनोक्ते होरामालोक्य कैतवात् ।
वसुभूतिर्जगौ ज्ञातं ज्ञानात्ते दुःखकारणम् ॥३६॥
पुष्पस्रक्पाशमाधाय कण्ठे यत्ते मनस्तया ।
हतं नृपतिनन्दन्या तद् दुनोति मनोम्यहम् ॥३७॥
मा विषीद परं श्रीद ! करिष्यामि तथा यथा ।
झटित्येव चटत्येषा चित्तचौरी करे तव ॥३८॥
इतश्च राजदुहितुः कृते **सानङ्गसुन्दरी** ।
कुमारस्य कृते **सौव-वसुभूति**रुभाविमौ ॥३९॥
ताम्यन्तावव्रताराय मिथः संघटितौ द्रुतम् ।
द्वयोर्हि तप्तयोरेव सन्धिः स्यादयसोरिव ॥४०॥
स्वस्य कामपरौ द्वेधा निकामं तावुभावपि ।
विलग्नौ न व्ययुज्येतां स्वाभिभक्तौ दिवानिशम् ॥४१॥
§§ इतः **सनत्कुमारो**ऽस्ति यावद् मृत्यौ कृतोद्यमः ।
एत्य स्मेरमुखस्तावद् **वसुभूति**रदोऽवदत् ॥४२॥
वर्ध्यसे देव ! सिद्धं ते सतां हितसमीहितम् ।
यद् **विलासवती**धात्रीसुताऽऽस्तेऽनङ्गसुन्दरी ॥४३॥
रुदती मिलिता साऽद्य मयोचे किमु रोदिषि ? ।
स्वामिनी म्रियते साह मयोचे कथमाह सा ॥४४॥
मम रूपे सपत्नो यस्तत्कण्ठे केसरस्रजम् ।
न्यधादियमिति क्रोधादिव कामो निहन्ति ताम् ॥४५॥
वातायनाश्च पल्यङ्के पल्यङ्कादपि कानने ।
काननाद् भवनेऽभ्येति बिभ्यती स्मरादिव ॥४६॥
मनुते हारमङ्गारं नालं व्यालं विधुं वधम् ।
जलार्द्रां हुतभुग्मुद्रां स्मरतापग्रहेण सा ॥४७॥

अवादिषं ततोऽहं तां किं ते स्वामिनि ! बाधते ? ।
सोचे तस्य **यशोवर्म**सुतस्यादर्शनं सखि ! ॥४८॥

ततो मया तदाधारकृतेऽलीकमपीरितम् ।
यद् देवि ! भव धीरा ते मेलयिष्यामि तं द्रुतम् ॥४९॥

इति मद्वचसा जीवातुनेवोन्मीलितेक्षणा । 5
ददौ मे रसनादाम तुष्टिदानेऽब्रवीच्च सा ॥५०॥

इदमङ्गीकृतं साधु त्वया त्वय्युपपद्यते ।
सुहृदां हि सुहृत्त्वस्य कषो विषमकर्मणि ॥५१॥

लेखः सखि ! शिखण्डी स्यादन्तरङ्गे नियोगिनि ।
तथापि मदवस्थाया लेखं तस्मै समर्पयेः ॥५२॥ 10

इत्युक्त्वा **स्मरलेखा**य यावत्कथयते सखी ।
वृद्धया तावदुत्थाय न्यषेधि कुललज्जया ॥५३॥

अथोत्पन्नमतिः सैषा समुत्तार्य ममार्पयत् ।
साञ्जनाश्राम्बुजम्बाललिपि ताडङ्कयोर्युगम् ॥५४॥

अत्रान्तरे समायाता माता **शृङ्गारमञ्जरी** । 15
उवाच वल्लकीं वत्से ! **विलासवति** ! सज्जय ॥५५॥

यतो वीणाविनोदार्थं त्वामादिशति ते पिता ।
वीणाकार्यपि साकार्य समानीतैव सम्प्रति ॥५६॥

इत्याकर्ण्य वचो मातुस्त्रपया संवृतेङ्गिता ।
पित्रोः प्रमाणमादेश इत्याह स्वामिनी ततः ॥५७॥ 20

इतिकर्तव्यतामूढाऽहं तु भूपभुवा तया ।
अविसृष्टापि निर्गत्य निजमन्दिरमागमम् ॥५८॥

अधृष्यं तं कथं यामि कुमारं किमु वा पुनः ।
देवीं विज्ञपयिष्यामीत्यतश्चिन्तापरास्मि तत् ॥५९॥

श्रुत्वेत्यनङ्गसुन्दर्या गदितं मुदितोऽवदम् ।
अतः परं शुभे ! चिन्तां कर्तुं नार्हसि कामपि ॥६०॥

प्रभुं तमात्मनो मित्रं गुणज्ञं गुणशालिनम् ।
तथा विज्ञपयिष्यामि यथा ते सिध्यति प्रियम् ॥६१॥

श्रुत्वेति सा पुनः प्राह स ते वज्रमयः प्रभुः ।
दृष्ट्वापि स्वामिनीभावं यस्तथा ही निरुद्यमः ॥६२॥

मयोचे नैष वज्रात्मा नैव देवो निरुद्यमः ।
निरवद्यं प्रियाप्राप्त्यै किन्तूपायं विमार्गति ॥६३॥

साह साहसिकानां किं सावद्यमिति विद्यते ? ।
मयोचे युक्तमात्थैतन्मेलः कुत्र करिष्यते ? ॥६४॥

सोचेऽहं **मन्दिरो**द्याने नयिष्ये स्वामिनीं निजाम् ।
आनयेथाः पुनस्तत्र त्वमपि स्वामिनं निजम् ॥६५॥

इत्युक्त्वाऽऽत्मसखीकामलेखं मम समर्प्य च ।
सा ययावहमप्यागामिह लेखस्वयं विभो ! ॥६६॥

कुमारोऽपि समादाय तस्यास्ताडङ्कयोर्युगम् ।
निधाय हृदि रोमाञ्चलिपेस्तन्मयतामयात् ॥६७॥

कुमार्यनङ्गसुन्दर्यै ददौ काञ्चीमहं पुनः ।
वसुभूते ! ददे तुभ्यं कल्याणकटकार्पणम् ॥६८॥

हसन्निति कुमारोऽस्मै प्रदाय कटकद्वयम् ।
ययौ तेन सहोद्यानं वसन्तेनेव मन्मथः ॥६९॥ युग्मम् ॥

सर्वर्तुयमुद्यानमयमालोकयन् क्रमात् ।
लवलीमण्डपान्तःस्थां ससखीं तामलोकत ॥७०॥

तद्दर्शनवशोत्पनन्नप्रमोदरसमज्जनात् ।
रोमाञ्चवेपथू भेजे कुमारः किमिहाद्भूतम् ? ॥७१॥

वलितस्खलितस्निग्धमुग्धमन्थरतारकैः ।
तयापि सैष सद्भावरोचनैरैक्षि लोचनैः ॥७२॥

अथाभ्युदस्थादेनं सा स त्वेनां समभाषत ।
नतभ्रु ! संभ्रमेणालं जनेऽस्मिन् दुःखदायिनि ॥७३॥

कुमारोऽनङ्गसुन्दर्यां दर्शिते कनकासने । 5
निषसाद कुमारी चानुमता तेन सादरम् ॥७४॥

उप्तो दृष्ट्यनुरागेण तयोः सत्प्रेमपादपः ।
तदा स्वेदाम्बुभिः सिक्तोऽङ्कुरितः कण्टकाङ्कुरैः ॥७५॥

ताम्बूलैः पत्रितोऽन्योन्यालापैर्मुकुलितस्ततः ।
स्मितैः कुसुमितो यावत्फलवर्त्माऽस्य वीक्ष्यते ॥७६॥ 10

तावद् दुर्वातवत् प्राप **मित्रभूति**महल्लकः ।
उपवीणयितुं तेनोदस्थाप्यत नृपाङ्गजा ॥७७॥ विशेषकम् ॥

मनः प्रतीक्षमाणेव स्थायं स्थायमियं ययौ ।
इष्टालोके बलद्ग्रीवारङ्ककायं वितन्वती ॥७८॥

हस्तविस्रस्तसर्वस्व इव शून्यमनास्ततः । 15
तस्यां गतायामाभाषि कुमारो । **विश्वभूति**ना ॥७९॥

आवामपि न किं यावस्तां विनाऽत्र स्थितेन किम् ? ।
देव ! देवकुले देवशून्ये क इव जागरः ? ॥८०॥

इति मित्रगिरोत्थाय कुमारः स्वगृहं व्रजन् ।
दृष्टो नृपनितम्बिन्याऽनङ्गवत्याऽतिसस्पृहम् ॥८१॥ 20

चेटीमुखात् तयाहूतो वामाक्षिस्पन्दभागपि ।
गत्वा दाक्षिण्यतः **पुण्यविनयः** प्रणनाम ताम् ॥८२॥

मोट्टायितवपुर्जृम्भायितास्या स्खलितोदिता ।
अयाचत कुमारं सा रतं सारङ्गलोचना ॥८३॥

कुमारस्त्वाह तां त्वं मे माता मा मैवमादिश ।
द्वयोर्विरुद्धमेतद्धि लोकयोः कुलयोरपि ॥८४॥
इत्युक्ते सा सवैलक्ष्यकैतवोचे तवोत्तम !
मया परीक्षितं सत्त्वं साधु साधु विवेक्ष्यसि ॥८५॥
इत्युदीर्य तदा क्षीर्यमाणयेवान्तरा क्रुधा ।
विसृष्टस्तां प्रणम्याशु निजं धाम जगाम सः ॥८६॥

§§ इतश्च सायमायाता ताम्बूलस्रग्विलेपनम् ।
कुमारायाऽऽर्पयत् तं च बभाषेऽनङ्गसुन्दरी ॥८७॥
स्वामिनी मन्मुखेन त्वां देव ! विज्ञपयत्यदः ।
यद् माल्यमार्यपुत्रेदं त्वत्कृते गुम्फितं मया ॥८८॥
कुमारस्तद् निशम्यैतत्करादादाय सादरम् ।
माल्यं मूर्ध्नि दधौ प्रीतः प्रियाज्ञामिव देहिनीम् ॥८९॥
प्रियायामिव मूर्त्तेनानुरागेण निजं वपुः ।
विलिलेपाङ्गरागेणात्युद्गतेनेष रोमभिः ॥९०॥
प्रियानीतमिवोद्दामं रागपुष्टिकरं मुखे ।
सनत्कुमारस्ताम्बूलमनुकूलस्मरोऽकरोत् ॥९१॥
अनङ्गसुन्दरीमूचे **विश्वभूति**र्जनान्तिकात् ।
कुमारविनयं पश्य साह किं न्यूनमस्ति वः ॥९२॥
अथ स्मित्वा कुमारोऽपि बभाषेऽनङ्गसुन्दरि !
यत्कृत्यादेशकृद्देव्या निखिलोऽयं जनो ननु ॥९३॥
इहैतव्यं त्वया शश्वद् **विश्वभूति**मयोऽपि यत् ।
मा शङ्किष्ठास्तवैवायमावासोऽनङ्गसुन्दरि ! ॥९४॥
भवती घटयन्त्यन्यत् कण्ठाभरणमस्ति नः ।
तदग्रेतनमादत्स्व नेशा वोढुं द्वयं वयम् ॥९५॥

सहास्यमिति संभाष्य दत्त्वास्यै कण्ठभूषणम् ।
ततो विसर्जयामास कुमारोऽनङ्गसुन्दरीम् ॥९६॥

§§ अत्रान्तरे समागत्य **विनयन्धर**सञ्ज्ञितः ।
तलारक्षः कुमारस्य नत्वोपाविशदग्रतः ॥९७॥
कारयित्वैष विजनं कुमारमिदमभ्यधात् ।
अस्ति **स्वस्तिमती** नाम ग्रामस्त्वत्पितृमण्डले ॥९८॥
वीरसेनाभिधस्तत्र राजपुत्रशिरोमणिः ।
शरण्यः सकृपस्त्यागी भोगीश्वरश्च मान्यभूत् ॥९९॥
आपन्नसत्त्वामादायान्यदा स त्वात्मगेहिनीम् ।
तस्याः पितुर्गृहस्थाने पुरे गच्छञ्**जयस्थले** ॥१००॥
आवासानग्रहीद् यावद् निकषा **श्वेतवर्ती** पुरीम् ।
शरणं कश्चिदप्यागात् तावत् तं सत्वरः पुरः ॥१०१॥ युग्मम् ॥
तस्यानुपदमेवोच्चैराकृष्टतरवारयः ।
यमदूता इवागच्छन् पत्तयः पृथिवीपतेः ॥१०२॥
रे रे क्व यासि फेरुण्ड इव वित्रस्य गोपतेः ।
मण्डवत् खण्डयिष्यामः कृष्ट्वा त्वामवटादपि ॥१०३॥
इत्युद्धतं ब्रुवन्तस्ते **वीरसेने**न भाषिताः ।
कथयन्तु स्थिरीभूय किमनेन विनाशितम् ? ॥१०४॥
ऊचुस्ते ननु चौरोऽयं वध्यः कस्त्वमितो भव ।
सोप्याहाऽस्य शरण्योऽहमेन रक्षामि सर्वथा ॥१०५॥
तदेवं ज्ञापितस्याथ नृपस्यादेशतस्त्वमी ।
यावत् प्रधनसंरम्भमारभन्तामुना समम् ॥१०६॥
वाह्यालीमाग्रतस्तावद् **यशोवर्मा** पिता तव ।
तज्ज्ञात्वाऽऽह शरण्यं कः शृणाति मयि जीवति ? ॥१०७॥ युग्मम् ॥

प्रतिषिद्धमथो युद्धं राज्ञा **विजयवर्मणा** ।
त्वत्पित्रा **वीरसेनो**ऽपि सत्कृतोऽगाज्**जयस्थलम्** ॥१०८॥

सूता च गृहिणी तस्य जातः पुत्रः स चास्म्यहम् ।
कुमार ! तेन ते तातो मत्तातस्योपकारकः ॥१०९॥

ममापि च मदम्बाया अपि चेति श्रुतं मया ।
पितृभ्यां, तेन तेऽस्माकं जीवलोकोऽपि किं बहुः ? ॥११०॥

किञ्चाद्य नृपतिः प्रापा**नङ्गवत्या** निकेतनम् ।
दृष्टा च रुदती तेन सा नखोल्लिखिता हृदि ॥१११॥

राज्ञा पृष्टा बलात्कारकारिणं त्वां शशंस सा ।
ततः क्रुद्धः समादिक्षदिति मामधनं नृपः ॥११२॥

सनत्कुमारकं पापं तमरे ! कुलपांसनम् ।
निगृहाण तथा शीघ्रं यथा कोऽपि न विन्दति ॥११३॥

इत्यादिष्टो नृपेणाहं निःसृतोऽतीव दुर्मनाः ।
हा किमेतदिति ध्यायंस्तोरणेऽशृणवं क्षुतम् ॥११४॥

विलम्बमानं तत् श्रुत्वा प्राह नैमित्तिकोऽथ माम् ।
क्षुतं **सोमा**ख्यमेतत्ते **विनयन्धर !** शोभनम् ॥११५॥

ततो गतो गृहं मात्रा पृष्टं कालुष्यकारणम् ।
तत् तथाऽकथयं तस्या रुदती साप्यदोऽवदत् ॥११६॥

हा वत्स ! मा वधीरेनमुपकारिसुतो ह्ययम् ।
इत्यागतोऽहमत्रातः परं यत् कृत्यमादिश ॥११७॥

ततः **सनत्कुमारो**ऽपि चिन्तयामास चेतसि ।
अहो मायाविता स्त्रीणामहो विलसितं विधेः ॥११८॥

स्वभावः कथ्यते राज्ञश्चेत् तदा सा निहन्यते ।
चेन्न तत् कुलमालिन्यं वरं तद् मा परव्यथा ॥११९॥

तलारक्षोऽवदद् देव ! शाधि मां करवाणि किम् ? ।
कुमारः प्राह मां हिन्धि जनिकृद्वंशपांसनम् ॥१२०॥
अत्रान्तरे क्षुतं मार्गे व्रजद्भिः कैश्चिदौच्यत ।
किं बहूक्तेन निर्दोषः सैष गङ्गाजलं यथा ॥१२१॥
इत्याकर्ण्य तलारक्षः प्राह निर्दूषणो भवान् ।
यत्क्षुतोपश्रुती व्यक्तमेव त्वां शुद्धमाहतुः ॥१२२॥
खलूक्त्वाऽन्यप्रलापेन तत्कुमार ! निवेदय ।
कीदृगेतदभूद् येन भूपं विज्ञपयाम्यहम् ॥१२३॥
कुमारः प्राह किं वच्मि प्रमाणं सैव मेऽम्बिका ।
तेनोचे सैव दुष्टेति गत्वा शंसामि भूपतिम् ॥१२४॥
इत्युदित्वोत्थितो रुद्धः कुमारेणेति जल्पता ।
संरम्भेणालमेतस्यां **'गुरुभ्यः को नु मत्सरः' ?** ॥१२५॥
तेनोचे त्वं **यशोवर्म**सुतोऽसि कियदुच्यते ।
कोपस्तन्नैष ते तस्यां तत् प्रसीद विमुञ्च माम् ॥१२६॥
कुमारः प्राह संरम्भं त्यज, स त्वाह मा वद ।
कुमारः प्राह चेन्न स्वं घातयिष्यामि तद् व्रज ॥१२७॥
निशम्येति तलारक्षो रुदन् प्रोवाच धिङ् नृपम् ।
कुमारः प्राह को दोषस्तस्य, मे कर्मवैशसम् ॥१२८॥
तलारक्षस्ततोऽवादीत् तदादिश करोमि किम् ? ।
कुमारोऽभिदधे तूर्णं विधेहि नृपशासनम् ॥१२९॥
तेनोचे कः प्रलापोऽयमसंबद्धः पुनः पुनः ।
कुमार ! जगदाधार ! सुतारगुणगौरव ! ॥१३०॥
यदि रक्षसि तां रक्ष देव ! किन्तु ममादिश ।
उपायं येन ते न स्यामपराधी कथञ्चन ॥१३१॥

कुमारोऽचिन्तयच्चित्ते मार्योऽयं मय्यमारिते ।
मारयन्नपराधी मे तद् वरं विषयान्तरम् ॥१३२॥
आख्यदेतत् कुमारोऽस्मै सोऽपि हृष्टो जगाविति ।
स्वर्णभूमिं प्रति ततो यानमद्यैव यास्यति ॥१३३॥
सविश्वभूतिविनयन्धरः सद्गुणबन्धुरः ।
ययौ छन्नं कुमारोऽथ वेलाकूलं पयोनिधेः ॥१३४॥
ततः **समुद्रदत्त**स्यार्पयत् प्रवहणेशितुः ।
विश्वभूतिद्वितीयं तं कुमारं **विनयन्धरः** ॥१३५॥
कुमार ! खेदितोऽसि त्वं क्षन्तव्यमिति सास्रदृक् ।
संभाष्यैनं प्रणम्याथ तलारक्षो न्यवर्तत ॥१३६॥
उदितेऽथ विधौ वार्धिवेलापयसि वल्गति ।
सविश्वभूतिरारोहद् यानुमुर्वीशनन्दनः ॥१३७॥
नावर्गलान् समुत्क्षिप्य गृहीत्वांशुकमञ्जसा ।
कर्णधारे समुद्युक्ते नौरपूर्यत नाविकैः ॥१३८॥
यानेन जाङ्घिकेनाथ पाथःपथमतीत्य तौ ।
दिनैः कतिपयैरेव **स्वर्णभूमिं** समीयतुः ॥१३९॥
समुद्रदत्तमापृच्छ्योत्तीर्य प्रवहणात् ततः ।
स**विश्वभूति**रविशत् कुमारः **श्रीपुरं** पुरम् ॥१४०॥
श्वेतवीतः समायातं **सिद्धदत्त**वणिक्सुतम् ।
स**मनोरथदत्ता**ख्यं बालमित्रमिहैक्षत ॥१४१॥
असंभाव्यागमः सोऽपि वीक्षितोऽनेन संभ्रमात् ।
विहसंश्च प्रणम्यात्मावासेऽनीयत भक्तितः ॥१४२॥
भुक्तोत्तरं ततः पृष्टः समागमनकारणम् ।
कुमारः प्राह यानस्मि तातरोषेण **सिंहलम्** ॥१४३॥

तत्र मे मातुलो राजा तं द्रष्टुमहमुत्सुकः ।
तत्त्वं मे **सिंहलद्वीप**गामि यानं निवेदयेः ॥१४४॥
ततः कतिपयैरेव वासरैः स न्यवेदयत् ।
यानमेकं कुमाराय प्रस्थास्नु प्रति **सिंहलम्** ॥१४५॥
गच्छतेऽस्मै वणिक्पुत्रः पटमेकढौकयत् ।
आश्चर्यकारी देवायं गृह्यतामिति रोचयन् ॥१४६॥
किमाश्चर्यं करोत्येष कुमारेणेति भाषिते ।
स प्राह पुरुषं कुर्याददृश्यमवगुण्ठितः ॥१४७॥
कुमारः प्राह लाभोऽस्य कुतस्ते सोऽब्रवीदिति ।
अस्त्यासनन्नमि**हानन्दपुरं** तत्रास्ति मे सुहृत् ॥१४८॥
सिद्धसेनाभिधः सिद्धविद्यस्तेनैकदा मम ।
आनीय मण्डले यक्षकन्याऽध्यक्षीकृता पुरा ॥१४९॥
तयाऽभितुष्टया दृष्टिममोघीकर्तुमात्मनः ।
कुमार ! मम दत्तोऽयं पटो नयनमोहनः ॥१५०॥
ततः प्रीतः कुमारस्तमादायानुमतोऽमुना ।
स**विश्वभूति**रगमद् वेलाकूलं पयोनिधेः ॥१५१॥
प्राह सांयात्रिकं त**त्रेश्वरदत्तं** मनोरथः ।
कुमारोऽयं मम स्वामी सर्वस्वं वा किमुच्यते ? ॥१५२॥
द्रष्टव्यस्तत् त्वयात्मेवेत्युक्ते सोऽभिदधे ततः ।
मित्र ! किं बहुना यादृक् तव तादृग् ममाप्यसौ ॥१५३॥
भालयित्वेति भूपालभवं नत्वा च सोऽगमत् ।
कुमारोऽथ समासेहद् यानमेतदपूर्यत ॥१५४॥
अथेदं **सिंहलद्वीपा**भियानं यानमन्यदा ।
कालमेघमयः कालः क्रुधोत्तालोऽकटाक्षयत् ॥१५५॥

तदा वर्षानिलोल्लोलकल्लोलकिलिकिञ्चितैः ।
यानं त्रस्तैणवद् व्योम्न्यारुह्यारुह्यापतद् मुहुः ॥१५६॥

कातरा व्यलपन् धीरा यानत्राणोद्यमं व्यधुः ।
धार्मिकाश्च तदा स्वस्वकुलदैवतमस्मरन् ॥१५७॥

आरुह्य कुत्रचिद् वार्धिनगमूर्ध्नि निरङ्कुशम् ।
तदा दुर्दैवसंरम्भाद् यानमेतदभज्यत ॥१५८॥

धीरचेताः कुमारस्तु प्राप्यैकं फलकं ततः ।
त्र्यहोरात्रं तरंस्तोयं गतोऽयं तीरमम्बुधेः ॥१५९॥

ततोऽसौ पुलिने गत्वा वासांसि निरपीडयत् ।
तदवस्थामिवालोक्य मुञ्चन्तीवाश्रुनिर्भरम् ॥१६०॥

दृग्मोहनपटः स्वानुभावात् तीमित एव न ।
यद्वा कुमारदुःखान्तचिकीर्जाड्यं किमेतु सः ? ॥१६१॥

कुमारस्तदभेदेन विस्मितात् सैकया दिशा ।
गत्वा किञ्चिद् विशश्राम श्रान्तो जम्बूतलावनौ ॥१६२॥

अचिन्तयच्च तत्रायमहो ! विधिविजृम्भितम् ।
अश्रद्धेयामवाप्यापि दशां यज्जीव्यते मया ॥१६३॥

विश्वभूतिं विना तेन जीवितेनापि किं मम ? ।
यद्वा कृतं विषादेन **'विचित्रा कर्मणां गतिः'** ॥१६४॥

यथाऽहमुद्धृतो जीवंस्तथा सोऽपि क्वचिद् भवेत् ।
तच्चन्द्रार्काविव क्वापि जीवन्तौ संघटावहे ॥१६५॥

विचिन्त्येत्यचलत् तृष्णाक्षुधार्त्तोऽयमुदन्मुखः ।
अपश्यच्च नदीमेकां वनराजिविराजिताम् ॥१६६॥

कृत्वा फलजलाहारं तत्र तिष्ठन्नलोकत ।
एकं निजस्त्रिया युक्तं सारसं भ्रमसंभृतम् ॥१६७॥

स **विलासवती** स्मृत्वा चिन्तयामासिवानिति ।
पक्षिणोऽमी वरं येषामभीष्टविरहो न हि ॥१६८॥

§§ अत्रान्तरे निशानावो भङ्गाद् मग्नान्यतारकम् ।
भास्वानपि नभोऽम्भोधिं तीर्त्वा तत्प्रान्तमीयिवान् ॥१६९॥

सान्ध्यकृत्यं विधायाथ स्मृत्वा देवगुरूनयम् । 5
शिलाशय्यामवष्टभ्याशेत वन्य इव द्विपः ॥१७०॥

निशान्ते बन्दिभिरिव ध्वनद्भिः श्रुतिपेशलम् ।
वाजिभिस्त्याजितो निद्रां विचचार वने वने ॥१७१॥

यावद् गिरिसरित्तीरमेकं वीरो जगाम सः ।
नूतनां तावद् द्राक्षीद् मृगाक्षीपदपद्धतिम् ॥१७२॥ 10

ततस्तदनुसारेण कौतुकोत्तानमानसः ।
किञ्चिदग्रे गतोऽपश्यदेकां तापसकन्यकाम् ॥१७३॥

वल्कसंवर्मितां धर्मनृपतेः सुभटीमिव ।
शस्त्रागारमिवोद्यानं लुण्टन्तीं पुष्पधन्वनः ॥१७४॥

नागकन्यामिवोद्वृत्तामुत्तीर्णममरीमिव । 15
लतान्तरितदेहस्तां पश्यन्नयमचिन्तयत् ॥१७५॥ युग्मम् ॥

अस्या जितो मुखेनोग्रजटावनसरित्तटे ।
पादान्तकृतभालाक्षकुकूलस्तप्यते विधुः ॥१७६॥

मुखाङ्कखलकेऽमुष्याः खेलतोः लोचनाङ्कयोः ।
नासावंशनिभाद् वेधा व्यधाद् दण्डमिवान्तरे ॥१७७॥ 20

लावण्यमृतकुल्यायाः स्तनावस्या मृगीदृशः ।
दोर्नालकरपाथोजविशकन्दाविवोज्ज्वलौ ॥१७८॥

रोमलेखामिषादस्याः पीत्वा नाभिसरोरुहम् ।
वक्त्रराजीवपानाय भृङ्गराजीव गच्छति ॥१७९॥

योषिदेतत्समानाऽऽसीद् नास्ति नैव भविष्यति ।
इति रेखात्रयं धातुरेषा धत्ते वलित्रयम् ॥१८०॥

यौवनस्य स्मरारोहवाजिनो वेल्लनोचिता ।
अस्या विभाति जघनस्थली पुलिनपुष्कली ॥१८१॥

स्वर्भुवःसुभ्रुवां रूपजयस्तम्भसखिभ्रमौ ।
ऊरू सुवर्णकदलीगर्भगौरौ बिभर्त्यसौ ॥१८२॥

निपत्यपादयोरेनां नखरत्नापदेशतः ।
चन्द्रार्थमर्थयन्तीव तारिकादौत्यकारिकाः ॥१८३॥

इयं निसर्गमधुरा वल्कलैरपि राजते ।
सुवर्णकेतकीपुष्पकलिकेव बहिर्दलैः ॥१८४॥

तदिय नूनमन्यूनरूपा भूपालनन्दनी ।
सा **विलासवती** यद्वा क्वासौ क्व च वनस्थितिः ? ॥१८५॥

इति चिन्तयतस्तस्य सा कृत्वा कुसुमोच्चयम् ।
यावद् बाला चचालात्मतपोविपिनसंमुखी ॥१८६॥

तावदेय स्मरोन्मादं गोपयित्वाऽभिसृज्य च ।
नमस्कृत्य च तामूचे तपस्ते वर्धतां शुभे ! ॥१८७॥

श्वेतवीवास्यहं **तामलिप्त्या** यान् प्रति **सिंहलम्** ।
अन्तराभग्नयानत्वादेकाकीह समागमम् ॥१८८॥

तद् मे भगवती शंसत्विदं किं जलधेस्तटम् ? ।
द्वीपो वा कः प्रदेशश्चः कुत्राश्रमपदं तव ? ॥१८९॥

ततो विलोक्यं तं सापि विकुञ्चितविलोचना ।
दिग्मुखानीव पश्यन्ती क्षणं तस्थौ ससाध्वसा ॥१९०॥

अदत्तप्रतिवागेषा ययावभि तपोवनम् ।
कुमारस्तु स्थितस्तत्र चिन्तयामासिवानिति ॥१९१॥

युवतिस्तापसी चैषैकाकिनी तत्किमेतया ? ।
अन्यं प्रक्ष्याम्यहं कञ्चिदिति ध्यात्वाऽविशद् वनम् ॥१९२॥

पृच्छाम्येतामिति पुनर्व्यावृत्तोऽयमसावपि ।
विशेषमन्थरं गत्वा स्तोकं भूमागमस्थित ॥१९३॥

मुक्त्वा करण्डके वल्कं विस्रस्तमिव पर्यधात् ।
जृम्भमाणा बभञ्जाङ्गमबध्नात् कबरीं पुनः ॥१९४॥

तद्विकारमयं दृष्ट्वाऽचिन्तयत् किमिदं पुनः ।
विरुद्धवस्तुविषयालोकेन किमु वाऽमुना ? ॥१९५॥

इति व्याघुट्य गतवानयं गिरिनदीं ततः ।
प्राणवृत्तिं व्यधात् पाकपेशलैर्भूरुहां फलैः ॥१९६॥

अत्रान्तरे नभोवृक्षात् फल तरणिमण्डलम् ।
निरन्नेन किलादाय कालेन कवलीकृतम् ॥१९७॥

सान्ध्यकृत्यं विधायाथ पूर्वेण विधिना ततः ।
अशेत शेषयामिन्यामसौ स्वप्नमलोकत ॥१९८॥

जानामि काञ्चनतरोरासन्नस्थस्य मे ददौ ।
स्रजं सर्वेन्द्रियमनोहरा कापि वराङ्गना ॥१९९॥

ऊचे च पूर्वक्लृप्तेयं स्रग् मया ते समर्प्यते ।
कुमार ! गृह्यतामित्थमादां कण्ठे च तामधाम् ॥२००॥

अत्रान्तरे विभातेशागमडिण्डिमचण्डिमा ।
सारसक्रौञ्चनिनदस्तस्य निद्रामनीनशत् ॥२०१॥

प्रबुद्धोऽचिन्तयदयं मम स्वप्नोऽयमीदृशः ।
कन्यालाभाय यद्वेदमरण्यं कुत एव सः ? ॥२०२॥

अत्रान्तरे च पुस्फोर भुजा दृष्टिश्च दक्षिणा ।
सोऽपि दध्याविदं भावि ध्रुवं न श्रुतमन्यथा ॥२०३॥

तां **विलासवतीं** हित्वा नान्यां कन्यामहं भजे ।
स्वप्नोऽपि पूर्वक्लृप्तेयं स्त्रगिति स्पष्ट एव मे ॥२०४॥

तापसी सापि सितांशुमुखीमनुकरोति ताम् ।
दैवतः सैव वा सा यत् ते तापस्याः क्व विभ्रमः ? ॥२०५॥

इति चिन्तयतस्तस्य मूर्तं पुण्यमिवोद्ययौ ।
रविस्तमांसि भिन्दानो विघ्नानिव घनानपि ॥२०६॥

ततः कामज्वरार्त्तस्तामोषधीमिव तापसीम् ।
वीक्षमाणः कुमारोऽयं बभ्राम प्रतिकाननम् ॥२०७॥

माधवीश्लिष्टचूतद्रुतलेऽन्येद्युरसौ स्थितः ।
तामेव चिन्तयन् मुग्धामशृणोद् मर्मरध्वनिम् ॥२०८॥

ततो विवलितग्रीवः समायान्तीमलोकत ।
जरतीं तापसीमेकां तपः कृशतमामयम् ॥२०९॥

अथोत्थाय विनीतात्मा ननामायमियं पुनः ।
राजपुत्र ! चिरं जीवेत्याशशास सबाष्पदृक् ॥२१०॥

कुमारोऽचिन्तयदियं कथं मामुपलक्षत्ते ? ।
अथवा ज्ञानवानेव भवेद् मुनिजनोऽखिलः ॥२११॥

उपविश्य कुमारेण मार्जितावनिमण्डले ।
तस्मै पुरो निषण्णायेत्यादिशद् वृद्धतापसी ॥२१२॥

कुमाार ! श्रूयतामस्ति **वैताढ्य** इति पर्वतः ।
तत्र **गन्धसमृद्धा**ख्ये पुरे विद्याधरेश्वरः ॥२१३॥

सहस्त्रबल इत्यासीत् तत्प्रिया तु **शुभा**भिधा ।
तयोरेकाहमभवं सुता **मदनमञ्जरी** ॥२१४॥

विलासपुरनाथेन पर्यणायिषि यौवने ।
अहं **पवनगत्या**ख्यविद्याधरमहीभृता ॥२१५॥

अन्यदाऽऽवामगच्छाव दम्पती **नन्दनं** वनम् ।
नानाविधाभिः क्रीडाभिश्चिरं चाक्रीडतामिह ॥२१६॥
अत्रान्तरे मम भोगान्तराये समुपस्थिते ।
क्षीणे तदायुषि व्यध्यात् प्रदीप इव मे पतिः ॥२१७॥
ततोऽहं तमसाक्रान्ता सारसीव समन्ततः ।
क्रन्दन्ती च भ्रमन्ती च भूतले सहसाऽपतम् ॥२१८॥
उत्पतन्तीव मूर्च्छान्ते चेतिता पुनरस्मरम् ।
आकाशगामिनीं विद्यां तथाप्युदपतं न हि ॥२१९॥
अपराधमात्मीयं च स्मरन्ती यावदस्म्यहम् ।
द्वितीयं हृदयं तावद् **देवानन्दः** समाययौ ॥२२०॥
विद्याधरोऽयं वैराग्याद् विलसत्तापसव्रतः ।
मामाह किमिदं वत्से ! मयोचे दैवचेष्टितम् ॥२२१॥
तेनोक्तं किं मयाऽप्युक्तमार्यपुत्रो व्यपद्यत ।
आकाशगामिनी विद्या सापि मेऽद्याप मोघताम् ॥२२२॥
स बाष्पगद्गदोऽवादीद् वत्सेऽलं परिदेवितैः ।
ईदृगेव हि संसारः कुशाग्रजलचञ्चलः ॥२२३॥
इन्द्रायुधमिव स्वप्नसाम्राज्यमिव वाऽस्थिरम् ।
भवं विभाव्य धीमंन्तो धर्मं दधति शाश्वतम् ॥२२४॥
ततो मयोचे भगवन् ! व्रतेनानुगृहाण माम् ।
सोऽब्रवीद् युक्तमेतत् तु किं विद्याभ्रंशकारणम् ? ॥२२५॥
मयोचेऽहं न जानामि स त्वाह ज्ञानचक्षुषा ।
त्वया शोकार्त्तया वत्से ! **सिद्धकूट**मलङ्घ्यत ॥२२६॥
पपात तस्य शिखरदेशे कुसुमदाम ते ।
वत्से ! तन्मूल एवायं विद्याभ्रंशोऽभवद् भृशम् ॥२२७॥

अथो मयोचे भगवन् ! देहि मे व्रतमञ्जसा ।
इहोपकारिणीभिस्तु विद्याभिः सर्वथा कृतम् ॥२२८॥

ततो भगवताऽऽख्याय तापसाचारमात्मनः ।
आपृच्छ्य पितरौ **श्वेतद्वीपे**ऽत्रानीय दीक्षिता ॥२२९॥

कियत्यपि गते कालेऽन्यदाऽहं समिदाहृतौ ।
गताऽम्भोधितटेऽद्राक्षं मूर्त्तिं साङ्कामिवैन्दवीम् ॥२३०॥

फलकेन युतां कन्यामेकामेकान्तसुन्दराम् ।
ततोऽगमं तदभ्यर्णे जीवतीति निरूपितुम् ॥२३१॥

मूर्च्छितामपि जीवन्तीं मत्वा लावण्यतो द्रुतम् ।
अभ्यषिञ्चमहं वारि समादाय कमण्डलोः ॥२३२॥

दृशावुन्मीलयन्ती सा समभाषि मया ततः ।
वत्से ! धीरा भवाहं यदस्मि ते तापसी पुरः ॥२३३॥

ततोऽश्रुमिश्रदृगियं नत्वा मामुपविश्य च ।
दीर्घमुष्णं च निःश्वस्य चित्ते चिरमखिद्यत ॥२३४॥

ततोऽस्या लक्षितो भावश्चिन्तितं च मया हृदि ।
भाव्यं महानुभावत्वाद् महाकुलभुवाऽनया ॥२३५॥

ततः फलैः प्राणवृत्तिमनिच्छन्त्यपि कारिता ।
नीत्वाऽऽश्रमं कुलपतेर्दर्शिताऽसौ ततो मया ॥२३६॥

ततो भगवताऽऽनन्द्य वत्से ! का त्वमितीरिता ।
आह सा **तामलिप्ती**तो मया चोक्ता निरश्वसीत् ॥२३७॥

ततोऽचिन्ति महावंशप्रसूः स्वं कथयेत् कथम् ।
इयमास्तां कुलपतिं प्रक्ष्यामि समयान्तरे ॥२३८॥

वासरेऽथ व्यतिक्रान्ते कृते सायंतने विधौ ।
भूतं भावि च वृत्तान्तमस्याः पृष्टो मुनिर्मया ॥२३९॥

दत्त्वोपयोगं तपसोऽनुभावाद् भगवानपि ।
जगाद **तामलिप्तीशेशानचन्द्र**सुता ह्यासौ ॥२४०॥
श्वेतवीश**यशोवर्म**सुतश्चैत्रोत्सवेऽनया ।
दृष्टः **सनत्कुमारो**ऽस्मिन्नजनिष्टानुरागिणी ॥२४१॥
पतिं मनोरथादेतं न पाणिग्रहणादियम् ।
शुश्राव काण्डकुपितनृपाज्ञानिहतं जनात् ॥२४२॥
विलोक्य मृतमप्येनं प्राणांस्त्यक्ष्यामि तत्कृते ।
इति तन्मोहतोऽचालीदियमेकाकिनी निशि ॥२४३॥
सुप्ते परिजने मन्दं निःसृत्य निजमन्दिरात् ।
अवतीर्णा पुरीमार्गे सद्यः प्राप्यत तस्करैः ॥२४४॥
गृहीत्वाऽऽभरणान्युच्चैः सार्थवा**हाचल**स्य तैः ।
दत्ता **बर्बर**कूलाभिगामिनस्तत्क्षणादियम् ॥२४५॥
अचलेन ततो यानमियमारोप्य चालिता ।
स्फुटितं यानमेतस्य फलकं चेयमासदत् ॥२४६॥
इदं कूलमियं प्रापत् त्रिरात्रेण ततोऽम्बुधेः ।
इदं भूतं, भविष्यत्तु भर्ता सोऽस्या मिलिष्यति ॥२४७॥
प्राप्य विद्याधरैश्वर्यं भुक्त्वा भोगान् सहानया ।
परलोकहितेनेहलोकं सफलयिष्यति ॥२४८॥
श्रुत्वेत्यपृच्छं भगवन् ! न हतः पतिः ? ।
नैवेति भगवानाह ततः प्रीतिमधामहम् ॥२४९॥
"समभाषि द्वितीयेऽह्नि सा मया श्यामलानना ।
राजपुत्रि ! विषादेन कृतं कुरु धृतिं हृदि ॥२५०॥
संसारे चिक्लिशेऽमुष्मिंश्चिक्लिदो विपदां गणः ।
सदैव चिक्नसो मृत्युः कृतान्तश्च घनाघनः ॥२५१॥

श्रियश्चलाचला वत्से ! यौवनं च पतापतम् ।
पटापटं च विषयसुखं दुःखं वदावदम्'' ॥२५२॥
निशम्येति तया प्रोचे ब्रूथ यत् तद् वृथा न हि ।
कृत्वा प्रसादं तद् मेऽपि दत्तां भगवती व्रतम् ॥२५३॥
इयं ततो मयाऽवादि वत्सेऽलं व्रतवार्तया ।
वनेऽपि हन्ति यद् यूनः स्मरो यौवनपाद्रिकः ॥२५४॥
पृष्टश्च तव वृत्तान्तं दिव्यज्ञानधरो मुनिः ।
श्वेतवीन्द्रसुतालोकादिकं सर्वं न्यवेदयत् ॥२५५॥
मा संताप्सीस्ततो वत्से ! जीवत्येव तव प्रियः ।
तेन दीर्घायुषा भावी भूयोऽपि तव सङ्गमः ॥२५६॥
निशम्येति ततस्तोषविस्मयोत्तरला मम ।
सङ्कल्पतः समुत्तार्यासदप्याभरणं ददौ ॥२५७॥
असंपत्तौ ततो जातचेतनेयमलज्जत ।
मयोचे संभ्रमेणालमीदृग्दानोचितासि यत् ॥२५८॥
व्रताग्रहेण तदलमिति मद्वचनादियम् ।
तुष्टा जगाद भवतामादेशो मेऽस्तु मूर्धनि ॥२५९॥
अथासौ तापसकन्योचितेन विधिना चिरम् ।
स्थिता कुलपतिश्चागात् तीर्थार्थी **सिद्ध**पर्वतम् ॥२६०॥
इतश्चातीतकतिचिद्दिनेभ्योऽन्येद्युराश्रमे ।
आगतेयं चिराद् गत्वा समित्कुसुमहेतवे ॥२६१॥
वीक्ष्यामाणा खिन्ना बाष्पक्लिन्नानना मया ।
पृष्टा वत्से ! किमित्येषा बन्धूनां स्मृतिमाह च ॥२६२॥
ततोऽभाषि मया भूयो वत्से ! तावद् विषीद मा ।
यावदभ्येति भगवान् स त्वां नेष्यति बन्धुषु ॥२६३॥

तदेतत् प्रतिश्रुत्यास्थात् पञ्चषाणि दिनानि सा ।
देवातिथिक्रियामन्दादरा स्मरविकारयुक् ॥२६४॥

नागवल्ल्याश्रितं चूतं मरालं वरटान्वितम् ।
सबाष्पं वीक्ष्य निःश्वस्यान्येद्युरेषाऽऽश्रमाद् ययौ ॥२६५॥

ततोऽचिन्ति मया नेयं भव्या भाति क्व याति च । 5
पश्यामीत्यहमप्यस्याः पृष्ठेऽगां गुप्तचर्यया ॥२६६॥

अगृहीतकरण्डासौ गता पुष्पोच्चयावनौ ।
विलोकितुं प्रवृत्ता च दिशस्तरलतारिका ॥२६७॥

ततोऽचिन्ति मया किं नु पश्यत्येषा पुनर्ययौ ।
अशोकवीथिकदलीवनं तत्र स्थिताऽरुदत् ॥२६८॥ 10

व्यलपच्चेति हा तत्रभवत्यो वनदेवताः ।
स्थानं तदेतद् यत्रार्यपुत्रोऽभ्यागात् कुतश्चन ॥२६९॥

तापसीति धिया तेन विनीतेनास्मि वन्दिता ।
गदिता च मृदूल्लापं तपस्ते वर्धतां शुभे ! ॥२७०॥

श्वेतवीवास्यहं तामलिप्त्या यान् प्रति **सिंहल**म् । 15
अन्तरा भग्नयानत्वादेकाकीह समागमम् ॥२७१॥

तद् मे भगवती शंसत्विदं किं जलधेस्तटम् ।
द्वीपो वा कः प्रदेशश्च कुत्राश्रमपदं तव ? ॥२७२॥

दत्तं तु प्रतिवाक्यं न ससाध्वसहृदा मया ।
स्वभावाद् वा मया स्तोकं भूभागं गतमग्रतः ॥२७३॥ 20

धैर्यमालम्ब्य पश्यन्त्या पृष्ठे नायात् स वीक्षितः ।
तन्न जानामि किमयं हृदयाद् मे विनिर्गतः ॥२७४॥

उतार्यपुत्रवेषेण कोऽपि मामीक्षते सुरः ।
आर्यपुत्रः स एवायं वा यदस्ति तदस्तु वा ॥२७५॥

न शक्नोम्यार्यपुत्रस्य पुनः सोढुं वियोजनम् ।
तदुद्बध्यात्र वासन्त्यां घातयामि स्वमञ्जसा ॥२७६॥
आर्यपुत्रशरीरे तु रक्षां कुर्यात् सन्ततम् ।
कथयेत च वृत्तान्तं भगवत्यो ! ममेदृशम् ॥२७७॥
अहं तु शंसितुं नेशे भृशं लज्जावशंवदा ।
इत्युदीर्याभिवल्मीकं स्थिता पाशमसूत्रयत् ॥२७८॥
ततो देवान् गुरून् नत्वा पाशे कृत्वा शिरोधराम् ।
मुञ्चते यावदात्मानं तावदस्मि प्रधावित्रा ॥२७९॥
पाशादाकृष्य साऽवादि वत्से ! नाप्रच्छनं मयि ।
कार्यस्याकथनं चापि वत्सलायां तवोचितम् ॥२८०॥
ततो ही सर्वमनया श्रुतमित्याहितत्रपा ।
सोचे प्रसीद भगवत्यत्र लज्जाऽपराध्यति ॥२८१॥
अथाभाषि मया वत्से ! न कोपो नः परं वद ।
त्वया कोऽप्यतिथिर्दृष्टः सोचेऽश्राव्येव पूज्यया ॥२८२॥
अथाभाषि मया वत्से ! सत्यवाग् भगवान् खलु ।
आयातमपि ते भाविप्रियं यावश्चलाश्रमम् ॥२८३॥
इत्यागत्याश्रमं त्वामन्वेष्टुं मुनिकुमारकान् ।
प्रस्थाप्य नृपनन्दन्याः पार्श्वेऽहं प्रयता स्थिता ॥२८४॥
दृष्टो न कश्चिदस्माभिरित्यागत्य न्यवेदि तैः ।
ततस्तांस्तत्र मुक्त्वाहं मार्गितुं त्वामिहागमम् ॥२८५॥
भवितव्यतयाऽवश्यकार्ये सज्जतया च मे ।
दर्शितोऽसि तदागच्छाश्रमं तज्जीवनौषधे ! ॥२८६॥
ततः प्रीतिमता तेन प्रियलोकोत्सुकात्मना ।
कुमारेण समं प्राप तापसी निजमाश्रमम् ॥२८७॥

कुमारो गौरवाद् दत्तासने तत्रासितो मुदा ।
तां **विलासवतीं** पद्मस्रस्तरस्थामलोकत ॥२८८॥

तं दृष्ट्वा सापि तच्चित्तमिवान्तर्लज्जिताऽविशत् ।
तापस्यादेशतश्चक्रे चार्घ्यपाद्यादिसत्क्रियाम् ॥२८९॥

अत्रान्तरे नभोमध्यमध्यास्त च गभस्तिमान् ।
कुमारसत्क्रियाचिन्तां विधातुमिव कामपि ॥२९०॥

आतिथ्यं पनसैः कृत्वा कुमारस्याथ तापसी ।
जगाद तत्पुरोभूय बाष्पाविलविलोचना ॥२९१॥

राजपुत्र ! किमातिथ्यं कन्दमूलफलाशनः ।
करोतु भवते वल्कवेषो वैखानसो जनः ? ॥२९२॥

तद् **विलासवती** सैषा जीविताद्पि वल्लभा ।
पूर्वसंपादिता धात्रा भूयः संपाद्यतेऽधुना ॥२९३॥

इत्युक्त्वा रुदतीं वल्कपिहितास्यामयं जगौ ।
इदं भगवति ! त्यक्तसंसारायाः किमद्य ते ? ॥२९४॥

ततस्तापसकन्याभिरुपनीताम्भसा मुखम् ।
प्रक्षाल्य वल्कलान्तेन निर्मार्ज्येयं समुत्थिता ॥२९५॥

होमकुण्डेऽनलं हुत्वा सा **यशोवर्म**सूनवे ।
सालङ्कारैर्विभूष्याऽदात् तां **विलासवतीं** तदा ॥२९६॥

गान्धर्वेण विवाहेन ततोऽसौ प्रेमसौरभाम् ।
मनीषी पर्यणैषीत् तां **रुक्मिणी**मिव **केशवः** ॥२९७॥

मूर्त्ते इवैकदा कामरती तौ दम्पती वने ।
जग्मतुः क्रीडितुं तत्र चक्रतुः कुसुमोच्चयम् ॥२९८॥

जगौ काले कुमारस्तां प्रियां गन्तुमथाश्रमम् ।
चिन्वती कुसुमान्युच्चैर्न व्यरंसिदियं पुनः ॥२९९॥

विप्रलब्धा ततोऽनेन दृग्मोहनपटावृतेः ।
तमनालोक्य साऽकस्माद् न्यपतद् मूर्च्छिता भुवि ॥३००॥

हा किमेतदुपक्रान्तमिति सोऽपि त्यजन् पटम् ।
तां समाश्वासयामास कदलीकन्दलानिलैः ॥३०१॥

स्वस्थीभूताऽब्रवीदेषा किमिदं सोऽवदच्च किम् ? ।
सोचे त्वं न मया दृष्टोऽधुना सोऽप्याह वेद्मि न ॥३०२॥

साऽभ्यधात् किं न हा वेत्सि तेनाप्रत्ययभीरुणा ।
पटव्यतिकरोऽशंसि सा परीक्ष्य तमग्रहीत् ॥३०३॥

इति प्रीतिमये काले कियत्यपि गते प्रियम् ।
कुमारः प्राह देशाय साप्यमन्यत तद्वचः ॥३०४॥

तापस्यनुज्ञया भिन्नपोतसंश्रवणं ध्वजम् ।
कुमारः प्रांशुवंशेन तीरे नीरेशितुर्व्यधात् ॥३०५॥

एत्य निर्यामकाः कोऽपि कुमारं जगुरन्यदा ।
त्वां भग्नतरणे ! **भानुदेवे**न प्रहिता वयम् ॥३०६॥

महाकटाहवास्तव्यो यानेष **मलयाचलम्** ।
भग्नपोतध्वजं दृष्ट्वा त्वामाह्वयति सञ्चल ॥३०७॥

कुमारस्त्वाह कान्तास्ति मे तेऽप्यूचुरुपेतु सा ।
ततस्तौ दम्पती तापस्यादीनापृच्छ्य जग्मतुः ॥३०८॥

कुमारः सार्थवाहस्य बहुमानेन वाहनम् ।
आरुह्याथ प्रियापार्श्वात् पटरत्नमुपाददे ॥३०९॥

§§ अन्यदा तत्प्रियालुब्धः सार्थवाहस्ततो निशि ।
सनत्कुमारं निर्यूहात् प्रस्रवन्तमपातयत् ॥३१०॥

प्राप्यकस्मादयं पूर्वभग्ननौफलकं ततः ।
पयोधिं पञ्चरात्रेण तीर्त्वा **मलय**मासदत् ॥३११॥

स दध्यौ वणिजा तेन किमहं पातितोऽम्बुधौ ? ।
हुं **विलासवती**लोभाद् मूढोऽयं वेत्ति तां न हि ॥३१२॥

जलेन शफरीवासौ यज्जीवेद् न मया विना ।
पटावगुण्ठनाज्ञातमिदं पुष्पोच्चये पुरा ॥३१३॥
अलं प्राणैर्ममाप्येतां विनोद्बध्य म्रिये क्वचित् ।
इति पश्यन् दिशोऽपश्यदयं नीपं समीपतः ॥३१४॥
स्थलमौलिस्थिते तस्मिन् गतोऽयं विगतोत्सवः ।
ददर्शैकं सरः साब्जं सनक्षत्रमिवाम्बरम् ॥३१५॥
तेन हंसो वियोगार्त्त्या तत्राक्रन्दन् समन्ततः ।
प्रियां कथञ्चिदासाद्य मोदमानश्च वीक्षितः ॥३१६॥
दृष्ट्वेत्यचिन्तदयं जीवतां सर्वसम्पदः ।
मृतानां तु न, तत्कान्ताऽस्येव मेऽपि मिलिष्यति ॥३१७॥
अन्यच्च मुनिनाप्यास्ति गदितं यदियं पतिम् ।
प्राप्य विद्याधरीत्वं चोत्तमार्थं साधयिष्यति ॥३१८॥
तन्न स्वं घातयिष्यामि **'विचित्रा कर्मणां गतिः'** ।
प्राप्तकालं ममाप्येतत् तस्या एव गवेषणम् ॥३१९॥
चिन्तयित्वेति नारङ्गैः प्राणवृत्तिं विधाय सः ।
तामन्वेष्टुं प्रवृत्तोऽब्धेर्यावत् तटमटाट्यते ॥३२०॥
तावदाश्लिष्टफलकामलोकत निजां प्रियाम् ।
रुरोद सापि तं वीक्ष्यापृच्छदाश्वास्य तामयम् ॥३२१॥
सोचे त्वयि तदा नाथ ! पतिते मदभाग्यतः ।
सार्थवाहस्ततो यानं चोत्पथेऽभजतां गतिम् ॥३२२॥
क्रन्दन्त्यास्त्वद्वियोगेन ममार्त्तेरिव तत्क्षणात् ।
निशा च नौश्च विलयं गते कीलिततारके ॥३२३॥
ततः फलकमासाद्य तव पुण्यमिवाञ्जसा ।
लङ्घितो दुःखवद् वार्धिर्दृष्टश्च त्वं तदन्तवत् ॥३२४॥

त्वं चापतः कथं नाथ ! कथं चात्रागतो वद ? ।
परदोषकथामूकस्त्वयमित्यब्रवीदथ ॥३२५॥

प्रमादात् पतितः पूर्वभिन्ननौफलकग्रहात् ।
इहागतोऽहमद्राक्षं त्वां च ध्यानादिवाग्रतः ॥३२६॥

ऊचे **विलासवत्या**र्यपुत्र ! मां बाधते तृषा ।
कुमारः प्राह देव्यस्ति नातिदूरे सरोवरम् ॥३२७॥

आवां तद् याव इत्युक्त्वा कुमारस्तामचालयत् ।
नाशकद् गन्तुमेषा तु खिन्ना मृद्वी नितम्बिनी ॥३२८॥

कुमारः प्राह देव्यस्मिंस्तावत्तिष्ठ लतागृहे ।
कृत्वाऽब्जिनीपुटे तोयं यावत् त्वद्योग्यमानये ॥३२९॥

तयोचे तोयतृष्णा मे न तावत् प्राणवल्लभ ! ।
यावत् त्वद्वदनाम्भोजतृष्णा पुष्णाति विप्रियम् ॥३३०॥

सोऽभ्यधत्त क्षणं देवि ! धैर्यलम्ब्यतामिह ।
अहमायात एवायं तोयमादाय सत्वरम् ॥३३१॥

इत्युक्त्वा पल्लवैः कृत्वा स्रस्तरं तामशाययत् ।
दृग्मोहनपटं चास्याः समर्प्येदं समादिशत् ॥३३२॥

प्रत्यवायघनं देवि ! वनं तेन त्वयाऽमुना ।
पटेन च्छन्नया स्थेयं तावद् यावदिहैम्यहम् ॥३३३॥

तयेति शासनं तस्य ततो बहुमतं हृदि ।
ओमित्यप्रतिकूलत्वात् प्रत्यगृह्णात् मौलिना ॥३३४॥

गत्वा सरः समादाय जलानि च फलानि च ।
आगच्छतोऽस्य पस्पन्द कामं वामं विलोचनम् ॥३३५॥

ततः साशङ्कमागत्य तमुद्देशं जगाद ताम् ।
दृग्मोहनपटं मुञ्च जलं देवि ! गृहाण च ॥३३६॥

अलब्धप्रतिवाक् प्राह पुनर्मृदुलगीरयम् ।
देव्यलं परिहासेन मुञ्च दृग्मोहनं पटम् ॥३३७॥
भूयोऽप्यलब्धप्रतिवाग् विषण्णोऽयमचिन्तयत् ।
कथं नास्ते च देवीति करैः स्रस्तरमस्पृशत् ॥३३८॥
अलब्धायां ततो देव्यां चलचित्त्वाज्जलं करात् ।
पपातास्य विलक्षस्य हा हतोऽस्मीति पूत्कृतः ॥३३९॥
विलपन् देवि देवीति परितः पदपद्धतिम् ।
वीक्षमाणोऽजगराहेर्घर्षणीं समलोकत ॥३४०॥
तां दृष्ट्वा हा हता हन्त मेऽजगरेण किम् ? ।
इति शोकार्णवे मज्जन्निव मूर्च्छानिपातितः ॥३४१॥
ततः सशीकराम्भोधिकल्लोलव्यजनानिलैः ।
मूर्च्छाव्यपगमे सैष चिन्तयामासिवानिति ॥३४२॥
दूरं नाजगरो यावद् याति तावद् विशाम्यहम् ।
मुखेऽस्य संमतो मृत्युरपि देव्या समं मम ॥४३॥
चिन्तयित्वेति तत्पार्श्वे सोऽगात् कोपयितुं च तम् ।
जधान मूर्ध्नि पादेन पटस्तेनोदगीर्यत ॥३४४॥
ततः कुण्डलिताङ्गोस्थाद् नमयित्वा फणं फणी ।
कुमारस्तु प्रियासङ्गसुभगं पटमादित ॥३४५॥
दृग्मोहनपटं कृत्वा हृद्येनं दयितामिव ।
म्रियेऽहमिति संचिन्त्योद्बन्धनं विदधे वटे ॥३४६॥
वटभूल्लासिविटपभुजोऽथ वनदेवताः ।
तं रक्षयितुमुड्डीनखगारावैरिवाह्वयत् ॥३४७॥
तस्याथ लम्बमानस्य स्वत्राणायेव सर्वतः ।
भ्रमतः पश्यतो वृक्षान् मूर्च्छाऽऽगात् पाशकोऽत्रुटत् ॥३४८॥

अत्रान्तरे मुनिः कश्चिदकस्मादेत्य सत्वरम् ।
अभ्यषिञ्चत् कुमारस्य कमण्डलुजलैर्वपुः ॥३४९॥

मूर्च्छान्ते च कुमारः स्वमालोक्य भुवि विस्मितः ।
अचिन्तयत् कथं मन्दभाग्योऽहं न मृतो हहा ? ॥३५०॥

ततोऽस्य मृदुलेनाङ्गं मुनिः पस्पर्श पाणिना ।
जगादैष तमालोक्य किं कृतं भगवंस्त्वया ? ॥३५१॥

मुनिरूचे मया दृष्टस्त्वमात्मनिधनोद्यतः ।
दूरादुपागतेनात्र समित्कुशफलार्थिना ॥३५२॥

चिन्तितं च हहा कोऽयं कर्म कापुरुषोचितम् ।
करोति कोऽत्र वा हेतुः पृष्ट्वेत्येनं निवारये ॥३५३॥

चिन्तयित्वेति वेगेनावलं यावदहं किल ।
तावदात्मा त्वयाऽमोचि पाशे कृत्वा शिरोधराम् ॥३५४॥

ततो मा साहसमिति ब्रुवन् धावन्निहागमम् ।
यावत् तावदयं कण्ठपाशोऽपि त्रुटितस्तव ॥३५५॥

कमण्डलुजलैः सिक्तो मूर्च्छितः पतितो भुवि ।
लब्धसञ्ज्ञः परामृष्टः करैरिति मया कृतम् ॥३५६॥

तदाख्याहि किमेतस्य कारणं मृत्युकर्मणः ।
इत्युक्तः सोऽब्रवील्लज्जमानोऽलममुना मुने ! ॥३५७॥

मुनिर्जगाद जननीतुल्यो व्रतिजनोऽङ्गिनाम् ।
किं भणामि तदज्ञातवृत्तान्तस्तद् निवेदय ॥३५८॥

ततस्तस्मै कुमारोऽपि सर्वं वृत्तान्तमात्मनः ।
श्वेतवीतः समारभ्योद्बन्धनान्तमचीकथत् ॥३५९॥

"अथाह मुनिरीदृक्ष एव दुःखाकरो भवः ।
तद् विषादनिषादं मा स्पृश मालिन्यकारणम् ॥३६०॥

सर्वदुःखक्षयोपायं धर्मकर्मैकमाश्रय ।
यदकृत्वा मृतोऽप्यङ्गी स्वार्थमङ्गीकरोति न'' ॥३६१॥

कुमारोऽभिदधे सत्यं भगवन् ! भवतो वचः ।
परं प्रियावियोगार्त्तो धर्तुं प्राणान् सहे न हि ॥३६२॥

तदुपायं त्वमाख्याहि ध्रुवं मृत्यूद्यतस्य मे । 5
लभे प्रियतमां यस्मात् परलोकगतामपि ॥३६३॥

मुनिर्बभाषे यद्येलमस्त्यस्मिन् **मलयाचले** ।
तीर्थमेकं तटं तस्मात् पतनं सर्वकामदम् ॥३६४॥

ततोऽसौ मुनिसंदिष्टवर्त्मनाऽगात् त्रिभिर्दिनैः ।
तत्रारुह्य प्रियावाप्तिकामः पतनमातनोत् ॥३६५॥ 10

दृष्टश्च निपतन् विद्याधरेणैकेन तत्क्षणात् ।
महाप्रमाद इत्युच्चैर्जल्पता धारितश्च सः ॥३६६॥

श्रीखण्डवनखण्डे च नीत्वा स्वस्येव भाषित् ।
भो महासत्त्व ! ते कर्म किमिदं पामरोचितम् ? ॥३६७॥

किं चात्र कारणं भ्रातः ! कथ्यं चेत् कथयस्व तत् । 15
कुमारोऽभिदधे मित्र ! किमकथ्यं भवादृशाम् ? ॥३६८॥

प्रियवियोगतो मृत्यूद्यतस्य मुनिना मम ।
न्यवेदि भृगुपातोऽयं परत्रापीष्टमेलकृत् ॥३६९॥

''श्रुत्वेतीषद् विहस्याह कुमारमथ खेचरः ।
अहो स्नेहविमूढानां न किमप्यस्ति दुष्करम् ॥३७०॥ 20
आधिबीजमसौ स्नेहः स्नेहः सर्वविपन्मुखम् ।
अविवेकखनिः स्नेहः स्नेहो लोकद्वयीरिपुः ॥३७१॥

स्नेहमूर्च्छां तदुत्सृज्य पश्य बोधप्रदीपतः ।
कर्माधीनाङ्गिनां क्वापि गतौ किं सङ्गमोऽथवा ? ॥३७२॥

न सर्वकामदं तीर्थमन्यदस्ति जगत्त्रये ।
दान-शील-तपो-भावमयं धर्मं विना सखे ! ॥३७३॥

अनेन तदलं भ्रातः ! संरम्भेण निवेदय ।
कथं कदा वियोगस्ते जायया समजायत ?'' ॥३७४॥

अथाजगरवृत्तान्तं कुमारोऽस्मै महात्मने ।
त्रिदिनीपरतः पङ्क्तियोजनान्ते न्यवेदयत् ॥३७५॥

अथाह खेचरस्तर्हि विषादेन कृतं कृतम् ।
न विपन्नैव ते कान्ता, कुमारोऽभिदधे कथम् ? ॥३७६॥

खेचरः प्राह मित्रास्ति विद्याधरनरेश्वरः ।
चक्रसेनाभिधः शक्रसमः साम्राज्यसम्पदा ॥३७७॥

प्रारभ्य**ताप्रतिचक्रा**धिविद्यायास्तेन साधनम् ।
विश्रुताऽस्य कृता पूर्वसेवा द्वादशमासिकी ॥३७८॥

इदानीमष्टचत्वारिंशद्योजनभुवोऽन्तरे ।
क्षेत्रशुद्धिं विधायात्र सप्ताहोरात्रमङ्गिनाम् ॥३७९॥

हिंसारक्षां समादिश्य राज्यं विन्यस्य मन्त्रिषु ।
मलयाद्रिगुहां **सिद्धिनिलयां** सिद्धयेऽविशत् ॥३८०॥ युग्मम् ॥

मन्त्रजापं च तस्यात्र कुर्वतः सार्धलाक्षिकम् ।
सप्ताहोरात्रमापूर्णं सहास्माकं मनोरथैः ॥३८१॥

इयन्मात्रे ह्यतः क्षेत्रे वेद्मि ते न मृता प्रिया ।
यतो विद्याधराः स्वामिकार्येऽभुवन् कृतोद्यमाः ॥३८२॥

कुमारोऽचिन्तयद् युक्तियुक्तमस्य वचः खलु ।
तत्प्रावृतपटस्यैवोद्गिरणं कथमन्यथा ? ॥३८३॥

कथं वा ग्रस्तसत्त्वस्य तस्याहेः कुण्डलक्रिया ? ।
चिन्तयित्वेति तेनोचे मुदितेन स खेचरः ॥३८४॥

महापुरुष ! यद्येवः तत् ते भवतु मङ्गलम् ।
भवताऽऽश्वासितो भूम्नो निवृत्तोऽकुशलादहम् ॥३८५॥

तत् तिष्ठ त्वमिहैवाहं याम्यन्वेष्टुं पुनः प्रियाम् ।
खेचरोऽभिदधे मा गा भलिष्ये सर्वमप्यहम् ॥३८६॥

तथेति वचनं तस्य कुमारो बह्वमन्यत । 5
हृत्तापेन समं तस्य तपनोऽस्तमितस्तदा ॥३८७॥

अर्धरात्रे ततो गीयमानमङ्गलमुञ्चकैः ।
विद्याधरविमानं खं द्योतमानं समागमत् ॥३८८॥

ससंभ्रममथोत्थाय कुमारं खेचरोऽवदत् ।
स्वामिनः सिद्धविद्यस्य पश्य भोः ! स्फातिमद्भुताम् ॥३८९॥ 10

पश्यतोरेतयो**श्चक्रसेन**विद्याधरेशितुः ।
सैन्यं वहद् बहुव्योमपथेनागाद् यथेप्सितम् ॥३९०॥

विभातेऽथ तमादाय स **निर्वृतिकरे** तटे ।
गत्वा विद्याधरोऽनंसीच्**चक्रसेनं** निजेश्वरम् ॥३९१॥

अथो कुमारवृत्तान्तमुपविश्य न्यवेदयत् । 15
खेचर**श्चक्रसेन**स्तु कुमारमिदयभ्यधात् ॥३९२॥

महापुरुष ! संतापमादधीथा मनागपि ।
अद्य संपादयिष्यामि नियतं दयितां तव ॥३९३॥

अत्रान्तरे समायान्तमद्वयं खेचरद्वयम् ।
चक्रसेनं प्रणम्योपविश्यं चेति व्यजिज्ञपत् ॥३९४॥ 20

देवादेशेन जन्तूनां हिंसारक्षाकृतेऽभितः ।
भ्रमन्तौ प्रतिकान्तारमद्राक्ष्वैकत्र कानने ॥३९५॥

उत्तरीयं विमुच्याजगरात् त्रस्तां वराङ्गनाम् ।
हा आर्यपुत्र हा आर्यपुत्रेति च विलापनीम् ॥३९६॥ युग्मम् ॥

तस्या विपत्तिभीताभ्यामावाभ्यामुपगृह्य सा ।
आनीय **मलय**प्रस्थे मुक्ता श्रीखण्डमण्डिते ॥३९७॥

मूर्च्छितेव क्षणं स्थित्वौत्तस्थौ सभयवेपथुः ।
हा आर्यपुत्र हा आर्यपुत्रेति प्रलयपन्त्यसौ ॥३९८॥

ततश्च भणिताऽऽवाभ्यामलं सुन्दरि ! ते भिया ।
क्वार्यपुत्रस्तवेत्येषाऽऽचख्यावस्ति गतोऽम्भसे ॥३९९॥

ततो गवेषितोऽस्माभिर्न दृष्टः क्वचिदप्यसौ ।
सा तु तन्नामलग्नाऽऽस्ते तदादि त्यक्तभोजना ॥४००॥

इति श्रुत्वा तयोर्वाचं विद्याधरपुरन्दरः ।
कुमारमभ्यधाद् भद्र ! जानीहि तव सा किमु ? ॥४०१॥

विद्याधरद्वितीयोऽथ कुमारस्तत्र यातवान् ।
लतामिवाब्दः स्वाभावक्लान्तां कान्तां ददर्श च ॥४०२॥

आश्वास्य प्रीणयित्वात्मदर्शनेनाऽशनेन च ।
तामानयत् कुमारोऽथ **चक्रसेन**स्य संनिधौ ॥४०३॥

चक्रसेनोऽभ्यधाद् भद्र ! किं नु कुर्मः प्रियं पुनः ? ।
कुमारस्त्वाह देवातः परमप्यस्ति किं प्रियम् ? ॥४०४॥

चक्रसेनोऽब्रवीद् भद्र ! तथाप्यातिथ्यमस्तु ते ।
विद्या**ऽजितबला** नाम साधिता खेचरत्वदा ॥४०५॥

ततोऽचिन्ति कुमारेण ज्ञानिदृष्टमिदं पुरा ।
किञ्च मान्यो महात्मैष निरुपध्युपकारकः ॥४०६॥

चिन्तयित्वेति तद्दतां विद्यामयमुपाददे ।
साधनोपायमाख्याय **चक्रसेनो** जगाम च ॥४०७॥

स विद्यासाधकं कञ्चिच्चिन्तयन्नस्मरद् हृदि ।
विश्वभूतिं तदा यावत् तावदागात् कुतोऽप्ययम् ॥४०८॥

अहो ! विधिपरीणाम इत्याश्चर्यजुषाऽमुना ।
एत्य तापसवेषेण कुमारः पर्यरम्भि च ॥४०९॥

किमेतदिति साकूतौ कुमारः सा च तत्प्रिया ।
तमनंस्तां यथौचित्यमाशशास स तौ पुनः ॥४१०॥

ज्ञातः स्वरात् कुमारेण **विश्वभूति**रसाविति ।
हर्षाश्रु मुञ्चता चास्मै मुमुचे पल्लवासनम् ॥४११॥

चक्रे **विलासवत्या** तु तदंह्रिक्षालनं मुदा ।
भोजनानन्तरं चैष कुमारेणेति भाषितः ॥४१२॥

वयस्य ! कतयाम्भोधिः कथं तीर्णस्त्वया तदा ? ।
तापसत्वं कथं प्राप्तं, साम्प्रतं च कुतो भवान् ? ॥४१३॥

इति पृष्टः कुमारेण **विश्वभूति**रदोऽवदत् ।
याने देव ! भग्ने प्राप्यैकं फलकं मया ॥४१४॥

तेनाब्धिपञ्चरात्रेण तीर्थ**मलय**मासदम् ।
कूलागतेन दृष्टोऽहमथैकेन तपस्विना ॥४१५॥

नीतस्तेनाश्रमं तत्रानमं कुलपतिं ततः ।
भोजनान्तेऽमुना पृष्टस्तस्मै सर्वं न्यवेदयम् ॥४१६॥

ततः कुलपतिः प्रोचे वत्सेदृग्भवविप्लवम् ।
विलोक्य मुनयो भेजुस्तदातङ्काऽवनं वनम् ॥४१७॥

इति श्रुत्वा मया दीक्षां याचितोऽयं जगौ पुनः ।
वत्सोचितमिदं किन्तु जीवत्येव सखा तव ॥४१८॥

मिलिष्यति स ते प्राप्तकालमत्रैव तिष्ठ तत् ।
तपस्विजनशुश्रूषापरश्च समयं क्षिप ॥४१९॥

ज्ञानिनोऽस्य गिरा जातप्रत्याशस्तव दर्शने ।
अस्थामहमिहैवेयत्कालं सालम्बनव्रतः ॥४२०॥

इतस्तृतीये दिवसेऽश्रौषमेकतपस्विना ।
तव व्यतिकरं कथ्यमानं कुलपतेः पुरः ॥४२१॥
कथान्ते मे सखा सैष इत्यापृच्छ्य मुनीश्वरम् ।
अयां मनोरथपूरं शिखरं त्वत्प्रवृत्तये ॥४२२॥
दृष्टो विद्याधरस्तत्र पृष्टोऽशंसत कथां तव ।
त्वामन्विष्यंस्ततोऽप्यत्रागमं मित्रासि वीक्षितः ॥४२३॥
कुमारोऽचिन्तयद् विद्यासम्पदा भाव्यमेव मे ।
विश्वभूतिरकाण्डेऽसावागतः कथमन्यथा ? ॥४२४॥
ततो न्यवेदयद् विद्यासम्पत्तिं **विश्वभूतये** ।
स प्रीतः प्राह सपदि सम्पादय समीहितम् ॥४२५॥
§§ ततस्तत्रैव शिखरे शेखरः सत्त्वशालिनाम् ।
यथाविधि व्यधत्तासौ पूर्वसेवां समाहितः ॥४२६॥
षण्मासपूर्वं सेवान्ते स **विलासवतीं** जगौ ।
विद्यासिद्धिफलं विद्धि देव्यहोरात्रमध्यतः ॥४२७॥
तत् त्वया नातिदूरेऽत्र स्थेयं गिरिगुहागृहे ।
विषोढकष्टयाऽद्यैकं सोढव्यं कष्टमस्ति च ॥४२८॥
श्रुत्वेत्याकूतनिस्यूतहृद् **विलासवती** सती ।
जगाद तव पूर्यन्तामार्यपुत्र ! मनोरथाः ॥४२९॥
ततस्तामुचितस्थाने विनिधाय प्रमोदभाक् ।
विश्वभूतिं दृढीकृत्योत्तरसाधकमात्मनः ॥४३०॥
स्थण्डिले स्थापयित्वाऽग्रे स्वस्याजितबलामथ ।
विमण्ड्य मण्डले होमकुण्डमुद्दण्डपावकम् ॥४३१॥
मुद्रामष्टाङ्गमासूत्र्य कृतासनपरिग्रहः ।
कुमारो लक्षहोमेनोत्तरसेवामशिश्रियत् ॥४३२॥ विशेषकम् ॥

निर्दम्भकुम्भकस्यास्य प्रणवोच्चारपूर्वकम् ।
स्वाहान्तं कुर्वतो होमं यावत् कालः कियानभूत् ॥४३३॥

तावत् क्रमेण मत्तेभपिशाचीप्रलयाम्बुदैः ।
वेतालराक्षसीभिश्च समभूवन् बिभीषिकाः ॥४३४॥

समस्ता आपि ताश्चण्डवात्या इव सुमेरुणा ।
असह्या अप्यसह्यन्त कुमारेण प्रकम्पिना ॥४३५॥

ततो यामावशेषायां त्रियामायां ववौ मरुत् ।
होमे समर्थितप्राये कुसुमामोदमेदुरः ॥४३६॥

पुष्पवृष्ट्या समं दिष्ट्याऽभवज्जयजयध्वनिः ।
उद्द्योतश्च शरज्ज्योत्स्ना सपिण्डः समजायत ॥४३७॥

किन्नरैर्गीयमानाऽथ स्तूयमानाऽमरीजनैः ।
राजमानाऽऽतपत्रेण वीज्यमाना च चामरैः ॥४३८॥

प्रसाददृष्टिं पीयूषवृष्टिं तत्र वितन्वती ।
प्रत्यक्षाऽभूत् कुमारस्य किलाजितबला स्वयम् ॥४३९॥

होमशेषं समाप्याथ कुमारः प्रणनाम ताम् ।
देवी तु प्राह तं वत्स ! यच्छ मे यत् समीहितम् ॥४४०॥

व्यजिज्ञपदयं देवि ! किं तत्, भूयोऽपि साऽवदत् ।
द्वात्रिंशल्लक्षण्या नारी नरो वा तस्य जाङ्गलम् ॥४४१॥

स प्राह नाहमातन्वे मातः ! स्त्रीघातपातकम् ।
मनसापि न हिंसामि पुमांसं च निरागसम् ॥४४२॥

द्वात्रिंशल्लक्षणोऽहं चेत् तदादिश यथेप्सितम् ।
किमनेन शरीरेण रक्षितेन विनाशिना ? ॥४४३॥

एवमस्तित्वति देव्युक्ते कुमारः पुलकं वहन् ।
वह्निकुण्डे पतन् देव्या स्वेनाह्लाय धृतः करे ॥४४४॥

कुमारोऽभिदधे देवि ! मुञ्च मां मुञ्च रक्ष मा ।
यशः सारमसारेणार्जयन्तं वपुषाऽमुना ॥४४५॥

''अथाह देवि विरम वत्स ! साहसतोऽमुतः ।
मया परीक्षितो धर्म निर्व्यूढोऽसि च सर्वथा ॥४४६॥
अहो स्थैर्यमहो धैर्यमहो वीर्यमहो महः ।
अहो ते वत्स ! गाम्भीर्यमहो ते धर्मशीलता ॥४४७॥
तवाहं भक्तितः सत्त्वयुक्तितः सुकृतोक्तितः ।
तुष्टास्मि सर्वथेत्युक्त्वा ततो देवी तिरोदधे'' ॥४४८॥
अथाश्रौषीत् कुमारः खे भेरीभाङ्कारभासुरम् ।
हयानां हेषितं हस्तिबृंहितं किङ्किणीक्वणम् ॥४४९॥
यावत् पश्यति विस्मेरदृगसौ विस्मितो नभः ।
तावद् विद्याधरचमूमागच्छन्तीलोकत ॥४५०॥
चत्वारः पुरतः कान्तहृद्या विद्याधरास्ततः ।
आगत्यामुं नमस्कृत्य कुमारमिदमभ्यधुः ॥४५१॥
देव ! सद्गुणवित्ताढ्य**वैताढ्य**गिरिमण्डपम् ।
समस्ति दक्षिणश्रेणौ पुरं **गगनवल्लभम्** ॥४५२॥
तत्र विद्याधराधीशोऽजनिष्ट **कनकध्वजः** ।
अपुत्रः पञ्चतां दैवप्रपञ्चादयमासदत् ॥४५३॥
ततो**ऽजितबला**देवी स्वामिशोकविसंस्थुलान् ।
राज्यप्रधानानादिक्षदेत्य स्वप्नान्तरद्य नः ॥४५४॥
सनत्कुमारनामा यः क्षत्रियाणां शिरोमणिः ।
मलयेऽस्ति स वः स्वामी मया दत्तोऽभितुष्टया ॥४५५॥
देव्यादेशादिति स्मेरमुदो वयमिहागताः ।
राज्यं वैद्याधरं चैतत् त्वच्यायाति स्वयंवरम् ॥४५६॥

अत्रान्तरे परेऽप्येत्य विद्याधरचमूचराः ।
कुमारं नूतनादित्यमुदयन्तमिवानमन् ॥४५७॥

कुमारोऽत्र क्षणे वामभुजस्पन्दचमत्कृतः ।
ऊचे विद्याधरै राज्याभिषेको देशहेतवे ॥४५८॥

कुमारोऽथाब्रवीदेतान् धैर्यात् प्रीतमना इव । 5
भवत्वेवं परं **विश्वभूति**माह्वयतेह नः ॥४५९॥

ततोऽसौ शब्दितो नोचे वीक्षितोऽदृश्यतापि न ।
कुमारेणाथ तं द्रष्टुमुत्पेते सह खेचरैः ॥४६०॥

ततो दृष्टः कुमारेण **विश्वभूति**र्भ्रमन् वने ।
स च विद्याधरान् दृष्ट्वा साक्षेपमिदमब्रवीत् ॥४६१॥ 10

अरे विद्याधराः ! प्राणवल्लभां सुहृदो मम ।
हा **विलासवतीं** हृत्वा क्व प्रयास्यथ सम्प्रति ? ॥४६२॥

तन्निशम्य कुमारोऽथाचिन्तयत् किं हृता प्रिया ? ।
निष्फलो मन्दभाग्यस्य प्रयासस्तर्ह्यसौ मम ॥४६३॥

नीचैर्भूय कुमारेण **विश्वभूति**रभाष्यत । 15
स तु तं विटपेनाहन् तेन घातोऽस्य वञ्चितः ॥४६४॥

आच्छिद्य विटपं हस्तात् पुनरप्येष भाषितः ।
कुमारं प्रत्यभिज्ञाय मुक्त्वा संरम्भमब्रवीत् ॥४६५॥

देव ! त्वया समारब्धे विद्यासाधनकर्मणि ।
प्राप वैद्याधरं वृन्दं मया तदवधीरितम् ॥४६६॥ 20

क्षणार्धेन ततोऽश्रौषं देव्याः क्रन्दितमुच्चकैः ।
साशङ्कस्तामपश्यं च विद्याधरविमानगाम् ॥४६७॥

हा आर्यपुत्र ! हा **विश्वभूते** ! त्रायस्व मामिति ।
श्रुत्वा च क्रन्दितं तस्या गुहां गत्वा न्यभालयम् ॥४६८॥

तामदृष्ट्वा ततोऽधावं विमानमनु तत् पुनः ।
नापश्यं वेद्मिनो देवी हृता, केनास्ति कुत्र च ? ॥४६९॥

ततोऽवदत् कुमारस्तं **विश्वभूते** ! विषीद मा ।
म**माजितबला** देवी तुष्टा स्तोकमिदं ततः ॥४७०॥

अथो **मलय**शैलस्य शृङ्गे तत्रैव तस्थिवान् ।
कुमारो मन्त्रयामास खेचरानात्मसेवकान् ॥४७१॥

तमूचुः खेचराः स्वामिन् ! देवी येन हृता खलु !
सोऽप्यस्थित खेचरश्चेत् तद् न भक्ष्यो नखिभिर्नखी ॥४७२॥

तं विज्ञाय पुरो दुष्टं यथास्थानं यथाबलम् ।
प्रभावादेव ते देव ! निग्रहीष्यामहे ततः ॥४७३॥

कुमारोदेशतो विद्याधरमेकमथोद्धुरम् ।
तस्मिन् **पवनगत्या**ख्यं प्रेषयामासुराशु ते ॥४७४॥

त्रिभिर्दिनैरसौ सर्वं विज्ञायाचूलमूलतः ।
विज्ञो विज्ञपयामास कुमारं प्रकृताञ्जलिः ॥४७५॥

स्वामिन् ! समस्ति **वैताढ्य**स्योत्तरश्रेणिभूषणम् ।
चक्रवालोत्तरपदं नगरं **रथनूपुर**म् ॥४७६॥

देवी तत्स्वामिना**ऽनङ्गरति**ना खेचरेन्दुना ।
वैदेही रावणेनेव हृता तेन हतात्मना ॥४७७॥

देवी तु वीतमालिन्या सहकारलतागृहे ।
तत्रास्ति तद्गुहोद्यानमध्ये विद्याधरीधृता ॥४७८॥

मया साऽदर्शि देवस्य नाममन्त्राक्षरावलीम् ।
जपन्ती निजमोक्षाय योगिनीव वियोगिनी ॥४७९॥

निशम्येति कुमारोऽथ **विश्वभूति**मलोकत ।
सोऽब्रवीद् देव ! दूतोऽस्मै प्रेष्यते स्वार्थसिद्धये ॥४८०॥

अथोचुः खेचराः स्वामिन् ! अस्मानेव समादिश ।
दूतेनान्येन किं तस्मै यमदूतां वयं खलु ॥४८१॥
कुमारोऽथ जगौ वीराः ! पश्चादपि हि जेष्यते ।
युष्माभिरेव, यद् दूतप्रेषणं तदयं नयः ॥४८२॥
इति संबोध्य तान् दूतं शिक्षयित्वा च तत्क्षणात् ।
प्रेषयामास **पवनगति**मेव स विद्विषे ॥४८३॥
स गत्वाऽ**नङ्गरतये** कथयामास तत्तथा ।
यत्त्वां **सनत्कुमारो**ऽभिवक्ति विद्याधरेश्वरः ॥४८४॥
अज्ञानाद् यदसावस्मत्परोक्षे भवता हृता ।
तद् **विलासवतीं** मुञ्च न ह्येतत् पुरुषव्रतम् ॥४८५॥
नो वाधिपत्यवैयात्यवशो मुञ्चसि न प्रियाम् ।
तत्कीनाशपुरीवासप्रस्थाने प्रगुणो भवेः ॥४८६॥
अ**थानङ्गरतिः** प्राह प्रहासोल्लण्ठया गिरा ।
तदेव भूयः **पवनगति**ना यत्किलोदितम् ॥४८७॥
अब्रवीदपि कस्कोऽत्र भोरेनं खेचरं ध्रुवम् ।
कण्ठे गृह्णीत भूचारिदौत्येनात्राजगाम यः ॥४८८॥
तत्क्षणादेव **पवनगतिः** क्रुद्धोऽस्य दुर्धियः ।
दन्तान् पार्ष्णिप्रहारेण पातयन्नुत्पपात खम् ॥४८९॥
आगत्य च कुमाराय तत् तथाऽयमशंसत ।
स च तं प्रलयाम्भोधिरिव भीमोऽभ्यषेणत् ॥४९०॥
अनङ्गरतिरप्येनं निशम्यायान्तमभ्यगात् ।
मिथो मिलितयोरासीदेतयोर्दारुणो रणः ॥४९१॥
रजोभिरस्त्रैः शस्त्राणां स्फुलिङ्गैः पुङ्खमारुतैः ।
तदाऽभूदानकध्वानैः पञ्चभूतात्मकं जगत् ॥४९२॥

निजसैन्ये परिक्षीणे ततोऽनङ्गरतिः स्वयम् ।
कुमारसैन्यं मन्थाद्रिरिवाम्भोधिं व्यलोडयत् ॥४९३॥

द्विपं द्वीपीव तं क्रुद्धः कुमारोऽथाभ्यधावत ।
निस्त्रिंशघातैर्निघ्नंस्तद्यूथान् घन इव ध्वनन् ॥४९४॥

जिष्णुना वञ्चितेनासौ यमुनाप्रतिमेऽमुना ।
शुशुभे द्विषदन्त्राली कालीयकुलशालिनि ॥४९५॥

कुमारस्याथ साश्चर्यं वीक्ष्यमाणः सुरासुरैः ।
अनङ्गरतिना सार्धमङ्गाङ्ग्यजनि सङ्गरः ॥४९६॥

कुमारः कौतुकेनाथ पटं नयनमोहनम् ।
प्रावृत्य विदधे क्ष्वेडामग्रतः पृष्ठतोऽस्य तु ॥४९७॥

स दुरस्फुरितः पश्यन्नप्यपश्यदमुं तदा ।
विलक्षश्चकितोऽनङ्गरतिरेवमचिन्तयत् ॥४९८॥

कामचारी नु सिद्धोऽयं न सामान्यो महाभुजः ।
वृथात्मबहुमानो मे **'बहुरत्ना हि भूरियम्'** ॥४९९॥

तदलं पौरुषेणात्र भस्मनीव हुतं हि तत् ।
तच्चैनं यामि तपसे स्वं न्यूनं पूरयामि च ॥५००॥

ततोऽस्तवीद् नमस्तुभ्यमलक्ष्याय महात्मने ।
कुमारोऽपि पटं हित्वाऽवादीत् प्रहर, किं स्थितः ? ॥५०१॥

ततः प्रत्यक्षमालोक्य कुमारमयमानमत् ।
दीयमानमपि त्यक्त्वा राज्यं च प्रस्थितो वने ॥५०२॥

दिवि दुन्दुभयो नेदुरासेदुः पुष्पवृष्टयः ।
महिमानं कुमारस्य तदानीमस्तुवन् सुराः ॥५०३॥

ततः पुरवधूनेत्रबद्धवन्दनमालिकम् ।
पुरन्दर इव स्वर्गं कुमारः प्राविशत् पुरम् ॥५०४॥

देवीं वियोगदुःखार्त्तिकृशामतिशयादसौ ।
शीलरेखायितां वेणीपट्टिकायामलोकत ॥५०५॥
हर्षस्मितमुखं वीक्ष्य स्वामिनं सापि तत्क्षणात् ।
पुलकैः स्फारतां नीता लज्जया संकुचन्त्यपि ॥५०६॥
§§ दम्पती तावथ श्रेणीद्वितयस्यापि खेचराः । 5
अभ्यषिञ्चन्त साम्राज्यपदे संभूय संमदात् ॥५०७॥
तयोर्विद्याधरैश्वर्यसुखसम्पत्तिशालिनोः ।
जज्ञेऽजितबलः सूनुः करीन्द्रस्वप्नसूचितः ॥५०८॥
तावथोत्कण्ठितौ पित्रो राज्यं विन्यस्य मन्त्रिषु ।
गतौ च मिलितौ हर्षबाष्पगद्गदयोस्तयोः ॥५०९॥ 10
आपृच्छ्य सुबहोः कालाद् दम्पती पितरौ निजौ ।
निजराज्यमथायातौ तदपालयतां चिरम् ॥५१०॥
अन्यदाऽतिशयज्ञानी चारणश्रमाणाधिपः ।
आजगाम पुरे तत्र **चित्राङ्ग** इति विश्रुतः ॥५११॥
सनत्कुमारस्तं श्रुत्वाऽऽयातं विद्याधरेश्वरः । 15
सर्वर्द्ध्याऽऽगत्य विधिना ननाम सह कान्तया ॥५१२॥
धर्मलाभाशिषमथो गुरुर्गम्भीरया गिरा ।
दत्त्वा दिदेश सर्वज्ञोपज्ञं धर्मं तयोः पुरः ॥५१३॥
देशान्ते च पप्रच्छ गुरुभक्त्या गुरुं नृपः ।
प्रभो ! किमावयोः कर्म भूयो भूयो वियोगदम् ? ॥५१४॥ 20
"गुरुराख्यद् नृपास्तीह **काम्पिल्य**मिति पत्तनम् ।
ब्रह्मदत्तोऽत्र भूपोऽस्य **सुन्दरी**ति प्रियाऽभवत् ॥५१५॥
रामगुप्त इति त्वं च समभूः सूनुरेतयोः ।
तारापीठसुतेयं तु प्रिया तव **हरिप्रभा** ॥५१६॥

युवाभ्यामेकदा कृत्वा जलकेलिं मधूत्सवे ।
विदधे कुङ्कुमेनाङ्गरागः केलिगृहान्तरे ॥५१७॥

मरालमिथुनं तत्रागतं, हंसी त्वया ततः ।
हंसोऽनया समालेपे रभसात् कुङ्कुमाम्भसा ॥५१८॥

ततो मिथो रथाङ्गीयमाणावङ्गीकृतारती ।
ताववेद्यौ वियोगात्तौ मर्तुमब्रुडतां जले ॥५१९॥

तत्र तौ धौतदेहत्वादुपलक्ष्य परस्परम् ।
मिलिताविति वां पूर्वकर्मोदीर्णमनेकधा ॥५२०॥

श्रुत्वेत्थं जातजातिस्मृतिविदितनिजप्राग्भवौ दम्पती तौ,
प्राज्ये विन्यस्य राज्ये सुत**मजितबलं** निर्विलम्बं विरागात् ।
दीक्षामादाय **चित्राङ्गद**गुरुपदयोरन्तिके सुष्ठु तप्त्वा,
क्षिप्त्वा चाविष्टकर्माष्टकमथ भुवनोत्तंसभूतावभूताम् ॥५२१॥

॥ इति विलासवतीकथा ॥

● ● ●

अञ्जनासुन्दरी यथा —

§§ इहैव भारतेऽम्भोधितीरे **दन्तिगिरौ** पुरम् ।
महेन्द्रपुरमित्यस्ति महेन्द्रपुरसुन्दरम् ॥१॥
तत्र विद्याधरेन्द्रोऽभूद् **महेन्द्र** इति विश्रुतः ।
बहिरन्तर्द्विषामन्तं धर्मेण विततान यः ॥२॥
पत्न्यां **मानसवेगाया**ममुष्याऽञ्जनसुन्दरी ।
प्रसन्नादिकपुत्राणां शतादनु सुताऽभवत् ॥३॥
यस्या रूपविनिर्माणावशिष्टैः परमाणुभिः ।
कङ्केल्लिकदलीकञ्चुकुन्दादि विदधे विधिः ॥४॥
यौवनौल्लसने तस्या वरं चिन्तयतः पितुः ।
अमात्याः शतशोऽशंसन् विद्याधरकुमारकान् ॥५॥
महेन्द्रस्याज्ञयाऽमात्यास्तद्रूपाणि पृथक् पृथक् ।
यथावदालेख्य पटेष्वानाय्य तमदर्शयन् ॥६॥
इतो **वैताढ्यगादित्यपुरे प्रह्लाद**भूपतेः ।
केतुमत्यङ्गभूः पुत्रो बभूव **पवनञ्जयः** ॥७॥
तं वापरं च चित्रस्थं हिरण्याभाङ्गसंभवम् ।
विद्युत्प्रभाख्यमद्राक्षीद् **महेन्द्रो** मन्त्रिदर्शितम् ॥८॥
रूपवन्तौ कुलीनौ च द्वावप्येतौ, तदेतयोः ।
वत्सायाः कोऽस्तु भर्त्तेति राज्ञोक्तः सचिवाऽवदत् ॥९॥
एषोऽष्टादशवर्षायुर्मोक्षं **विद्युत्प्रभो** गमी ।
इति नैमित्तिकाः स्वामिन् ! साक्षादाख्यातपूर्विणः ॥१०॥
प्रह्लादतनयस्त्वेष चिरायुः **पवनञ्जयः** ।
योग्यो वरस्तदेतस्मै प्रयच्छाञ्जनसुन्दरीम् ॥११॥
§§ अत्रान्तरे च यात्रायै द्वीपं **नन्दीश्वरं** ययुः ।
विद्याधरेन्द्राः सर्वेऽपि सर्वर्द्ध्या सपरिच्छदाः ॥१२॥

प्रह्लादस्तत्र यान् प्रेक्ष्य **महेन्द्र**मिदमभ्यधात् ।
दीयतां मत्सुतायैषा स्वसुता**ऽञ्जनसुन्दरी** ॥१३॥

महेन्द्रः प्रतिपेदे तदग्रेऽपि हृदयस्थितम् ।
निमित्तमात्रमेवासीत् **प्रह्लाद**प्रार्थना तु सा ॥१४॥

इतस्तृतीये दिवसे **मानसा**ख्ये सरोवरे ।
कार्यो विवाह इत्युक्त्वा तौ यथास्थानमीयतुः ॥१५॥

ततो **महेन्द्र-प्रह्लादौ** साह्लादौ समम् ।
ईयतु**र्मानस**सरस्यावासं चक्रतुश्च तौ ॥१६॥

मित्रं **प्रहसितं** तत्रोवाचेति **पवनञ्जयः** ।
दृष्टास्ति सा त्वया ब्रूहि की**दृश्यञ्जनसुन्दरी** ? ॥१७॥

हसित्वेषत् **प्रहसितो**ऽप्येवमूचे मयेक्षिता ।
सा देवसुन्दरीभ्योऽपि सुन्द**राञ्जनसुन्दरी** ॥१८॥

पवनञ्जय इत्यूचेऽद्यैव द्रक्ष्यामि तां कथम् ? ।
दयितोत्कण्ठितानां हि कालक्षेपः सुदुःसहः ॥१९॥

पवनः सुहृदा नीतः प्रच्छन्नोऽथ तदालये ।
अञ्जनां निशि योगीवापश्यत् कुण्डलिनीं पुरः ॥२०॥

सखी **वसन्ततिलका** तदोचे**ऽञ्जनसुन्दरीम्** ।
धन्यासि या त्वमप्राप्सीः (?) तं पतिं **पवनञ्जयम्** ॥२१॥

तमाह **मिश्रकेशी**ति हले ! चरमविग्रहम् ।
मुक्त्वा **विद्युत्प्रभं** देव्याः को वरः श्लाघ्यते परः ? ॥२२॥

प्रथमाप्रत्युवाचैवं मुग्धे ! वेत्सि न किञ्चन ।
विद्युत्प्रभो हि स्वल्पायुः स्वामिन्या युज्यते कथम् ? ॥२३॥

द्वितीयापीत्यभाषिष्ट मन्दा ति सखि ! शेमुषी ।
वरं स्तोकोऽपि कर्पूरो न पूरोऽपि तु भस्मनः ॥२४॥

इत्यालापं तयोः श्रुत्वाऽचिन्तयत् **पवनञ्जयः** ।
अस्याः प्रियमिदं नूनं तेनैषा न निषेधति ॥२५॥

विद्युत्प्रभो ह्रदि ययोर्द्वयोरपि तयोः शिरः ।
छिनद्मीति वदन् रोषात् कृष्टासिरभवच्च सः ॥२६॥

धृत्वोचे तं **प्रहसितो** दोषेऽपि स्त्री न हन्यते । 5
अञ्जना किन्तु निर्दोषा ह्रियैतां न निषेधति ॥२७॥

इति **प्रहसिते**नोच्चैर्निषिद्धस्तद्वधादयम् ।
उत्पत्यागाद् निजागारं तस्थौ जाग्रंश्च दुःखतः ॥२८॥

प्रातः **प्रहसितं** प्राह सखे ! यामः स्वपत्तनम् ।
विरक्ता स्त्री विषं पुंसां तेनालमनयोढया ॥२९॥ 10

उत्पित्सन्तमुदीर्येति प्राह **प्रहसितो**ऽथ तम् ।
भ्रातर्निर्मूल एवायं हेतुस्त्वच्चित्तपल्वले ॥३०॥

येन सा दोषलेशेनाप्य**ञ्जना** नाप्तगञ्जना ।
दुग्धे स्युः पूतराः क्वापि श्यामिकापि च काञ्चने ? ॥३१॥

किञ्च स्वस्यापि नो विज्ञाः प्रतिज्ञामवजानते । 15
गुरूणां तामवज्ञातुं कथमुद्यतवानसि ? ॥३२॥

उक्तः **प्रहसिते**नैवं विमृश्य **पवनञ्जयः** ।
तथैव कथमप्यस्थात् करी वारीगतो यथा ॥३३॥

निर्णीते चाह्नि **पवनाञ्जनयोः** समजायत ।
पितृनेत्रसुधासत्रं पाणिग्रहमहोत्सवः ॥३४॥ 20

महेन्द्रेणार्चितः स्नेहात् तदादाय वधूवरम् ।
तदीयादोषसाह्लादः **प्रह्लादः** स्वपुरं ययौ ॥३५॥

प्रह्लादोऽञ्जनसुन्दर्याः सौन्दर्यातिशयान्वितम् ।
अर्पयामास वासार्थमावासं सप्तभूमिकम् ॥३६॥

तां च वाचापि **पवनञ्जयो** न समभावयत् ।
यथा कथञ्जनोज्झन्ति **'न मानं हि मनस्विनः'** ॥३७॥

कुमुद्वतीव शीतांशुं सा विना **पवनञ्जयम्** ।
तस्थावनुदिनं दुःस्था प्रस्थास्नुभिरिवासुभिः ॥३८॥

§§ एवं व्रजति कालेऽथ **प्रह्लाद**नृपमेकदा ।
एत्य **लङ्का**पतेर्दूतः सगौरवमिदं जगौ ॥३९॥

विशङ्काहंकृते**र्लङ्का**पतेर्वशयतो दिशः ।
वर्तते विग्रहः साकं **वस्रगे**नातिदारुणा ॥४०॥

विद्याधरेन्द्रानाह्वातुं प्राहिणोत् तेन **रावणः** ।
दूतान् प्रत्येकमप्याराद् भवते प्रेषितस्त्वहम् ॥४१॥

प्रह्लादोऽथ **दशास्या**य साहायककृते स्वयम् ।
यावच्चचाल तावत् तमुवाच **पवनञ्जयः** ॥४२॥

इहैव तिष्ठ तात ! त्वं **दशग्रीव**मनोरथम् ।
पूरयिष्येऽहमप्युच्चैस्तवास्मि तनयो ननु ॥४३॥

इत्युदीर्य सनिर्बन्धं पितरं चानुमन्य सः ।
अखिलं लोकमापृच्छ्याचलच्छबलवाहनः ॥४४॥

श्रुत्वाञ्जना जनाद् भर्तुर्यात्रामुत्तीर्य सौधतः ।
तमीक्षितुमवष्टभ्य द्वारमस्थित दुःस्थिता ॥४५॥

पाण्डुरौष्ठीमतिक्षामामुन्मुखीं परतः स्थितम् ।
अञ्जनां व्यञ्जनदृशं ददर्श **पवनञ्जयः** ॥४६॥

निध्यायंस्तामिदं दध्यावयं ध्यामलितो रुषा ।
अहो निह्रीकता निर्भीकता चास्य कुमेधसः ॥४७॥

अथवा ज्ञातमेवास्या दौर्मनस्यं पुरापि हि ।
उदूढा च मया पित्रोराज्ञालङ्घनभीरुणा ॥४८॥

पतित्वा पादयोस्तस्य साप्यूचे रचिताञ्जलिः ।
त्वया संभाषिताः सर्वेऽप्यहं तु न मनागपि ॥४९॥
विज्ञप्यसे तथापि त्वं विस्मार्याहं न हि त्वया ।
पुनरागमनेनाशु **'पन्थानः सन्तु ते शिवाः'** ॥५०॥
इति ब्रुवाणां तां दीनामदीनचरितामपि ।
ययाववगणय्यैव जयाय **पवनञ्जयः** ॥५१॥
पत्यवज्ञावियोगार्त्ता गत्वान्तर्वेश्म भूतले ।
सा पपाताम्बुभिन्नेव तटी सख्यश्रुभिः सह ॥५२॥
पवमानवदुत्पत्य पवनो मानसं सरः ।
जगाम तत्र चोवास प्रकृत्यावासमद्भुतम् ॥५३॥
§§ सन्ध्यायामधिपल्यङ्कं निविष्टः सरसीतटे ।
आर्तां प्रियवियोगेन चक्रवाकीं ददर्श सः ॥५४॥
पित्सन्तीं समुत्पिसन्तीं मूर्च्छन्तीं च मुहुर्मुहुः ।
तामालोक्य रुदतीं च स एवं पर्यचिन्तयत् ॥५५॥
सकलं वासरं पत्या रमन्ते चक्रवाकिकाः ।
सोढुं तु विरहं तस्य निशायामपि नेशते ॥५६॥
उद्वाहतोऽपि या त्यक्ता भाषिता या न जातुचित् ।
या गच्छताप्यवज्ञाता सा कथं हा भविष्यति ? ॥५७॥
धिग् धिग् ममाविवेकेन म्रियते सा तपस्विनि ।
इति चिन्तितमात्मीयमाख्यत् **प्रहसिताय** सः ॥५८॥
प्रोचे **प्रहसितो**ऽप्येवं साध्वज्ञासीश्चिरादपि ।
नूनं विपद्यते साद्य सारसीव वियोगतः ॥५९॥
आश्वासयितुमद्यापि सखे ! सा तव युज्यते ।
प्रियोक्त्या तामनुज्ञाय स्वार्थाय पुनरापतेः ॥६०॥

इत्येवं सुहृदा तेन भावसंवेदिनेरितः ।
प्रापोत्पत्य**अञ्जना**देवीभवनं **पवनञ्जयः** ॥६१॥

द्वारे तिरोहितः सोऽस्थादग्रे **प्रहसितो**ऽविशत् ।
ददर्श **चाञ्जनां** तल्पे व्योम्नि लेखामिवैन्दवीम् ॥६२॥

वेल्लन्तीं निःश्वसन्तीं च वियोगोष्मप्रपीडिताम् ।
जीवायोगं प्रापमाणां तित्तिरीमिव गत्वरीम् ॥६३॥

देव्यस्ति **पवनो**ऽयं ते वीजनेन सखीजनैः ।
पृष्टे क्व स इति प्रोच्याभ्युत्थाय च निपेतुषीम् ॥६४॥ विशेषकम् ॥

सखीवचो मृषा नेति दिष्ट्या स्वामिनि ! वर्ध्यसे ।
दूरीकुरुष्व हृत्तापं **पवनञ्जय**सङ्गमात् ॥६५॥

अहं **प्रहसित**स्तस्य मित्रमग्रेसरोऽस्मि च ।
इत्युक्त्वा सोऽवसृत्यैतां दण्डनामं नमोऽकरोत् ॥६६॥ युग्मम् ॥

अञ्जनापि जगादैवं हसितां वेधसैव माम् ।
अहासीस्त्वं **प्रहसित** ! क्षणोऽयं न हि नर्मणः ॥६७॥

अतिसंक्लेशिनामत्र दोषो मत्पूर्वकर्मणाम् ।
कुलीनस्तादृशो भर्ता त्यजेद् मां कथमन्यथा ? ॥६८॥

पाणिग्रहात् प्रभृत्येव त्यक्तायाः स्वामिना मम ।
द्वाविंशतिः समा जग्मुर्जीवाम्यद्यापि पापिनी ॥६९॥

अथ संक्रान्ततद्दुःखप्राग्भारः **पवनञ्जयः** ।
प्रविश्यान्तरुवाचेति बाष्पगद्गदया गिरा ॥७०॥

निर्दोषा दोषमारोप्य त्वमुद्वाहात् प्रभुत्यपि ।
अवज्ञातास्यविज्ञेन मया देवि ! क्षमानिना ॥७१॥

मद्दोषादीदृशीं प्रापस्त्वं प्रिये ! दुस्सहां दशाम् ।
मृत्युं प्राप्तापि मद्भाग्यैः स्तोकाद् मुक्तासि मृत्युना ॥७२॥

इत्युक्तवन्तं सा नाथमुपलक्ष्य त्रपावती ।
पर्यङ्केषामवष्टभ्याभ्युत्तस्थौ विनमन्मुखी ॥७३॥

ततो हस्तीव हस्तेन दोष्णा वलयितेन ताम् ।
आददानोऽधिपर्यङ्कं न्यषदत् **पवनञ्जयः** ॥७४॥

भूयस्तां **पवनो**ऽवोचद् मयातिक्षुद्रबुद्धिना । 5
निरागाः खेदितासि त्वं सहस्व मम तत्प्रिये ! ॥७५॥

अञ्जनापि जगादैवं नाथ ! मा स्म ब्रवीरिदम् ।
सदैव तव दास्यस्मि क्षमणाऽनुचिता मयि ॥७६॥

तदानीं विजनीभूते रेमाते तौ प्रियापती ।
निशा च तद्रसावेगवाहितेव ययौ जवात् ॥७७॥ 10

प्रमीतां रात्रिमालोक्य तामूचे **पवनञ्जयः** ।
कान्ते ! जयाय यास्यामि ज्ञास्यति गुरवोऽन्यथा ॥७८॥

खेदं माऽतः परं कार्षीः सुखं तिष्ठ सखीवृता ।
दशास्यकृत्यमापाद्ययावदायामि भामिनि ! ॥७९॥

साप्युवाचेति तत्कृत्यं दोष्मतः सिद्धमेव ते । 15
कृतार्थः शीघ्रमागच्छ यदि मां जीवितीयसि ॥८०॥

अपरं च ऋतुस्नातास्म्यद्यैव यदि मे भवेत् ।
गर्भस्तत् त्वत्परोक्षेऽपवदेयुः पिशुना मयि ॥८१॥

तामाह **पवनो**ऽपीति शीघ्रमेष्यामि सुन्दरि ! ।
मय्यायाते कथं क्षुद्रावकाशो भविता त्वयि ॥८२॥ 20

अथवा गृह्यतामेतद् मदागमनसूचकम् ।
नामाङ्कमुद्रीयं मे समये तत् प्रकाशयेः ॥८३॥

अर्पयित्वाऽयमस्यै तदादाय च निजां चमूम् ।
उत्पत्य **रावणं** प्राप विजयो मूर्त्तिमानिव ॥८४॥

§§ इतश्च तद्दिने गर्भं बभाराञ्जनसुन्दरी ।
तामालोक्य तथा श्वश्रूः साधिक्षेपमदोऽवदत् ॥८५॥
हले ! किमिदमाचारि कुलद्वयकलङ्ककृत् ? ।
देशान्तरगते पत्यौ पापे ! । यदुदरिण्यभूः ॥८६॥
स्वपुत्रे त्वदवज्ञायामज्ञाय्यज्ञानदोषिता ।
इयच्चिरं त्वमस्माभिर्न ज्ञातासि तु पांशुला ॥८७॥
भर्त्सिता **केतुमत्येति** साश्रुरञ्जनसुन्दरी ।
पत्युरागमचिह्नं तदङ्गुलीयमदर्शयत् ॥८८॥
सा लज्जयाऽवाङ्मुखी **केतुमत्या** भूयोऽप्यभर्त्स्यत ।
यस्तेऽग्रहीद् न नामापि तत् कथं तेन सङ्गमः ? ॥८९॥
अङ्गुलीयकमात्रेण प्रतारयसि नः कथम् ? ।
प्रतारणविधीन् नैकान् जानते ह्याशु पांशुलाः ॥९०॥
स्थानं न त्वादृशामत्र भर्त्सयित्वेद**मञ्जनाम्** ।
सा रुषाऽऽदिक्षदारक्षानेतां नेतुं पितुर्गृहे ॥९१॥
तां च ते यानमारोप्य **वसन्ततिलका**न्विताम् ।
महेन्द्रनगरोपान्ते नीत्वाऽमुञ्चन्नुदश्रवः ॥९२॥
दुःखदीनामिमां द्रष्टुमक्षमास्ते ययुः क्षणात् ।
अस्तं च भानुमान् भेजे को वीक्षेतापदं सताम् ? ॥९३॥
घूकघूत्कृतिफेरुण्डफेत्कारवृकवाशितैः ।
श्वश्रूवाग्रोचिभिः कीर्णकीर्णतां साऽनयद् निशाम् ॥९४॥
प्रातर्दूना पितुर्गेहद्वारेऽगाद् भिक्षुकीव सा ।
सख्याख्यातां च तां वेत्री तता राज्ञे व्यजिज्ञपत् ॥९५॥
लज्जावनम्रश्यामास्यो राजाप्येवमचिन्तयत् ।
अचिन्त्यं चरितं स्त्रीणां ही विपाको विधेरिव ॥९६॥

दुष्टाप्यञ्जनलेखेव शिष्टा नेत्राश्रये वधूः ।
तच्च्युताननकालुष्यकरीः स पितुरात्मनः ॥९७॥

चिन्तयन्तमिति प्राह तं **प्रसन्ना**भिधः सुतः ।
इयं निष्कास्यतां गेहाद् देहाल्लूतिरिव द्रुतम् ॥९८॥

अथावोचद् **मतिसिंहो** नाम मन्त्रीति भूपतिम् । 5
श्वश्रूदुःखे दुहितृणां शरणं शरणं पितुः ॥९९॥

किञ्च **केतुमती** श्वश्रूर्निर्दोषामप्यमूं प्रभो ! ।
निर्वासयेदपि क्रूरा दोषमुत्पाद्य कञ्चन ॥१००॥

भवेद् व्यक्तिर्यावद् दोषादोषस्तावदत्र तत् ।
प्रच्छन्नं पाल्यतामेषा स्वपुत्रीति कृपां कुरु ॥१०१॥ 10

राजापीति जगौ श्वश्रूः सर्वत्र भवतीदृशी ।
ईदृशं चरितं तु स्याद् वधूनां न हि कुत्रचित् ॥१०२॥

किञ्च संशृण्महेऽग्रेऽपि द्वेष्येयं **पवन**स्य यत् ।
गर्भः संभाव्यतेऽमुष्याः **पवना**देव तत् कथम् ? ॥१०३॥

सर्वथा दोषवत्येषा साधु निर्वासिता तया । 15
निर्वास्यतामितोऽपि द्राक् पश्यामस्तन्मुखं न हि ॥१०४॥

इत्थं राजाज्ञया द्वाःस्थो निरवासय**दञ्जना**म् ।
जनैरपि कृताक्रन्दैर्निरानन्दैर्निरीक्षिताम् ॥१०५॥

क्षुधिता तृषिता श्रान्ता निःश्वसन्त्यश्रुवर्षिणी ।
दर्भविद्धपदासृग्भी रञ्जयन्ती महीतलम् ॥१०६॥ 20

पदे पदेऽभिताम्यन्ती विश्राम्यन्ती तरौ तरौ ।
रोदोऽपि रोदयन्ती साऽचालीदालीसमन्विता ॥१०७॥ युग्मम् ॥

क्वापीति व्यलपच्चेयमहो मे भाग्यविप्लवः ।
विवेकिनोऽपि यत् पूज्या नापराधमवेविचुः ॥१०८॥

"साधु श्वश्रु ! कुले स्वस्य कलङ्को रक्षितस्त्वया ।
त्वयापि तात ! संबन्धिभयाच्चारु विचारितम् ॥१०९॥

योषितां दुःखितानां हि माताऽऽश्वासनकारणम् ।
पतिच्छन्दजुषा मातस्त्वयाप्यहमुपेक्षिता ॥११०॥

भ्रातर्दोषोऽपि नास्त्यत्र ताते जीवति ते ननु ।
नाथ ! त्वयि च दूरस्थे रिपुः सर्वोऽपि मेऽभवत्" ॥१११॥

विलपन्तीति स सख्या निन्ये संबोध्य चाग्रतः ।
मुनिमेकमपश्यच्च ध्यानस्थं गिरिगह्वरे ॥११२॥

तं नत्वाऽ**मितगत्या**ख्यं तत्पुरस्ते निषीदतुः ।
अन्तेध्यानं ददौ सोऽपि धर्मलाभाशिषं तयोः ॥११३॥

वसन्ततिलका तस्मै कथयित्वाऽञ्जनाकथाम् ।
तद्दुःखकारणं तं चाप्राक्षीदाख्यच्च सोऽप्यदः ॥११४॥

§§ पुरेऽभूत् **कनकपुरे** पुरेद्धमहिमा नृपः ।
नामधेयेन **कनकरथो** जितमहारथः ॥११५॥

तस्याभूतां च **कनकोदरी लक्ष्मीवती**ति च ।
राज्ञ्यौ, सुश्राविका **लक्ष्मीवती** तत्र सदाऽभवत् ॥११६॥

बिम्बं रत्नमयं जैनं गृहचैत्ये निवेश्य सा ।
अपूज्यदवन्दिष्ट प्रत्यहं कालयोर्द्वयोः ॥११७॥

मात्सर्यात् **कनकोदर्या** हृत्वा तद्बिम्बमार्हतम् ।
चिक्षिपे चापवित्रे स्वकरेणवकरोत्करे ॥११८॥

जयश्रीर्नाम गणिनी विहरन्त्यागता तदा ।
तद् दृष्ट्वा तामुवाचैवमकार्षीः किमिदं शुभे ! ? ॥११९॥

भगवत्प्रतिमामत्र प्रक्षिपन्त्या त्वया कृतः ।
अनेकभवदुःखानामात्मायं हन्त ! भाजनम् ॥१२०॥

इत्युक्ता सानुतापा सा गृहीत्वा प्रतिमां ततः ।
प्रमृज्य क्षमयित्वा च यथास्थानं न्यवेशयत् ॥१२१॥

तदाद्यासाद्य सम्यक्त्वमूलं धर्मं प्रपाल्य च ।
काले विपद्य **सौधर्मे** कल्पे सा देव्यजायत ॥१२२॥

च्युत्वा ततो **महेन्द्र**स्याभूत् सुतेयं सखी तव । 5
अस्यास्तज्जैनबिम्बस्य दुःस्थानक्षेपजं फलम् ॥१२३॥

अस्यास्त्वं भगिनी तस्मिन् भवेऽभूस्तस्य कर्मणः ।
अनुमन्त्री च तत्पाकमनुभुङ्क्ष्वे सहानया ॥१२४॥

भुक्ताप्रायमिदं चास्यास्तस्य दुष्कर्मणः फलम् ।
गृह्यतां जिनधर्मस्तच्छुभोदर्को भवे भवे ॥१२५॥ 10

भविष्यति च पुत्रोऽस्यास्ततोऽकस्माच्च मातुलः ।
एत्यैनां स्वगृहे नेता भावी पत्या च सङ्गमः ॥१२६॥

एवमुक्त्वाऽऽर्हते धर्मे स्थापयित्वा स ते उभे ।
समुत्पत्य पतत्रीव रभसाद् नभसा ययौ ॥१२७॥

अथायान्तं पुरो व्यात्तवक्त्रं दीप्रदृशं भृशम् । 15
पृच्छेनाघन्तमुर्वी ते सिंहमेकमपश्यताम् ॥१२८॥

उत्पित्सन्त्याविव द्यां ते विविक्षू इव चावनिम् ।
कान्दिशीके ततो मृग्याविव यावदातिष्ठताम् ॥१२९॥

मणिबलाभिधस्तावद् गन्धर्वस्तद्गुहाधिपः ।
विकृत्य सारभं रूपं तं पञ्चास्यमनाशयन् ॥१३०॥ युग्मम् ॥ 20

संहृत्य सारभं रूपं स्वरूपं प्रतिपद्य च ।
जगौ तयोः प्रमोदाय सारदस्तुतिमार्हतीम् ॥१३१॥

तेन चामुक्तसान्निध्ये गुहायां तत्र सुस्थिते ।
मुनिसुव्रतदेवार्चा स्थापयित्वाऽर्चतः स्म ते ॥१३२॥

अन्येद्युः सुषुवे तत्र प्राचीव रुचिमालिनम् ।
पदाग्रजाग्रदम्भोजचक्रं तनय**मञ्जना** ॥१३३॥

तस्याश्च सूतिकर्माणि **वसन्ततिलका**ऽकरोत् ।
स्वेनाहृतैर्मृदूत्सेधोदयादेधोजलादिभिः ॥१३४॥

आरोप्य सुतमुत्सङ्गे दुःखिता**ऽञ्जनसुन्दरी** ।
अरोदीत् तत्पुरो दीना रोदयन्ती च तां गुहाम् ॥१३५॥

एतस्मिन् विपिने जात ! तव जातस्य कीदृशम् ।
जन्मोत्सवं करोम्येषा वराकी पुण्यवर्जिता ॥१३६॥

रुदतीमिति तां श्रुत्वा समुपेत्य च खेचरः ।
प्रतिसूर्यो मधुरगीरपृच्छद् दुःखकारणम् ॥१३७॥

आ विवाहादथापुत्रजन्म चाख्यदशेषतः ।
अञ्जनादुखहेतूनि बाष्पायितमुखी सखी ॥१३८॥

सोऽपि सद्यो रुदन्नाह स्माहं **हनुपुरेश्वरः** ।
एषोऽस्मि **सुन्दरीमाला**कुक्षिभू**श्चित्रभानुजः** ॥१३९॥

भ्राता **मानसवेगा**यास्त्वज्जनन्याश्च बालिके ! ।
दिष्ट्या त्वां दृष्टवानस्मि जीवन्तीमाश्वसिह्यतः ॥१४०॥ युग्मम् ॥

मातुलं तं विदित्वा साप्यरोदीदधिकाधिकम् ।
पुनर्नवानि दुःखानि दृष्टेऽभीष्टे भवन्ति हि ॥१४१॥

रुदतीं वारयित्वा तां **प्रतिसूर्यः** सहागतम् ।
सूनोर्जन्मादि पप्रच्छ दैवज्ञमथ सोऽवदत् ॥१४२॥

भाव्यवश्यं महाराजो भवे चात्रैव सेत्स्यति ।
शुभेऽहनि चले लग्ने जातोऽयं पुण्यवान् सुतः ॥१४३॥

प्रतिसूर्योऽथ यामेयीं सात्मजां ससखीं च ताम् ।
विमानवरमारोप्य प्रतस्थे स्वपुरं प्रति ॥१४४॥

विमानकिङ्किणी रातुं बालोऽङ्काद् मातुरुद्ययौ ।
पपात च हनुप्रान्तेनाद्रावदलयच्च तम् ॥१४५॥

सद्यो हृदयमाजघ्ने पाणिना**ञ्जनसुन्दरी** ।
दरीरपि प्रतिरवै रोदयन्ती रुरोद च ॥१४६॥

प्रतिसूर्योऽनुपत्याशु भागिनेय्यास्तमर्भकम् ।
अक्षताङ्गमुपादायार्पयद् नष्टनिधानवत् ॥१४७॥

ततो **हनुपुरे** सद्यो विमानेन जगाम सः ।
एतां च गमयायास निजावासवतंसताम् ॥१४८॥

हनुना शैलभेत्ता यत् प्राप्तो **हनुपुरे** च यत् ।
अभ्यधीयत तेनायमर्भको **हनुमानि**ति ॥१४९॥

अञ्जनाया बहिः क्रीडन्नवर्धत स बालकः ।
अन्तः श्वश्रूप्रदत्ताङ्कः समुत्तारमनोरथः ॥१५०॥

§§ इतश्च **पवनः** कृत्वा जयप्रीतं **दशाननम्** ।
आजगाम निजं राजधानीमानीतसम्पदम् ॥१५१॥

प्रणम्य पितरौ तत्रा**ञ्जना**वासगृहं ययौ ।
तच्चानञ्जनमद्राक्षीदलोचनमिवाननम् ॥१५२॥

प्रेयसी क्व**वाञ्जना** सा मे नेत्रयोरमृताञ्जनम् ।
इति तत्र स्थितां काञ्चिदेकां पप्रच्छ च स्त्रियम् ॥१५३॥

साप्याख्यत् त्वयि यात्रायां गतेऽहस्सु कियत्स्वपि ।
गर्भसम्भवदोषेण स देव्या निरवास्यत् ॥१५४॥

महेन्द्रनगरासन्ने सा नीत्वाऽऽरक्षपुरुषैः ।
पापैरमुच्यतारण्ये हरिणीव भयाकुला ॥१५५॥

श्रुत्वेति **पवनः** पारापतवत् पवनत्वरः ।
अकुण्ठदयितोत्कण्ठः प्राप श्वशुरपत्तने ॥१५६॥

तत्रापि तामनालोक्य पप्रच्छैकां स योषितम् ।
इहाञ्जना कलत्रं ते समायाताऽथवा न किम् ? ॥१५७॥
साऽऽचख्याविह साऽऽयासीद् **वसन्ततिलकान्विता** ।
परं निर्वासिता पित्रोत्पन्नदौःशील्यदोषतः ॥१५८॥
श्रुत्वेति सर्वतः कान्तामन्वेष्टुं **पवनो** भ्रमन् ।
क्वापि चानाप्य तद्वार्त्तामार्त्तः **प्रहसितं** जगौ ॥१५९॥
गत्वा शंस सखे ! पित्रोर्भ्राम्यता परितो भुवम् ।
मयाऽद्य यावदालोकि न क्वाप्यञ्जनसुन्दरी ॥१६०॥
पुनर्गवेषिष्यामि तामरण्ये तपस्विनीम् ।
द्रक्ष्यामि चेद् वरं तर्हि नो चेद् वेक्ष्यामि पावके ॥१६१॥
इत्यादित्यपुरे गत्वा तथा **प्रहसितो**ऽकरोत् ।
तच्च **केतुमती** श्रुत्वा विलपन्तीदमब्रवीत् ॥१६२॥
हहा कृताग्रहो मृत्यौ स किं **प्रहसित** ! त्वया ।
प्रियमित्रं वने मुक्त एकाकी कठिनाशयः ? ॥१६३॥
अथवा किं मया सापि निर्दोषा परमार्थतः ।
अविमृश्यविधायिन्या पापिन्या निरवास्यत ॥१६४॥
तदलाभि मया साध्वीदोषारोपणजं फलम् ।
यदुग्रपुण्यपापानामिहैव फलमाप्यते ॥१६५॥
प्रह्लादस्तां प्रबोध्याथ सस्नुषं सुतमीक्षितुम् ।
प्रजिघायभितो दूतानात्मनापि चचाल च ॥१६६॥
सह विद्याधरैः सूनुं स्नुषां चालोक्यन्नयम् ।
वने भूतवनेऽपृश्यच्चितोपान्तस्थितं सुतम् ॥१६७॥
"**पवनो**ऽत्रान्तरे प्रोच्चैरूचे हे वनदेवताः ! ।
विद्याधरेन्द्र**प्रह्लाद-केतुमत्योः** सुतोऽस्म्यहम् ॥१६८॥

महासत्य**ञ्जना** नाम पत्नी मे सा च दुर्धिया ।
निर्दोषापि मयोद्वाहात् प्रभृत्यपि हि खेदिता ॥१६९॥

तां परित्यज्य यात्रायां चलितः स्वाभिकार्यतः ।
दैवाद् मत्वा च निर्दोषामुत्पत्य पुनरापतम् ॥१७०॥

रमयित्वा च तां स्वैरमभिज्ञानं समर्प्य च ।
पितृभ्यामपरिज्ञातः पुनः कटकमापतम् ॥१७१॥

जातगर्भा च सा मुग्धा मद्द्वेषाद् दोषशङ्कया ।
निर्वासिता जनन्या मे क्काप्यस्तीति न बुध्यते ॥१७२॥

साग्रेऽधुनापि निर्दोषा दारुणामासदद् दशम् ।
ममैवाज्ञानदोषेण धिग् मां पतिमपण्डितम् ॥१७३॥

मया भ्रान्त्वाऽखिलां क्षोणीं सम्यग् मार्गयतापि हि ।
न साप्ता मन्दभाग्येन चिन्तामणिरिवार्णवे ॥१७४॥

तदद्य स्वममुं देहं जुहोम्यत्र हुताशने ।
यद्वियोगानलोऽयं मे जीवतोऽतीव दुस्सहः ॥१७५॥

यदि पश्यथ मे कान्तां ज्ञापयध्वं तदेति यत् ।
त्वद्वियोगेनते कान्तः प्रविवेश हुताशने'' ॥१७६॥

इत्युक्त्वा तत्र चित्यायां दीप्यमानहविर्भुजि ।
प्रदातुं **पवनो** झम्पामुत्पपात नभस्तले ॥१७७॥

श्रुततद्वचनो वेगात् **प्रह्लादो**ऽप्यतिसम्भ्रमी ।
वक्षःस्थलोपपीडं तं स्वबाहुभ्यामधारयत् ॥१७८॥

मृत्योः प्रियवियोगार्तिप्रतिकारस्य सम्प्रति ।
को विघ्नोऽयं ममेत्युच्चैरुवाच **पवनञ्जयः** ॥१७९॥

प्रह्लादोऽपि जगौ साश्रुरेष पापोऽस्मि ते पिता ।
यः स्नुषाया विदोषाया निर्वासनमुपैक्षत ॥१८०॥

आविमृश्य कृतं तावत् त्वन्मात्रैवैकमग्रतः ।
द्वितीयं मां कृथास्त्वं तु स्थिरीभव सुधीरसि ॥१८१॥

स्नुषान्वेषणहेतोश्चादिष्टाः सन्ति सहस्रशः ।
विद्याधरा मया वत्साऽऽगमयस्व तदागमम् ॥१८२॥

अत्रान्तरे विमार्गन्तः सर्वतः **पवनाञ्जने** ।
पुरं **हनुपुरं** प्रापुः खेचराः कोऽपि सत्वराः ॥१८३॥

प्रतिसूर्याञ्जनाग्रे तेऽञ्जनाविरहदुःखतः ।
पवनस्यानले मृत्युप्रतिज्ञामाचचक्षिरे ॥१८४॥

श्रुत्वा तद् मूर्च्छिता सद्यः पीत्वा विषमि**वाञ्जना** ।
अवाप्य चेतनां चेति रुदती विललाप सा ॥१८५॥

"प्रतिव्रताः पतिशुचा प्रविशन्ति हुताशनम् ।
तासां विना हि भर्त्तारं दुःखाय खलु जीवितम् ॥१८६॥

नारीसहस्रभोक्तृणां भर्तृणां श्रीमतां पुनः ।
क्षणिकः प्रेयसीशोकस्तत् कुतोऽग्नौ विभोऽविशः ? ॥१८७॥

विपरीतमिदं जज्ञे त्वयि वह्निप्रवेशिनि ।
पुनर्मयि वियोगेऽपि हा जीवन्त्यामियच्चिरम् ॥१८८॥

महासत्त्वस्य ते चाल्पसत्त्वायाश्च ममान्तरम् ।
उपलब्धमिदं स्वर्णगुञ्जयोरिव सम्प्रति ॥१८९॥

न मे श्वशुरयोर्दोषो दोषः पित्रोर्न चापि हा ।
ममैव मन्दभाग्यायाः कर्मदोषोऽयमीदृशः" ॥१९०॥

प्रबोध्य तां समारोप्य विमानं साङ्गजामथ ।
अन्विष्यन् **पवनं** प्राप्य वने तत्रैव मातुलः ॥१९१॥

दृष्टः **प्रहसिते**नायान् **साञ्जनो**ऽयं न्यवेदि च ।
मुदा **प्रह्लाद-पवनञ्जय**योर्जयपूर्वकम् ॥१९२॥

अथोत्तीर्य विमानात् तौ **प्रतिसूर्योऽञ्जना**पि च ।
प्रह्लादं नेमतुर्दूराद् भक्त्या भून्यस्तमस्तकौ ॥१९३॥
प्रतिसूर्यं परिष्वज्य पौत्रमङ्के निवेश्य च ।
प्रह्लादो जातसंह्लादो जगादैवं ससंभ्रमः ॥१९४॥
"मज्जन्तं व्यसनाम्भोधौ मामद्य सकुटुम्बकम् ।
समुद्धरंस्त्वमेवासि बन्धुः सम्बन्धिनां धुरि ॥१९५॥
मद्वंशपर्वभूतेयं शाखासन्तानकारणम् ।
स्नुषा त्यक्ता विना दोषं साध्वियं रक्षिता त्वया ॥१९६॥
सद्यो व्यसनसन्तापैः **पवनो**ऽपि व्यमुच्यत ।
सनन्दनां समासाद्य **मेरु**चूलामिव प्रियाम्" ॥१९७॥
पुरं **हनुपुरं** जग्मुस्ततः सर्वेऽपि ते मुदा ।
दिवं दिवापि कुर्वाणा विमानैरुडुमण्डिताम् ॥१९८॥
महेन्द्रोऽप्याययौ तत्र समं **मानसवेगया** ।
सा च **केतुमती** देवी सर्वेऽप्यन्येऽपि बान्धवाः ॥१९९॥
विद्याधरेन्द्रैः सम्बन्धिबन्धुभिर्विदधे मिथः ।
तत्रोत्सवो महापूर्वोत्सवादप्यधिकस्ततः ॥२००॥
आपृच्छ्याथ मिथो निजं निजमगुः स्थानं चिरात् खेचरा,
वृद्धिं चेन्दुरिवाससाद **हनुमान्** गृह्णन् कला निर्मलाः ।
भुक्त्वा भोगमभङ्गुरं प्रियतमप्रेमा क्रमादायुषि,
क्षीणे साधितमृत्युरुत्तमगतिं भेजे**ऽञ्जना**देव्यपि ॥२०१॥

॥ इत्यञ्जनासुन्दरीकथा ॥

● ● ●

अथ **नर्मदासुन्दरी**कथा –

§§ अस्तीह **भरत**क्षेत्रे **वर्धमान**पुरं पुरम् ।
तत्र **सम्प्रति**नामाभूद् गुणैरप्रतिमो नृपः ॥१॥
अभूद्**ऋषभसेना**ख्यः सार्थवाहोऽत्र पत्तने ।
जिनधर्मरतस्तस्य भार्या **वीरमती**त्यभूत् ॥२॥
एतयोः **सहदेव**श्च **वीरदास**श्च नन्दनौ ।
नन्दनी रम्यरूपश्री**ऋषिदत्ते**ति चाभवत् ॥३॥
अभ्याजग्मुरिमामिभ्या नैकै वरयितु परम् ।
मिथ्यादृशाममीषां न दत्तवा**नृषभ**ः सुताम् ॥४॥
इतश्च **कूपचन्द्रा**ख्यपुरात् तत्र महर्द्धिकः ।
वाणिज्यार्थं वणिक्पुत्रो **रुददत्त**ः समागतम् ॥५॥
असौ **कुबेरदत्त**स्य सुहृदो मन्दिरोदरे ।
क्रयाणकानि निक्षिप्य न्यविक्षद् मत्तवारणे ॥६॥
यावत् तावदनेनैक्षि पुरवीथ्यां सखीवृता ।
ऋषिदत्तेन्दुलेखेव ताराचक्रपरिस्तुता ॥७॥
ततः **कुबेरदत्तं** स पप्रच्छेतिस्मरातुरः ।
केयं कस्य सोऽपि सर्वमस्मै न्यवेदयत् ॥८॥
मिथ्यादृष्टिः प्रकृत्यैव तल्लोभादचिरेण सः ।
यतीनुपास्य विधिवत् कपटश्रावकोऽभवत् ॥९॥
अथो **ऋषभसेन**स्तद्विवेकापहृताशयः ।
ऋषिदत्तामदत्तास्मै धर्मः फलित सर्वथा ॥१०॥
उपायश्रावकः सोऽयमुपायंस्त सविस्तरम् ।
ऋषिदत्तां ततो भोगानगाहत सहैतया ॥११॥
अथैष कतिथैर्मासैः स्वपितुर्लेखदर्शनात् ।
आपृच्छ्य श्वशुरं यातः स्वपुरं सह कान्तया ॥१२॥

पित्राभिनन्दितस्तत्रान्वितो स **ऋषिदत्तया** ।
भवाध्वनि भवन्नुज्झाञ्चक्रे धर्मं जिनेशितुः ॥१३॥

मिथ्यात्व**मृषिदत्ता**पि तत्संसर्गादगाहत ।
कटुत्वमेति निम्बस्य सङ्गाच्चूतलतापि यत् ॥१४॥

मत्वेति तत्पितृभ्यां सा वर्जिताऽऽवर्जनीकृता । 5
नीचैर्गतिं वितन्वाना यमुना भानुना यथा ॥१५॥

कालचक्रेण विषयानुषङ्गिफलमङ्गजम् ।
सा **महेश्वरदत्ता**ख्यमसूत श्रीरिव स्मरम् ॥१६॥

अधीती सर्वशास्त्रेषु कृती सर्वकलासु च ।
स प्राप मन्मथक्रीडाभवनं योवनं क्रमात् ॥१७॥ 10

वर्धमानपुरे किञ्च **ऋषिदत्ता**ग्रजन्मनः ।
वल्लभा **सहदेव**स्य **सुन्दरी** गर्भमादधे ॥१८॥

अन्यदा **नर्मदा**स्नानदोहस्तमखेदयत् ।
तं च सा क्षीयमाणाङ्गी पृष्टा पत्ये न्यवेदयत् ॥१९॥

सहदेवस्ततोऽचालीत् तस्या दोहदपूर्त्तये । 15
वणिक्पुत्रैः सहानेकैर्गृहीत्वोरुक्रयाणकम् ॥२०॥

प्रयाणैरप्रमाणैश्च **नर्मदा**माप संमदात् ।
तत्तीरभुवि चावासन् महीमानिव सोऽग्रहीत् ॥२१॥

शुभे मुहूर्त्ते संपूज्य **नर्मदां** शर्मदायिनीम् ।
तत्रैष सह **सुन्दर्या** जलकेलिमसूत्रयत् ॥२२॥ 20

पूरिते दोहदेऽमुष्यास्तन्नदीसौहृदेन सः ।
नर्मदापुरमाधाय पुरं तत्रैव तस्थिवान् ॥२३॥

मन्दरोन्नतमातेने तेनेह जिनमन्दिरम् ।
मिथ्यात्वबलमुद्बध्य जयस्तम्भ इवात्मनः ॥२४॥

विमुच्य नगरग्रामपुराणि परितो जनाः ।
तत्रैयुर्नूतनाम्भोजविपिने भ्रमरा इव ॥२५॥

अथासूत सुतां तत्राद्भुतां कल्पलतामिव ।
सुन्दरी मन्दरक्षोणीधरभूरिव भास्वरम् ॥२६॥

सहदेवो नृदेवश्रीस्तस्या जन्मोत्सवं व्यधात् ।
अभ्यधत्त च तामुच्चै**र्नर्मदासुन्दरी**मिति ॥२७॥

वर्धमानेन्दुलेखेव साऽऽसाद्य सकलाः कलाः ।
प्रपेदे विश्वविहितस्तवनं यौवनं वयः ॥२८॥

तस्याः पिता च रूपं च स्थाणुरित्यत्र नो भिदाम् ।
सहदेव-महादेव इत्यत्र तु समीयतुः ॥२९॥

रूपप्रसिद्धिमाकर्ण्य तस्या विश्वप्रसृत्वराम् ।
ऋषिदत्तात्मपुत्रार्थे चिन्तयामास चेतसि ॥३०॥

धिग् मां धिग् मम जन्मेदं स्वजनैरुज्झिताऽस्मि यत् ।
कियदेवैतदथवा धर्मध्वंसकृतो मम ॥३१॥

आलापयन्त्यपि न मां ये ते कथमिवात्मजाम् ।
मत्पुत्राय प्रयच्छन्तीत्यन्तःखेदपराऽरुदत् ॥३२॥

रुदती **रुद्रदत्ते**न सा पृष्टाऽशंसताखिलम् ।
तद् **महेश्वरदत्तो**ऽपि श्रुत्वा स्वं तातमब्रवीत् ॥३३॥

ततः प्रहिणु मां तत्र स्वजनावर्जनाद् यथा ।
कन्यामिमां करे कृत्वा स्वमातुः प्रीतिमादधे ॥३४॥

तदर्थे सार्थमाधाय ततोऽसौ प्रहितोऽमुना ।
नर्मदापुरबाह्योर्व्यामेत्य सार्थं न्यवेशयत् ॥३५॥

ततः शुभे दिने मातामहादीन् स्वजनानयम् ।
दृष्ट्वा दृष्ट्वा बभूवैते सच्चक्रुस्तं जनस्थितेः ॥३६॥

दाक्ष्यदाक्षिण्यनैपुण्यसत्पुण्यविनयादिभिः ।
गुणैरनुगुणैस्तेषां मनः प्रह्वीचकार सः ॥३७॥

मातामहस्तमूचेऽङ्कमारोप्य प्रयतोऽन्यदा ।
बन्दीकृतानि भवता प्रविश्यान्तर्मनांसि नः ॥३८॥

वाञ्छितं वृणु तद् वत्स ! तवैताः सम्पदोऽखिलाः ।
इत्युक्तोऽयाचताऽऽनम्य **नर्मदासुन्दरी**मयम् ॥३९॥

मातामहोऽभ्यधाद् वत्स ! साधु याचितवानसि ।
परं मिथ्यादृशां सीमा कुलं ते तद् दुनोति नः ॥४०॥

आस्तां कुलमिदं तात ! यूयं जानीथ यादृशम् ।
अहं तु श्राद्धधर्मोऽस्मीत्य**ार्षदत्तो**भ्यधत्त तम् ॥४१॥

यद्येवं प्रत्ययः पथ्यान् शपथान् कुरु नः पुरः ।
इति मातामहेनोक्ते शपथानप्यथाकरोत् ॥४२॥

इति प्रत्यायितस्तेन प्रीतो मातामहस्ततः ।
आदिश्य **सहदेवं** तत्सुतामस्मै प्रदत्तवान् ॥४३॥

महेन महतोद्यम्य **नर्मदासुन्दरी**मसौ ।
विषया**नार्षदत्ते**यस्तया सार्धमसेवत ॥४४॥

धातून् सप्तापि सत्कर्मसेनास्यानुबध्नती ।
कल्याणमयमातेने **नर्मदासुन्दरी** पतिम् ॥४५॥

कालेन कियताप्येष स्वजनानामनुज्ञया ।
नर्मदासुन्दरीयुक्तो जगाम निजपत्तनम् ॥४६॥

अथाशु कारयामास **नर्मदासुन्दरी**जुषः ।
रुददत्तः स्वपुत्रस्य पूःप्रवेशमहोत्सवम् ॥४७॥

कृतप्रणामामुत्सङ्गे विनिवेश्योपगृह्य च ।
नर्मदासुन्दरीमेता**मृषिदत्ता**ऽन्वमोदत ॥४८॥

नर्मदासुन्दरी तत्र कौमुदीव सदोदिता ।
मिथ्यात्वतिमिरोन्माथं चक्रे श्वशुरवेश्मनि ॥४९॥

श्वश्रू-श्वशुरयोर्भक्तिं तन्वती तत्र नर्मदा ।
भृंश भर्तुरभिप्रेता निन्येऽब्दानि कियन्त्यपि ॥५०॥

§§ अन्यदा स्वास्यमादर्शतले भूतलमेनका ।
पश्यन्ती **नर्मदा** गवाक्षमधितिष्ठति ॥५१॥

मुनिस्तावत् कृतोऽप्यागादधः सापि प्रमद्वरा ।
ताम्बूलरसमौज्झत् तन्मूर्ध्नि सद्यः पपात सः ॥५२॥

मुनिः कोपादिति प्राह य एवं मम मूर्धनि ।
पिक्कां मुञ्चति तस्य स्याद् वियोगः प्रेयसा सह ॥५३॥

श्रुत्वेति **नर्मदा** भीतभीतोत्तीर्यानमद् मुनिम् ।
क्षमयित्वा तमत्यर्थप्राञ्जलिश्च व्यजिज्ञपत् ॥५४॥

"अज्ञानिनी हताशाऽहं हतास्ति दलितास्मि च ।
हा हा शिरसि पूज्यानामीदृग् या कृतपूर्विणी ॥५५॥

कारुण्यसिन्धवो विश्वबन्धवो विश्वमातरः ।
विश्वैकपितरो युष्मादृशा येन महर्षयः ॥५६॥

न द्रुह्यन्ति न मुह्यन्ति न कुप्यन्ति शपन्ति न ।
विपक्षेषु सपक्षेषु दुर्जन्तुषु समन्तुषु ॥५७॥

तत् प्रसीद प्रमादिन्यां मयि शापमपाकुरु ।
गुरूणां विनयान्तो हि कोपः शिशुषु जायते" ॥५८॥

"अथाब्रवीद् मुनिर्वत्से ! मा विषीद वृथा, शृणु ।
जिनेशमुनयः प्राणहृतामपि शपन्ति न ॥५९॥

यद् मयाऽवादि तच्चक्रे स्वरूपाख्यानमात्रकम् ।
त्वया तु मुग्धया वत्से ! शापचापलमौह्यत ॥६०॥

पूर्वदुष्कर्मदोषात् ते भावि पत्या वियोजनम् ।
स्वप्रसूतं हि कर्मानुगच्छत् केन निवार्यते ? ॥६१॥
बोधयित्वेति तां साधुरयासीत् प्रणतोऽनया ।
पृष्टा च रुदती पत्या सा तत् तस्मै न्यवेदयत् ॥६२॥
आश्वासयदिमां सोऽपि तद्गिरा सपि चाश्वसीत् । 5
कालं च यापयामास तन्वती धर्ममद्भुतम् ॥६३॥
स **महेश्वरदत्तो**ऽथ सवयोभिः पुरस्ततः ।
चचाल **जवनद्वी**पं प्रत्यर्थार्जनहेतवे ॥६४॥
आपृच्छ्य पितरौ कृत्वोचितभाण्डपरिग्रहम् ।
नर्मदासुन्दरीमाह रहसीति विहस्य सः ॥६५॥ 10
प्रिये ! यास्यामि **जवनद्वीप**मर्थार्जनाकृते ।
शुश्रूषेथा गुरूंस्त्वं तु कुर्वीथा धर्ममन्वहम् ॥६६॥
शीतवातातपक्लेशाः प्रिये ! देशान्तरे खलु ।
भवती सुकुमारा तदिहैवास्तु व्रजाम्यहम् ॥६७॥
"अथाह **नर्मदा** साधु साधु नाथ ! त्वयोदितम् । 15
किन्तु ते विरहं सोढुं न क्षमाहं मनागपि ॥६८॥
जले स्थले सुखे दुःखे नगे च नगरेऽपि च ।
यत्र त्वं यासि तत्राङ्गच्छायेवाहं तवानुगा" ॥६९॥
तया स**हार्षदत्तो**ऽथ शुभेऽह्नि कृतमङ्गलः ।
प्रणम्य पितरौ चक्रे प्रयाणं प्रति वारिधिम् ॥७०॥ 20
तत्रारुह्य महायानं विमानमिव **पुष्करम्** ।
यावत् प्रयाति केनापि तावद् गीतमगीयत ॥७१॥
तद् निशम्य निशामध्ये स्वरलक्षणवेदिनी ।
नर्मदासुन्दरीत्याह गायन् यो वर्तते प्रिय ! ॥७२॥

स श्यामदेहः स्थूलांह्रिकेशोऽतिसात्त्विकः ।
द्वात्रिंशद्वर्षदेशीयः पृथुवक्षःस्थलः किल ॥७३॥
गुह्योऽस्य मशकः शोणोऽस्त्यंसदेशे च लाञ्छनम् ।
इत्याकर्ण्य वचस्तस्याः पतिरेवमचिन्तयत् ॥७४॥
"नूनमेषाऽमुना सार्धमत्स्यवस्थितमानसा ।
न वेति यदि तद् वेत्ति कथमस्याङ्गलक्षणम् ॥७५॥
आसीत् पुरा मम हृदि श्राविकेयं महासती ।
परं कुलद्वयस्यापि यशःकुसुमधूमरी ॥७६॥
कुलीनाभ्योऽपि कः स्त्रीभ्यः प्रत्येति मतिमान् यतः ।
नदोऽब्जिनीकुमुदिन्योर्भर्ताऽर्केन्दू तु वल्लभौ ॥७७॥
ज्ञायते न भवे नृणामसती शाकिनीव तत् ।
शस्त्रेण शातम्येनां पयोधौ पातयामि वा" ॥७८॥
इति यावदसौ मिथ्याकुविकल्पानकल्पयत् ।
तावत् कूपस्थितः प्रोच्चैरिति निर्यामकोऽब्रवीत् ॥७९॥
अरे रे धत्त धत्ताशु यानं स्खलयतांशुकम् ।
नावर्गलांश्च गृह्णीत **रक्षोद्वीपः** समाययौ ॥८०॥
जवादुत्तीर्य चैतस्माद् गृह्णीतैधोजलानि भोः ! ।
श्रुत्वेति गर्भपादान्तास्तत्क्षणात् तत् तथा व्यधुः ॥८१॥
स **महेश्वरदत्तो**ऽपि गोपितान्तरमत्सरः ।
द्वीपेऽस्मिन् मायया रन्तुमनयद् **नर्मदा**मथ ॥८२॥
सापि तेन सह प्रीता भ्रामं भ्रामं वने वने ।
सरसः कस्यचित् तीरवानीरगहनेऽस्वपत् ॥८३॥
वीक्षेथा मैनमधुना वञ्चकं **नर्मदां** प्रति ।
इतीव निद्रयातस्याश्छादिते पक्ष्मभिर्दृशौ ॥८४॥

तद्भर्ता मायिकः पापी चिन्तयामासिवानिति ।
मुञ्चाम्येनामिह यथा यूकेवार्त्तिपरा सती ॥८५॥
स्वयमेव म्रियेतासौ स्मरन्त्यन्यायमात्मनः ।
तीव्रघातहता हन्त निजमागः स्मरेत् कुतः ? ॥८६॥
चिन्तयित्वेति शनकैरुत्थाय शुनको यथा । 5
पलायिष्ट निकृष्टोऽसौ प्रालपद् यानमागतः ॥८७॥
अथ सांयात्रिकैः पृष्टो भ्रातः ! किमिति रोदिषि ? ।
सोऽब्रवीद् मे समागत्य रक्षसाऽभक्षि सा प्रिया ॥८८॥
प्रणश्याहं तु हन्तेह प्राप्तस्तद्यानमञ्जसा ।
पूर्यतामन्यथा रक्षोऽभ्येत्व वो मारयिष्यति ॥८९॥ 10
श्रुत्वेति तेऽपि संभ्रान्ता पूरयामासुराशु तत् ।
रुरोद स तु शोकीव कुट्टयन् वपुरात्मनः ॥९०॥
अचिन्तयच्च विहितं द्वयमद्य हितं मया ।
स्वैरिणी मारिता सापि जनवादश्च रक्षितः ॥९१॥
अथ सांयात्रिकैरन्येर्बौधं बोधं कथञ्चन । 15
विशोक इव क्लृप्तोऽसौ **जवनद्वीप**मभ्यगात् ॥९२॥
वाञ्छितं लाभमादाय ततोऽपि स्वपुरं गतः ।
असौ पित्रोः पुरः शोकीवाख्यद् रक्षोहतां प्रियाम् ॥९३॥
नर्मदासुन्दरीप्रेतकार्यं कृत्वातिदुःखितौ ।
कन्यामन्यामथो पर्यणायिषातामनेन तौ ॥९४॥ 20

§§ इतश्च **नर्मदा** यावज्जागर्त्युन्मिषितेक्षणा ।
स्वभावसरला तावद् न पश्यति निजं पतिम् ॥९५॥
निलीनः परिहासाद् मे प्रियः क्वापीति मन्वती ।
एह्येहि नाथ नाथेति निर्व्याजा व्याजहार सा ॥९६॥

शब्देष्वपि कृतेषूच्चैर्यावन्नायमुपाययौ ।
शङ्कितोत्थाय सा तावत् पर्यन्तेषु न्यभालयत् ॥९७॥

तत्राप्यदृष्ट्वा तं बाष्पाविलदृग् विललाप सा ।
एह्येहि स्फुटतीवेदं त्वदृते हृदयं मम ॥९८॥

श्रुत्वात्मलपितस्यास्य कन्दरासु प्रतिस्वनम् ।
आकारयति मां कान्त इति भ्रान्त्याऽभ्यधावत ॥९९॥

कर्करस्थलशृङ्गाटकण्टकैर्दर्भसूचिभिः ।
भिद्यमानक्रमस्रावि रुधिरोत्फालगामिनी ॥१००॥

वेशं वेशं गिरिगुहा भ्रामं भ्रामं वनानि च ।
पुनरेत्य निजं कुञ्जं तारतारं रुरोद सा ॥१०१॥

अत्रान्तरे रवि द्वीपान्तरेऽगात् त्वरितक्रमः ।
कर्म प्रष्टुमिवैतस्याः **सीमन्धर**विभोः पुरः ॥१०२॥

साञ्जनाश्रुदलश्यामं किरन्त्यस्तिमिरं तदा ।
तद्दुःखादिव चक्रन्दुः ककुभः ककुभस्वनैः ॥१०३॥

दुःखमूर्च्छामपाकर्तुमिवैतस्याः सुधाकरः ।
उज्जगाम तदा युक्तत्रिजातस्य तस्य तत् ॥१०४॥

रोदं रोदमसौ खिन्ना निलीयाधिलतागृहम् ।
कोटियामामिव तदा त्रियामां तामयापयत् ॥१०५॥

विभातायां विभावर्यामुदिते च विभाविभौ ।
स्मारं स्मारं पतिगुणान् रुदती व्यलपत् पुनः ॥१०६॥

"हा नाथ ! द्युसरित्पाथःपवित्रचरिताद्भुतः ।
हा सदा स्मेरवदनापहस्ततसरोरुहः ॥१०७॥

दीनामशरणामेकामेकान्तस्नेहमोहिताम् ।
हा विदाय त्वं विपिने निर्जने मामगात् क्व नु ? ॥१०८॥

रथाङ्ग्या अपि भर्ता स्यात् कुतोऽपि मिलिनोऽधुना ।
एहि त्वमपि तद् देहि सदास्यो दर्शनं मम'' ॥१०९॥
रुदती विलपन्तीति तं प्रत्यद्रि प्रतिद्रुमम् ।
प्रतिमार्गं च मार्गन्ती पञ्चाहीं सात्यवाहयत् ॥११०॥
तथैव च भ्रमन्ती सा षष्ठेऽहनि पयोनिधेः । 5
तीरे तत्र ययौ यत्र यानपात्रं व्यलञ्च्यत ॥१११॥
तत्रापि शून्यमालोक्य विवेकादित्यचिन्तयत् ।
पूर्वकर्मोदयः सोऽयं **'न मुनेरन्यथा गिरः'** ॥११२॥
आत्मन् ! कर्म तदायातं यत् पुरा जनितं त्वया ।
सम्यक् सहस्व मा रोदीरदीनहृदयो भव ॥११३॥ 10
आत्मानमात्मनैवेति संबोध्यागस्य पल्वले ।
स्नात्वा देवांश्च वन्दित्वा फलाहारं चकार सा ॥११४॥
''ततोऽसौ गह्वरे क्वापि मृण्मयं बिम्बमार्हतम् ।
स्थापयामास मनसो दृशोश्चालानहेतवे ॥११५॥
पुष्पैः फलैश्च नीवारैरिगुन्दीतैलदीपकैः । 15
सार्चयन्ती स्तुवन्ती च दिवसानत्यवाहयत्'' ॥११६॥
अन्यदाऽचिन्तयदिदं भारते गम्यते यदि ।
तदा व्रतमुपादायोत्तमार्थः साधु साध्यते ॥११७॥
चिन्तयित्वेति सा भग्नयानतापिशुनं परम् ।
चिह्नमुत्तम्भयामास तीरे नीरेशितुस्ततः ॥११८॥ 20
अत्रान्तरे पितृव्योऽस्या यान् कुलं **बर्बरं** प्रति ।
वीरदासो विलोक्यैतच्चिह्नं यानादवातरत् ॥११९॥
वृतः कतिपयैर्गर्भपादान्तैः पदपद्धतीन् ।
दर्शं दर्शं ययौ तत्र यत्रास्ते सा महासती ॥१२०॥

स्तुवत्या जिनमाकर्ण्य तस्या मधुकिसे गिरः ।
नर्मदा किमसावित्याश्चर्यादेषोऽविशद् गुणे ॥१२१॥
सा च दृष्ट्वा पितृव्यं स्वं विलम्ब्यास्य गलेऽरुदत् ।
शोकानन्दकदुष्णाश्रुः सोऽप्यभूदुपलक्ष्य ताम् ॥१२२॥
पृष्टा सा तेन हा वत्से ! किमेकेहागमः कुतः ? ।
इति सा सर्वमेतस्मै स्ववृत्तान्तमचीकथत् ॥१२३॥
विपाकं दुर्विधेर्निन्दन्नयमादाय **नर्मदा**म् ।
ययौ **बर्बर**कूलेऽनुकूलेन मरुता यतः ॥१२४॥
तत्रोत्तार्य क्रयाणानि कारितांशुकमण्डपः ।
सदूष्यां नरदूष्यां तां **नर्मदासुन्दरीं** व्यधात् ॥१२५॥
उपायनमुपदायाद्राक्षीदेष नृपं ततः ।
अर्धदानीकृतस्तेन स्वावासानाययौ पुनः ॥१२६॥
§§ इतश्च तत्र वेश्यास्ति **हरिणी** नाम विश्रुता ।
मेनका वर्णिकामात्रं यस्यास्त्रिदशपत्तने ॥१२७॥
आदत्ते सा महीपालप्रसादविहितं स्थितम् ।
सायांत्रिकेभ्यो दीनारानष्टोत्तरसहस्रकम् ॥१२८॥
सा चेटीं प्राहिणोद् **वीरदास**माह्वातुमन्यदा ।
तयाऽऽहूतोऽब्रवीदेष स्वदारैकव्रता वयम् ॥१२९॥
आगन्तव्यं तथापीति सोचे दक्षस्त्वयं ददौ ।
दीनारांस्तानुपादाय **हरिण्यै** सापि चार्पयत् ॥१३०॥
हरिण्याह किमेतै रे तमेवेभ्यमिहानय ।
इत्याहूतोऽनया भूयः समागादयमप्यथ ॥१३१॥
हरिण्यासौ करिण्येवारब्धश्चालयितुं ततः ।
तथापि नाचलद् देवाचलवद् निश्चलस्थितिः ॥१३२॥

अत्रान्तरे **हरिण्यै** सा चेटी कर्णगताऽवदत् ।
यदस्य गेहे गृहिणी स्वसा वा दुहितापि वा ॥१३३॥
सुलोचनास्ति यदि सा त्वदाज्ञाकारिणी भवेत् ।
तदा ते भवने संपद् भुवनस्यापि किं बहुः ? ॥१३४॥ युग्मम् ॥
श्रुत्वेति मुदितोत्पन्नमतिः सा **हरिणी** ततः ।
वीरदासमयाचिष्ट प्रतिच्छन्दीयमुद्रिकाम् ॥१३५॥
सोऽपि तामार्पयद् मुग्धस्तस्यै साप्याशु मुद्रिकाम् ।
समर्प्य गूढमन्त्रेण सह दासीं व्यसर्जयत् ॥१३६॥
सा गत्वा **नर्मदा**मूचे शुभे ! श्रेष्ठ्यस्ति नो गृहे ।
द्रुतं त्वामाह्वयत्येकां साभिज्ञानेऽत्र मुद्रिकाः ॥१३७॥
नामाङ्कां **वीरदास**स्य मुद्रामालोक्य **नर्मदा** ।
निर्विकल्पा तथा सार्धं ययौ तस्या निकेतनम् ॥१३८॥
अपद्वारेण तां सद्यः प्रवेश्योर्वीगृहेऽक्षिपत ।
मुद्रिकां **वीरदास**स्यार्पच्च **हरिणी** ततः ॥१३९॥
उत्थायासौ ततः प्राप्तोऽक्षतशीलो निजालयम् ।
अपश्यन् **नर्मदां** तत्र पप्रच्छ स्वपरिच्छदम् ॥१४०॥
तत्प्रवृत्तिमजानानः कोऽपि नास्मै न्यवेदयत् ।
नष्टाङ्गामिव तां सोऽपि सर्वत्राप्यगवेषयत् ॥१४१॥
ततोऽपश्यन्नयं दुःखी ह्युपायमचिन्तयत् ।
योऽहार्षीत् कथमेतां स पुरः प्रकटयेद् मम ? ॥१४२॥
तदहं यामि येनायं दुष्टः प्रकटयेदिमाम् ।
निर्धार्येति स भाण्डानि गृहीत्वाऽऽपृच्छ्य भूपतिम् ॥१४३॥
आपूर्य यानपात्राणि चलितः स्वपुरं प्रति ।
भृगुकच्छं समागच्छदतुच्छश्रीनिकेतनम् ॥१४४॥

तन्मित्रं श्रावकस्तत्र **जिनदेवो**ऽस्ति विश्रुतः ।
आख्याय सर्वमप्यस्मै **वीरदासो**ऽभ्यधत्त तम् ॥१४५॥
त्वं याहि तत्र सर्वत्र तामालोक्य समानयेः ।
तेनेति सोऽर्थितः कृत्वा सामग्रीं तत्र यातवान् ॥१४६॥

§§ इतश्च **वीरदासं** तं गतं विज्ञाय वेश्यया ।
हिरण्यार्थं **हरिण्या** सा **नर्मदा**ऽवादि सादरम् ॥१४७॥
भद्रे ! भजस्व वेश्यात्वं भोगान् मानय भूरिशः ।
मदीयसदनश्रीणां त्वमेव स्वामिनी भव ॥१४८॥
अथाह **नर्मदा** हस्तौ धुन्वती तन्वतीव सा ।
मैवं वोचः शुभे ! शीलशैलव्रजोपमं वचः ॥१४९॥
अथाह वेश्या वेश्यात्वं दुर्गं स्वर्गस्थयोषिताम् ।
विनैतद् दुर्ज्जनाज्जातरण्डात्वनरकोदयः ॥१५०॥
अथाह **नर्मदा** पांशुपर्वराज्योपमं ह्यदः ।
स्त्रीणां शीलं त्विहामुत्र सिद्धिसंवननौषधम् ॥१५१॥
तद्वाक्येन जितम्मन्या कुपिता **हरिणी** ततः ॥
ताडयामास तां मूढा पीयूषायेन्दुरत्नवत् ॥१५२॥
विनष्टं न किमप्यद्याप्यङ्गीकुरु वचो मम ।
हरिण्योक्तेति साऽवादीद् नेत्येतां सा त्वकुट्टयत् ॥१५३॥
मर्मावित्कुट्यमाना साऽस्मार्षीत् पञ्चनमस्कृतिम् ।
तत्प्रभावादियं वेश्या पञ्चामञ्चति स्म च ॥१५४॥
राजा तन्मृत्युमाकर्ण्याज्ञापयद् मन्त्रिणं ततः ।
तत्पदे तद्गुणां काञ्चिदन्यां सचिव ! सञ्चिनु ॥१५५॥
राजादेशादसावेत्यामात्योऽभाषिष्ट **नर्मदा**म् ।
हरिणाक्षि ! नृपाज्ञातः श्रय त्वं **हरिणी**पदम् ॥१५६॥

नर्मदा निर्गमोपायं ध्यात्वाऽमन्यत तद्वचः ।
सोऽपि तां तत्पदे कृत्वा जगाम नृपधामनि ॥१५७॥
तदीयरूपलावण्यमाकर्ण्य सचिवाद् नृपः ।
प्रजिघाय समानेतुमेतामथ सुखासनम् ॥१५८॥
सुखासनं समारोप्य विधृतातपवारणम् ।
पुरमध्येन भूपालभृत्या यावद् नयन्ति ताम् ॥१५९॥
दध्यौ सा **नर्मदा** तावज्जीवन्त्या मे न लुम्पति ।
शक्रोऽपि शीलमन्येषां वराकाणां कथैव का ? ॥१६०॥
तथापि कः किलोपायो हुं वैकल्यमिति क्षणात् ।
निर्धार्य वीक्ष्य च पुरः क्षालगर्तमिहापतत् ॥१६१॥
कट**नेपाल**देशीया कस्तूरीति प्रलापिनी ।
पङ्कृतिं शीलरक्षार्थमङ्गे वर्मेव साऽग्रहीत् ॥१६२॥
स्मरेण सह सन्धानपत्राणीव सुविग्रहा ।
पाटयामास वस्त्राणि समक्षं जगतोऽपि सा ॥१६३॥
अन्तर्मन्त्रकलापूर्वं परितो योगिनीव सा ।
धूलिमुल्लालयामास भुजङ्गत्रासहेतवे ॥१६४॥
उपायः साधु लब्धोऽयं शीलरक्षाकृते मया ।
इतीव नृत्यमातेने वर्णयन्ती तदात्मना ॥१६५॥
अथ राजा तदाकर्ण्य प्राहिणोद् मन्त्रवादिनः ।
तानियं कुट्टयामास लेष्टुभिर्भषणानिव ॥१६६॥
दूरेण तत्यजुस्तां ते मान्त्रिका विषया इव ।
भूतैस्वि प्रभूतैस्तु साऽभ्रमत् पृथुकैर्वृता ॥१६७॥
अथासौ **जिनदेवे**न दृष्टा निर्माल्यमण्डना ।
नृत्यन्ती डिम्भकुण्डान्तर्गायन्ती जिनरासकान् ॥१६८॥

उपसृत्य पुरोभूय **जिनदेवो**ऽभ्यधत्त ताम् ।
शंस मे व्यन्तराधीश ! जिनभक्तोऽस्ति को भवान् ? ॥१६९॥

साऽवादीद् यदि मां वेत्तुमस्ति साधो ! मनोरथः ।
तदान्यदा समागच्छाधुना रङ्गं धुनासि किम् ? ॥१७०॥

परेद्युः पृथुकान् धूत्वा मशकानिव गौरियम् ।
दूरोद्यानगता देवानवन्दत समाहिता ॥१७१॥

इतश्च **जिनदेवो**ऽपि तत्रायातोऽभिवन्द्य ताम् ।
विकासधर्मा कांसि त्वं पप्रच्छेति कृताञ्जलिः ॥१७२॥

श्रावकोऽयमिति ज्ञात्वा सा स्वं तस्मै न्यवेदयत् ।
ततोऽसौ मुदितोऽवादीद् वत्से ! दिष्ट्यासि वीक्षिता ॥१७३॥

भृगुकच्छे गतो वत्से ! **वीरदासो**ऽस्ति मे सुहृत् ।
तेनैष **जिनदेव**स्त्वामानेतुं प्रहितोऽस्म्यहम् ॥१७४॥

ततस्त्वं मां कृथाः खेदं सर्वं कर्तास्मि सुन्दरम् ।
परं घृतघटान् भञ्ज्याः शतशो मेऽट्टमध्यगान् ॥१७५॥

सङ्केतमिति कृत्वैतावुभावप्यागसौ पुरे ।
नर्मदा तु तदाऽभाङ्क्षीद् घटान् दुःखघटामपि ॥१७६॥

जिनदेवमथाहूय कृपोपेतो नृपोऽवदत् ।
हहा ग्रहलिया चक्रे हानिर्महिलया तव ॥१७७॥

तदस्मदुपरोधेन परं पारं पयोनिधेः ।
नीत्वा क्षिपैतां सत्यत्र बहुशोऽनर्थकारिणी ॥१७८॥

नृपादेशात् क्षणादेव **जिनदेवः** प्रमोदभाक् ।
नर्मदां निगडय्याशु निजावासान् निनाय सः ॥१७९॥

आकृष्य निगडादेनां स्नपयित्वा च तत्क्षणात् ।
परिधाप्य दुकूलानि भोजयामास तत्र सः ॥१८०॥

अरोप्य वाहने चैनां **भृगुकच्छे** समागमत् ।
ततोऽपि च गृहीत्वैष **नर्मदापुर**मीयिवान् ॥१८१॥

ज्ञात्वा समागतामभ्याजग्मुस्तां जनकादयः ।
प्रणम्य सापि तानेषां कण्ठमालम्ब्य **चारुदत्** ॥१८२॥

पितामहः पिता माता पितृव्योऽस्याः परिऽपि हि । 5
दिष्ट्या तामाप्य जीवन्तीं पुनर्जन्मोत्सवं व्यधुः ॥१८३॥

पूजां जिनालयेषूच्चैरनघं सङ्घपूजनम् ।
चक्रुः साधर्मिकाणां च वात्सल्यं ते तदागमे ॥१८४॥

जिनदेवस्तु कतिथदिनान्तेऽथ कथञ्चन ।
आपृच्छ्य **वीरदासा**दीन् प्रत्यागाद् **भृगुपत्तन**म् ॥१८५॥ 10

§§ इतश्च विहरन्नुर्व्यामनेकयतिसंयुतः ।
गुरु**रार्यसुहस्त्या**गात् कदाचिद् **नर्मदापुरे** ॥१८६॥

अथो **ऋषभदासा**द्याः सर्वद्धर्योद्यानमागताः ।
प्रणम्य सुगुरोः पादान् यथोचितमुपाविशन् ॥१८७॥

धर्मलाभाशिषं दत्त्वा तेभ्यस्तत्त्वकिरा गिरा । 15
चतुर्धा धर्ममदिशद् दशपूर्वधरो गुरुः ॥१८८॥

अत्रान्तरे गुरुं नत्वा **वीरदासो** व्यजिज्ञपत् ।
प्रभो ! किं कर्म चक्रेऽसौ **नर्मदा** पूर्वजन्मनि ? ॥१८९॥

"गुरुः श्रुतोपयोगेन जगादास्तीह **भारते** ।
द्यावाभूम्यन्तरामानदण्डो **विन्ध्याचल**ः किल ॥१९०॥ 20
नदी तस्मात् प्रभूतेयं **नर्मदा** वेणिवद् भुवः ।
आसीदस्यामधिष्ठात्री देवता सापि **नर्मदा** ॥१९१॥

मिथ्यादृष्टिरसौ **धर्मरुचि**नाम्नो मुनेर्व्यधात् ।
सरित्तीरं गतस्योच्चैरुपसर्गाननेकशः ॥१९२॥

ततोऽमुं निश्चलं मत्वा सम्यग्दृष्टिरभूदियम् ।
च्युत्वा चैषा भवत्पुत्री **नर्मदासुन्दरी**त्यभूत् ॥१९३॥
अतः पूर्वभवाभ्यासाद् **नर्मदा** प्रियनर्मदा ।
साधूपसर्गदुष्कर्मोदयादजनि दुःखिनी ॥१९४॥
श्रुत्वेति **नर्मदा** जातजातिस्मृतिरुपाददे ॥
व्रतं क्रमात् तपस्यन्ती जातावधिरजायत ॥१९५॥
प्रवर्त्तिनीपदं लब्ध्वा **कूपचन्द्रपुरं** गता ।
ऋषिदत्ताप्रदत्तोपाश्रयेऽस्थाद् व्रतिनीवृता ॥१९६॥
तत्र धर्मं समादिक्षद् **नर्मदा** कर्मदारणम् ।
स **महेश्वरदत्तश्च ऋषिदत्ता**पि साऽशृणोत् ॥१९७॥
सा **महेश्वरदत्त**स्य संवेगायान्यदाऽपठत् ।
स्वरलक्षणमक्षूणमक्षीणनरलक्षणम् ॥१९८॥
महेश्वरो निशम्यैतत् पश्चात्तापादिदं जगौ ।
सापि नूनमतः शास्त्राद् विवेद नरलक्षणम् ॥१९९॥
ततोऽधमाधमं धिग् मामविमृश्यविधायिनम् ।
येन सैकाकिनी कान्ता सती मुक्ता वनान्तरे ॥२००॥
अद्रष्टव्यमुखोऽहं तदभाष्योऽहं मनीषिणाम् ।
दैव ! रे कैव रेखाऽस्ति मत्तः कस्यापि पापिषु ? ॥२०१॥
विलपन्तमिति प्रोचे कृपया तं प्रवर्त्तिनी ।
मा विषीद महाभाग ! सैवाहं **नर्मदा** पुरः ॥२०२॥
सर्वोऽपि हन्त जन्तूनां कर्मादिष्टो विचेष्टते ।
नातस्ते कोऽपि दोषोऽस्ति **'स्फरे वैरं स्फुरेद् न हि'** ॥२०३॥
तां **महेश्वरदत्तो**ऽथ क्षमयामास भक्तितः ।
उवाच च ग्रहीष्यामि व्रतं भग्नो भवादहम् ॥२०४॥

इत**श्चार्यसुहस्त्या**गादितः सोऽप्यादित व्रतम् ।
ऋषिदत्तान्वितस्तप्त्वा तपो मृत्वा दिवं ययौ ॥२०५॥
मत्वायुःक्षयमात्मनोऽतिनिकटं सापि स्वयं **नर्मदा,**
निर्मायानशनेन मृत्युमसमं स्वराज्यमास्ते गता ।
च्युत्वाऽतश्च मनोरथो**ऽपरविदेहो**र्व्यां महोर्वीपति- 5
र्भूत्वाऽऽत्त्वा व्रतमष्टकर्मनिधनं कृत्वा दिवं यास्यति ॥२०६॥

॥ इति नर्मदासुन्दरीकथा ॥

● ● ●

शिवा तु **चेटक**नृपसुता **चण्डप्रद्योत**पाणिगृहीतीत्यभयकुमारकथायां कथितैव, **धारिणी** तु **चन्दनबाला**माता 'मम भोगपत्नी भविष्यति' इत्यौष्ट्रिकवचनाकर्णनसमकालमेव त्यक्तजीविते ति विदितैव । **चेल्लणा**देवी**प्रभावत्यौ चाभय**कुमार**कथायामुपदिष्टे** । अथ **कलावती** यथा —

§§ अस्ति **मङ्गल**देशोर्व्यां महाशङ्खनिधानवत् ।
पुरं **शङ्खपुरं** नामासंख्यलक्ष्मीनिकेतनम् ॥१॥
सदाकरजपातारस्फारकेलिमहा बहिः ।
यत्रोद्यानगणेऽन्तश्च व्यरुचन्मानवा नवाः ॥२॥
नृपोऽत्र **शङ्ख** इत्याप्तशब्दः संख्येषु भूरिषु ।
आसीच्चित्रं तु पुरुषोत्तमहृद्विहित स्थितिः ॥३॥
करालवालस्थितया नखांशुजलसिक्तया ।
यस्यासिलतया कीर्त्तिप्रसूनश्रीरसूयत ॥४॥
तमास्थानस्थितं दत्तः प्रतीहारनिवेदितः ।
गजश्रेष्ठिसुतोऽनंसीदुपदापाणिरन्यदा ॥५॥
दत्तासन्नासनासीनं तमथाह महीपतिः ।
वपुस्ते **दत्त** ! नीरोगं किं चिरेण विलोक्यसे ? ॥६॥
सोऽभ्यधत्त सुधावृष्टौ स्वामिदृष्टौ क्व मे गदाः ? ।
चिराय दर्शने किन्तु कारणं श्रूयतामदः ॥७॥
§§ **देवशालपुरे** देव ! वाणिज्यायाभवं गतः ।
बाल्य एवोपभोग्यं यद् मातुः स्तन्यं धनं पितुः ॥८॥
हंसाश्च सत्पुमांसश्च द्वय एव निजाश्रयम् ।
हित्वा नृप ! निरीक्षन्ते नानाश्चर्यधरां धराम् ॥९॥
ब्रुवन्तमिति साकूतमनेमुद्भूतकौतुकः ।
नृपोऽब्रवीत् त्वया तत्र चित्रं किमपि वीक्षितम् ? ॥१०॥

अथ **दत्तो**ऽवदद् वच्मि **देवशाल**स्य देव ! किम् ? ।
वक्तुमेकैव जिह्वा मे तस्य वाच्यं त्वनेकधा ॥११॥
अनेकैरीश्वरैः पुण्यजनैश्च पुरुषोत्तमैः ।
गौरीभिरपि नैकाभिः स्वर्गाद् यदतिरिच्यते ॥१२॥
यद्वा किं बहु देवोऽपि स्वयमेकं विलोकताम् ।
आश्चर्यवर्णिकारत्नं तस्येन्दुमिव नीरधेः ॥१३॥
दत्तो दत्तभ्रममिति ब्रुवन्नुर्वीशतक्रतोः ।
आकृष्य स्वपटीमध्यार्पयच्चित्रपट्टिकाम् ॥१४॥
तामादाय स्वयं स्मेरवदनो मेदिनीपतिः ।
अपश्यत् तत्र चित्रस्थां काञ्चित् कुञ्चितलोचनाम् ॥१५॥
तदालोकसुखस्यन्दनिस्पन्दे नृपतौ तदा ।
रोमाञ्चदण्डैराक्षेपि कापि शङ्का सभासदाम् ॥१६॥
तामालोक्य चिरेणोच्चैर्नृपः स्वापादिवोत्थितः ।
अथाह **दत्तं** नेदृक् स्याद् नारीयममरी कथम् ? ॥१७॥
दत्तोऽभ्यधादयं देव ! न देवी किन्तु मे स्वसा ।
पुनः साश्चर्यमूचे तं नृपः कथमिवोच्यताम् ? ॥१८॥
दत्तोऽब्रवीदथो देव ! श्रूयतां यदि कौतुकम् ।
आपृच्छ्य तात**मचलं** वाणिज्याय पुरादतः ॥१९॥
गृहीतानेकभाण्डोऽहं सार्थेन महतान्वितः ।
देव ! यावद् व्रजन्नस्मि **देवशालपुरं** प्रति ॥२०॥
विपिने तावदेकस्मिन् शयितं वर्त्मसीमनि ।
एकं पुरुषमद्राक्षं विपन्नासन्नवाजिनम् ॥२१॥
तस्य रूपं निरूप्याहमचिन्तयमनेकधा ।
युवा किमेष पञ्चेषुर्न स यद् मकरध्वजः ॥२२॥

किमेष चन्द्रमा नैव स यस्माद् मृगलाञ्छनः ।
विष्णुर्वा नैव यत्ताक्ष्यवाहनोऽयं तु वाजिभृत् ॥२३॥
अयं हरिर्हरस्तर्हि नाप्यसौ नयनोत्करः ।
तत्कः स्यादेष जानामीत्यस्यागां सविधे ततः ॥२४॥
अतुच्छमूर्च्छया कण्ठोपकण्ठगतजीवितम् ।
असिञ्चमम्भसा तं च पयोद इव शाखिनम् ॥२५॥
विकासिनयनस्तोयं ततोऽयं पायितो मया ।
प्रीणितश्च क्षुधा क्षामो मधुराहारवस्तुभिः ॥२६॥
कस्त्वं क्वत्यः किमेकाकी विपिनेऽत्र समागमः ? ।
इति पृष्टो मयाऽवादीदात्मवृत्तमयं ततः ॥२७॥
राज्ञो **विजय**सञ्ज्ञस्य **देवशालपुरे**शितुः ।
निदेशपुरुषोऽस्म्यत्र वाजिना पातितो वने ॥२८॥
उपकारिंस्त्वमाख्याहि स्वं कुत्र चलितोऽसि च ? ।
तेनेति गदितोऽवोचं प्राप्तः **शङ्खपुरा**दहम् ॥२९॥
देवशालं व्रजन्नस्मि तदध्यास्स्व सुखासनम् ।
सतां चिन्तायिकः संपत्स्वापत्सु विधिरेव यत् ॥३०॥
इत्यावां चलितावग्रे सुखासनसुखासितौ ।
वार्तयन्तौ मिथः पल्लीं गतावेकतमां ततः ॥३१॥
भीमां भल्लूकहिक्काभिरूर्जितां गजगर्जितैः ।
पूर्णां पारीन्द्रबूत्कारैः क्षुण्णां च कपिखीत्कृतैः ॥३२॥
अनेकवृक्षविटपासूर्यंपश्यवनेचरम् ।
कुल्यासहस्रकलितामन्तकोपनीमिव ॥३३॥ विशेषकम् ॥
सार्थं संवर्मितैर्वीरैर्गोपायन्तौ समन्ततः ।
यावदग्रे प्रयान्तौ स्वस्तत्रावामप्रमद्वरौ ॥३४॥

हेयानां हेषितं वीरनिस्वनं च प्रतिस्वनैः ।
तदाऽशृणुव सर्वासु दिक्षु विस्मितमानसौ ॥३५॥
पल्लीपतीनामास्कन्दशङ्कयैकत्र गह्वरे ।
सार्थं निवेश्य चास्थाव विधाय रचनां भटैः ॥३६॥
यावद् दृष्टं पुरस्तावद् वाताश्चिद्वयमाययौ । 5
सार्थेशं साहसेनालमलमित्यालपद् मुहुः ॥३७॥
कथ्यतामिह कान्तारे कोऽपि सादी विलोकितः ? ।
पृच्छतेति च दृष्ट्वैष हर्षात् तेनेदमौच्यत् ॥३८॥
अद्यापि सुकृतं देव ! दिष्ट्याऽस्माकं प्रवर्तते ।
भूभृद्विजयसूनो ! यज्जयसेनाऽसि वीक्षितः ॥३९॥ 10
वदन्ताविति सानन्दं सादरं सादिनाविमौ ।
बाष्पाम्भोभिः समं तस्य पादयोरेत्य पेततुः ॥४०॥
अथ पृथ्वीपतिस्ताभ्यां ज्ञात्वा वृत्तान्तमञ्जसा ।
कुमारमाययौ हर्षबाष्पाविलविलोचनः ॥४१॥
दूरादपि समायान्तं दृष्ट्वात्मजनकं ततः । 15
मुक्त्वा सुखासनं गत्वा पादचारेण सोऽनमत् ॥४२॥
पतितं पादयोरेनमूर्ध्वीकृत्य महीपतिः ।
श्लिष्यन् रोमाञ्चितोऽचुम्बदजिघ्रदपि मूर्धनि ॥४३॥
प्रहृष्टमनसा पृष्टः सादरं मेदिनीभृता ।
स्ववृत्तान्तमथाचख्यौ कुमारः सुकुमारगीः ॥४४॥ 20
हयं तदाहमारुह्य कृतासनपरिग्रहः ।
ऊरुभ्यां प्रेरयन् सद्यो रयं चक्रे पदैरयम् ॥४५॥
जेतुं वायुमिवायं तत्पथेनैव ययौ बहु ।
अङ्गारकसवित्रीति धरित्रीमस्पृशन् पदैः ॥४६॥

यथा यथाऽहमकृषं वल्गया तं हयं जवात् ।
तथा तथाऽन्यथाशिक्षस्त्वरते स्माधिकाधिकम् ॥४७॥

पश्यतां तातपादानां धावतामपि पृष्ठतः ।
हरिस्तदा हरिश्चिन्द्रपुरीवाभूददर्शनः ॥४८॥

तेनाहं वल्गयाऽऽकृष्टेनापि दुष्टेन वाजिना ।
दुर्वातेनाम्बुधौ पोत इवारण्येऽत्र पातितः ॥४९॥

श्रान्तोऽहममुचं वल्गां तत्क्षणं च स्थितादतः ।
समुत्तीर्णो यदा प्राणा अपि तं मुमुचुस्तदा ॥५०॥

स्वामिन्नहमपि प्रौढश्रमात् तापतृषातुरः ।
तदा परासुवत् पृथ्व्यामपतं मीलितेक्षणः ॥५१॥

ततः परमयं साधुमूर्धन्यो मामजीवयत् ।
तेनेति जल्पता पृथ्वीपतये दर्शितोऽस्म्यहम् ॥५२॥

मयाथ प्रणतः पृथ्वीपतिर्मामित्यभाषत ।
वत्स ! केनोपमामि त्वां निर्निमित्तोपकारिणम् ? ॥५३॥

बतोपकुरुतो विश्वं घनचन्द्राविमौ पुनः ।
उपजीव्यामृतं सिन्धोरेकोऽन्योऽपि च भास्वतः ॥५४॥

इमौ च **सागरादित्यौ** यदि स्वेनोपकारकौ ।
मुखेन क्षार एवैकोऽपरः संतापनः पुनः ॥५५॥

ततोऽनवकरस्फारोपकारोदारकीर्त्तयः ।
त्वादृशास्त्वादृशा एव तद् ब्रूमः किमतः परम् ? ॥५६॥

प्रशंसन्निति मां गाढमालिङ्ग्याङ्के निवेश्य च ।
जयसेनाग्रजत्वेन प्रत्यपद्यत भूपतिः ॥५७॥

सूत्रयित्वा ततः सार्थरक्षामक्षामसौहृदः ।
आत्मना सह मां देवो **देवशालपुरे**ऽनयत् ॥५८॥

तत्राप्याह नृपो मां ते निर्निमित्तोपकारिणः ।
प्रत्युक्रियते राज्यं तदपि स्तोकमेव हि ॥५९॥

तथाप्येकसुतस्यासि सूनुस्त्वमपरो मम ।
धुर्यावेवमिमां राज्यधुरां वोढुं युवामतः ॥६०॥

इत्थं बहु मतो राज्ञा कुमारेणप्यहं तथा ।
यथा न मातृपित्रादिबन्धूनामुदकण्ठिषि ॥६१॥

किञ्चास्य **काश्यपी**भर्त्तुः **श्रीदेवी**कुक्षिसंभवा ।
सुता **कलावती**त्यस्ति सल्लावण्यकलावती ॥६२॥

विद्यातः शारदेवान्या कान्तितः श्रीरिवापरा ।
रती रूपाद् द्वितीयेव या सृष्टेर्निकषो विधेः ॥६३॥

यथा यथा समारोहत् तारुण्ये सा **कलावती** ।
नृपस्तद्वरचिन्तायां निममज्ज तथा तथा ॥६४॥

प्रत्यज्ञासीत् पितुः पार्श्वे परं स परमार्हती ।
परिणेष्यामि तं यो मे ज्ञाता प्रश्नचतुष्टयम् ॥६५॥

इति मत्वा महीपालः स्वयंवरणमण्डपम् ।
तत्कृते कारयामास नृपांश्चाह्वास्त सर्वतः ॥६६॥

अहं तु प्रेषितः स्वामिंस्तवानयनहेतवे ।
पुरापि गाढमापृच्छन् पितरौ द्रष्टुमात्मनः ॥६७॥

ततोऽहं कौतुकाद् देवोपायनाय समानयम् ।
इदं **कलावती**रूपं कृत्वा चित्रपटे स्फुटे ॥६८॥

यावत् **कलावती**रूपं न तावदिह वर्तते ।
कीदृशी हि प्रभा भानोः प्रतिबिम्बमुपेयुषः ? ॥६९॥

किन्त्वेतद् वर्णिकामात्रमत्रानीतं मया विभो ! ।
योग्येयं देवपादानां यदि वेधाः प्रसीदति ॥७०॥

ततः **कलावती**रूपं निपीय स्वादु सादरम् ।
शङ्खो विशृङ्खलं धुन्वन् मूर्धानं दत्तमूचिवान् ॥७१॥
तवेयं मित्र ! चित्रस्था चित्तस्थाऽजनि मे पुनः ।
भाग्यं तु मादृशां क्वेदृक् स्याद् येनोत्सङ्गसङ्गिनी ? ॥७२॥
दत्तोऽभ्यधाद् मुधा खेदं मा धास्त्वं वसुधापते ! ।
जानामि शकुनैः पत्नी तवैवेयं भविष्यति ॥७३॥
आराधय परं देव ! देवीं वाचामधीश्वरीम् ।
यथा प्रश्नचतुष्केऽस्या निर्णयः क्रियते त्वया ॥७४॥
श्रुत्वेत्यथाह तं भूपश्चिद्रूप ! वरमभ्यधाः ।
तोषयिष्याम्यहं देवीं त्वं भवोत्तरसाधकः ॥७५॥
एवमस्त्विति तेनोक्ते नृपतिर्ब्रह्मचर्यवान् ।
आराधयितुमारेभे शारदां ज्ञानसारदाम् ॥७६॥
गुरूपदिष्टसन्मन्त्रध्यानमुद्रावशंवदः ।
दिनैः कतिपयैरेनं साक्षादूचे सरस्वती ॥७७॥
तुष्टास्मि वत्स ! ते ब्रूहि किं यच्छामि समीहितम् ? ।
सोऽपि प्रीतः प्रणम्याह प्राञ्जलिः परमेश्वरीम् ॥७८॥
देवि ! तुष्टासि चेद् मह्यं तदाहं तत्स्वयंवरे ।
कुर्यां **कलावती**प्रश्नचतुष्टयविनिर्णयम् ॥७९॥
देव्याह वत्स ! ते पाणिकुशेशयवतंसिता ।
शालभञ्ज्यपि साश्चर्यं कर्त्री प्रश्नविनिर्णयम् ॥८०॥
महाप्रसाद इत्युक्त्वा मूर्ध्नि चक्रेऽञ्जलिं नृपः ।
देवी तु कौमुदीवाह्नो मुखेऽह्नाय तिरोदधे ॥८१॥
शङ्खः शङ्खोज्ज्वलप्रीति**र्दत्त**मु**त्तर**साधकम् ।
जगाद तव साहाय्यादस्मि सिद्धप्रयोजनः ॥८२॥

महान्तस्त्वादृशा **दत्त** ! यान्ति यत्र निजेच्छया ।
तत्र तत्रोपकाराय यथार्केन्दुघनाघनाः ॥८३॥
यथा त्वं **जयसेन**स्य राज्यभाग्यसि भाग्यतः ।
तथा ममापि तृष्णार्त्या यातः प्राणान् प्रधारयन् ॥८४॥
इति संभाष्य सत्कृत्य **दत्तं** प्रैषीद् गृहानयम् ।
स्वयं मन्त्रिषु विन्यस्तामुद्दधार धुरं भुवः ॥८५॥
अथ **दत्त**गिरा दत्तप्रयाणं **शङ्ख**भूपतिः ।
साक्षात् **कलावतीं** द्रष्टुं **देवशालपुरं** प्रति ॥८६॥
दत्तेन सहितो राजा माधवेनेव मन्मथः ।
देवशालपुरं प्राप्तः प्रयाणैरविलम्बितैः ॥८७॥
अनेकायातभूपालनिवासपदमण्डपैः ।
यावद् दृष्टिसमाकीर्णं शैलैरिव समन्ततः ॥८८॥ युग्मम् ॥
विजयः संमुखोऽभ्येत्य **शङ्खं** सत्कृत्य संभ्रमात् ।
देवशालपुरोपान्ततरुषण्डे न्यवासयत् ॥८९॥
आह्वयन्तमिवानन्तैश्चलद्भिः केतुपाणिभिः ।
अथ भूपाः समाजग्मुः स्वयंवरणमण्डपम् ॥९०॥
सुप्रपञ्चेषु मञ्चेषु तेऽस्थुः पञ्चेषुमूर्त्तयः ।
वाञ्छन्तो भारतीं ध्यानादात्मन्यात्मप्रभावतीम् ॥९१॥
एकस्मिन् सह **दत्ते**न मञ्चे **शङ्ख**नरेश्वरः ।
निषसादेन्द्रवद् **मेरा**वुपेन्द्रेण समन्वितः ॥९२॥
पठत्सु बन्दिषु क्षोणीभृतां वंशादिवेदिषु ।
पञ्चशब्दप्रणादेन नृत्यत्सु वनकेकिषु ॥९३॥
स्वर्णालङ्कारकिरणमञ्जरीपिञ्जरीकृताः ।
दिशो धूपघटाधूमे ललामयति सर्वतः ॥९४॥

सुप्रगल्भेषु सभ्येषु निविष्टेषु यथायथम् ।
काष्ठिकैः कुट्टयमानासु मिलितासु प्रजासु च ॥९५॥

ततः **कलावती** तत्र प्रतीहारीभिरावृता ।
अप्सरोभिः समं लक्ष्मीरिव पाथोधिनिःसृता ॥९६॥

याप्ययानस्थिता सर्वाङ्गीणाभरणभूषिता ।
वारस्त्रीचामरमरुद्वीचिभिर्नर्तितालका ॥९७॥

पुरः सखीकरधृतां स्वयंवरणमालिकाम् ।
पश्यन्ती भ्रमरहितां चेतोवृत्तिमिवात्मनः ॥९८॥

स्तूयमानामितगुणद्वैता वैतालिकीजनैः ।
आययौ कान्तिविस्फूर्तिर्मूर्त्तेवाज्ञा मनोभुवः ॥९९॥ सप्तभिः कुलकम् ।

नवोदितायां शीतांशुलेखायामिव तत्क्षणात् ।
समकालं दृशस्तस्यां निपेतुरवनीभृताम् ॥१००॥

कलावत्या निदेशेन **धारिणी** वेत्रधारिणी ।
करे प्रश्नचतुष्कस्य पत्रं कृत्वेदमब्रवीत् ॥१०१॥

भूपाः ! प्रश्नचतुष्टयमेतत् क्रमतः **कलावती**देव्याः ।
को देवः कश्च गुरुः किं तत्त्वं कथयतापि किं सत्त्वम् ? ॥१०२॥

प्रत्येकमुत्तराण्येते स्वस्वप्रज्ञानुमानतः ।
ददति स्मार्हती किन्तु न मेने च **कलावती** ॥१०३॥

अथ **शङ्ख**महीपालः प्राह विस्मापयन् सभाम् ।
स्वमञ्चस्तम्भपाञ्चालीमूर्ध्नि दत्तकराम्बुजः ॥१०४॥

यथा **कलावती**देव्याः प्रश्नं तं कुरुषे शुभे !
तथोत्तरं मम पुनः पाञ्चालीयं प्रदास्यति ॥१०५॥

ततः सा **धारिणी** शालभञ्जी साप्यार्ययैकया ।
उच्चैरुच्चेरतुः प्रश्नमुत्तरं च क्रमादिति ॥१०६॥

को देवः सर्वज्ञः कश्च गुरुर्विषयसङ्गधुतरङ्गः ।
किं तत्त्वं जीवदया किं सत्त्वं विषयचयविजयः ॥१०७॥

ततश्चित्तचमत्कारो विदुषां विद्विषामपि ।
अभूत् **कलावती** त्वस्य कण्ठेऽधाद् वरमालिकाम् ॥१०८॥

बद्धक्रुधोऽपि भूपास्ते **शङ्खे** न प्राभवंस्तदा । 5
कलावतीसतीत्वेन स्तम्भिताभुजगा इव ॥१०९॥

अथ तत्काललग्ने तां दत्तां **विजय**भूभुजा ।
निरपायमुपायंस्त **शङ्खः** सैष **कलावतीम्** ॥११०॥

ततश्चकार सत्कारं जामातु**र्विजयो** नृपः ।
हर्षेण हास्तिकाश्वीयवसनाशनभूषणैः ॥१११॥ 10

अन्यानपि महीपालानशनैर्वसनैरपि ।
सत्कृत्य कृत्यवित् प्रैषीदसौ निजनिजं पुरम् ॥११२॥

शङ्खः सैन्यभरक्षुब्धशेषः **शङ्खपुरं** प्रति ।
प्रतस्थे **विजय**क्ष्मापमापृच्छ्य कथमप्यसौ ॥११३॥

कियन्तमप्यथाध्वानमनुगम्य न्यवर्तत । 15
विजयक्ष्माभृता **शङ्खो** जगदेऽश्रूणि मुञ्चता ॥११४॥

"इयं वत्स ! तवोत्सङ्गे न्यवेश्यत **कलावती** ।
मर्षणीया कुलीनाऽस्यास्तत् कापि विनयच्युतिः ॥११५॥

अपराधभ्रमोत्सेके जाते जातु न हि त्वया ।
त्याज्या न्याय्यान्वयेनासौ कार्याकार्यविवेकिना" ॥११६॥ 20

सोपरोधं सवात्सल्यं सविश्रम्भं सगद्गदम् ।
शङ्खमुक्त्वेत्यथावादीदात्मनो नन्दनीमपि ॥११७॥

"पुत्रि ! त्वं जिनधर्मैकवासनापास्तदुर्नया ।
स्वाभावेनासि तच्छिक्षा त्वयि मण्डितमण्डनम् ॥११८॥

तथापि जनकस्नेहमोहितो वच्मि किञ्चन ।
पतिमाराधयेः **'स्त्रीणां पतिरेव हि दैवतम्'** ॥११९॥

कदापि त्वां यदि पुनः खण्डशः कुरुते पतिः ।
तथाप्यत्र प्रतीपत्वं भजेथा मनसापि मा ॥१२०॥

कष्टेऽपि पतिता वत्से ! शीलरत्नमनाविलम् ।
रक्षेस्तस्माद् यतः सम्पदिहामुत्र च शाश्वती'' ॥१२१॥

इत्यादरेण साकूतं शिक्षयित्वा **कलावतीम्** ।
उवाच **विजय**क्षोणीपतिर्दत्तं प्रदत्तमुत् ॥१२२॥

वत्स ! त्वं तत्र यदसि तदावां स्वयमास्वहे ।
अहं च **जयसेनश्च कलावत्याः** किलान्तिके ॥१२३॥

अस्यामतुच्छवात्सल्यपरेण भवता ततः ।
वर्तितव्यं तथास्माकं यथा नैव स्मरत्यसौ ॥१२४॥

भालयित्वा सुतामेवं शिक्षयित्वा च तं ततः ।
विजयक्ष्मापतिः पुत्रीवियोगार्त्तो न्यवर्तत ॥१२५॥

स्वतातविरहाज्जातमहारणरणं क्षणम् ।
शङ्खोऽभिधीरयामास प्रेमालापैः **कलावतीम्** ॥१२६॥

अथ तौ दम्पती स्यूताविव प्रेमगुणैरिमौ ।
पथि शय्यालयारूढाववियुक्तौ प्रचेलतुः ॥१२७॥

संकुचन्त्यामिव क्षोणौ सैन्यसंमर्दतोऽभितः ।
प्रापेव संमुखं **शङ्खपुरं शङ्ख**महीपतेः ॥१२८॥

स्कन्धावारयुतौ हस्तिस्कन्धारूढावथो पुरम् ।
दम्पती तावविशतां पौरीभिः स्तुतसङ्गमौ ॥१२९॥

कलावत्या समं **शङ्खः** पौलोम्येव पुरन्दरः ।
भुञ्जानो विषयान् कामं कालं गतममंस्त न ॥१३०॥

सुखसुप्ताऽन्यदा देवी स्वप्ने स्वोत्सङ्गसङ्गिनम् ।
विलोक्य पूर्णकलशं निशाशेषे व्यबुध्यत ॥१३१॥
प्रातः पत्ये शशंसैतत् प्रीत्या सोऽपि जगाद ताम् ।
देवि ! ते तनयो भावी पूर्णलक्षणलक्षणः ॥१३२॥
अथ क्रमेण सा कामक्रीडारसपयोधिगा ।
शङ्खाद् गर्भं दधौ शुक्तिरिव मौक्तिकमम्बुदात् ॥१३३॥
कुक्षौ गर्भं वहन्ती सा हृदये च मनोरथम् ।
अष्टमासं व्यतीयाय विंशत्याभ्यधिकां दिनैः ॥१३४॥
§§ इतश्च **जयसेने**नाङ्गदद्वितयमात्मनः ।
प्रैषि योग्यं **कलावत्या** **दत्त**हस्तेऽस्य पूरुषैः ॥१३५॥
देवशालपुरायातैस्तैः समं निजपूरुषैः ।
दत्तो गत्वा **कलावत्याः** प्रणम्येदं न्यवेदयत् ॥१३६॥
एते मत्पुरुषा देवि ! **देवशाला**दुपागताः ।
त्वत्कृते प्रेषितावेतौ **जयसेने**न चाङ्गदौ ॥१३७॥
इत्युक्त्वाङ्गदयुग्मं तद् **दत्तो** देव्यै समार्पयत् ।
सापि जग्राह सोदर्यातुल्यवात्सल्यपूरिता ॥१३८॥
कुशलं तातपादानां कुशलं बान्धवस्य मे ।
कुशलं मातुरित्येतत् पप्रच्छ च **कलावती** ॥१३९॥
आख्याय कुशलोदन्तं **दत्ते**न सह ते ययुः ।
देवी तु बन्धुवात्सल्यादङ्गदौ पर्यधादिमौ ॥१४०॥
तावङ्गदौ स्वभुजयोर्निर्वर्ण्य वरवर्णिनी ।
प्रमोदवार्धिविवशा सध्रीचीभिः सहाहसत् ॥१४१॥
इतश्च देवीसदनमागच्छन् **शङ्ख**भूपतिः ।
हसितध्वनिमाकर्ण्य गवाक्षान्तरितोऽभवत् ॥१४२॥

संमदेन वदन्त्योऽमूः कमभिप्रायमात्मनः ।
व्यञ्जन्तीति धिया **शङ्खः** स्ता जालेन न्यभालयत् ॥१४३॥
कलावती कलाकारौ दर्शं दर्शमथाङ्गदौ ।
समुद्दिश्य सखीः स्मेरमुखी गदितवत्यदः ॥१४४॥
अहो ! स्नेहसमुत्सेकः कोऽपि तस्य महायुषः ।
इमौ येनाङ्गदौ प्रीतिसङ्गतौ प्रेषितौ मयि ॥१४५॥
तद्वियोगामयग्रस्तं याभ्यामेत्यात्मसङ्गतः ।
वपुः सज्जीकृतं मेऽद्यागदौ तावङ्गदौ स्फुटम् ॥१४६॥
सख्योऽप्युचूरयं प्रैषीत् तदवक्रयमङ्गदौ ।
दूरस्थोऽपि स ते चित्ते यदित्थं वर्तते वसन् ॥१४७॥
श्रुत्वेति नृपतिः सान्तस्तापश्चिन्तितवानथ ।
असावकृत्रिमप्रेमा क्वाप्यन्यत्र **कलावती** ॥१४८॥
बहिर्विहितरागश्रीभरानुकृतपावकम् ।
गुञ्जामिवैतां कपिवद् गृहीत्वा वञ्चितोऽस्मि हा ॥१४९॥
अन्यच्च परिधायान्यकेयूरौ यत्र माद्यति ।
तदस्या बाहुयुगलं छिन्नमेव सुखाय मे ॥१५०॥
इति क्रुद्धो महीपालश्चिन्तयित्वातिदारुणम् ।
स जगाम निजं धाम भास्वानप्यस्तपर्वतम् ॥१५१॥
क्रमादस्तमितो भानुर्विवेकश्च महीपतेः ।
तमोभिर्व्यानशे विश्वं सद्यस्तस्य मनोऽपि च ॥१५२॥
अथैष पानचाण्डालीयुगं प्रच्छन्नमादिशत् ।
त्यक्तायाः साङ्गदं देव्याश्छित्त्वाऽऽनेयं भुजद्वयम् ॥१५३॥
अथादिशत्तरां राजा शय्यापालकमात्मनः ।
अरे शय्यालये कृत्वा देवीं त्यज बहिर्वने ॥१५४॥

मिषं किमपि तत् कार्यं येनासौ न विलम्बते ।
नेया चासौ तथा सख्योऽप्यस्या जानन्ति नो यथा ॥१५५॥

ओमित्युदीर्य स रथं प्रगुणीकृत्य तत्क्षणात् ।
सत्वरं **निर्घृणा**ख्याऽयं गत्वा देवीं व्यजिज्ञपत् ॥१५६॥

देवोऽस्त्युपवने देवि ! त्वामाह्वयति सम्प्रति ।
तदध्यास्स्व रथं मुक्त्वा सखीजनमशेषतः ॥१५७॥

ससंभ्रममृजौ तस्यामारूढायामथो रथम् ।
निर्घृणो रचयामास त्वरगांस्तुरगानयम् ॥१५८॥

प्राप्याथ निर्घृणोऽरण्यमगण्यश्वापदास्पदम् ।
स्थापयित्वा रथं तस्थौ न्यग्मुखीभूय सास्रदृक् ॥१५९॥

दृष्ट्वा देवी तथावस्थमथावादीत् तमञ्जसा ।
किं रथं स्थापयित्वाऽस्थाः सशोक इव सम्प्रति ? ॥१६०॥

निर्घृणोऽथ घृणाशोकबाष्परुद्धगलोऽगृणात् ।
त्याजितासि वने राज्ञा देवी ! दोषेण केनचित् ॥१६१॥

तं वेत्ति यदि देव्येव यद्वा देवोऽपरस्तु न ।
श्रुत्वा देवीति दुःखोर्मिवाहितेवापतद् रथात् ॥१६२॥

मूर्च्छितां पतितामेतामुर्व्यां गुर्वीं मृतामिव ।
विलोक्य **निर्घृणः** स्वोरः कुट्टयन् व्यलपीदिति ॥१६३॥

धिग् मामधनं स्वामिकामिताज्ञापरैधितम् ।
विश्वालङ्करणं देवी नीता येनेदृशीं दशाम् ॥१६४॥

कलावत्यपि चैतन्यं प्राप्य कान्तारमारुतैः ।
रुसेद निभृतं **'बालस्त्रीणां हि रुदितं बलम्'** ॥१६५॥

निर्घृणश्चिन्तयामास पूर्वं नाम्नास्मि निर्घृणः ।
देवीमेकां निशि त्यक्त्वाऽधुना स्यां कर्मणापि हि ॥१६६॥

ध्यात्वेति निर्घृणः सोऽपि निशावधि कृपानिधिः ।
तस्थौ भूपीठलुठितां रुदतीमनु तां रुदन् ॥१६७॥
अथ सैष निशाशेषे समापृच्छन् सगद्गदम् ।
कलावत्या निजगदे जगदेकपवित्रया ॥१६८॥
भद्र ! विज्ञपयेथा मत्संदेशं **शङ्ख**भूपतेः ।
किमेतदुचितं स्वामिन् ! विवेककुलयोस्तव ? ॥१६९॥

"अहं दोषं न वेद्मि स्वं यद्वा वेत्ति न कोऽपि तम् ।
सन्देहः कोऽपि चित्तेऽभूत् तद् दिव्यं किमदा न मे ? ॥१७०॥
अथवा मयि मुक्तायामेव देवोऽभितुष्यति ।
तदा किं न मया प्राप्तं स्वस्त्यस्तु भवते भृशम्" ॥१७१॥

इत्युक्त्वा मूर्च्छितां भूयस्तामाश्वास्याश्रुमिश्रदृक् ।
निर्घृणोऽगादिहागाच्च मातङ्गीद्वितयं पुनः ॥१७२॥
करालकर्त्तिकापाणि तदुवाच **कलावती**म् ।
आः पापेऽनुभव स्वामिवञ्चनापाप्मनः फलम् ॥१७३॥
त्वदङ्गदौ तदीयत्वाद् दुष्टे ! तद्वदमन्यथाः ।
त्वद्दोर्युगं तदाश्लेषादिदं सागो निगृह्यते ॥१७४॥
श्रुत्वेति मूर्च्छिताया हा **कलावत्याः** करद्वयम् ।
साङ्गदं कर्तयित्वा ते मातङ्ग्यौ जग्मतुः क्षणात् ॥१७५॥
कलावत्यपि मूर्च्छान्ते छिन्नमालोक्य दोर्युगम् ।
तद्दुःखाद् मनसो दुःखाद् व्यलपत् करुणस्वरा ॥१७६॥
'हा मातः **श्रीमती** ! श्रीमन् **विजयो**र्वीश ! तात ! हा ।
हा भ्रात**र्जयसेना**द्य निर्भाग्येयं **कलावती** ॥१७७॥
पितरौ ! दुहितुः स्वस्या भगिन्या भ्रातरात्मनः ।
दर्शनं दीयतां नैवोपेक्षा वो हन्त ! युज्यते ॥१७८॥

हा भ्रातः ! स्वसृवात्सल्यात् प्रहितौ यौ त्वयाङ्गदौ ।
तौ मे भाग्यविपर्यासदभूतां भुजभङ्गदौ ॥१७९॥

यद्वा मयैतौ निर्नाम व्याख्यातावितिं चक्रतुः ।
हन्त निर्नामतां नीतो नान्योऽपि शुभकृद् भवेत् ॥१८०॥

धिगमी विषया येषामिहापि विषपाकिता ।
परत्र यत् करिष्यन्ति वेत्ति सर्वज्ञ एव तत्'' ॥१८१॥

एवं दुःखातिरेकेण भयोत्सेकतयापि च ।
नदीतीरलताकुञ्जे सासूत सहसा सुतम् ॥१८२॥

सुतजन्मनि सा तत्र शान्तदुःखाऽभवत् क्षणात् ।
मुक्तोष्णकरसंतापा रोदसीव विधूदये ॥१८३॥

पश्यन्ती स्निग्धया दृष्ट्या तं पुत्रं पुत्रवत्सला ।
जगाद हर्षबाष्पोर्मिगद्गदाक्षरमित्यसौ ॥१८४॥

''भव त्वं वत्स ! दीर्घायुस्तत एव सुखी भव ।
मयैवं जातया जात ! वाच्याशीरेव केवला ॥१८५॥

सामान्यस्यापि पुत्रस्य जन्मनि स्यात् किलोत्सवः ।
मन्दभाग्यस्य ते वत्स ! तल्लेशेऽपि हि संशयः'' ॥१८६॥

अत्रान्तरे सरित्पूरो दूरोदस्तोर्मिभीषणः ।
आगच्छन् ददृशे देव्या हा द्विधापि विहस्तया ॥१८७॥

ततोऽसौ पुत्रकारुण्या कुररीव विराविणी ।
सस्मार श्रुतसारस्य परमेष्ठिनमस्कृतेः ॥१८८॥

सत्यमश्रावयच्चैवं यदि मेऽर्हन्मते मनः ।
बद्धरागं, निरागश्च शीलं स्वप्नेऽपि सर्वथा ॥१८९॥

कृतसाधर्मिकोद्धारे ! मातः ! शासनदेवते ! ।
प्रत्यञ्चतु नदीपूरस्तदा मे विपदा सह ॥१९०॥

तयेति गदिते सिद्धमन्त्रवत् तत्क्षणादपि ।
सरित्पूरो व्यगात् तद्दोर्युगं तदुदगात् पुनः ॥१९१॥
तदानीं दिविषन्मुक्ता दिवः कुसुमवृष्टयः ।
अरुन्धतीयशांसीवोपासितुं तां समापतन् ॥१९२॥
शीललीलायितं दृष्ट्वात्मनेत्यात्मन एव सा ।
भेजे विस्मयम्भोधिं समुत्तीर्येव मारुतिः'' ॥१९३॥

''अत्रान्तरे कुतोऽप्येत्य कश्चित् तामाह तापसः ।
वत्से ! प्रसूतवत्सायास्तवेह न हि शोभनम् ॥१९४॥
अकुतोभयसंवासं तदाश्रममुपैहि नः ।
जल्पन्निति मुनिर्निन्येऽभ्यर्णे कुलपतेरिमाम् ॥१९५॥
प्रत्यक्षेणेव तातेन तेन पृष्टा **कलावती** ।
रुदती किञ्चिदव्यक्तं स्ववृत्तान्तमचीकथत् ॥१९६॥
ततः कुलपतिः प्राह त्वं वत्से ! स्म विषीद मा ।
अमीभिर्लक्षणैर्भूयः श्रेयःपात्रं भविष्यसि ॥१९७॥
तत् तापसीषु समयं कियन्तमपि पालय ।
तेनेत्थमुदिता साऽस्थाद् मुदिताऽथ तदाश्रमे'' ॥१९८॥

§§ इतश्च **शङ्ख**भूपाय **कलावत्याः** करद्वयम् ।
साङ्गदं श्वपचीभ्यां तच्छित्त्वानीतमदर्श्यत ॥१९९॥
राजापि **जयसेना**ख्यां दृष्ट्वा केयूरयोस्तयोः ।
तदात्वं दत्तमाहूय पप्रच्छेति ससंभ्रमम् ॥२००॥
देवशालपुरात् कश्चिदायातस्ते निकेतने ।
सोऽब्रवीद् मे वणिक्पुत्रा ह्य एवाह्नि समागमन् ॥२०१॥
प्रहितं **जयसेनेना**ङ्गदद्वितयमद्भुतम् ।
तैरानीतं कृते देव्या मया चास्यै समर्पितम् ॥२०१॥

नृपः श्रुत्वेति दम्भोलिदण्डेनेवाहतो हृदि ।
सिंहासनात् पपात स्वःसमाजादिव संगमः ॥२०३॥

ततः परिजनेनाशु चन्दनव्यजनादिभिः ।
प्रगुणीक्रियमाणोऽपि संमुमूर्च्छ मुहुर्मुहुः ॥२०४॥

कथङ्कथमपि प्राप चैतन्यमवनीपतिः । 5
कुट्टयन् भालपट्टं स्वं ससूत्कारमदोऽवदत् ॥२०५॥

"अहो ममाविमर्शत्वमहो मम विमूढता ।
अहो ममाकृतज्ञत्वमहो मम नृशंसता ॥२०६॥
अहो मे मन्दभाग्यत्वमहो मे चापकारिता ।
अहो मे सददृश्यत्वमहो मे सदभाषिता" ॥२०७॥ 10

विलपन्नित्यसौ पृष्टः किमेतदिति मन्त्रिभिः ।
सानुतापं ससूत्कारं सव्रीडमिदमब्रवीत् ॥२०८॥

किं करोमि किमाख्यामि क्य यामि क्व विशामि च ।
आत्मानमात्मनेवाहं शोकसिन्धावपातयम् ॥२०९॥

अनालोच्य कुलच्छेदमनालोच्य कुलोचितम् । 15
अनालोच्य कुलाधर्ममनालोच्य कुलायशः ॥२१०॥

चन्द्रिकायां यथा ध्वान्तं सुधायां गरलं यथा ।
तस्यां दोषमसंभाव्यमपि संभाव्य दैवतः ॥२११॥

आसन्नप्रसवा प्रैषि प्रिया पितृपतेर्गृहम् ।
न पुनः पापिना **शङ्खु**हतकेन पितुर्गृहम् ॥२१२॥ विशेषकम् ॥ 20

तत् कस्यापि न शक्तोऽस्मि मुखं दर्शयितुं निजम् ।
आत्मनोऽपि हि लज्जेऽतः परं प्राणांश्च धारयन् ॥२१३॥

ततः काष्ठानि धीयन्तां प्रगुणानि महावने ।
विशामि येन दहने दयितावधपातकी" ॥२१४॥

श्रुत्वेति दुःश्रवं पौरान्तःपुरामात्यलक्षणः ।
लोकः शोकपरोऽस्तोकपूत्कारमुखरोऽजनि ॥२१५॥

"अथो **गजा**दयः पौराः **सुमन्त्रा**द्याश्च मन्त्रिणः ।
नृपं विज्ञपयामासुः संभूय सकदाग्रहम् ॥२१६॥

एकं तावदभूद् देव ! यद् मृता सा **कलावती** ।
द्वितीयं मा कुरु स्वामिन् ! प्रजान्तं निजमृत्युना ॥२१७॥

तदपि क्रियते स्वामिन्नवाप्येत यदि प्रिया ।
स्वकर्मवर्त्मना साऽगात् त्वं तथैव गमिष्यसि ॥२१८॥

एकं तु हन्त भविता यदासीद् न कदाचन ।
मृत्युना तव शत्रूणां पूरिष्यन्ते मनोरथाः ॥२१९॥

तत् प्रसीद प्रजापाल ! मृत्योर्वार्तामपि त्यज ।
जाते राज्यधरे कर्तुमुत्तमार्थं त्वमर्हसि ॥२२०॥

इत्येषां वचनान्युच्चैर्भक्तियुक्तिमयान्यपि ।
नृपोऽवमन्य दयिताशोकार्तो मृत्यवेऽचलत्" ॥२२१॥

श्रृण्वन् पौरपुरन्ध्रीणां परितो रोदनानि सः ।
राजा निरीय नगराद् **नन्दनो**द्यानमीयिवान् ॥२२२॥

"अत्रान्तरे **गज**श्रेष्ठी कालक्षेपकृते कृती ।
नृपं विज्ञपयामास समयज्ञः कृताञ्जलिः ॥२२३॥

देव ! चेद् गन्तुकामोऽसि **कलावत्या**ः किलान्तिके ।
अस्याः श्रय तदध्वानं जिनधर्मक्रियामयम् ॥२२४॥

अस्मिन्नुपवने श्रीदेवदेवस्य जिनेशितुः ।
चैत्यमस्ति ततो देव ! पूजा कर्तुमिहोचिता ॥२२५॥

वनैकदेशे किञ्चात्रा**मिततेजा**स्तपोधनः ।
आस्तेऽत्र समये तस्योपास्तिश्च तव युज्यते" ॥२२६॥

इति विज्ञापितस्तेन राजा रञ्जितमानसः ।
समयोचितमातेने तत् तथाशु यथाविधि ॥२२७॥
प्रणम्य सपरीवारे निविष्टेऽथ महीपतौ ।
व्यधादतिशयज्ञानी मुनीन्दुरिति देशनाम् ॥२२८॥

"राजन् ! कर्मवशाज्जीवपात्राण्यायान्ति यान्ति च ।
गर्भाधिवासनेपथ्ये गत्यङ्के भवनाटके ॥२२९॥
शृङ्गारादिरसैः स्थायिभावैश्चात्र किलाष्टभिः ।
जीवैर्विगुप्यते कर्म पात्रीभूय मुधैव हा ! ॥२३०॥
रसं शान्तं शमं स्थायिभावं च नवमं यदा ।
श्रयन्त्येते तदेहापि जायन्ते महिमास्पदम् ॥२३१॥
नीचोऽप्यनुहरन् हन्त महान्तमतिरिच्यते ।
ग्रावापि देवताकारधरः पश्य नमस्यते ॥२३२॥
तद् विहाय महीपाल ! नीचाभिनयमात्मना ।
उच्चाभिनयमातन्वन्नुच्चैः पदपदं भव ॥२३३॥
दुष्प्रापमाप्य मानुष्यं मा कृथा नृपते ! वृथा ।
अचिरेणाद्भुतश्रेयोभाजनं भविता भवान् ॥२३४॥
श्रुत्वेति श्रुतिपीयूषमुवाच नृपतिस्ततः ।
अस्त्वेतद् माननीया हि मुनयो ज्ञानचक्षुषः" ॥२३५॥

"अथ रात्रौ विशश्रामोद्याने तत्रैव भूपतिः ।
दृष्ट्वा स्वप्नं पुनः प्राप्तश्रीगरीयानजागरीत् ॥२३६॥
गत्वा च गुरुपादान्ते कान्तेन विनयेन सः ।
तं स्वप्नमवनीखण्डशचीपतिरचीकथत् ॥२३७॥
यथैका पतिता छिन्ना व्रततिः कल्पपादपात् ।
अपूर्णैकफलाऽथास्मिन् पूर्णा पूर्णफलाऽभवत् ॥२३८॥

अथाह गुरुरुर्वीश ! भवन्तं कल्पपादपम् ।
छिन्ना वल्ली प्रिया जातसूनुः पल्लवितैष्यति'' ॥२३९॥
श्रुत्वेति नृपतिः प्रीतः पुनरभ्येत्य सत्वरम् ।
दत्तं दत्ताश्वपादातं प्रियामन्वेष्टुमादिशत् ॥२४०॥
वनाद् वनमयं भ्राम्यन् दृष्ट्वा तापसमब्रवीत् ।
मुने ! दृष्टा त्वया क्वापि काप्येकाऽस्मिन् वने वधूः ? ॥२४१॥
स प्राह किं तया कार्यं **दत्तो**ऽप्यूचे प्रमोदभाक् ।
भूपतेर्विंशतो वह्नावह्नाय प्राणरक्षणम् ॥२४२॥
एवमाकर्ण्य कारुण्यात् तेन नीत्वैनमाश्रमे ।
दत्ताय दर्शिता सा तं दृष्ट्वाऽरोदीत् **कलावती** ॥२४३॥
दत्तोऽवादीदिमां मा स्म रोदीः स्वसरिदं यतः ।
त्वदाक्रन्देन हृदयं भवतीव द्विधा मम ॥२४४॥
भवती स्वयमेवेति वेत्ति यत् पूर्वकर्मतः ।
नार्हन्तोपि च्छुटन्त्यन्ये देहिनः के तपस्विनः ? ॥२४५॥
विवेकवसते ! देवि ! तदलं परिदेवितैः ।
प्रसीदागत्य सीदन्तं नृपमाश्वासयात्मना ॥२४६॥
किमन्यदनुतापेन तप्यमानोऽवनीपतिः ।
स्थापितोऽस्ति विशन् वह्निं दिनमद्यतनं बलात्'' ॥२४७॥
श्रुत्वेति नृपकारुण्यपूरोन्मूलितमानधीः ।
कलावत्याकुलीभूताऽऽपृच्छत् कुलपतिं किल ॥२४८॥
दत्त्वाशिषमनेनापि प्रेषिता मुदितात्मना ।
साङ्गजा स्वपुरोपान्ते **दत्ते**न सममागमत् ॥२४९॥
सप्रद्युम्नां श्रियमिव सजयन्तां शचीमिव ।
तामभ्येत्य नृपोऽवादीदश्रुपूर्णविलोचनः ॥२५०॥

"सराष्ट्रमपि मामद्य मज्जन्तं मरणाम्बुधौ ।
दिष्ट्याऽऽगत्योरुफलका भवती नौरिवोद्धात् ॥२५१॥
कृतरोषं विना दोषं कानने त्याजितासि यत् ।
विडम्बितासि यच्चैवं मम देवि ! क्षमस्व तत्" ॥२५२॥
मनयित्वेति तां याप्ययानारूढां महासतीम् ।
नृपः प्रवेशयामास पुरं प्रीतिभरोत्तरम् ॥२५३॥
एत्यैत्य वार्धिवीचिभिर्मलयाद्रितटीव सा ।
अवर्धाप्यत पौरीभिर्मुक्तारत्नैरवेधिभिः ॥२५४॥
अथ स्वप्नानुसारेण स्वसूनोर्द्वादशेऽहनि ।
विदधे **पूर्णकलश** इति नामावनीपतिः ॥२५५॥
"अथान्यदा महीनाथमाहैकान्ते **कलावती** ।
कुतो दोषात् त्वया नाथ ! दण्डो मेऽकार्यतेदृशः ? ॥२५६॥
अथाह मनुजापीडः सव्रीडमवनीपतिः ।
त्वयि बालेन्दुलेखायामिव लक्ष्म न हि प्रिये ! ॥२५७॥
परं तवात्मनो वापि केनचित् पूर्वकर्मणा ।
प्रेरितोऽहं व्यधामन्धो यत् कुर्यादन्त्यजोऽपि न ॥२५८॥
तस्योदयालवालस्तु तदयं यत् त्वया प्रिये !
व्याख्यातं **जयसेना**ख्यां विनैवाङ्गदयोर्युगम् ॥२५९॥
पुरातनं तु यत् कर्म तवापि ज्ञास्यतेऽधुना ।
यतोऽस्त्यतिशयज्ञानी नगरोपवने मुनिः" ॥२६०॥
ततः **कलावती**त्यूचे तर्ह्यावां तं मुनीश्वरम् ।
नन्तुं यावश्च पृच्छावः कृतं यद् दुष्कृतं पुरा ॥२६१॥
इति तौ दम्पती याप्ययानमारुह्य सत्वरम् ।
जग्मतुर्**नन्दनो**द्याने श्रीदेवं नेमतुर्जिनम् ॥२६२॥

ततो मुनीन्दु**ममिततेजसं** ज्ञानतेजसम् ।
नत्वैतत्पुरतो भक्त्या दम्पती तौ निषेदतुः ॥२६३॥

धर्मलाभाशिषं दत्त्वा स खण्डितभवापदम् ।
सद्धर्मदेशनां चक्रे मुनिचक्री तयोः पुरः ॥२६४॥

§§ अथापृच्छद् महीपालः प्रभो ! किं पूर्वजन्मनि ।
कलावत्या कृतं येन मयाऽस्याश्छेदितौ भुजौ ? ॥२६५॥

अथ ज्ञानोपयोगेन मुनिराह महीपते ! ।
आस्ते **महाविदेहो**र्व्यां **माहेन्द्र**मिति पत्तनम् ॥२६६॥

तत्रासीत् त्रासितारातिर्नृपतिर्नरविक्रमः ।
प्रिया **लीलावती** तस्यासूत पुत्रीं **सुलोचना**म् ॥२६७॥

सा प्रकृत्याऽऽस्तिका धर्मे रता कुतूहलेषु च ।
बाल्य-यौवनयोः सन्धिवयः प्रापातिबन्धुरम् ॥२६८॥

एतस्यामन्यदोत्सङ्गस्थितायामवनीपतेः ।
शुकोऽतिसुन्दराकारः केनचित् प्राभृतीकृतः ॥२६९॥

स तु राज्ञा करे कृत्वा पाठितः कौतुकार्थिना ।
पपाठ क्रममुत्पाट्य दक्षिणं पक्षिणां वरः ॥२७०॥

स्वःसिन्धुयोगपट्टा स्वःपथदण्डोडुशङ्खमणिभूषा ।
दधती कपालमिन्दुं कीर्त्तिस्ते योगिनी जयति ॥२७१॥

श्रुत्वेति रञ्जितो राजा तदानेतुस्तदा ददौ ।
स्वाङ्गलग्नमलङ्कारं द्रविणं च मनोतिगम् ॥२७२॥

शुकं तु निजनन्दन्या मेदिनीन्दुरथार्पयत् ।
सापि गत्वा निजावासेऽक्षिपत् कनकपञ्जरे ॥२७३॥

दाडिमीफलबीजानि शर्कराशकलानि सा ।
चूणयामास तं द्राक्षापानकादीन्यपाययत् ॥२७४॥

पञ्जरस्थं कदाप्यङ्कस्थं करस्थं कदापि च ।
उरःस्थं च कदाप्येषा कौतुकात् तमपाठयत् ॥२७५॥

आसने शयने याने भोजने राजसंसदि ।
सा तं निजात्मवत् क्वापि नामुचद् नृपनन्दनी ॥२७६॥

अन्यदाऽसौ पुरोद्याने **कुसुमाकर**नामनि ।
जगाम पञ्जरस्थेन तेन साकं सखीवृता ॥२७७॥

तत्र **सीमन्धर**स्वामिजिनं नन्तुं जिनौकसि ।
सुलोचनाऽविशद् देवाधिदेवं सोऽप्यलोकत ॥२७८॥

अथासौ चिन्तयामास क्वापीदृग् नयनामृतम् ।
दृष्टमासीद् बहु मया बिम्बं दैवतमद्भुतम् ॥२७९॥

इत्यूहापोहलीनोऽयमस्मरज्जातिमात्मनः ।
अधीती सर्वशास्त्रेषु यत् पुराऽऽसमहं व्रती ॥२८०॥

अपठं केवलं शास्त्रमकार्षं न पुनः क्रियाम् ।
पुस्तकोपधिसंग्राहमूर्च्छासंलीनमानसः ॥२८१॥

विराधितव्रतो मृत्वा शुकोऽहमभवं वने ।
सनीडं मुक्तपाठत्वाद् नीडजोऽपीह पाठकः ॥२८२॥

धिगहं ज्ञानदीपेऽपि करस्थे तमसाऽन्धितः ।
स्खलच्चरणसंचारोऽपतं तिर्यग्भवावटे ॥२८३॥

अधुनापि वरं जातं यद् दृष्टः परमेश्वरः ।
दृष्ट्वैनं चूणिमादास्ययेऽतः परं नियमो मम ॥२८४॥

इति स्वयमुपात्तोग्रनियमेनामुना सह ।
सुलोचना जिनं नत्वा निजावासमुपाययौ ॥२८५॥

परेद्युः पञ्जरात् कृष्ट्वा तं करे न्यस्य राजसूः ।
यावद् भोक्तुमुपाविक्षत् तावदेष शुकः क्षणात् ॥२८६॥

ब्रुवन् 'नमोऽरिहंताणं' इत्युड्डीय विहायसा ।
गृहीतनियमो नन्तुं जगाम जिनपुङ्गवम् ॥२८७॥ युग्मम् ॥

नत्वा **सीमन्धर**राधीशमुद्याने **कुसुमाकरे** ।
प्रीतः कुर्वन् फलाहारं स्वेच्छया विजहार सः ॥२८८॥

ततः **सुलोचना** तस्मिन्नुड्डीने क्रन्दति स्म सा ।
ततस्तमन्वधावंश्च पत्तयोऽस्याः खगा इव ॥२८९॥

छन्नं छन्नं चरद्भिस्तैरुद्याने **कुसुमाकरे** ।
दृष्टः पाशिकया बद्ध्वाऽऽनीतश्चायं तदन्तिके ॥२९०॥

तेभ्यस्तं सा समादाय मन्मनस्वरमब्रवीत् ।
मां विहाय गतोऽभूस्त्वं क्व रे शठ ! निवेदय ॥२९१॥

यद् गतं तदेव त्वं स्मरेर्नातः परं पुनः ।
कामचारिन् ! न दास्यामि दास ! गन्तुं बहिस्तव ॥२९२॥

इत्युक्त्वा गतिभङ्गाय तस्य पक्षावलावयत् ।
सा चिक्षेप च तं सद्यः कारायामिव पञ्जरे ॥२९३॥

शुकोऽथ चिन्तयामास धिक् पराधीनतां मम ।
स्वाधीनः सत्क्रियां पापो नाकार्षमधमस्तदा ॥२९४॥

सहिष्ये त्वधुना नैकप्रकारेण विडम्बनाः ।
लप्स्ये न वीक्षितुमपि वीतरागमुखाम्बुजम् ॥२९५॥

इति चिन्तामहादुःखपतितोऽयं शुकोत्तमः ।
अश्रूणि मुमुचे ग्रस्तशिखराणि वमन्निव ॥२९६॥

अथानशनमादाय पञ्चषैर्दिवसैरयम् ।
मृत्वा **सौधर्म**कल्पेऽभूद् देवः स्वल्पेतरद्युतिः ॥२९७॥

सुलोचनापि सा तस्य दुःखेनानशनं श्रिता ।
मृत्वा तस्यैव देव्यासीत् तौ स्वर्भोगान् विलेसतुः ॥२९८॥

शुकजीवो दिवश्च्युत्वा राजा **शङ्खो**ऽभवद् भवान् ।
पुनः **सुलोचना** जीवोऽजायतेयं **कलावती** ॥२९९॥

यत् पूर्वजन्मनि **कलावत्या** पक्षौ शुकस्य ते ।
कृत्तौ ततस्त्वयाऽप्यस्याः कृत्तावस्मिन् भवे भुजौ ॥३००॥

शुभस्याप्यशुभस्यापि कर्मणः प्राक्कृतस्य हि । 5
विपाकः खलु जायेत दशधा बहुधापि वा ॥३०१॥

तौ दम्पती निशम्येति जातजातिस्मृति ततः ।
विरक्तौ गृहवासस्य संयमायोदतिष्ठताम् ॥३०२॥

राज्येऽस्मिन् विनिवेश्य पूर्णकलशं भूमण्डलस्योच्चकै-
र्भारं मन्त्रिषु च प्रयोज्य परितः पौरानथापृच्छ्य च । 10

पादान्तेऽ**मिततेजसो** व्रतमुपादायायुषोऽन्ते दिवं,
यातौ तौ क्रमयोगतः शिवपदं सिद्धास्पदं यास्यतः ॥३०३॥

॥ इति कलावतीकथा ॥

● ● ●

रेवती तु ख्याता, यया भगवतोऽतीसारशान्त्यै विविधौषधसंस्कृतोत्कूरकूष्माण्डं **लोहार्यः** प्रतिलाभितः । **देवकी** तु **विष्णु**माता विदितैव ! **ज्येष्ठा सुज्येष्ठा** च **चेल्लणा**भगिन्यौ पूर्वोदिते । **पद्मावती** तु **करकण्डु**माता कथिता । **नन्दात्वभय-कुमार**मातोपदिष्टैव । **भद्रा** च **शालिभद्र**जननी प्राक् प्रतिपादिता ॥

सम्प्रति तु **सुभद्रा** यथा—

§§ अस्ति दत्तद्विषत्कन्था पुरी **चम्पा**ऽत्र विश्रुता ।
जितशत्रुरभूत् तस्यां निःसामान्यो विशां पतिः ॥१॥
जिनदत्ताभिधश्चासीत् तत्रासीमधनो धनी ।
निरन्तरं जिनोपज्ञधर्मधन्यक्रियापरः ॥२॥
तस्याभूद् दुहिता रूपसहिता महिता गुणैः ।
सुभद्रा शशभृद्भद्राकारवक्त्रसरोरुहा ॥३॥
बुद्धभक्तेश्च तनयो **बुद्धदासा**भिधोऽन्यदा ।
वातायनगतामेतामपश्यदमरीमिव ॥४॥
अनुरक्तेन सा तेन **जिनदत्ता**दयाच्यत ।
जिनदत्तस्तु नादत्त तस्मै वैधर्मिकाय ताम् ॥५॥
कैतवाद् **बुद्धदासो**ऽथ वरिवस्यन् मुनीश्वरान् ।
सुभद्रापात्रताप्राप्त्यै श्रावकत्वमशिश्रियत् ॥६॥
अश्रद्धयापि सिद्धान्तं श्रुत्वा बोधिमवाप सः ।
अरुच्याप्यमृतं पीतममरत्वं प्रयच्छति ॥७॥
जिनधर्मप्रियायास्मै **जिनदत्ते**न तोषिणा ।
अदीयत **सुभद्रा** तामुपायंस्त स विस्तरात् ॥८॥
वासरेभ्यः कियद्भ्योऽथ **बुद्धदासो** विनीतवाक् ।
जिनदत्तं जगौ नेतुं **सुभद्रा**मात्मवेश्मनि ॥९॥
तमाह **जिनदत्तो**ऽपि वत्स ! त्वं युक्तमुक्तवान् ।
परं त्वत्पितरौ बौद्धौ किलैनां दूषयिष्यतः ॥१०॥

बुद्धदासस्तमूचेऽथ तात ! तौ किं करिष्यतः ।
पृथगोकःस्थितामेतां धारयिष्यामि ते सुताम् ॥११॥

जिनदत्तानुमत्याथ तेन सा पृथगाश्रये ।
मुक्ता मुक्तावलीवान्यवासःकोशे परीक्षिणा ॥१२॥

भक्तादिहेतवे साधूनायातो वीक्ष्य तद्गृहे । 5
पितरौ **बुद्धदास**स्य मत्सरादिदमूचतुः ॥१३॥

वधूस्ते व्रतिभिः साकमेकान्ते रमतेऽनिशम् ।
स्वायत्तं हि गृहं वत्स ! स्त्रीणां कौलट्यकारणम् ॥१४॥

अथाह **बुद्धदास**स्तौ चेच्चलन्ति कुलाचलाः ।
तथापि नात्मनः शीलं श्राविकेयं विलुम्पति ॥१५॥ 10

श्रुत्वेति नितरां तस्य पितरौ मौनमास्थितौ ।
दष्टुकामौ महासुन्द्रकुलजाविव भोगिनौ ॥१६॥

§§ अथैकदा **सुभद्रा**यायाः सदने क्षपको मुनिः ।
विहरन्नविशद् भृङ्ग इव पद्मे विकस्वरे ॥१७॥

वात्यया दृष्टिगं तस्याप्रतिकर्मतनोरभूत् । 15
तृणं तच्च समीक्ष्येति **सुभद्रा** ह्यचिन्तयत् ॥१८॥

महासत्त्वस्य दृग्बाधा भवित्री तृणतोऽमुतः ।
तदेतद् ददती भिक्षामपनेष्ये रसज्ञया ॥१९॥

तच्चक्रे च **सुभद्रा**ऽस्याः किन्तु सीमन्तकुङ्कुमम् ।
क्षपकस्यालिके लेगे वेगेनाऽज्ञासतां (?) न तौ ॥२०॥ 20

मुनिं भालस्थकालेयं दर्शयन्ती जनन्यथ ।
बुद्धदासं जगौ वत्स ! त्वं किमद्यापि वक्ष्यसि ? ॥२१॥

ततस्तत्प्रत्ययाद् **बुद्धदासो** बुद्ध्वाऽसतीमिमाम् ।
जज्ञे स शिथिलप्रेमा **सुभद्रा**यामभद्रधीः ॥२२॥

अचिन्तयच्च यद्येषा कुलीना श्राविकापि च ।
एवं व्यवस्यति स्रस्तं तद् धर्मकिलिकिञ्चितम् ॥२३॥

सुभद्रापि विदित्वेति वैमनस्यं स्वभर्तरि ।
निष्कलङ्का कलङ्काप्तिखेदादेवमचिन्तयत् ॥२४॥

"गृहस्थानां विषयिणां कषायनटितात्मनाम् ।
अस्मादृशां कलङ्को यत् तत्र किं नाम कौतुकम् ? ॥२५॥
यत् पुनः कथमप्यत्र पवित्रे जिनशासने ।
अद्योन्मिमील मालिन्यं तद् दुनोति मनो मम" ॥२६॥

चिन्तयित्वेति सन्ध्यायामभ्यर्च्यार्चा गृहेऽर्हताम् ।
प्रत्यज्ञासीदिति स्थित्वा पवित्रे सा महीतले ॥२७॥

लक्ष्म प्रवचनस्योच्चैरिदं यावत् कथञ्चन ।
नापनीतममुं तावद् नोत्सर्गं पारयाम्यहम् ॥२८॥

यदि शासनदेव्यस्ति तद् मे प्रादुर्भवत्वसौ ।
इहानशनमेतद् मेऽत्र भवे तथ्यमन्यथा ॥२९॥

इति यावत् क्षणं तस्थावुत्सर्गेण महासती ।
तावच्छासनदेव्यागाद् द्योतयन्ती दिवं त्विषा ॥३०॥

बभाषे च **सुभद्रे**ऽहं वत्से ! शासनदेवता ।
आगता त्वत्प्रभावेण सुवाणि ! करवाणि किम् ? ॥३१॥

सुभद्रापि विलोक्यैतां वन्दित्वा च जगौ मुदा ।
जिनशासनमालिन्यमपनेतुं त्वमर्हसि ॥३२॥

वत्से ! मा त्वं विषीदेथाः करिष्येऽहं तथा प्रगे ।
यथा ते पूर्यते वाञ्छेत्युक्त्वा देवी तिरोऽभवत् ॥३३॥

समं प्रतिज्ञयोत्सर्गं पारयित्वाऽथ सा सती ।
धर्मध्यानपराऽत्यन्तं यामिनीं तामनीनयत् ॥३४॥

§§ इतश्च नगरीद्वाराण्यवराणि कथञ्चन ।
नाभूवंस्तेन चक्रन्दुर्द्विपदश्च चतुष्पदः ॥३५॥
विमृश्य दैवतं किञ्चिदाकूतमिदमित्यथ ।
सपौरः प्रार्थिवः साम्ना प्रारेभे तत्प्रतिक्रियाम् ॥३६॥
धौतार्द्रवासाः प्रोत्क्षिप्तधूपो भूपोऽभ्यधादिति । 5
यत्रापराद्धं देवे वा दैत्ये वा स प्रसीदतु ॥३७॥
अथोल्ललास दैवी वाग् हंहो ! काप्यस्ति या सती ।
सा कूपादम्बु चालन्योद्धत्तां तन्तुनिबद्धया ॥३८॥
सैव तत्तोयचुलुकैः कपाटे त्रिभिरुक्षणात् ।
चत्वार्यपि ततो द्वाराण्युद्घटिष्यति (?) नान्यथा ॥३९॥ 10
श्रुत्वेत्येवमथ क्षत्त्रवणिग्विप्रविशां स्त्रियः ।
बहुशोऽपि व्ययुज्यन्त चालनीतोयचालनैः ॥४०॥
व्यजिज्ञपद् निजां श्वश्रूं **सुभद्रा**ऽथ कृताञ्जलिः ।
अम्ब ! त्वदाज्ञयाऽऽत्मानं वीक्षेऽहमपि किञ्चन ॥४१॥
स्मित्वा श्वश्रूरुवाचैतां त्वं सती विदितास्ति नः । 15
प्रजानां त्वद्य विदिताऽवदातेन भविष्यसि ॥४२॥
यदाऽन्या न पुरीद्वाराण्युद्घटयितुमीशते ।
तदा त्वमीशिषे तन्वि ! श्रमणैर्या सिषेविषे ॥४३॥
निशम्येति **सुभद्रा**ह मातस्त्वं सर्वविद् मम ।
तथापि तावदात्मायं पञ्चाचारात् परीक्ष्यते ॥४४॥ 20
इति सा चालनीं तन्तुप्रोतामाधाय कूपके ।
चिक्षेप स्वं च सत्येकगुणं हृदि महात्मनाम् ॥४५॥
सगुणं चालनीं कूपादाकर्षन्ती रराज सा ।
उदंशुमिन्दुमम्भोधेरुद्धरन्तीव पूर्णिमा ॥४६॥

कृष्यमाणस्तु तितओस्तोयलेशोऽपि नापतत् ।
तस्या विद्वेषिणां त्वास्यात् पानीयमगलत् तदा ॥४७॥

पानीयच्युतिहेतूनि च्छिद्राणि तितओरपि ।
प्यधात् तूर्णं गुणं चाधात् **सुभद्रा** सुप्रभावतः ॥४८॥

तद् मत्वाऽभ्येत्य भूपालस्तामुवाच महासति ! ।
उद्घाटय कपाटानि पुण्यानीव प्रसीद नः ॥४९॥

ततः पौरनृपामात्यैः **सुभद्रा** परिवारिता ।
ययौ पूर्वप्रतोल्यां सा चालन्या बिभ्रती जलम् ॥५०॥

नमस्कारपुरस्कारमियं तत्र महासती ।
कपाटे चालनीतोयचुलुकैस्त्रिभिराहत ॥५१॥

कपाटे ते **सुभद्रा**या गुणस्तुतिपरे इव ।
कुर्वती क्रौञ्चनिनदमुद्घटेते स्म तत्क्षणात् ॥५२॥
दिवि दुन्दुभयो नेदुरासेदुः पुष्पवृष्टयः ।
महासति ! महापुण्ये ! जयेति च जगुः सुराः ॥५३॥

स्तूयमाना दिवि सुरैर्नरैश्च भुवि सा ततः ।
प्राग्वदुद्घाटयाञ्चक्रेऽपाचीप्रत्यक्प्रतोलिके ॥५४॥

गत्वोदीचीं पुनः प्राह सती काचित् कुतश्चन ।
अभ्येत्योद्घाटयेदेनां विभागस्तत्कृतेऽस्त्वयम् ॥५५॥

चम्पायां सा तथैवास्तेऽद्यापि बद्धा प्रतोलिका ।
सुभद्रायां किल श्वश्रूमुखमुद्रानुकारिणी ॥५६॥

रत्नत्रयमिवोद्घाट्य मोक्षायेव शिखात्रयम् ।
चकार श्रीमतीं चैत्यपरिपाटीमियं ततः ॥५७॥

सुभद्रा चन्द्रलेखेव निष्कलङ्का नृपादिभिः ।
धिष्ण्यैरिव परीताऽऽगाद् मन्दिरं स्वमुदिन्दिरम् ॥५८॥

स्तुत्वा नत्वा च तां धर्माधिष्ठात्रीमिव देवताम् ।
स्वं स्वं स्थानमगुर्लोका यशांसि तु दिगन्तरम् ॥५९॥

सप्रश्रयं च श्वशुरश्वश्रूवर्गननान्दृभिः ।
सुभद्राऽमान्यतानन्दात् पितृभ्यां चाभ्यनन्द्यत ॥६०॥

पत्यापि क्रमयोर्निपत्य निभृतं सा क्षामिता नामिता, 5
अन्तर्वैरिव्यसना निरस्तवृजिनावस्था गृहेऽस्थाच्चिरम् ।
कालेनापि च सद्गुरोर्व्रतमवाप्यादाय चोग्रं तपः,
क्षीणायुर्भजति स्म शर्मपदवीं भद्रां **सुभद्रा** गतिम् ॥६१॥

॥ इति सुभद्राकथा ॥

● ● ●

अथ **ऋषिदत्ता**कथा–

§§ अस्तीह **भरत**क्षेत्रे देशो नाभिनिवेशभूः ।
मध्यदेश इति ख्यातो मध्यदेश इवावनौ ॥१॥
पुरं तत्रास्ति विपदां मर्दनं **रथमर्दन**म् ।
दानकोविदयत्पौरच्छात्राः कल्पद्रुमादयः ॥२॥
तस्मिन्नासीत् किल महारथो **हेमरथो** नृपः ।
यस्यासिर्भुजगः क्षोणीभुजां लक्ष्मीमकामयत् ॥३॥
स्वरूपविजितानङ्गवल्लभा वल्लभाऽभवत् ।
सुयशाः **सुयशा**स्तस्य त्रस्यदेणविलोचना ॥४॥
सुतस्तयोस्तु **कनकरथो**ऽजन्यनिरुद्धरुक् ।
येनारिबाणसंभूतिरुषा कीर्तिः कृता करे ॥५॥
इतः पुर्यस्ति **कावेरी** कौबेरीव पुरी श्रिया ।
सुन्दरपाणिः पृथिवीपतिः पालयति स्म ताम् ॥६॥
पौलोमी वासवस्येव **वासुला** तस्य वल्लभा ।
असूत **रुक्मिणीं** नाम तनयां तविषीमिव ॥७॥
सुतामुद्यौवनां वीक्ष्य तामथो पितुरन्तिके ।
प्राहिणोज्जननी सर्वाङ्गीणाभरणधारिणीम् ॥८॥
कृतप्रणामामारोप्य तनयामङ्कमञ्जसा ।
विलोक्य च नृपोऽपीति चिन्तयामास चेतसि ॥९॥
कस्मै वराय दातव्या यौवनस्थेयमङ्गजा ।
हुं ज्ञातमस्ति **कनकरथो हेमरथा**त्मजः ॥१०॥
अस्याः स एव सगुणः पतिर्भवति नापरः ।
इति मन्त्रिभिरालोच्य तस्मै दूतं विसृष्टवान् ॥११॥
दूताहूतोऽथ **कनकरथः** स्वपितुराज्ञया ।
सद्यश्चचाल **कावेरीं** प्रति सैन्यैरनुद्रुतः ॥१२॥

क्रमतो गच्छतरस्य प्रयाणैरविलम्बितैः ।
आवासाञ्जगृहे सैन्यं सीमान्तवनभूमिषु ॥१३॥
उत्तार्यमाणभारेषु रवणेषु विराविषु ।
परितस्ताड्यमानासु पटमण्डपपङ्क्तिषु ॥१४॥
उत्पर्याणितपृष्ठेसु वेल्लत्सु भुवि वाजिषु ।
स्तम्भमानीयमानेषु कुञ्जरेषु निषादिभिः ॥१५॥
वेत्रासनमलङ्कृत्य स्थितं चूततरोस्तले ।
कुमारं कश्चिदागत्य दूतः साकूतमब्रवीत् ॥१६॥ विशेषकम् ॥
कुमार ! पौरुषाधार ! **तवारिदमनो** नृपः ।
समादिशति वीराणां गणनासु धुरि स्थितः ॥१७॥
यदस्मद्देशसीमान्तप्रवेशस्तव मृत्यवे ।
मृगस्येव मृगारातिगृहान्तरविहारिता ॥१८॥
युद्धश्रद्धमतेस्तत् त्वं मम रे रे पुरो भव ।
यद्यसि प्रधनाकाङ्क्षाकण्डूलभुजमण्डलः ॥१९॥
ममाज्ञामथवाऽऽदाय निवर्तस्व गृहान् प्रति ।
पुत्रशोकानभिज्ञाऽस्तु जननी ते तपस्विनी ॥२०॥
वचस्यवसिते तस्य भ्रकुटीभीषणाननः ।
कुमारः स्माह हे दूत ! गत्वा ते कुलपांशनम् ॥२१॥
आत्मनः स्वामिनः ब्रूहि यदयं नृपनन्दनः ।
त्वमेव हन्तुमायातो वैनतेय इवोरगम् ॥२२॥ युग्मम् ॥
यदाज्ञा भुवनभ्रान्तिश्रान्तेव रिपुमौलिषु ।
विशश्राम स मे **हेमरथस्**तातोऽद्य लज्जते ॥२३॥
यदि त्वयि समायाते क्रममाकर्षयाम्यहम् ।
स्थितोऽहमेष संनह्य युद्धकौतुकतर्षितः ॥२४॥

इत्युदीर्य स्फुरद्धैर्यः कुमारः स्फारमत्सरः ।
अधारयद् गले दूतमथ नूतनविक्रमः ॥२५॥
गत्वाऽऽचख्यौ स दूतोऽपि स्वामिने युद्धकामिने ।
कुमारोदन्तमखिलं सम्परायभियां खिलम् ॥२६॥
दूताख्यातमथ श्रुत्वा कुमारं प्रति भूपतिः ।
उच्चचाल चमूपांशुप्रकारच्छन्नभास्करः ॥२७॥
वाताश्विभिः परिज्ञाय तमायान्तं रणेच्छया ।
स्माभिषेणयति क्षोणिपालसूरपि वैरिणम् ॥२८॥
वक्षसीव जगत्त्रय्या व्योम्नि पीनपयोधरे ।
तदाश्वीयखुरोद्धूता धूलिः कम्बुकतामगात् ॥२९॥
अथ तुल्यप्रतिद्वन्द्वी युगान्तप्रतिचारकः ।
मिथो मिलितयोरासीद् दारुणः सैन्ययो रणः ॥३०॥
तूर्यताम्रानकध्वानक्ष्वेडाबृंहितहेषितैः ।
तदा नादमयं विश्वमिदं विश्वमजायत ॥३१॥
घनाघनेषु वर्षत्सु शरेषु शरधोरणीम् ।
विपक्षवाहिनीहंसैरुड्डीयोड्डीय निर्गतम् ॥३२॥
अथोच्चैर्धार्यमाणोऽपि वल्गाचालिभिरञ्जसा ।
गत्वा**ऽरिदमनं** प्राह कुमारोऽसमसाहसः ॥३३॥
रे संग्रामसरोभेक ! विवेकविकलाकृते ! ।
आगतोऽयमसिर्ग्रासचिकीस्त्वां भुजगो मम ॥३४॥
वदन्निति पराजित्य कृतायुधमनायुधः ।
अग्रहीद् विग्रही जीवग्राहमे**वारि**भूपतिम् ॥३५॥
अथ दत्त्वा प्रयाणानि वीरः कतिपयानि सः ।
तं मुमोच पुना राज्यभाजनीकृत्य भूपतिम् ॥३६॥

तदानीं सोऽपि संतज्य राज्यं प्राज्यविरागवान् ।
प्रव्रज्य च शिवं प्राप तीर्थे तीर्थकृतो **नमेः** ॥३७॥

§§ कुमारोऽपि व्रजन्नेकामटवीमटति स्म सः ।
सैंहिकेयभियेवास्यां नार्केन्दू किरतः करान् ॥३८॥

तदन्तरे महीनाथसूनोरथ वरूथिनी । 5
आवास्य तामरण्यानीमकरोद् नगरीनिभाम् ॥३९॥

सायाह्ने च समागत्य सभासीनं नृपात्मजम् ।
प्रणेमुर्जलवीक्षायै प्रस्थापितचराश्चराः ॥४०॥

तानवादीत् कुमारोऽपि प्रसादाञ्चितया गिरा ।
किं चिरेण समायाता यूयं, तेऽपीदमूचिरे ॥४१॥ 10

जग्मिवांसो वयं देवादेशतः स्थानकादतः ।
अपश्यामैकमम्भोधिसदृशं प्रान्तरे सरः ॥४२॥

तत्र यामो वयं यावत् तावच्चूतवनान्तरे ।
वनश्रियमिवाद्राक्ष्म दोलाकेलिं वितन्वतीम् ॥४३॥

स्वर्वधूरूपविजयादुदस्तमिव केतनम् । 15
बिभ्रतीं कबरीं लोलायितामेकां सुलोचनाम् ॥४४॥ युग्मम् ॥

विलोक्य सहसाऽकस्मादस्मान् वनमृगीव सा ।
अलक्षितगतिः क्वापि तरुकुञ्जे तिरोदधे ॥४५॥

विलोकयद्भिरथ तत् काननं तरुणा तरुम् ।
नैव सा ददृशेऽस्माभिर्गतभाग्यैरिवौषधीः ॥४६॥ 20

वेलाऽलगदतोऽस्माकं हेलाविजितशात्रव ! ।
इत्याकर्ण्य कुमारोऽपि विस्मयोत्तरलोऽभवत् ॥४७॥

अत्रान्तरे च तरणिः पत्रैरापीय वारुणीम् ।
मुक्ताम्बरोऽपरोदन्वत्तटे क्षीब इवालुठत् ॥४८॥

विध्यातेऽत्र चित्रभानौ पयोधिसलिलैरिव ।
धूमेनेव तदीयेन व्यानशे तमसा जगत् ॥४९॥
अथाभिवादयन् सप्त ऋषीनिव पुरःस्थितान् ।
प्रसारितकरः साक्षादुद्ययौ यज्वनामिनः ॥५०॥
तान् विसृज्य कुमारोऽथ सान्ध्यकृतं विधाय च ।
हंसतूलीमलङ्कृत्य तां निनाय विभावरीम् ॥५१॥
अथोच्चकैः प्रयुञ्जानास्तस्मै जयजयाशिषम् ।
प्रातर्निवेदयामासुरिति मङ्गलपाठकाः ॥५२॥
शय्यां त्यज कुमारेन्द्र ! विभातेयं विभावरी ।
तमस्तिरोहिता याऽभूदाविर्भूतं श्रिया तया ॥५३॥
निशम्येति कुमारोऽपि शकुनग्रन्थिमादरात् ।
बबन्ध सिद्धये तूर्णं तल्पमुज्झाञ्चकार च ॥५४॥
प्रक्षाल्य वदनाम्भोजं देवपूजां विधाय च ।
अदापयत् प्रयाणाय ढक्कामथ नरेन्द्रसूः ॥५५॥
ढक्कानिनदमाकर्ण्य प्रयाणोपक्रमं ततः ।
कुर्वाणे सत्वरं सैन्ये तुमुलाकुलितेऽम्बरे ॥५६॥
निजैः कतिपयैरेव सवयोभिः समन्वितः ।
चचाल चरनिर्दिश्यमानवर्त्मा नृपात्मजः ॥५७॥ युग्मम् ॥
अग्रेसरः कुमारस्य प्लवमानः प्लवङ्गवत् ।
एकस्तारगिरा कश्चिदपाठीदिति मागधः ॥५८॥
व्योमश्रीकुचकुङ्कुमपङ्को दिनमुखतरुप्रवालभरः ।
तिमिरवनदावदहनः प्रभवति भगवानयं भानुः ॥५९॥
तीरं तीरमनारतमटतस्तत्संगमाशया सरसः ।
संघटयति पतिरह्नाममुं ननु दयितां चक्रवाकस्य ॥६०॥

तदन्वाम्रवणं भूपनन्दनो बन्दिनो गिरि ।
दत्तकर्णः क्रमेणाप ससखो निकषा सरः ॥६१॥

तदन्तश्चरनिर्दिष्टलतान्तरितविग्रहः ।
तां ददर्श तथैवैष विस्मितश्चेत्यचिन्तयत् ॥६२॥

"यदीयं स्ववर्धूर्नेत्रमाला तत्सफला हरेः । 5
भोगी स एव भोगीशस्तन्वीयमुरगी यदि ॥६३॥

स्त्रीरत्नमीदृशं मर्त्यलोकेऽस्मिन् घटतेऽपि न ।
कर्पूरपूरः किमहो जायते लवणाकरे ? ॥६४॥

यदि वा मानुषीयं तदस्या वेधा न वास्तवः ।
पटुः कर्मणि कुग्रामे कुविन्दः किं नु विन्दति ?" ॥६५॥ 10

इति चिन्तासमाचान्तचेता यावन्नृपात्मजः ।
तद्दर्शनसुखेनास्ति सैन्यं तावदुपाययौ ॥६६॥

तुरङ्गखुरकुद्दालदारितावनिरेणुभिः ।
तद् वनं पुनरावृत्तरात्रिध्वान्तैरिवानशे ॥६७॥

आयातसैन्यतुमुलमाकर्ण्य भयसम्भ्रमात् । 15
साऽनेशत् तरुणी तोयकरिणीव वनान्तरे ॥६८॥

सरःपरिसरक्षोणिमण्डले तरुमण्डले ।
उत्प्रयाणमथो तत्र चमूरपि चकार सा ॥६९॥

कुमारस्तु वरेणेव स्मरेणकृष्टमानसः ।
संभ्रमी बंभ्रमीति स्म तामपश्यन् सुलोचनाम् ॥७०॥ 20

भ्रमन्नुर्वीरुहामन्तः कुमारो मारविह्वलः ।
चैत्यं केतुकरेणाऽऽकारयदेकमलोकत ॥७१॥

एतस्मिन् भविता सापि भामिनी सुरसद्मनि ।
विचिन्त्येति विवेशायं तदन्तः क्षितिपात्मजः ॥७२॥

मूर्त्तिं विधोरिव सुधागौरां दूरात् तमोपहाम् ।
नाभेयस्य विभोस्तत्र स ददर्श महाशयः ॥७३॥

ततो न्याय्यविदानाय्य नानापुष्पोच्चयं स्वयम् ।
सुधीर्विधिवदानर्च धन्यम्मन्यो जिनोत्तमम् ॥७४॥

अथ तुष्टाव सद्भावपावनीभूतमानसः ।
स पाणी सम्पुटीकृत्य हर्षाश्रुभरितेक्षणः ॥७५॥

"निःशेषसुखसन्दोहकन्दकन्दलनाम्बुद ! ।
जयामेयगुणग्राम ! नाभेय ! जिनपुङ्गव ! ॥७६॥

अद्य मे सफलं चक्षुरद्य मे सफलं शिरः ।
अद्य मे सफलः पाणिरद्य मे सफलं वचः ॥७७॥

दृष्टोऽसि वन्दितोऽसि त्वं पूजितोऽसि स्तुतोऽसि यत् ।
वदन्निति स तीर्थेशं प्रणनाम मुहुर्मुहुः" ॥७८॥

तस्मिन्नवसरे प्रांशुर्मुनिरेकः समाययौ ।
जराभिदेलिमवपुः प्रलम्बितजटाभरः ॥७९॥

तया नायिकया प्रौढोदूढपुष्पकरण्डकः ।
कुमारदर्शनोत्पन्नकौतुकोत्तानलोचनः ॥८०॥ युग्मम् ॥

मुनेः स्फारतराकारजटाभारतिरोहिता ।
हृतचेताः कुमारस्य ज्ञातमन्तुरिवात्मनः ॥८१॥

सापि बाला विशालाङ्गविभादत्तमुदं दृशोः ।
महीपतिसुतं निध्यायन्ती दध्याविदं हृदि ॥८२॥

"किमिन्द्रः किमु वा चन्द्रः किमु वाऽसौ दिवाकरः ।
देवः किमथवा साक्षादयं मकरकेतनः ? ॥८३॥

अथवा चारिमा तस्येदृशी क्वास्ति बिडौजसः ।
यो वपुर्वहते नेत्रैः पिटकैरिव दन्तुरम् ? ॥८४॥

कलङ्की रजनीजानिस्तापनस्तपनः पुनः ।
अनङ्गस्तु मनोजन्मा तत्कोऽयं सुभगाग्रणीः ?'' ॥८५॥

अथोत्थितः कुमारोऽपि नमस्कृतजिनेश्वरः ।
तं मुनिं सहसा वीक्ष्य नमश्चक्रेऽतिविस्मितः ॥८६॥

आशास्य तं मुनिः प्राह वत्स ! त्वद्विरहाकुलम् । 5
भूतलं किं, कुलं किं च भवता सफलीकृतम् ? ॥८७॥

का वा त्वदभिधानेन वर्ण्या वर्णपरम्परा ।
केन वा कारणेनात्र भवगदामनोत्सवः ? ॥८८॥

इत्युदीर्य स्थिते तत्र मुनो वाग्मीति मागधः ।
सर्वं निवेदयामास कुमारे लज्जया नते ॥८९॥ 10

अत्रान्तरे कुमारस्तां जटाभारैस्तिरोहिताम् ।
पक्ष्मलाक्षीमथाद्राक्षीच्चक्षुःकुमुदकौमुदीम् ॥९०॥

ततोऽसौ विस्मयानन्दामोदमेदुरमानसः ।
पप्रच्छेति मुनिश्रेष्ठं प्राञ्जलं रचिताञ्जलिः ॥९१॥

मुने ! केनेदमसमं कारितं जिनमन्दिरम् । 15
अटव्यामपि, के यूयं केयं कन्या च कथ्यताम् ? ॥९२॥

अथोवाच मुनिर्वत्स ! महतीयं कथास्ति नः ।
देवपूजां पुरः कुर्मः क्षणं तावत् प्रतीक्ष्यताम् ॥९३॥

ओमित्युक्तवति क्षोणीपालपुत्रे पवित्रधीः ।
प्रविश्यान्तस्तया सार्धं देवपूजां मुनिर्व्यधात् ॥९४॥ 20

सा कुमारं कुमारस्तां मुहुकर्वलितकन्धरम् ।
ईक्षाम्बभूव धवलैश्चपलैर्लोचनाञ्चलैः ॥९५॥

ततो निर्मिततीर्थेशसपर्याविधिरम्बुजैः ।
आगत्य मण्डपे भूपनन्दनं मुनिरब्रवीत् ॥ ९६॥

कुमारागम्यतां चैत्यादुत्तरेण ममोटजम् ।
अभ्यागतस्य भवतो यतः पूजावशिष्यते ॥९७॥

गत्वोटजं नृपसुतस्ततस्तदुपरोधतः ।
मुनेः प्रत्यग्रहीदर्घमासीनो दत्तविष्टरे ॥९८॥

मुनिरुचे ततो वत्स ! श्रूयतां महती कथा ।
चैत्यस्य मम चामुष्या कन्याया यदि कौतुकम् ॥९९॥

§§ आस्तेऽमवरावतीवेह नगरी **मन्त्रितावती** ।
शशास नृपतिर्नाम्ना **हरिषेणः** सुखेन ताम् ॥१००॥

तस्याऽभूद् दयिता मूर्त्या नाम्ना च **प्रियदर्शना** ।
तत्कुक्षिजन्मा पुत्र**श्चाजितसेना**भिधोऽभवत् ॥१०१॥

तमन्यदाऽन्यथाशिक्षः कश्चिदश्वो नरेश्वरम् ।
वाह्यालीतोऽपहृत्येहानीतवान् काननावनौ ॥१०२॥

वटप्रालम्बमालम्ब्य गच्छतोऽपि ततोऽर्वतः ।
अवातरद् नराधीशः स कीनाशकरादिव ॥१०३॥

पुरःसरसरोनीरप्रक्षालितमुखक्रमः ।
क्रममाणः क्रमादेनमाश्रमं प्राविशद् नृपः ॥१०४॥

आतिथ्याय शुकप्रेर्यमाणमाणवकव्रजम् ।
रुरुवर्त्तितरोमन्थफेनदन्तुरितोटजम् ॥१०५॥

ध्यानलीनमुनिक्रोडसुखासीनमृगार्भकम् ।
वृक्षशाखाशतालम्बितापसाधिपमण्डलम् ॥१०६॥ विशेषकम् ॥

तत्र **कच्छ-महाकच्छ**वंशवारिधिकौस्तुभम् ।
नृपः कुलपतिं **विश्वभूति**नामानमैक्षत ॥१०७॥

उपसृत्य तमुर्वीशस्ततो विनयवामनः ।
अवन्दत युतं शिष्यैस्तरणिं किरणैरिव ॥१०८॥

लक्षणैरेभिरवनीपर्भिवति नापरः ।
विचिन्तेयेति मुनिस्तस्मै ददावित्याशिषं तदा ॥१०९॥

राजन् ! **वृषध्वज**विभुस्तव मङ्गलानि पुष्णातु सैष भुवनत्रयपूर्णकुम्भः ।
यस्योपकर्णमधिरोपितचूतपर्णलीलामुपैति चिकुरालिरिहालिनीला ॥११०॥

मुनिरित्याशिषं दत्त्वा सोऽपृच्छदिति भूपतिम् ।
कुतो यूयमिहायाताः कथमेकाकिनस्तथा ? ॥१११॥

पृष्टोऽथ सादरमिदं मुनिना **विश्वभूति**ना ।
सर्वं निवेदयामास प्राञ्जलिः पृथिवीपतिः ॥११२॥

इति कुर्वन् मुनिपदोपस्तिमस्ति महीपतिः ।
यावत् तावद् बभूवोच्चैः कानने तुमुलो महान् ॥११३॥

किमेतदिति साकूतमुच्छ्वस्याश्रमवासिनः ।
ऊचुरुत्कर्णिस्तूर्णं परस्परमुखेक्षिणः ॥११४॥

भविष्यत्यागतं सैन्यमेव मेऽनुपदाध्वना ।
विचिन्त्येति नृपो **विश्वभूति**पादानदोऽवदत् ॥११५॥

इदं समागतं सैन्यमाश्रमाद् बहिरस्ति मे ।
दत्त्वात्मदर्शनं सुस्थीकरोमि तदहं प्रभो ! ॥११६॥

इत्यापृष्टे विसृष्टोऽथ मुनिना सैन्यमभ्यगात् ।
राजा, सैन्यमपि प्राप प्रमोदं स्वामिदर्शनात् ॥११७॥

कारयित्वा ततस्तस्मिन् सैन्यावासान् वनान्तरे ।
मुनिमाराधयन्नेकमस्थाद् मासमिलापतिः ॥११८॥

कुमार ! सुन्दराकारमिदं **नाभेय**मन्दिरम् ।
कारितं तेन कल्याणरत्नरोहणरोहणः ॥११९॥

अथास्मै गच्छते भूमीभुजे निजपुरीं प्रति ।
अदाद् मुनिपतिर्मन्त्रमेकमेष विषापहम् ॥१२०॥

गत्वात्मनः पुरीं पौरबद्धवन्दनमालिकम् ।
अपालयत् परानन्दमयं राज्यमयं ततः ॥१२१॥

§§ अन्यदाऽमुष्य नृपतेः समासीनस्य कैश्चन ।
राजादौवारिकैरेत्य विज्ञप्तमिदमुच्चकैः ॥१२२॥

अस्ति स्वस्तिमती देव ! नगरी **मङ्गलावती** ।
तां च पालयति क्षोणीदयितः **प्रियदर्शनः** ॥१२३॥

तस्य **विद्युत्प्रभा**कुक्षिसरसीकलहंसिका ।
अस्ति **प्रीतिमती** नाम दुहिता सहिता गुणैः ॥१२४॥

दष्टा दुष्टाहिना साऽद्य निवेदितुमिति प्रभुः ।
अत्रास्मान् प्रैषयद् देव एव जानात्यतः परम् ॥१२५॥

राजा तेषां वचः श्रुत्वा वेगिभिः करभोत्तमैः ।
तत्र गत्वा नृपसुतां निर्विषां तामसूत्रयत् ॥१२६॥

पित्रा दत्तां स धरणीधरस्तां परिणीय च ।
पुनरागाद् निजपुरीं पौरोत्तम्भिततोरणम् ॥१२७॥

भुक्त्वा भोगानयमथो तया सह नवोढया ।
कियत्यपि गते काले सुते बालेतरे निजे ॥१२८॥

विनिवेशितसाम्राज्यभारो भेजे तपस्विताम् ।
भर्तृमार्गमलञ्चक्रे सापि **प्रीतिमती** सती ॥१२९॥ युग्मम् ॥

अथ तौ दम्पती वीक्ष्यमाणावश्रुमुखैर्जनैः ।
निरीय नगरीतोऽमुमीयतुस्तापसाश्रमम् ॥१३०॥

विश्वभूतेः कुलपतेः पादमूले स्थितौ तपः ।
चक्रतुर्जम्पती राधावेधसब्रह्मचारिणौ ॥१३१॥

अथाभूत् पञ्चमे प्रकटो गर्भविभ्रमः ।
प्रीतिमत्यास्तपस्यन्त्या लज्जाकारी तपस्विषु ॥१३२॥

गुर्विणीयं कथमिति ध्यात्वा रहसि तत्पतिः ।
तामिदं लज्जितोऽवादीद् गर्भोऽस्ति तव किं प्रिये ! ? ॥१३३॥
साप्युवाच त्रपाभारन्यञ्चदाननपङ्कजा ।
अस्ति किञ्चिदहं नार्यपुत्र ! ज्ञातवती तदा ॥१३४॥
तस्मिन्नवसरे भानुमति प्रशममीयुषि । 5
सूचीभेद्यस्तमःपुरः पूरयामास रोदसीम् ॥१३५॥
अभेदयत् तमः सान्द्रमपि चन्द्रः समुद्गतः ।
जलकान्तो मणिरिव प्रज्वलंस्तेजसा जलम् ॥१३६॥
भविता हन्त ! धिक्कारस्तापसेष्वावयोरतः ।
प्रातरन्यत्र यास्याव इत्यालोचपरायणौ ॥१३७॥ 10
निषण्णावेव तौ वामहस्तन्यस्तमुखाम्बुजौ ।
निन्यतुस्तां निशां चिन्ताचान्तस्वान्तावुभावपि ॥१३८॥ युग्मम् ॥
विभातायां विभावर्यामुदिते च विभापतौ ।
तौ वत्सतापसैः शून्यं पश्यतः स्म तमाश्रमम् ॥१३९॥
गच्छन्नेको मुनिस्तत्र दृष्टः पृष्टो निवेदय । 15
दृश्यते मुनिभिः सर्वैः शून्यः किमयमाश्रमः? ॥१४०॥
अथोवाच मुनिर्भद्र ! युवयोराश्रमस्थयोः ।
गृहस्थयोरिवालोक्य कर्म कर्मनिबन्धनम् ॥१४१॥
विश्वभूतिमुनिर्भूतैरिव भूतिपतिः पुरा ।
तपस्विभिः समं सर्वैरपि भेजे वनान्तरम् ॥१४२॥ युग्मम् ॥ 20
इत्युदीर्य मुनिः सोऽपि जगाम नृपनन्दन ! ।
हरिषेणस्तु दयितायुतः स्वोटजमागमत् ॥१४३॥
तौ दम्पती निजं कर्म निन्दतावतिदुःखितौ ।
अत्यवाहयतां मासांश्चतुरो वत्सरोपमान् ॥१४४॥

साऽसूत नवमे मासि पूर्णे **प्रीतिमतीं** सुताम् ।
प्रतिपत्तिथिसन्ध्येव चन्द्रलेखां महस्विनीम् ॥१४५॥

ऋषीणामाश्रमे जाता सुतेयं कारणादतः ।
पितृभ्यां**मृषिदत्ते**ति नाम तस्या विनिर्ममे ॥१४६॥

ततः प्रसवरोगेण दैवयोगेन पञ्चताम् ।
तस्या जगाम जननी हीदृशी भवितव्यता ॥१४७॥

कृतौर्ध्वदेहिकः पन्त्याः साश्रुदक्पङ्कजः पिता ।
लालयित्वा सुतामष्टवार्षिकामकरोत् क्रमात् ॥१४८॥

मम रूपवतीं पुत्रीमिमां दृष्ट्वा वनेचराः ।
हरिष्यन्तीति संचिन्त्य तदर्थं जनकोऽञ्जनम् ॥१४९॥

चकारदृश्यताहेतो**र्विश्वभूति**निवेदितम् ।
वनेऽस्मिंस्तेन सा जज्ञे पुलिन्दानामगोचरा ॥१५०॥ युग्मम् ॥

कुमार ! सुभगाकार ! सोऽहं सेयं च कन्यका ।
अलक्ष्या काननेऽमुष्मिंस्तवैवादत्त दर्शनम् ॥१५१॥

कुमारस्तामृषिसुतां स्नेहमांसलया दृशा ।
तथाऽपश्यत् कुमारं सा यथात्मान्योन्यमर्पितः ॥१५२॥

मुनिरप्येतयोर्भावं विभाव्य निजचेतसि ।
उवाच मुदितः स्मित्वा कुमारं सुकुमारगीः ॥१५३॥

कुमारातिथये तुभ्यमातिथ्यमियमङ्गजा ।
अस्तु मे **भरता**येव चक्रिणे **विनमेः** सुता ॥१५४॥

ऋषिदत्ता तु पितरि वदतीदमधोमुखी ।
तदक्षवलयग्रन्थीन् गणयामास लज्जया ॥१५५॥

कुमारस्तु समानीय पाणी वाणीमिमां जगौ ।
यदादिशन्ति पूज्यास्तत् प्रतिपन्नं मया खलु ॥१५६॥

अत्रान्तरेऽवदद् बन्दी देव ! तुभ्यं प्रयच्छतः ।
मुनेरात्मसुतां कर्मसाक्षी साक्षी भवत्ययम् ॥१५७॥

कुमारं मुनिरप्याह विलोक्याभि दिवाकरम् ।
वत्सोत्तिष्ठ प्रयाहि स्वं शिबिरं कुरु भोजनम् ॥१५८॥

कुमारोऽपि मुनिं प्राह प्रणम्य प्राञ्जलिः प्रभो ! । 5
अद्य भोक्ष्यामि युष्माभिः समं चलत तद् मया ॥१५९॥

मुनिरप्यभणद् भद्र ! प्रमाणं तव गौरवम् ।
फलमूलादि मुक्त्वाऽन्यत् कल्पते न तपस्विनाम् ॥१६०॥

मुनिनेति विसृष्टस्तां दृशा संभावयन्नयम् ।
गत्वाऽऽत्मशिबिरे चक्रे भोजनं सपरिच्छदः ॥१६१॥ 10

"कुमारः कुमुदाक्षीं तामथो दाक्षीमिवेश्वरः ।
निरपायमुपायंस्त महेनातिमहीयसा ॥१६२॥

तत्रैव वसतस्तस्य तया सह नवोढया ।
अजायन्त कियन्तोऽपि वासराः सुखभास्वराः ॥१६३॥

तमन्यदा प्रमोदाश्रुपूरपूरितलोचनः । 15
कुमारमब्रवीदेवं मुनिर्गद्गदया गिरा ॥१६४॥

कुमार ! जगदाधार ! प्रतिपन्नैकवत्सल ! ।
किं बहु ब्रूमहे मैनापमानपदं कृथाः ॥१६५॥

इयं हि काननावासकृशकौशल्यवैभवा ।
न्यासीकृता मया वत्स ! राशीभूतगणे त्वयि ॥१६६॥ 20

त्वत्सङ्गमाद् गुणागारमसावपि भविष्यति ।
मृगनाभौ गता धूलिरप्यहो सुरभीभवेत् ॥१६७॥

किञ्चान्यदहमिच्छामि प्रवेष्टुं वत्स ! पावके ।
जीविताद् मरणं श्रेयो मादृशां जरतां यतः ॥१६८॥

निपत्य पादयोः प्राह कुमारोऽपि मुनीश्वरम् ।
अलं प्राणपरित्यागवार्तयापि प्रसीद नः ॥१६९॥

रुदती **ऋषिदत्ता**पि समानीय करद्वयीम् ।
भक्तिनम्रशिराः प्रोचे पितरं नितरामिति ॥१७०॥

यदयं तात ! जामाता भवतां बत जल्पति ।
तद् यूयं प्रतिपद्यध्वं विधाय करुणां मयि ॥१७१॥

"सुप्रसन्नः सुतामेवमुवाच मुनिरप्यथ ।
शोकेनालमलं वत्से ! तुच्छेयं तव शेमुषी ॥१७२॥

परं शिक्षावचोऽस्माकमिदं क्वचन मा मुचः ।
शुश्रूषेथा गुरून् शीलं पालयेथाः पतिव्रते ! ॥१७३॥

सपत्नीष्वपि मा कोपीः कोपयन्तीष्वपि द्रुतम् ।
विधुः संतप्यते क्वापि दूयमानोऽपि राहुणा ? ॥१७४॥

मा भूः सुखे च दुःखे च वत्से ! धर्मपराङ्मुखी ।
धर्म एव हि जन्तूनां पिता माता सुहृत् प्रभुः" ॥१७५॥

आपृच्छ्याथ महीनाथसुतं स्वामपि नन्दनीम् ।
विवेशाग्नौ मुनिः पञ्चपरमेष्ठिपरायणः ॥१७६॥

विलुठ्य जगतीपठे चितानिकटवर्तिनि ।
रुदती **ऋषिदत्ता**पि विलापानकरोदिति ॥१७७॥

"हा तात तात ! निःसीमापत्यवात्सल्यतत्पर !
अद्याहं त्वद्दते शोच्या गतमूलेव कन्दली ॥१७८॥

दृष्टापि न मया मात तात ! मातापि मे भवान् ।
तदुभावप्यजायेतां हतौ भुवि मृते त्वयि" ॥१७९॥

रुदतीमिति भूपालसुतस्तां दयितामथ ।
प्राबोधयद् निवेश्याङ्कमनङ्कचरितामिति ॥१८०॥

तिष्ठ तिष्ठ प्रिये ! माऽश्रुपातमत्यन्तमातनु ।
किं वलन्ते कृते दुःखे परलोकपथं गताः ? ॥१८१॥

अयं हि ते पिता कामं कृतराज्यः कृतव्रतः ।
न शोच्यः किमु वा शोच्यः प्रिये ! पूषाऽस्तमीयिवान् ? ॥१८२॥

इत्थं संबोध्य तां तस्य कृतशेषौर्ध्वदेहिकः ।
कुमारः कारयामास श्मशाने स्थण्डिलं मुनेः ॥१८३॥

अथ कन्यामवज्ञाय यदर्थं चलितः पुरा ।
प्रतस्थे स तया सार्धं कुमारः स्वपुरं प्रति ॥१८४॥

पत्या समं समायान्ती पित्रा दत्तां परामसौ ।
अवपत् पथि सर्वर्तुफलवृक्षफलावलीम् ॥१८५॥

अखण्डितप्रयाणोऽथ कुमारो **रथमर्दनम्** ।
प्रविवेश पुरं पित्रा कारितोत्तुङ्गतोरणम् ॥१८६॥

सवधूकस्ततः पित्रोर्ननाम चरणद्वयीम् ।
तौ चातिमुमुदाते तद्दर्शनैकसुखोत्सवौ ॥१८७॥

पित्राभिनन्दितः साकं तदा च **ऋषिदत्तया** ।
कुमारोऽभुङ्क्त विषयसुखं लक्ष्म्येव केशवः ॥१८८॥

§§ इतश्चाश्रावि **कावेरी**भुजा **सुन्दरपाणि**ना ।
उदन्तो यत्कुमारेण परिणीता मुनेः सुता ॥१८९॥

सापि तद्दुहिता जातयौवनौन्मादसादरा ।
कुमारा काङ्क्षिणी दुःस्था **रुक्मिणी** समजायत ॥१९०॥

अथान्यदाऽमिलत् तस्या योगिनी **सुलसा**भिधा ।
समस्तमन्त्रतन्त्रादिवेदिनी पापमेदिनी ॥१९१॥

सदैवोपकृतामेतां भोजनाच्छादनादिभिः ।
ऋषिदत्ताकलङ्काय कुमारागतिहेतवे ॥१९२॥

रुक्मिणी प्राहिणोद् दुष्टचेतोवृत्तिमिवाङ्गिनीम् ।
सापि प्राप पुरं लक्ष्मीसदनं **रथमर्दन**म् ॥९३॥ युग्मम् ॥

कुमारदयिताभाग्यमिव पूषाऽस्तमासदत् ।
तदाऽगण्यमिवापुण्यं प्रससारतमां तमः ॥९४॥

उदियाय ततः शीलव्रतनिर्मलदीधितिः ।
जगल्लक्ष्मीवतंसस्य शशिनो बिम्बमम्बरे ॥६५॥

दत्त्वावस्वापनीं तत्र जनमेकं निहत्य च ।
सा कुमारचतुःशालं **सुलसा**ऽनलसा ययौ ॥९६॥

ऋषिदत्तां कुमारान्ते निरीक्ष्य सुखशायिनीम् ।
धुन्वती मौलिमश्रान्तं चेतसीदमचिन्तयत् ॥९७॥

अहो रूपमहो दीप्तिरेतस्या मृगचक्षुषः ।
अयं च पुण्यवान् यस्य दयितेयमजायत ॥९८॥

अथ सा मुखमेतस्याश्चक्रे शोणितशोणितम् ।
यतो दुरात्मनां क्वास्ते कृत्याकृत्यविवेकिता ? ॥९९॥

उपधानपदे किञ्च पललं न्यस्य पापिनी ।
हृत्वावस्वापिनीं चापि चतुःशालात् पलायिता ॥२००॥

मारितं प्रातरालोक्य जनं परिजनस्ततः ।
चक्रे कलकलं तेन कुमारः प्रत्यबुध्यत ॥२०१॥

ज्ञातोदन्तः प्रियां वीक्ष्य रुधिररुणिताननाम् ।
उपधानोपरिन्यस्तपललामित्यशङ्कत ॥२०२॥

मारितः श्रूयते कश्चिदमुत्र पुनरीदृशम् ।
राक्षसीयं हहा प्राणवल्लभा नु कथं मम ? ॥२०३॥

रूपसम्पदपापाय यदहो श्रूयते श्रुतौ ।
हा धातः ! किमिदं तात ! विपरीतमजायत ? ॥२०४॥

अनल्पानिति संकल्पान् कल्पयन् निजचेतसि ।
प्राबोधयत् प्रियां सद्यो देवि ! जागृहि जागृहि ॥२०५॥

सुप्तोत्थितामथ क्षामावाचा प्रोवाच वल्लभाम् ।
पृच्छामि भवतीं किञ्चिद् गोपायसि न तद् यदि ॥२०६॥

भूत्वा मुनिसुतापि त्वं प्रिये ! किमसि राक्षसी ? ।
सापि भीताऽभणद् देव ! किमेवमयि ! जल्पसि ? ॥२०७॥

कुमारः प्राह पुरुषः प्रियेऽद्य निशि मारितः ।
समांसमुपधानं ते सास्रं च पुनराननम् ॥२०८॥

इति वीक्ष्याप्यहो ! साक्षाद् न संदेग्धि कथं मनः ? ।
सलक्ष्मणि विधौ किं न जाघटीति जनोदितम् ? ॥२०९॥

इति श्रुत्वा वचः पत्युः स्वमालोक्य च तद्विधम् ।
सा विस्मयात् त्रपासारं कुमारं प्रत्यभाषत ॥२१०॥

"पुरापि यद्यहं देव भवेयं मांसभोजनी ।
आर्यपुत्र कथं कुर्यां तदा मांसनिषेधनम् ? ॥२११॥

एतत् किमपि नो वेद्मि पादाः क्रुध्यन्तु ते मयि ।
मम कर्मेरितेनोच्चैः केनचिद् वैरिणा कृतम् ॥२१२॥

तवाप्रतीतिर्यदि वा काचित् तद् निगृहाण माम् ।
इष्टोऽपि त्यज्यते दुष्टः शटदङ्गप्रदेशवत्" ॥२१३॥

कुमारस्तद्वचः श्रुत्वा विवेकी तामदोऽवदत् ।
निर्दोषाऽसि प्रिये ! ~~चित्तं मा कृथाः~~ खेदविह्वलम् ॥२१४॥

~~वदन्निति तिरोधाय मांसं मांसलसौहृदः ।~~
~~पयसा क्षालयामासात्मनैवास्या मुखाम्बुजनम् ॥२१५॥~~

एवं कलङ्कसंयोगं योगिनी सापि नित्यशः ।
तस्याश्चक्रे कुमारस्तु सारस्नेहस्तिरोहयत् ॥२१६॥

§§ भूयो भूयः परिज्ञातवृत्तान्तोऽथ महीपतिः ।
अमात्यानित्यभाषिष्ट कोपाटोपारुणेक्षणः ॥२१७॥

रे रे मम पुरे नित्यमेकैको मार्यते जनः ।
यूयं किमु न जानीथ यदेवं स्थ निराकुलाः ? ॥२१८॥

तेऽप्यूचुर्मानवी नैव देव ! मारिः पुरे तव ।
किमु कुर्मो वयं तत्र मान्त्रिकी दैवती यदि ? ॥२१९॥

उत निर्वास्यतामेते देव ! पाखण्डिनः पुरात् ।
तथापि यदि नो शान्तिस्तदाऽन्यवधार्यते ॥२२०॥

पुरात् पाखण्डिनः सर्वान् मन्त्रिभिः प्रेरितस्ततः ।
मुक्त्वा जिनमुनीन् मानी नृपतिर्निरवासयत् ॥२२१॥

आगत्य **सुलसा** कालविदुषी पापसंमुखी ।
नृपमत्रान्तरे क्रूरा रहसीदं व्यजिज्ञपत् ॥२२२॥

मयाऽद्य ददृशे देव ! निशि स्वप्नोऽयमीदृशः ।
दैवतं किञ्चिदागत्य जाने मामिदमब्रवीत् ॥२२३॥

प्रातः पाखण्डिनः सर्वान् नृपो निर्वासयिष्यति ।
तत् तस्य भवती गत्वा शुद्धिमेतां निवेदयेत् ॥२२४॥

यदसौ ते कुमारस्य वधूर्वनसमाहृता ।
नियतं राक्षसी, तस्या एव चेष्टितमीदृशम् ॥२२५॥

पाखण्डिनः पराभूयमैतत् सत्यापय प्रभो ! ।
यदिक्षून् खादति क्रोडः कुट्यते सैरिभाननम् ॥२२६॥

मदीये वचसि क्षोणीपाल ! चेत् तव संशयः ।
इदं तत् कौतुकं रात्रावद्यैव परिभावयेः ॥२२७॥

आमित्युक्त्वाऽवनीशोऽपि विसृज्यैतामथो निशि ।
कुमारं स्वान्तिके स्वाङ्गपीडादम्भादशाययत् ॥२२८॥

कुमारश्चिन्तयामास जाग्रन्नुग्रतरारतिः ।
अद्य मे दयितादोषः प्रकटो हा ! भविष्यति ॥२२९॥

एकतः पितुरादेशलङ्घनं युज्यते न मे ।
अन्यतो दयितादुःखम् **'इतो व्याघ्र इतस्तटी'** ॥२३०॥

इतश्च सापि **सुलसा** तदेव निशि निर्ममे । 5
चरैर्निभालयामास भूमानपि वधूं प्रगे ॥२३१॥

अथाचख्युर्महीशाय यथादृष्टचरं चराः ।
ततो निर्भर्त्सयामास नृपोऽपि कुपितः सुतम् ॥२३२॥

अरे जानन्नपि क्रूरां राक्षसीचरितामिमाम् ।
कुलाङ्गार ! दुराचार ! पाप ! पालयसे कथम् ? ॥२३३॥ 10

याहि याहि दृशोरग्रं त्यज मे राक्षसीपते ! ।
त्वया कलङ्कितमिदं शशाङ्कधवलं कुलम् ॥२३४॥

नृपं विज्ञपयामास कुमारोऽपि कृताञ्जलिः ।
देव ! सर्वमिदं मिथ्या प्रसीद मयि मा कुपः ॥२३५॥

अथाब्रवीद् नृपः कोपाटोपसंटङ्कितध्वनिः । 15
अरे प्रत्येषि नास्मासु स्वयं गत्वा निभालय ॥२३६॥

कुमारोऽपि नृपादेशमासाद्य विमलाशयः ।
स्वं जगाम ततो धाम क्षामः श्याममुखच्छविः ॥२३७॥

वामहस्तलन्यस्तकपोलां रुदतीं प्रियाम् ।
दृष्ट्वाऽवादीदयं प्रेम्णा सदयं हृदयं दधत् ॥२३८॥ 20

सुवाणि ! किमिदं पाणितले मुखमचीकरः ।
यदूर्मिकाभिरेताभिः कपोलः परिपीड्यते ॥२३९॥

अजस्रमश्रुधाराभिः कुरुषे किमु वर्षणम् ? ।
एतच्चित्राम्बु मे हर्षकर्षणस्यातिमर्षणे ! ॥२४०॥

किं कुर्मः कर्मवशगे ! सुभगे ! ह्यस्तेनऽहनि ।
राक्षसीति नृपस्याग्रे योगिनी त्वां न्यवेदयत् ॥२४१॥

ईदृशीं प्रातरप्यद्य नृपतिश्चरपूरुषैः ।
त्वामज्ञासीद् न जानीमोऽधुना तद् यद् भविष्यति ॥२४२॥

अत्रान्तरे नृपः केशैराकृष्याकृशमत्सरः ।
अर्पयामास तां दण्डपाशिकानां विलापिनीम् ॥२४३॥

आदिदेश च तामेवमिमां पापीयसीं पुरे ।
भ्रामयित्वा श्मशानान्तर्नीत्वा मारयताचिरात् ॥२४४॥

कुमारोऽपि गलद्बाष्पबिन्दुः स्वाङ्गं विघातयन् ।
निषिद्धस्तत्क्षणाद् बद्ध्वा स्वयमेव महीभुजा ॥२४५॥

अथ सप्तशिखाबद्धश्रीफलां विफलाशिषम् ।
निम्बपत्रस्रगाक्रान्तकण्ठां कुण्ठितमङ्गलाम् ॥२४६॥

उद्दण्डदण्डविधृतच्छित्वरातपवारणाम् ।
जीर्णसंमार्जनीखण्डशेखरां खरसादिनीम् ॥२४७॥

पुरःसंचारिडक्कारीकाहलाशृङ्गडिण्डिमाम् ।
मिलितप्राकृतास्तोकलोकपातिबुम्बिकाम् ॥२४८॥

चूर्णचित्रितनिःशेषतनुं तनुमुखीमिमाम् ।
पुरान्तर्भ्रमयामासुः पुरतो दण्डपाशिकाः ॥२४९॥ कलापकम् ॥

ततः पौरेषु हाकारपरेषु पुरमध्यतः ।
श्मशानान्तर्नयन्ते स्म तामसौ निर्दयाशयाः ॥२५०॥

तस्मिन्नवसरे भानुरपि द्वीपान्तरं ययौ ।
तस्याः कष्टामिवावस्थां विलोकितुमनीश्वरः ॥२५१॥

विश्वं विश्वमपि ध्वान्तविस्तरः परितस्तरे ।
सतां चेतस्तदाऽस्तोकरयः शोकमयोऽपि च ॥२५२॥

डुढौकेऽसिलतापाणिर्मारणायाथ निष्ठुरः ।
एकस्तेषु ब्रुवन्नैतामिति भूरिभयातुराम् ॥२५३॥
एषा न भवसि क्रूरे ! दैवतं किञ्चिदीप्सितम् ।
स्मराशु घस्मराचारपरायणपराक्रमे ! ॥२५४॥
इत्युदीर्यासिलतिकां यावदुद्गमयत्यसौ । 5
तावदेषा भयोन्मेषात् पपात भुवि मूर्च्छिता ॥२५५॥
मृतावस्थामिमां दृष्ट्वा किमिदं मृतमारणम् ? ।
इत्युक्त्वा ते मिथोऽप्युच्चैः परावृत्य पुरं ययौ ॥२५६॥
§§ सापि सायं समीरेण शिशिरेण प्रसर्पता ।
बोधिता बन्धुनेवोच्चैर्महावनमुदैक्षत ॥२५७॥ 10
पश्यन्ती च श्मशानं तामपश्यन्तीव च घातकान् ।
सोऽनेशद् वागुराभ्रष्टमृगीनाशं मृगेक्षणा ॥२५८॥
गत्वा दूरमथ क्वापि बिभ्यती निर्जने वने ।
रुरोद रोदयन्ती सा रोदसी प्रतिनिःस्वनैः ॥२५९॥
गलद्भिः कुसुमैः शेफालिकाश्चन्द्रोपला अपि । 15
तामिवान्वरुदन्निन्दूदये बिन्दुभिरम्भसाम् ॥२६०॥
पतिता दुःखपङ्केऽहं त्वां विना तात ! तात ! तत् ।
समागत्य निजापत्यहस्तालम्बनमातनु ॥२६१॥
यद्यहं त्वाममोक्ष्यं न तदार्नी तात ! दुर्मतिः ।
दुःखं कथमिदार्नीं मे स्यादिदं हन्त ! दारुणम् ? ॥२६२॥ 20
रे जीव ! भवता पाप ! किं कृतं दुष्कृतं पुरा ।
निरागसोऽपि यदयं ही ! कलङ्को ममाभवत् ? ॥२६३॥
व्यधा निरपराधायां यादृग् दुःखमिदं मयि ।
मा विधासीर्विधातस्त्वं हा तादृगपरास्वपि ॥२६४॥

मद्वियोगमलं सोढुं मनागपि न यः पतिः ।
सोऽपि दूरीकृतो देव ! भवता कमुपालभे ? ॥२६५॥

भर्तः ! दुःखमहागर्तपतितेयं तव प्रिया ।
क्व यातु कथयागत्य महाशय ! महोदय ! ? ॥२६६॥

विलप्य बहुधापीति दक्षिणाभिमुखी पितुः ।
आश्रमं हृदि कृत्वाथ सा चचाल शनैः शनैः ॥२६७॥

आरूढशिबिरस्याङ्कपल्यङ्कं पत्युराश्रिता ।
आजगाम पथा येन सैन्यसंवलितावनिः ॥२६८॥

तेन सा प्रययौ दर्भपाट्यमानपदाम्बुजा ।
एकाकिन्यातपक्लान्ता **'धिगहो ! चरितं विधेः'** ॥२६९॥ युग्मम् ॥

हरिवर्षसमायातबीजैस्तरुभिरुद्गतैः ।
स्वहस्तवापितैरेव संदर्शितपथिस्थितिः ॥२७०॥

जगाम पैतृकं धाम तपोवनमियं क्रमात् ।
पितृः श्मशानमालोक्य रुदोदातिभृशं पुनः ॥२७१॥

''हा तात ! दुहितेयं तेऽनवधिदुःखसेवधिः ।
क्वासि त्वमेहि मे देहि वत्सावत्सल ! दर्शनम् ॥२७२॥

दुःखितां दीनवदनामेकां शरणवर्जिताम् ।
आश्वासय समागत्य विधाय करुणां मयि ॥२७३॥

शून्येऽमुत्र वने तात ! त्वद्दते दुःखभागहम् ।
पूत्करोमि पुरः कस्य क्व यामि च करोमि किम् ? ॥२७४॥

रम्यमासीत् पुरमिव त्वयीदं तात ! जीवति ।
अभूत् पुनरिदानीं मे गहनं दहनोपमम् ॥२७५॥

अद्राक्षमद्य जीवन्तमेव त्वां तात ! यद्यहम् ।
दुःखमप्युत्सवीयेत तदा वैयसनं मम ॥२७६॥

अथ ग्रहिलतामेतां जल्पामि कियतीमहम् ।
यादृगेवोप्यते पूर्वं तादृगेव हि लूयते ॥२७७॥
इति शोकं कुशीकृत्य जनकोटजवासिनी ।
कन्दमूलफलाहारा तस्थावेकाकिनी वने ॥२७८॥
हस्तन्यस्तमुखी दुःखं तस्थुषी सुमुखी हृदि ।
दध्यावित्यन्यदा चित्रलेपकाष्ठमयीव सा ॥२७९॥
प्रायः संपाकमधुरा कर्कन्धूरिव यद् वधूः ।
शुद्धा वनीपकं तद् मे भविता शीलशीलनम् ॥२८०॥
हुं स्मृतं जनकेनास्ति पुरा संदर्शितौषधी ।
एका यस्याः प्रभावर्द्धिवशाद् नारी नरायते ॥२८१॥
इति निश्चित्य तामेषा वनं वीक्ष्य समाहृताम् ।
कर्णे पवित्रिकीकृत्य पितृशिक्षामिवाकरोत् ॥२८२॥
तस्याः प्रभावतः पुंस्त्वकुतोभयमाप्य सा ।
मुनिवेषा सुखेनास्थादर्चयन्ती जिनेश्वरम् ॥२८३॥
§§ इतश्च वल्लभोऽमुष्या रोहद्विरहविह्वलः ।
तस्थौ राज्येऽपि विक्रीतावशिष्ट इव शून्यहृत् ॥२८४॥
सुलसापि निजोदुग्रप्रवृत्त्या जितकाशिनी ।
गत्वा संमदयामास **कावेरी**पतिनन्दिनीम् ॥२८५॥
शिक्षयित्वा तु **कावेरी**पतिरप्यतिमानवान् ।
प्रास्थापयत् तदा दूतमथो **हेमरथं** प्रति ॥२८६॥
सोऽपि गत्वा ततो दूतः पुरुहूतमिव श्रिया ।
रथमर्दनभूपालमभ्यधादिति पर्षदि ॥२८७॥
भवन्तं देव ! **कावेरी**पतिः प्रच्छयतीदृशम् ।
अयं नाऽऽयातवानत्र कुमारः किमु कारणम् ? ॥२८८॥

परिणेतुं सुतामस्मत्प्रभोरात्मतनूभवम् ।
तत् त्वं विसृज गजेन्दो ! सज्जनं माऽवजीगणः ॥२८९॥

किमन्यदेकतो रङ्कमपि राजानमन्यतः ।
वचनापि विवेकज्ञा जातु न ह्यावजानते ॥२९०॥

दूतवाणीमिति क्षोणीपतिः श्रुत्वा निजाङ्गजम् ।
दुःखिनं रहसि क्रोडीकृत्य कृत्यविदब्रवीत् ॥२९१॥

किमेवं नित्यशोऽतुच्छ वत्स ! चेतसि ताम्यसि ।
किं त्वयाऽश्रावि नैवं यत् **'कृतं कर्म न दूषयेत्'** ॥२९२॥

तत् त्वं मदुपराधेन **कावेरी**नगरीशितुः ।
परिणेतुं दुहितरं सत्वरं वत्स ! संचर ॥२९३॥

अनिच्छन्नपि स क्ष्मापवाचमेतामममन्यत ।
रुद्रस्नात्रमिवालङ्ध्यं भाषितं हि पितुः सताम् ॥२९४॥

§§ अथो चचाल गणकोपदिष्टेऽहनि **रुक्मिणी**म् ।
परिणेतुमसौ सैन्यधूलिधूसरिताम्बरः ॥२९५॥

वाहिनी वाहिनीवास्य वाहकल्लोलमालिनी ।
ऋषिदत्तावनाम्भोधौ प्रविश्य स्थितिमादधे ॥२९६॥

वनमालोक्य तद् दृष्टचरं चारुगुणैकभूः ।
कुमारश्चिन्तयामास बाष्पक्लिन्नविलोचनः ॥२९७॥

वनं हन्त ! तदेवेदं तदा पूर्णमनोरथः ।
पर्यणैषमहं यत्र तामहो तारलोचनाम् ॥२९८॥

त एव तरवः सर्वे तदेव हि सरोवरम् ।
सैव भूमिस्तदेवेदं पुरतो जिनमन्दिरम् ॥२९९॥

ममाजायत दुःखाय सुखाय यदभूत् पुरा ।
निरागस्यापि निर्बुद्धे ! हा विधे ! किं कृतं मयि ? ॥३००॥

चिन्तयन्नित्ययं शोकशङ्कुसंकुलमानसः ।
जगाम कतिभिः साकं पत्तिभिर्जिनमन्दिरम् ॥३०१॥

अस्मिन्नवसरे तस्य दक्षिणं चक्षुरुच्चकैः ।
पस्पन्द संमदादेवमचिन्तयदसौ ततः ॥३०२॥

ममास्फुरदिदं चक्षुः प्रियसङ्गमसूचकम् । 5
सा तु दैवहता क्वास्ते तदिदं किमु निष्फलम् ? ॥३०३॥

अथवेदं ममाग्रेऽपि चैत्यं चिन्तामणीयते ।
अधुनापि प्रियं किञ्चित् तादृशं तद् भविष्यति ॥३०४॥

इति चिन्तयते यावत् कुमारः स्फारविस्मयः ।
ऋषिदत्तामुनिस्तावदस्मै पुष्पाण्युपानयत् ॥३०५॥ 10

कुमारोऽपि करात् तस्य पुष्पमालां समाददे ।
दृशा पश्यन्नमुं जातिप्रियाभ्रमविशालया ॥३०६॥

ऋषिदत्तामुनिः सोऽपि हृदीदं समचिन्तयत् ।
रुक्मिणीं परिणेतुं किं प्रस्थितोऽयं मम प्रियः ? ॥३०७॥

कुमारोऽपि जिनं नत्वा तमाहूय च सादरम् । 15
आत्मगुप्यद्गुरुं निन्ये तद्वियोगासहः सुधीः ॥३०८॥

अग्रासनोपविष्टं तं भोजयामास चाञ्जसा ।
पर्यधापयदत्यर्थमभ्यर्थ्य वसनानि च ॥३०९॥

ततोऽपृच्छदिदं मानी समानीय करद्वयीम् ।
कुमारस्तं समासन्नासनासीनं विनीतवाक् ॥३१०॥ 20

मदीयनयनाम्भोजभास्करप्रतिम ! प्रभो ! ।
निवेदय वनेऽमुष्मिन् कदाऽऽयासीः कुतस्तथा ? ॥३११॥

अथोवाच मुनिः काशसंकाशदशनत्विषा ।
अयं विद्योतयन्नुच्चैः समाजपटमण्डपम् ॥३१२॥

आसीदत्राश्रमे देव ! **हरिषेण**मुनिः पुरा ।
ऋषिदत्तेति तस्याभूत् तनया विनयावनिः ॥३१३॥
कुमारः कोऽपि तां निन्ये परिणीय निजं पुरम् ।
मुनिरप्यगमद् वह्निप्रवेशात् त्रिदशात्मताम् ॥३१४॥
तदैवाहमपि क्षोणीं भ्रामं भ्राममिहागमम् ।
अमेयगुणनाभेयसेवाहेवाकमुद्वहन् ॥३१५॥
अपूर्यत ममात्रैव वसतः पञ्चवत्सरी ।
पुनस्त्वद्दर्शनेनाद्य वल्लीवाभूत् फलेग्रहिः ॥३१६॥
अब्रवीदथ सानन्दभिलापतिसुतोऽपि तम् ।
मुने ! त्वां पश्यतो दृष्टिः कथं मे न हि तृप्यति ? ॥३१७॥
तेनापि जगदे देव ! कोऽपि कस्यापि वल्लभः ।
मोदन्ते कुमुदानीन्दौ कमलानि तु भास्करे ॥३१८॥
मुनिं विनिह्नुतास्तोकतोषचिह्नमथावदत् ।
सोपरोधमिति क्षोणीरमणप्रभवोऽपि तम् ॥३१९॥
अग्रे समस्ति गन्तव्यं मुने ! यामि कथं यतः ।
त्वत्प्रीतिशृङ्खलाबद्धं मनो मे गन्तुमक्षमम् ॥३२०॥
तद् मयैव समं तत्र चल चारुमते ! यते !
वलमानस्त्वहं पश्चाद् मोक्ष्यामि त्वामिहाश्रमे ॥३२१॥
अथावादीद् मुनिर्मैवमाग्रहं त्वं वृथा कृथाः ।
यतः संयमिनां देव ! दूष्यते राजसङ्गतिः ॥३२२॥
जगदे जगतीशक्रसूनुना मुनिरादरात् ।
कुर्वते प्रार्थनाभङ्गं त्वादृशा अपि किं प्रभो ! ? ॥३२३॥
अमात्या अपि तं प्राहुः स्वामिचित्तोपलक्षिणः ।
तथा यथा कुमारेण स मेने गमनं समम् ॥३२४॥

ऋषिदत्तासमा कापि सती क्वाप्यस्ति नास्ति वा ।
रविर्द्रष्टुमितीवागात् तदा द्वीपान्तरावनौ ॥३२५॥

यामिनीकामिनीकर्णकुण्डलं चन्द्रमण्डलम् ।
नभोऽङ्गणेऽपतत् कीर्णतारामौक्तिकपङ्क्तिकम् ॥३२६॥

तौ कुमारमुनी प्रीत्या कृतसान्ध्यविधी ततः । 5
निशामनयतामेकपल्यङ्कतलशायिनौ ॥३२७॥

§§ अथ प्रयाणकरोत् प्रभाते भूपतेः सुतः ।
पटापटप्लुताश्वीयहेषामुखदिङ्मुखः ॥३२८॥

स सन्ततप्रयाणोऽथ **कावेरीं** नगरीमगात् ।
समभ्यागाच्च मुदितस्तं नृपः सपरिच्छदः ॥३२९॥ 10

प्रावेश्यच्च **कावेरी**मुत्सृतध्वजतोरणम् ।
कुमारं स नृपः पौरवधूवीक्षितवैभवम् ॥३३०॥

विवाहसज्जितं मत्तवारणप्रवणं ततः ।
सौधमेकमलञ्चक्रे कुमारः कटकोपमम् ॥३३१॥

अथ ज्योतिर्विदादिष्टे वासरे वासवोपमः । 15
पर्यणैषीद् नृपसुतां तामृषेर्दुहितुः पतिः ॥३३२॥

कृतपाणिग्रहं पुत्र्याः कुमारं गौरवादमुम् ।
नृपः कतिपयान्युच्चैरस्थापयदहानि सः ॥३३३॥

कण्ठासक्तभुजोत्सङ्गसङ्गिनी नक्तमन्यदा ।
पतिं जगाद विश्रम्भप्रणयादिति **रुक्मिणी** ॥३३४॥ 20

प्राणेश ! कीदृशी साऽऽसीद्**ऋषिदत्ता** तपस्विनी ।
मनस्ते या वशीचक्रे गौतमीव शचीपतेः ? ॥३३५॥

जगाद मेदिनीनाथसूनुः साश्रुविलोचनः ।
शुभे ! तदुपमा सैव नैव काचिदिहापरा ॥३३६॥

रूपलक्ष्मीजुषो यस्याः समस्या कामकामिनी ।
वर्णिका मेनका नागयोषितः पदपांशवः ॥३३७॥

जाते तद्विरहे दैवादासीस्त्वमपि मे प्रिया ।
यत् क्षैरेयीं विना घृष्टिरपि प्रीतिकरी न किम् ? ॥३३८॥

ततः सकोपा भूपालदुहिता पूर्वकारितम् ।
निजं पौरुषमाचख्यौ परिणेतुर्बहिर्मुखी ॥३३९॥

तदाकार्ण्य तदा दत्तकर्णः सोऽपि मुदं हृदि ।
ऋषिदत्तामुनिर्दध्रे स्वकलङ्कापनोदतः ॥३४०॥

इति श्रुत्वा कुमारोऽथ भृकुटीभङ्गभीषणः ।
रुक्मिणीमपनीयाङ्कादतुच्छं निरभर्त्सयत् ॥३४१॥

अरे पापीयसि ! क्रुरे ! भवती तन्वतीदृशम् ।
आत्मानं नरकक्रोडे मां च दुःखावटेऽक्षिपत् ॥३४२॥

हहा गुणावती रूपवती योऽसीद् महासती ।
कथाशेषीकृता सापि धिक् त्वामशुभकारिणीम् ॥३४३॥

केवलं सूत्रयन्त्यात्महितं किं विहितं त्वया ।
लोकद्वयविरुद्धं हा पापकारिणि ! वैरिणि ! ॥३४४॥

इति निर्भर्त्सतस्तस्य नवोढां गूढदीधितिः ।
निशानाशात् पतिर्भासामाविरासाम्भसां निधेः ॥३४५॥

निशापतिरपि प्राप्तनिशाविरहविह्वलः ।
झम्पापातमिवाधातुं ययावपरवारिधौ ॥३४६॥

अथ भूपसुतः कान्तादुःखतान्ताशयश्चिताम् ।
किङ्करैः कारयामास तत्रैव भवनाङ्गणे ॥३४७॥

अधिरोढुं चितां सोऽग्निनिचितां चलितश्च ताम् ।
स्वजनैर्वार्यमाणोऽपि सबाष्पं पदपातिभिः ॥३४८॥

कावेरीपतिनाप्येष जवादेत्य निवारितः ।
कुमार ! त्वादृशां नेदमबलाकर्म युज्यते ॥३४९॥
राज्ञेत्युक्तोऽप्यसौ यावदाग्रहं न विमुञ्चति ।
ऋषिदत्तामुनिं तावदवोचन् परितो जनाः ॥३५०॥
भगवन्नेष निःशेषं मन्यते ते सितासितम् ।
अतः कृताग्रहं संप्रत्येनं मृत्योर्निवर्तय ॥३५१॥
अभ्यर्थितो जनैः सोऽथ निह्नुतामन्दसंमदः ।
ऋषिदत्तामुनिः प्राह विहस्य नृपनन्दनम् ॥३५२॥
कुमार ! महिलामात्रकृते किं म्रियते वद ।
त्वादृशा वसुमत्या हि पतयः सेयमज्ञता ॥३५३॥
प्रतिश्रुतमहो ! यन्मां भवताऽऽनयता वनात् ।
धन्यमण्डलमूर्धन्य ! विस्मृतं तत् कथं तव ? ॥३५४॥
किञ्च तद्वल्लभासङ्गकाम्यया मा मृथा वृथा ।
देहिनां गतयो भिन्नाः परलोकजुषां यतः ॥३५५॥
मृतस्य वल्लभासङ्गवार्तापि तव दुर्लभा ।
जीवतः पुनरागत्य सा कुतोऽपि मिलिष्यति ॥३५६॥
कुमारोऽपीत्यभाषिष्ट विप्लावयसि मां मुने ! ।
संघटन्तेऽसवः क्वापि जीवतां मृतिमीयुषः ? ॥३५७॥
जगाद मुनिरप्येनं मा विषीद महामते ! ।
अमुना तव सत्त्वेन जीविष्यति मृतापि सा ॥३५८॥
सप्रत्याशमथ क्ष्मापसूनुर्मुनिमभाषत ।
~~प्रभो !~~ मां पुनरप्येतदेव श्रावय सत्वरम् ॥३५९॥
प्रत्यक्षं भवता क्वापि दृष्टा सा किमथ श्रुता ? ।
अथ जानासि जीवन्तीं ज्ञानेन क्वापि तस्थुषीम् ? ॥३६०॥

सावष्टम्भमदम्भस्त्वं यदेवं देव ! जल्पसि ।
यतः प्रकटयन्त्येव वाचोऽभिप्रायमान्तरम् ॥३६१॥

मुनिर्जगाद जानामि ज्ञानेन तव वल्लभा ।
दक्षिणाशापतेरस्ति पुरे पश्यति मां यथा ॥३६२॥

प्रस्थापयामि तदहं तत्पदे सविधे विधेः ।
स्थित्वा तां, सुहृदः कार्ये तदल्पं यद् विधीयते ॥३६३॥

अब्रवीदथ सौत्सुक्यप्रमोदं भूपनन्दनः ।
यद्यप्येतद् मुने ! तत्र विलम्बो युज्यते न ते ॥३६४॥

मुनिर्बभाषे किं ध्यानक्षणो दक्षिणया विना ।
सिध्यति क्ष्मापतनय ! शीतमेव पतेन्मुधा ॥३६५॥

उवाच भूपसूस्तुभ्यमग्रेऽपि हि मुने ! मनः ।
अर्पितं सांप्रतं सोऽयमात्मापि मम तावकः ॥३६६॥

जगाद मुनिरप्यस्तु त्वदात्मा निकटे तव ।
यच्च दानं यदा याचे ददीथास्तत् तदा मम ॥३६७॥

उक्त्वा प्रमाणमादेश इति भूपसुतोऽपि तम् ।
ऊचे किञ्च विलम्बोऽयं लम्बो मामतिबाधते ॥३६८॥

कुमार ! ते प्रियामाविष्करोम्येषोऽधुना ननु ।
इत्युदीर्य मुनिस्तथ्यं नेपथ्यान्तरमाविशत् ॥३६९॥

भविताहो ! मुनेः कर्म समीचीनमिदं यदि ।
अहमेव कदा धन्यः पुण्यवानिह भूतले ॥३७०॥

प्रभविष्णुः प्रभावोऽत्र सतीनां च सतामपि ।
भूयादिति महीनाथे सनाथे हृदि चिन्तया ॥३७१॥

द्रष्टव्याऽद्य मया दिष्ट्या दृष्ट्या संजीवनौषधिः ।
सा प्रियेत्युत्सुकरवान्तेऽपि च भूपसुते सति ॥३७२॥

परोलक्षेषु निस्पन्दमानलोचनपक्ष्मसु ।
पश्यत्सु पुरलोकेषु मालिताट्टालपङ्क्तिषु ॥३७३॥
यक्षकिन्नरगन्धर्वस्वर्वासिषु नभोऽङ्गणे ।
स्थितेषु कौतुकात् पाणिधृतमालेषु सादरम् ॥३७४॥
विहाय सममौषध्या मुनितां मुनिनन्दनी ।
प्रादुरास पटीमध्यादब्धेरिव रमा ततः ॥३७५॥ षड्भिः कुलकम् ॥
पुष्पवृष्टिं व्यधात् तस्याः शिरसि त्रिदशावली ।
जयेत्याशीर्वचःपूरपूरिताखिलदिङ्मुखा ॥३७६॥
उवाच रूपसम्पत्तिविजितामरसुन्दरीम् ।
तामालोक्य तदा लोकः स्मेरविस्मयमानसः ॥३७७॥
चामीकरस्य पुरतो यादृशी किल पित्तला ।
तादृशी **ऋषिदत्ताया**ः पुरः स्फुरति **रुक्मिणी** ॥३७८॥
स्थाने तदस्य भूपालसूनोराग्रहसद्ग्रहः ।
को नाम म्रियते नास्याः कृतेऽतिमधुराकृतेः ? ॥३७९॥
कुमारोऽपि बहोः कालाद् दृष्टनष्टापदस्तथा ।
पपौ यथानन्दबाष्पैस्तल्लावण्यमिवाचमत् ॥३८०॥
ऋषिदत्तापि नीरङ्गीदलोत्सङ्गीकृतानना ।
आलुलोके दृशा लज्जास्पृशा पत्युः पदाङ्गुलीः ॥३८१॥
जीवन्तीमात्मजामातुराविर्भूय पुरः स्थिताम् ।
तामालोक्य नृपोऽप्यन्तः प्रमोदवशगोऽभवत् ॥३८२॥
निनाय च निजं सौधमसौ धन्यतमां नृपः ।
कुमारसहितामेतां समारोप्य करीश्वरम् ॥३८३॥
गौरवात् तामथ स्नानवासोऽलङ्करणादिभिः ।
सच्चकार निजापत्यनिर्विशेषं विशेषवित् ॥३८४॥

सुलसां तु महीपालः पापिनीं तामपापधीः ।
भ्रमयित्वा पुरे पौरैर्निन्द्यमानामनारतम् ॥३८५॥

रासभारोपितां मुष्टियष्ट्यादिपरिताडिताम् ।
पुरतः परितो वाद्यमानकाहलडिण्डिमाम् ॥३८६॥

विलूनकर्णयुगलनासिकां निरवासयत् ।
अवध्या हि सतामेते नारीगोद्विजलिङ्गिनः ॥३८७॥ विशेशकम् ॥

नन्दनीं स्वामपि महीपती रहसि रंहसा ।
निरभर्त्सयदत्यन्तरूक्षाक्षरकिरा गिरा ॥३८८॥

कुमारोऽपि कियत्कालं, सहैव **ऋषिदत्तया** ।
तस्थौ विषयवांस्तत्र श्वशुरेण प्रमोदितः ॥३८९॥

§§ अन्यदा च प्रियामूचे तामुत्सङ्गनिषेदुषीम् ।
कुमारः स्फारशोकाश्रुजलाविलविलोचनः ॥३९०॥

प्रिये ! सर्वमिदं भव्यमभूद् मित्रं परं मम ।
कष्टमास्ते विधेः पार्श्वे त्वत्पदे प्रहितो मुनिः ॥३९१॥

परार्थकर्मठेनाद्य मठेन गुणसम्पदाम् ।
मित्रेण रहिता जज्ञे भूरियं मे तमोमयी ॥३९२॥

ऋषिदत्ता विहस्याह मा विषीदावधारय ।
देवाखर्वमिदं सर्वमोषधीललितं मम ॥३९३॥

किञ्च मे वरमायच्छ यस्त्वयास्ति प्रतिश्रुतः ।
प्रसीद पश्य दयित ! **रुक्मिणी**मपि मामिव ॥३९४॥

दध्याविति कुमारोऽपि श्रुत्वा तद्भारतीमहो ।
विरोधिन्यामपि मनोवृत्तिरस्या कृपावती ॥३९५॥

विचिन्त्येति हृदा भूमीपतिसूनुस्तदा मुदा ।
उवाच दयितामेवमस्तु देवि ! विवेकिनि ! ॥३९६॥

इति भर्तुर्वचः प्राप्य **रुक्मिणी**मतिगौरवात् ।
ऋषिदत्तात्मनाऽऽहूय लज्जाभङ्गमसूत्रयत् ॥३९७॥
अथापृच्छ्य कुमारोऽपि **कावेरी**पतिमादरात् ।
दयिताभ्यां युतस्ताभ्यामाजगाम निजं पुरम् ॥३९८॥
अभ्याजगाम तनयमथो **हेमरथो** नृपः । 5
कुर्वन् करिमदैर्दत्तच्छटामिव वसुन्धराम् ॥३९९॥
रङ्गत्तुरङ्गतुण्डाग्रपातिभिः फेनबिन्दुभिः ।
तदा रराज परितः सपुष्पप्रकरेव भूः ॥४००॥
विलोक्य तातमायान्तमुत्तीर्णोऽथ रथादसौ ।
कुमारः सारविनयो ननाम लुठदङ्गकैः ॥४०१॥ 10
पादानतं तमुत्थाप्य परिरभ्य च वक्षसा ।
चुचुम्ब शिरसि क्षोणीपतिः प्रीतितरङ्गितः ॥४०२॥
पुरं पुरुपुरन्ध्रीदृक्क्लृप्तवन्दनमालिकम् ।
नृपः प्रावेशयदथो वधूयुगयुतं सुतम् ॥४०३॥
ऋषिदत्तां सतीचक्रचूडामणिममानयत् । 15
ज्ञातोदन्तः क्षितेरिन्दुरपि स्वागसि लज्जितः ॥४०४॥
क्रमात् कृत्वैष **कनकरथ**सादखिलामिलाम् ।
भद्राचार्यपदोपान्ते व्रतमादाय निर्वृतः ॥४०५॥
अथ न्यायेन **कनकरथः** शासन् वसुन्धराम् ।
अवाप **ऋषिदत्ता**यां नाम्ना **सिंहरथं** सुतम् ॥४०६॥ 20

§§ **ऋषिदत्ता**न्वितः क्षोणीपतिर्वातायनस्थितः ।
अद्राक्षीदन्तरिक्षेऽम्बुवाहमण्डलमन्यदा ॥४०७॥
प्रचण्डपवनस्तच्च तत्क्षणादेव दैवतः ।
सिद्धं कार्यमिवानार्यः प्रापयद् विशरारुताम् ॥४०८॥

मिलितं गलितं चापि घनवृन्दमुदीक्ष्य तत् ।
चिन्तयामास वैराग्यवानिदं मेदिनीपतिः ॥४०९॥

दृष्टनष्टमिदं यादृग् घनाघनकदम्बकम् ।
संसृतौ तादृगेवायुर्विभवादि चलाचलम् ॥४१०॥

उदिते सति भूपस्य वैराग्यमयतेजसि ।
कोऽहमित्याकलय्येव रविरत्रान्तरेऽसरत् ॥४११॥

भूपालोऽपि दयितया स साक**मृषिदत्तया** ।
विरागतिमना धर्मवार्त्ताभिरनयद् निशम् ॥४१२॥

प्रातःकृत्यं च निर्माय यावदास्थानमास्थितः ।
आरादारामिकेणेयं तावदित्यभ्यधीयत ॥४१३॥

नाथ ! **भद्रयशाः** सूरिरुद्याने **कुसुमाकरे** ।
आगत्य सपरिवारः शमवान् समवासरत् ॥४१४॥

इत्याकर्ण्य वितीर्यास्मै पारितोषिकमञ्जसा ।
जगाम सपरिवारो नमस्कर्तुं गुरून् नृपः ॥४१५॥

प्रणम्याग्रे निविष्टेऽस्मिन् गुरुर्गम्भीरया गिरा ।
चकार भवनिस्तारदायिनीं देशनामथ ॥४१६॥

विधाय देशनां ज्ञानगुरौ तत्र गुरौ तदा ।
विरते सत्यदोऽवादी**दृषिदत्ता** कृताञ्जलिः ॥४१७॥

निर्मितं कर्म भगवन् ! किं मया पूर्वजन्मनि ।
राक्षसीति ममालीकः कलङ्को यदजायत ? ॥४१८॥

अथोवाच स तां साचीकृतप्राचीनकल्मषः ।
प्रतिबोधसुधावृष्टिपुष्पकरावर्तको गुरुः ॥४१९॥

§§ अस्तीह **भारते** भद्रे ! परं **गङ्गापुरं** पुरम् ।
अभूद् भूमीपति**र्गङ्गदत्त**स्तत्रातिविक्रमी ॥४२०॥

त्वमासीस्तस्य तनया **गङ्गा**कुक्षिसमुद्भवा ।
गङ्गसेनेति निःसीमशीलपालनपण्डिता ॥४२१॥

तत्रैवासीत् पुरे **चन्द्रयशाः** साध्वी तदन्तिके ।
मतं तीर्थकृतामाप भवती भवतीरदम् ॥४२२॥

ततः कृतरतिस्तत्र जगदेवसहोदरे । 5
विषयांस्त्वमवाञ्छासीरखिलान् खलसंनिभान् ॥४२३॥

तदा तु **चन्द्रयशसः** प्रवर्त्तिन्याः पदान्तिके ।
निःसङ्गा यतिनी **सङ्गा**भिधा काचित् तपस्यति ॥४२४॥

नमस्यति जनः स्तौति तपस्यन्तीमुदीक्ष्य ताम् ।
नान्यदस्ति सदाचारादपरं यशसे यतः ॥४२५॥ 10

तत्प्रशंसामतीव त्वं सहसे न तदा शुभे ! ।
स्यादेवैकगुणानां हि मत्सरच्छुरितं मनः ॥४२६॥

तस्याः श्लाघाविपर्यासमिच्छन्ती भवती ततः ।
अभ्याख्यानमतिप्रौढमदासीदूढमत्सरा ॥४२७॥

यदियं दम्भिनी **सङ्गा** तपस्यति दिवा तपः । 15
राक्षसीव पुना रात्रौ ग्रसते मृतकामिषम् ॥४२८॥

अभ्याख्यानमिदं साक्षात् प्रशमामृतदीर्घिका ।
तितिक्षामास सा **सङ्गा** भवभङ्गाभिधाविता ॥४२९॥

वत्से ! तुच्छस्त्वया कर्मबन्धः शर्मनिषूदनः ।
उपार्जितः पुनर्मिथ्यादुष्कृतादानतस्ततः ॥४३०॥ 20

तद्विपाकवशाद् भ्रान्त्वा भवं बहु मुहुर्मुहुः ।
~~कर्मशेषे~~ पुनर्**गङ्गा**पुरे राजसुताऽभव ॥४३१॥

ततः प्राप्तदिनाधीशमुनिव्रतविराजिता ।
अकार्षीः कपटात्तोपसंकटं विकटं तपः ॥४३२॥

पर्यन्ते तदनालोच्य दुष्कर्म कपटोद्भवम् ।
मृत्वाऽनशनतः प्राप **ईशानेन्द्र**कलत्रताम् ॥४३३॥
ततश्च्युत्वा च भवती **हरिषेण**महीपतेः ।
सुता **प्रीतिमती**कुक्षिभवाऽभूदाश्रमावनौ ॥४३४॥

§§ प्राचीनकर्मपरमाणुमहोदयेन भद्रे ! तवाभवदयं विपुलः कलङ्कः ।
दुष्कर्म मर्मभिदुरं हि दुरन्तमेव न क्षीयते भवशतैरपि देहभाजाम् ॥४३५॥
इति श्रुत्वा गुरोर्वाणीं वैराग्यद्रुमसारणीम् ।
सापि जातिस्मृतिज्ञानचक्षुषा सर्वमैक्षत ॥४३६॥
तदा किञ्च तदाकर्ण्य भूपालोऽपि विशेषतः ।
विरागितमनाः साक्षाद् गुरुं दीक्षामयाचत ॥४३७॥
ऋषिदत्तापि वैराग्यवती गुरुमजिज्ञपत् ।
एतदेव पुराकर्मभयात्तपृथुवेपथुः ॥४३८॥
उवाच गुरुप्येतद् विलम्बोऽत्र न युज्यते ।
असारेऽमुत्रे संसारे सारेयं हि तपःक्रिया ॥४३९॥
अथ तौ दम्पती **सिंहरथ**नामानमङ्गजम् ।
कृत्वा राजपदे दीक्षामाददाते तदन्तिके ॥४४०॥
तौ गृहीतव्रतौ खड्गधाराचङ्क्रमणोपमम् ।
चक्रतुर्द्वादशविधं तपः कपटवर्जितम् ॥४४१॥
अन्यदा जग्मतुः साकं गुरुभि**र्भद्रिलापुर**म् ।
पुरं **शीतल**तीर्थेशजन्मना पावनीकृतम् ॥४४२॥
तपोहुताशे किल कर्मजालं पलालपूलप्रतिमं विधाय ।
अवापतुस्तत्र पुरे गरीयः सत्केवलज्ञानमयं महस्तौ ॥४४३॥
गतवति विततायुःकर्मणि प्रान्तमन्तःकरणशरणवैरिध्वंसनादात्तकीर्त्तिः ।
अथ पृथु मथितापत् केवलद्वन्द्वमेतत् परमपदमुदारानन्दसंदोहमूहे ॥४४४॥

॥ इति ऋषिदत्ताकथा ॥

● ● ●

अथ **मृगावती**कथा —

§§ अस्ति **वत्सेषु कौशाम्बी** पुरी देवपुरीनिभा ।
मणिभिः स्वस्तिकन्यस्तैर्यत्र ज्योतिष्मतीव भूः ॥१॥
जैत्रानीकः **शतानीक** इति तत्राभवद् नृपः ।
मृगावती मृगाङ्कास्या प्रिया चास्य मृगेक्षणा ॥२॥
तत्र चित्रकरश्चैकः **साकेता**देत्य तस्थिवान् ।
एकांशदर्शनाद् वस्तुचित्रकृद् देवतावरात् ॥३॥
राजैकदा **शतानीकः** सभायां वैभवस्मयात् ।
दूतमूचेऽस्ति नो किं मे यदास्तेऽन्यमहीभुजाम् ? ॥४॥
तव चित्रसभा नास्तीत्यूचे दूतेन भूपतिः ।
सभाचित्रकृते चित्रकरानथ समादिशत् ॥५॥
चित्रविद्भिः सभाभूमिर्विभज्य समगृह्यत ।
तस्य चान्तःपुरासन्नदेशश्चित्रकृतोऽभवत् ॥६॥
तत्र चित्रं स कुर्वाणो जालकस्यान्तरेण च ।
पादाङ्गुष्ठं **मृगावत्याः** सरत्नोर्मिकमैक्षत ॥७॥
इयं **मृगावती** देवीत्यनुमानेन तामयम् ।
आलिलेख तथारूपां विनेयस्तद्विधेरिव ॥८॥
चक्षुष्युन्मील्यमाने तूरुमूले कूर्चिकामुखात् ।
निपपात मषीबिन्दुरपनिन्ये च तं द्रुतम् ॥९॥
भूयोऽपतद् मषीबिन्दुर्भूयः सोऽपि ममार्ज तम् ।
भूयश्च पतितं प्रेक्ष्य प्रेक्षावानित्यचिन्तयत् ॥१०॥
नूनमस्याः प्रदेशेऽत्र मषो भाव्यस्त्व्यं ततः ।
इति निर्मापिते चित्रे राजोपेत्य तदैक्षत ॥११॥
देव्यूरौ प्रेक्ष्य तं बिन्दुं क्रुद्धश्चायमचिन्तयत् ।
मत्कान्ताऽध्वस्यतानेन मषोऽबोधि किमन्यथा ? ॥१२॥

इति कोपेन तं दोषमुदीर्य नृपतिः स्वयम् ।
निग्रहायाग्रहात् तूर्णमारक्षाणां तमार्पयत् ॥१३॥

नृपं चित्रकृतोऽथोचुरसावेकांशदर्शनात् ।
लिखत्यखिलमालेख्यं यक्षदत्तवरौजसा ॥१४॥

इत्युक्तेऽस्य परीक्षार्थं राज्ञान्तर्धाय कुब्जिकाम् ।
अदर्श्यत मुखं तस्या अप्यलेखीच्च तां तथा ॥१५॥

तथापि क्षुद्रधी राजा तत्संदंशमकर्तयत् ।
चित्रकः सोऽपि **साकेत**यक्षमाराधयत् पुनः ॥१६॥

सोऽप्यूचे वामहस्तेन तद्वच्चित्रं करिष्यसि ।
एवं लब्धवरश्चित्रकरोऽमर्षादचिन्तयत् ॥१७॥

निरागास्तेन राज्ञाऽहं किमिमां प्रापितो दशाम् ।
तस्य प्रतिकरिष्ये तदुपायेनापि केनचित् ॥१८॥

एवं चित्रपटे कृत्वा **प्रद्योत**स्य महीपतेः ।
गत्वा **मृगावती** रूपं स मनोज्ञमदर्शयत् ॥१९॥

तत प्रेक्ष्य**वान्तिनाथो**ऽपि तमूचे चित्रकृद्वरम् ।
विधेर्घुणाक्षरस्ते वा वद केयं सुलोचना ? ॥२०॥

तन्वीयं यत्र कुत्रास्तीन्दिरेव नृपमन्दिरे ।
तस्मादेनां ग्रहीष्यामि गरुडः पन्नगीमिव ॥२१॥

ततश्चित्रकरः प्रीतः प्राह पूर्णमनोरथः ।
कौशाम्बीन्द्रस्य देवेयं पत्नीरत्नं **मृगावती** ॥२२॥

प्रद्योतः प्राह मन्येऽहं तृणायापि न तं नृपम् ।
राजनीतिस्तथाप्यस्तु यातु दूतस्तदर्थने ॥२३॥

इति प्रैषीदयं दूतं **शतानीका**य सोऽपि तम् ।
कद्वदं धारयामास गलेऽनर्गलमत्सरः ॥२४॥

क्रुद्धोऽतिदण्डभृच्**चण्डप्रद्योतो**ऽथ परन्दमः ।
चचाल प्रति **कौशाम्बीं** छादिताशामुखो बलैः ॥२५॥

सारङ्ग इव शार्दूलं तमायान्तं निशम्य सः ।
क्षोभाज्जातातिसारो द्राक् **शतानीको** व्यपद्यत ॥२६॥

देवी **मृगावती** दध्यौ पतिस्तावद् व्यपादि मे । 5
बालः स्वल्पबलः सूनुरसा**वुदयनो**ऽपि च ॥२७॥

बलीयसोऽनुसरणं नीतिः स्त्रीलम्पटे त्विह ।
सा मे कुलकलङ्काय तस्मात् कैतवमर्हति ॥२८॥

वाचिकैरनुकूलैस्तदेनमत्र स्थिताप्यहम् ।
प्रलोभ्य वञ्चयिष्यामि कालं स्वसमयाप्तये ॥२९॥ 10

विमृश्येत्यनुशिष्याथ दूतः प्रस्थापितस्तया ।
स्कन्धावारस्थितं गत्वा **चण्डप्रद्योत**मब्रवीत् ॥३०॥

ब्रूते **मृगावती**ति त्वां **शतानीके** दिवं गते ।
त्वमेव शरणं किन्तु पुत्रोऽप्राप्तबलो मम ॥३१॥

मया मुक्तोऽयामाशान्तदीप्तैरभिभविष्यते । 15
भृशं पितृविपत्त्युत्थैः शोकावेशैरिवारिभिः ॥३२॥

प्रद्योतस्तद्गिरा हृष्टोऽभाषिष्ट ननु वः सुतम् ।
पराभवितुमीशः स्यात् को नाम मयि गोप्तरि ? ॥३३॥

दूतोऽवदत् पुनर्देव ! देव्यैतदपि भाषितम् ।
जेतुं न कोऽप्यलम्भूष्णुः **प्रद्योते** सति मे सुतम् ॥३४॥ 20

देवपादाः परं दूरे समीपे सीमभूभुजः ।
तद् योजशनते वैद्यः सर्पोऽस्त्युच्छीर्षके पुनः ॥३५॥
निर्विघ्ने तद् मया योगं यदीच्छसि कुरुष्व तत् ।
इष्टाकाभि**रवन्त्या**स्तत् **कौशाम्ब्यां** वप्रमप्रमम् ॥३६॥

प्रद्योतस्तत् प्रपेदेऽथ चक्रे चाह्वाय तत् तथा ।
वीरा अपि हि कामेन क्रियन्ते भीरुकिङ्करा: ॥३७॥

भूयो **मृगावती** दूतमुखेनोचे पुरीमिमाम् ।
धनधान्येन्धनाद्यैस्त्वं **चन्द्रप्रद्योत** ! पूरय ॥३८॥

सर्वमह्वाय चक्रे तदपि **प्रद्योत**भूपति: ।
न किं कुर्याद् न किं दद्याद् नरो नारीभिरर्थित: ? ॥३९॥

पुरीं रोधक्षमां मत्वा शालयित्वा च तां भटै: ।
तस्थौ तस्या भवस्येव बद्ध्वा द्वाराणि सा सती ॥४०॥

प्रद्योतोऽप्यभितो रुद्ध्वा स्थित: सूत्कारदारुण: ।
मृगावतीपुरीं दुग्धगर्गरीमिव पन्नग: ॥४१॥

§§ अन्येद्युर्भववैराग्याद् दध्याविति **मृगावती** ।
यद्येति भगवान् **वीर:** प्रव्रजामि तदाऽऽश्वहम् ॥४२॥

तदाशयं च मत्वेति **श्रीवीर:** सुरसार्थयुक् ।
तत्रैत्येशानदिग्भागे शमवान् समवारत् ॥४३॥

बहिर्महिमपात्रं तं श्रुत्वाऽऽयातं **मृगावती** ।
निरीय नगरीतो निर्भीका नन्तुं समाययौ ॥४४॥

सा प्रणम्य जगन्नाथं यथास्थानमथास्थित ।
प्रद्योतोऽप्येत्य वन्दित्वा मुक्तवैरमुपाविशत् ॥४५॥

कामहृत्पूरदोषेण विपर्यस्तदृशां विशाम् ।
शर्करादुग्धदेशीयां देशनां विदधे विभु: ॥४६॥

"दौर्गत्यभिदुरं साध्वाराद्धं यत्तदिहाङ्गिभि: ।
कृच्छ्रादाप्येत मानुष्यं चिन्तारत्नभिवार्णवे ॥४७॥
तदपि प्राप्य विषयैर्गमयन्ति मुधा हहा ।
पादशौचेन पीयूषमिव दूषितवृत्तय: ॥४८॥

लिप्सुर्भोगान् पशुलोकस्तद्विपाकसंस्तुतम् ।
न पश्यति पयःपायी बिडालो लगुडं यथा ॥४९॥

स्वेच्छाविषयपुष्टानामन्ते घोरैव दुर्गतिः ।
पोषितानां यथा सूनापशूनामसुनाशिनी ॥५०॥

मिथः संभुक्तिजाप्यः स्त्रीपुंसो कामोऽस्ति भस्मकः । 5
तदेनं रोद्धुमिच्छन्ति प्रशमेन शिवार्थिनः ॥५१॥

अथ सानन्दमुत्थाय समयज्ञा **मृगावती** ।
शिरस्यञ्जलिमाधाय धन्या व्यज्ञपयद् विभुम् ॥५२॥

"तदात्वकल्पिताद् नाथ ! मत्सङ्कल्पात् त्वमागतः ।
कथं कल्पद्रुमो नासि नासि चिन्तामणिः कथम् ? ॥५३॥ 10
ममैषा नन्दथुर्नाथ ! विषयध्वंसदेशना ।
त्वयाऽकारीन्दुना वर्या चकोर्या इव चन्द्रिका ॥५४॥

तद् **मालवे**शमापृच्छ्य प्रव्रजिष्यामि सम्प्रति ।
विज्ञप्येति विभुं प्राह **प्रद्योतं** द्युतिमन्मुखी ॥५५॥

यत् तवास्याभिलाषस्य जातास्मि प्रातिकूलिकी । 15
आत्मानुकूलमेवैतज्जानीयास्त्वं जनाधिप ! ॥५६॥

भगवद्वदनाम्भोजकिञ्जल्कान् कल्कहारिणः ।
उपदेशानिमानीश ! कदाचिद् सा स्म विस्मर ॥५७॥

इदानीमनुमन्यस्व संयमग्रहणाय माम् ।
तयेत्युक्तोऽनुमेने तां नृपोऽपि त्रपया नतः ॥५९॥ 20
आयतिज्ञा नृपोत्सङ्गे क्षिप्त्वोदयमात्मजम् ।
दत्त्वा दानानि दीनेभ्यः प्रपेदे साथ संयमम्" ॥५९॥

तां गृहीतव्रतां **वीरो**ऽनुशास्य भगवानपि ।
तदा **चन्दनबालायाः** प्रवर्त्तिन्याः समार्पयत् ॥६०॥

ततोऽगादन्यतः स्वामी तमोहा भानुमानिव ।
कृत्**वोदयन**साद् वत्सान् **प्रद्योतो**ऽपि निजां पुरीम् ॥६१॥

कालक्रमेण केनापि विहरन् भगवानथ ।
पुरी**मुदयन**क्ष्मापगुप्तां तां पुनराययौ ॥६२॥

निविष्टं त्रिदशोपज्ञे देशनासदसि प्रभुम् ।
वत्सराजो नमस्कर्तुमागमत् सपरिच्छदः ॥६३॥

प्रभोश्चरमपौरुष्यां वन्दनायेन्दुभास्करौ ।
स्वाभाविकविमानस्थौ तस्यां युगपदीयतुः ॥६४॥

चन्दना समयं ज्ञात्वा नत्वेशं वसतौ गता ।
तदा **मृगावती** त्वस्थात् तद्भासा दिवसभ्रमात् ॥६५॥

चन्द्रार्कयोरथोपास्य जिनेशं गतयोस्तयोः ।
जाते तमसि चात्मानमन्वशोचद् **मृगावती** ॥६६॥

हहा प्रमादिनीं धिग् मां यदायान्ती मया निशा ।
नैवालक्ष्यत यान्ती च प्रवर्त्तिन्यपि शून्यया ॥६७॥

तस्यां यास्ये कथं ध्वान्ते शुध्यतीर्यापथः कथम् ? ।
शोचन्तीति स्खलन्ती सा रुदती चाचलत् पथि ॥६८॥ युग्मम् ॥

आगाच्च व्रतिनीवृन्दस्वाध्यायध्वनिबन्धुरम् ।
गतातिचारचारिपात्रसंश्रयाश्रयम् ॥६९॥

आवश्यकान्तविश्रान्तां संस्तारकतले तदा ।
मृगावती शनैरेत्य तत्रावन्दत **चन्दना**म् ॥७०॥

विनयेन नमस्यन्तीमवगम्य **मृगावती**म् ।
उपालब्ध वचोभिस्तां **चन्दना** चन्दनोपमैः ॥७१॥

"नक्तमेकाकिनी साध्वि ! तत्र स्थाने स्थितासि किम् ? ।
निशामप्यसमप्रज्ञे ! न हि ज्ञातवती कथम् ? ॥७२॥

इतरापि तमस्विन्यां संचरन्ती कुलाङ्गना ।
अन्यथा शङ्क्यते लोकैः किं पुनर्न तपोधना ? ॥७३॥

चेटकस्यासि पुत्री त्वं शिष्या वीरस्य च प्रभोः ।
प्रभावत्यादयस्तास्ते महासत्यश्च यामयः ॥७४॥

आयुष्मति ! प्रमादोऽयं तत् ते नाभूत् कुलोचितः ।
उपात्तमुनिवृत्तीनामसौ हि परमो रिपुः'' ॥७५॥

इत्युक्ते **चन्दनां** तस्याः क्षमयन्त्या मुहुर्मुहुः ।
घातिक्षयाद् **मृगावत्याः** केवलज्ञानमुद्ययो ॥७६॥

निद्रान्त्याश्च प्रवर्त्तिन्या भुवो बाहुमुदक्षिपत् ।
तत्पार्श्वे सा प्रसर्पन्तं सर्पमालोक्य केवलात् ॥७७॥

तस्यास्तेन प्रयत्नेन जजागार प्रवर्त्तिनी ।
मनसा स प्रसन्नेन निजगाद **मृगावतीम्** ॥७८॥

भद्रेऽद्यापि तथैवासि मम संवाहनापरा ।
धिग् मदीयोऽपराधोऽयं यद् विसृष्टासि नो मया ॥७९॥

किञ्च बाहुस्त्वया भूमेः किमुदासीति भाषिता ।
महाहिरिह यातीति शशंस च **मृगावती** ॥८०॥

भूयोऽपि **चन्दनो**वाच सूचिमेद्येऽपि तामसे ।
मृगावति ! कथं दृष्टस्त्वयाऽहिर्विस्मयो मम ॥८१॥

मृगावती भगवतीत्याचचक्षे प्रवर्त्तिनी ! ।
उत्पन्नकेवलज्ञानचक्षुषा दृष्ट्वत्यहम् ॥८२॥

केवल्याशातिनीं धिग् मामित्यश्रान्तं स्वगर्हया ।
उत्पेदे केवलज्ञान **चन्दना**या अपि क्षणात् ॥८३॥

आयुष्कर्मान्ते तौ केवलिनौ त्रिभुवनश्रिया मूर्ध्नि ।
रत्नत्वं भेजाते मुक्तालीकेशपाशान्तः ॥८४॥

॥ इति मृगावतीकथा ॥

● ● ●

अथ सतीवर्गोपसंवर्गणकथामाह –

इयमाइ सलहणिज्जा महासई जाण सुद्धचरियाण ।
वाइज्जइ सीलगुणो पयडु व्व जयम्मि जसपडहो ॥५९॥

[इत्यादयः श्लाघनीया महासत्यो यासां शुद्धचरितानाम् ।
वाच्य(द्य)ते शीलगुणः प्रकट इव जगति यशःपटहः ॥]

व्याख्या । **इत्यादयो महासत्यः श्लाध्याः** स्तुत्याः । 'जाण सुद्धचरियाण' **यासां शुद्धचरितानां** 'सीलगुणो वाइज्जइ' शीलमेव सर्वसिद्धिनिबन्धनं स्वस्वभाव एव गुणः **शीलगुणः वाच्यत** उद्घुष्यते । 'पयडु व्व जयम्मि जसपडहो' **प्रकटो जगति यशःपटह इव** स तु वाद्यत इति ॥५९॥

अथ गाथायुगेन गुणनुमोदनासंग्रहमाह –

गुणगारवं जिणाणं सिद्धसरूवं च सव्वसिद्धाणं ।
आयरियाणायारं उज्झायाणं च अज्झयणं ॥६०॥

सच्चरियं साहूणं जं सुहकिच्चं च सावयाणं पि ।
अणुमोएमि सहरिसं तं चिय उल्लसियरोमंचो ॥६१॥

[गुणगौरवम् जिनानां सिद्धस्वरूपं च सर्वसिद्धानाम् ।
आचार्याणामाचारमुपाध्यायानां चाध्ययनम् ॥

सच्चरितं साधूनां यच्छुभकृत्यं च श्रावकाणामपि ।
अनुमोदे सहर्षं तदेवोल्लसितरोमाञ्चः ॥]

व्याख्या । **उल्लसितः** प्रादुर्भूतो **रोमाञ्चः** पुलको यस्य स तथा अहम्, 'सहरिसं' **सहर्षम्,** 'अणुमोएमि' **अनुमोदयामि** । किम् ? 'तं चिय' **तदेव** । तत्किम् ? इत्याह –'गुणगारवं' **गुणानां** चतुस्त्रिंशदतिशयरूपाणां पञ्चत्रिंशद्वचनातिशयात्मनां वा **गौरवं** माहात्म्यम् । केषाम् ? **जिनानाम्**–अर्हताम् । 'सिद्धसरूवं च' **चः** समुच्चये, सिद्धस्यानन्तज्ञानदर्शनवीर्यानन्दरूपं **सिद्धस्वरूपम्** । केषाम् ?

'सव्वसिद्धाणं' सर्वे च ते तीर्थातीर्थतीर्थकरातीर्थकरप्रत्येकबुद्धस्वयंबुद्धबोधित-पुंलिङ्गनपुंसकलिङ्गपरलिङ्गगृहलिङ्गैकानेकादिभिः पञ्चदशभिर्भेदैः सिद्धाः **सर्वसिद्धाः** । तत्र नपुंसकलिङ्गसिद्धास्तीर्थकरसिद्धा न भवन्त्येव । प्रत्येकबुद्ध-सिद्धास्तु पुंलिङ्गसिद्धा एव स्वलिङ्गेन रजोहरणादिना द्रव्यलिङ्गेन सिद्धाः स्वलि-ङ्गसिद्धाः । अन्येषां परिव्राजकादीनां लिङ्गेन सिद्धा अन्यलिङ्गसिद्धाः । गृहिलिङ्ग- 5
सिद्धा अतीर्थसिद्धाश्च **मरुदेव्या**दयः । एकैकस्मिन् समये एकाकिनः सिद्धा एकसिद्धाः । एकस्मिन् समयेऽष्टोत्तरशतं यावत् सिद्धा अनेकसिद्धाः। यदाह—

"[१]**अडवीसा (बत्तीसा) अडयाला सट्ठी बावत्तरी य बोद्धव्वा ।**
चुलसी य छन्नउई दुरहियमट्ठुत्तर सयं च" ॥ [बृ.सं./२५७] इति ।

तेषाम् । 'आयरियाणायारं' **आचार्याणां** गणभृतां ज्ञाने दर्शने चरणे तपसि 10
चाचरण**माचारस्तत्** । 'उज्झायाणं च अज्झयणं' च पुनरर्थे, **उपाध्यायानामध्ययनं** सिद्धान्तपाठस्तत् । 'सच्चरियं साहूणं' **साधूनां** महर्षीणां **सत्** समीचीनं **चरितम**-ष्टादशशीलाङ्गसहस्रधुराधरणस्वरूपं तत् । किं बहुना ? 'जं सुहकिच्चं च सावयाणं पि' चः समुच्चये, **यत् शुभकृत्यं** सत्कर्मे देवपूजा-गुरूपास्ति-स्वाध्याय-संयम-तपो-दानादि **श्रावकाणामपि तत्** । 'अनुमोदयामि' इति संबन्धः ॥६०॥ ॥६१॥ 15

॥ इत्याचार्यश्रीबालचन्द्रविरचितायां विवेकमञ्जरीवृत्तौ
गुणानुमोदनाद्वारविवरणं नाम द्वितीयः परिमलः ॥

● ● ●

अन्तर्नभोजलधिकुण्डलिताहिराजरम्ये विधौ विदलिताञ्जनकान्तिलक्ष्म ।
आसीनकेशववतुलामिदमेति यावत् तावज्जयं कलयतायदिह जैत्रसिंहः ॥

● ● ●

---

१. अष्टाविंशतिः (द्वात्रिंशत्) अष्टचत्वारिंशत् षष्टिर्द्वासप्ततिश्च बोद्धव्याः ।
चतुरशीतिश्च षण्णवतिर्द्ध्यधिकमष्टोत्तरं शतं च ॥

अथ दुष्कृतगर्हाद्वारमाह—

अरहंतसिद्धचेईयसिद्धंताईण जयपवित्ताणं ।
जं आसाईयमिण्हिं मह मिच्छा दुक्कडं तत्थ ॥६२॥

[अर्हत्सिद्धचैत्यसिद्धान्तादीनां जगत्पवित्राणाम् ।
यदाशातितंमदानीं मम मिथ्या दुष्कृतं तत्र ॥]

व्याख्या । 'अरहंत त्ति' **अर्हन्तो** जिनाः, **सिद्धाः** प्रक्षीणशेषकर्माणः, **चैत्यानि** जिनयतनानि, **सिद्धान्तः** प्रवचनम्, त एते आदौ **येषां** ते तथा गुरुस्थविरोपाध्याय-तपस्विनस्**तेषाम्**; 'जयपवित्ताणं' **जगत्पवित्राणां** 'जं आसाइयं' **यद् आशातितम्** अवज्ञातम्; 'इण्हिं' **इदानीं** 'मह मिच्छा दुक्कडं तत्थ' **तत्रा**शातनाविषये **मम मिथ्या दुष्कृतमि**ति ॥६२॥

अथ जिनवाणीं क्षमयन्नाह—

पयअक्खरमत्ताए अहियं हीणं च जं मए गुणियं ।
तं तित्थयरपयासियवाणीए मज्झ खमियव्वं ॥६३॥

[पदाक्षरमात्रयाऽधिकं हीनं च यन्मया गुणितम् ।
तीत्तीर्थकरप्रकाशितवाण्या मम क्षन्तव्यम् ॥]

स्पष्टा ॥६३॥

अथ गाथात्रयेण सङ्घमभिष्टुत्य क्षमयन्नाह—

जयइ सुरासुरनमिओ गुणरयणमहोयही सुहावासो ।
तित्थयरमाणणीओ चउविहसिरिसमणसंघो य ॥६४॥

[जयति सुरासुरनतो गुणरत्नमहोदधिः शुभ(सुधा)वासः ।
तीर्थकरमाननीयश्चतुर्विधश्रीश्रमणसङ्घश्च ॥]

व्याख्या । **चतुर्विधः** साधुसाध्वीश्रावकश्राविकारूपः, श्राम्यति तपःशीलभावना-

दानैस्तपस्यतीति श्रमणः स चासौ श्रिया शोभयोपलक्षितः संघः **श्रीश्रमणसङ्घः**; **चः** समुच्चये; **जयति** सर्वोत्कर्षेण वर्तते । किंविशिष्टः ? 'सुरासुरनमिओ' सुरा वैमानिकज्योतिष्काः, असुरा भवनव्यन्तरा मर्त्याश्च तैर्नमितो वन्दितः **सुरासुरनमितः**। 'गुणरयणमहोयही' **गुणाः** कृपादयस्त एव **रत्नानि तेषां महोदधिः** समुद्रः। अत एव 'सुहावासो' **शुभं** श्रेयस्**तदावासः**, समुद्रोक्तिलेशे तु **सुधा** पीयूषं **तदावासः**। पुनः किंविशिष्टः सङ्घः ? 'तित्थयरमाणणीओ' **तीर्थकरा** जिनास्तै**र्माननीयो** वन्दनीयः । इतश्च समुद्रोऽपि, तीर्थमवतारं कुर्वन्ति **तीर्थकरा**स्तारकास्तै**र्माननीयः** स्यादिति ॥६४॥

तं भगवंतं अणहं नियसत्तीए अणग्घभत्तीए ।
सक्कारेमि य संमाणेमि य सिरसा नमंसामि ॥६५॥

[तं भगवन्तमनघं निजशक्त्याऽनर्घ्यभक्त्या ।
सत्करोमि च सम्मानयामि च शिरसा नमस्यामि ॥]

व्याख्या । **तं** श्रीश्रमणसङ्घं **भगवन्तं** पूज्यं 'अणहं' **अनघं** निष्पापं 'नियसत्तीए' **निजशक्त्या** 'अणग्घभत्तीए' **अनर्घ्यभक्त्या** महद्भक्त्या यथाक्रमं 'सक्कारेमि य' **सत्करोमि च** प्रवरवस्त्राभरणैरभ्यर्चयामि च 'सम्माणेमि य' **सन्मानयामि च** गुणोन्नतिक्रियया स्तवीमि च, **शिरसा** उत्तमाङ्गेन, आदरप्रदर्शनार्थं चैतत्, 'नमंसामि' **नमस्यामी**ति ॥६५॥

जं तस्स मए कत्थ वि पडिकूलं कह वि विप्पियं विहियं ।
आसायणा तह कया कया वि खामेमि तं सव्वं ॥६६॥

[यत्तस्य मया कुत्रापि प्रतिकूलं कथमपि विप्रियं विहितम् ।
आशातना तथा कृता कदापि क्षमयामि तत्सर्वम् ॥]

व्याख्या । **यत् तस्य** भगवतः श्रीश्रमणसङ्घस्य 'मए' **मया** 'कत्थ वि' **क्वापि** समये 'पडिकूलं' **प्रतिकूलं** हितोपदेशविपरीताचरणं 'कह वि' **कथमपि** प्रमादेनेत्यर्थः 'विप्पियं' **विप्रियम**निष्टाचरणं 'विहियं' **विहितम्**, 'आसायणा तह

कया' **अशातना** हस्तपादादिसंघट्टना **तथा कृता** 'कया वि' **कदापि,** 'खामेमि तं सव्वं' **क्षमयामि तत् सर्वमशेषमिति** ॥६६॥

अथ गाथात्रयेण धर्ममुत्कीर्त्य क्षमयन्नाह –

अहिंसालक्खणो धम्मो गुणाण रयणायरो ।
भासिओ वीअराएहिं मुक्खसुक्खाण कारणं ॥६७॥

[अहिंसालक्षणो धर्मो गुणानां रत्नाकरः ।
भाषितो वीतरागैर्मोक्षसौख्यानां कारणम् ॥]

स्पष्टा ॥६७॥

दहभेओ जइधम्मो सावयधम्मो य बारस वयाइं ।
भणिओ थूलगपाणाइवायविरमणपुरोगाइं ॥६८॥

[दशभेदो यतिधर्मः श्रावकधर्मश्च द्वादश व्रतानि ।
भणितः स्थूलप्राणातिपातविरमणपुरोगाणि ॥]

व्याख्या । पूर्वगाथोपदिष्टो धर्मस्तावद् द्विप्रकारो यतिधर्मः श्रावकधर्मश्च । तत्र 'दहभेओ जइधम्मो' **दशभेदो यतिधर्मः**, यदाहुः–

"[१]**खंती य मद्दवज्जवमुत्ती तवसंजमे य बोद्धव्वे ।**
सच्चं सोयं आकिंचणं च बंभं च जइधम्मो" ॥ [**प्र.सा./५५४**]

'सावयधम्मो बारस वयाइं भणिओ' भणित उपदिष्टः । कोऽसौ ? **श्रावक-धर्मः** । च पुनरर्थे । किंरूपः ? 'बारस वयाइं' द्वादश च व्रतानि च **द्वादशव्रतानि** । किंविशिष्टानि ? 'थूलगपाणाइ त्ति' **स्थूलकं** च तद् बादरं **प्राणातिपातविरमणं** च तत्तथा, **तत् पुरोगं** मुख्यं येषां **तानि** । यदाहुः–

---

१. क्षान्तिश्च मार्दवार्जवमुक्तयस्तपःसंयमौ च बोद्धव्याः ।
सत्यं शौचमाकिञ्चन्यं च ब्रह्म च यतिधर्मः ॥

"[1]पाणिवहमुसावाए अदत्तमेहुणपरिग्गहे चेव ।
दिसिभोगदंडसमईदेसे तह पोसहविभागो" ॥ [सं.प्र./११२१] ॥६८॥

संकाकंखविगिच्छा मिच्छादिट्ठिस्स संथवपसंसा ।
आसायणं च कत्थ वि कयं तं खमावेमि ॥६९॥

[शङ्काकाङ्क्षाविचिकित्सा मिथ्यादृष्टेः संस्तवप्रशंसे । 5
आशातनं च कुत्रापि तस्य कृतं तत्क्षमयामि ॥]

व्याख्या । "**द्वितीयादेः**" इति प्राकृतलक्षणात् 'तस्स' तत्र दशद्वादशोभयभेदधन्ये जिनोपज्ञे सम्यक्त्वमूले भवजलधिपरकूले चिदानन्दलक्ष्मीहर्म्ये धर्मे **शङ्का** संशयकरणं, **काङ्क्षा** अन्यान्यदर्शनग्रहणेच्छा, **विचिकित्सा** फलं प्रति सन्देहः, 'मिच्छादिट्ठिसंथवपसंसा' **मिथ्यादृष्टीनां** शाक्यादीनां **संस्तवः** परिचयः, तेषामेव प्रशंसा 10 स्तुतिः 'आसायणं च' मनोवाक्कायैरवज्ञाकरणमाशातनं 'कत्थ वि' **कस्मिन्नपि** भवे **कुत्रापि** प्रस्तावे **ववापि** विषये **कृतं** यत् 'तं खमावेमि' **तत् क्षमयामि** सानुतापेन मनसा तद् व्युत्सृजामीति भावः ॥६९॥

अथात्मनः सप्तक्षेत्रीदानमनुकम्पादानं च गाथायुगेन शंसन्नाह—

जिणसमयपसिद्धेसु सत्तसु गुणसमिद्धेषु । 15
जं चिय दिन्नं दाणं भत्तीए कयं च सम्माणं ॥७०॥

जं विहियं सुहकिच्चं अन्नं पि मए जिणाण आणाए ।
तं सव्वं पि अणग्घं मम हुज्जा मुक्खसुक्खफलं ॥७१॥

[जिनसमयप्रसिद्धेषु•सप्तसु क्षेत्रेषु गुणसमृद्धेषु ।
यदेव दत्तं दानं भक्त्या कृतश्च सम्मानः ॥ 20
यद् विहितं शुभकृत्यमन्यदपि मया जिनानामाज्ञया ।
तत्सर्वमप्यनर्घ्यं मम भवेद् मोक्षसौख्यफलम् ॥]

---

१. प्राणिवधमृषावादावदत्तमैथुनपरिग्रहाश्चापि ।
दिग्भोगदण्डसामायिकदेशास्तथा पौषधविभागौ ॥

व्याख्या । **जिनानाम**र्हतां समयः शासनं स तथा **तत्र प्रसिद्धेषु** विख्यातेषु **सप्तषु** जिनबिम्ब-जिनभवन-जिनागम-साधु-साध्वी-श्रावक-श्राविकात्मसु 'गुणसमिद्धेसु' गुणास्तावद् भव्यजनमनप्रमोदजननप्रभृतयः सप्तानामपि साधारणाः, जिनबिम्बस्य तु प्रसादनीयत्वं विशिष्टलक्षणलक्षितत्वं प्रातिहार्यविराजितत्वं लोकोत्तरोदात्तशान्तमुद्रयाऽऽह्लादकत्वेन भव्यानां कर्मनिर्जराहेतुत्वम्, यदाहुः—

"[१]पासाईया पडिमा लक्खणजुत्ता समत्तंलकरणा ।
जह पल्हाएइ मणं तह निज्जरमो वियाणाहि" ॥ [व्य.भा./उ. ६/१८९]

जिनभवनस्य तु भव्यानां धर्मध्यानैकतानताहेतुत्वं परमान्दजनकत्वं प्रव्रज्याकरणोत्थापनाचार्यपदस्थापनाधर्मदेशनासङ्गागमनप्रभावनाभिर्मोक्षाङ्गत्वं च, यदाहुः—

"[२]पिच्छिस्सं इत्थ अहं वंदणगानिमित्तमागए साहू ।
कयपुन्ने भगवंते गुणरयणनिही महासते ॥ [पं.व./११२६]

पडिबुज्झिस्संति इण्हिं दट्ठूण जिणिंदबिंबमकलंकं ।
अन्नेवि भव्वसत्ता काहिंति तओ परं धम्मं ॥ [पं.व./११२७]

ता एवं मे वित्तं जमित्थमुवओगमेइ अणवरयं ।
इय चिंतापरिवडिया सासयबुद्धीउ मुक्खफला" ॥ [पं.व./११२८]

जिनागमस्य तु कुशास्त्रजनितसंस्कारविषमूर्च्छापहारकर्मणि महामन्त्रायमाणत्वं धर्माधर्मकृत्याकृत्यभक्ष्याभक्ष्यपेयापेयगम्यागम्यसारासारादिविवेचनाहेतुत्वम्, यदाहुः—

---

१. प्रासादीया प्रतिमा लक्षणयुक्ता च्च समस्तालंकरणा ।
यथा प्रह्लादयति मनस्तथा निर्जरां तु विजानीहि ॥

२. द्रक्ष्याम्यत्राहं वन्दननिमित्तमागतान् साधून् ।
कृतपुण्यान् भगवतो गुणरत्ननिधीन् महासत्त्वान् ॥
प्रतिभोत्स्यन्त इह दृष्ट्वा जिनेन्द्रबिम्बमकलङ्कम् ।
अन्येऽपि भव्यसत्त्वाः करिष्यन्ति ततः परं धर्मम् ॥
तस्मादेवं मे वित्तं यदत्रोपयोगमेत्यनवरतम् ।
इति चिन्तापरिवृताः शाश्वतबुद्धयो मोक्षफलाः ॥

"[१]सुयनाणम्मि नेउन्नं केवले तयणंतरं ।
अप्पणो य परेसिं च जम्हा तं परिभावियं" ॥ [ ]

अपि च, अस्य केवलज्ञानादपि प्रामाण्यातिरेकित्वं च, यदाहुः—

"[२]ओहा सुउवउत्तो सुयनाणी जइ हु गिण्हइ असुद्धं ।
तं केवली विभंजइ अपमाणसुअं भवे इहरा" ॥ [ ] 5

साधुसाध्वीनां च जिनवचनानुसारेण निर्वाणसाधकत्वं सर्वजीवदयापरत्वं व्रतशीलतपोयुक्तत्वं सद्गतिकाङ्क्षित्वं च, यदुक्तम्—

"निर्वाणसाधकान् साधून् सर्वजीवदयापरान् ।
व्रतशीलतापोयुक्तान् वन्दे सद्गतिकाङ्क्षणः" ॥ [ ]

श्रावकश्राविकाणां च विशुद्धसिद्धान्तानुप्रेक्षया श्रद्धासमृद्धिपावकत्वम्, सुपात्रेषु 10
च न्यायोपात्तवित्तवापकत्वम्, साधुवर्गसंसर्गात् पापावकरविक्षेपकत्वं च, यदुक्तं निरुक्त्याम्—

"श्रद्धालुताश्रान्तपदार्थचिन्तनाद् धनानि पात्रेषु वपत्यनारतम् ।
किरत्यपुण्यानि सुसाधुसेवनादथापि तं श्रावकमाहुरञ्जसा" ॥ इति । [ ]

तैः सम्यग् ऋद्धानि उपचितानि गुणसमृद्धानि तेषु **गुणसमृद्धेषु** 'जं चिय दाणं' 15
'चिय त्ति' अवधारणे, **यद् दानं दत्तं** जिनबिम्बजिनभवनजिनागमसाधुसाध्वीष्विति मन्तव्यम् । तत्र जिनबिम्बे श्री**कालिका**चार्यप्रभृतिगणभृत्प्रणीतसप्तप्रतिष्ठाकल्पोक्तविधिना प्रतिष्ठापनम्, अष्टाभिश्च प्रकारैरभ्यर्चनम्, यात्राविधानम्, विशिष्टाभरणभूषणम्, विचित्रवस्त्रैः परिधापनमिति । यदाह—

---

१. श्रुतज्ञाने नैपुण्यं केवले तदनन्तरम् ।
आत्मनश्च परेषां च यस्मात्तत् परिभावितम् ॥

२. ओघात् श्रुतोपयुक्तः श्रुतज्ञानी यदि खलु गृह्णात्यशुद्धम् ।
तत्केवली विभनक्ति अप्रमाणश्रुतं भवेदितरथा ॥

"[१]करिज्ज तम्हा पडिमा जिणाणं ण्हाणं पइट्ठाबलिपूयजत्ता ।
अणच्चयाणं च चिरंतणाणं जहारिहं रक्खणवद्धणंति" ॥ [ ]

जिनभवने तु शल्यादिरहितायां भुवि स्वयं सिद्धस्योपलकाष्ठप्रमुखदलस्य ग्रहणेन, सूत्रधारादिभृतकानतिसन्धानेन, भृत्यानामधिकमूल्यावितरणेन, षड्जीवनिकाय-रक्षायतनया विधापनम्, तस्य च जीर्णस्य शीर्णस्य च समारचनम्, नष्टस्य भ्रष्टस्य चोद्धरणम्। तत्र देवाधिदेवस्य क्षीरस्नानाय गोकुलप्रदानम्, कुसुमपूजार्थं चाराम-वितरणम्, वाद्यनादनृत्यपूजाकृतः प्रमदाकुलस्य वृत्तये पुरनगरग्रामदेशदानम्, भग्न-रुग्णसमारचनविधये द्रविणवितरणं चेति । यदुक्तम्—

"[२]दिज्जा दवं मंडलगोउलाइं जिन्नाइं सिन्नाइं समारइज्जा ।
नट्ठाइं भट्ठाइं समुद्धरिज्जा मुक्खंगमेयं खु महाफलं ति" ॥ [ ]

जिनागमे तु पुस्तकलेखनम्, वस्त्रादिभिरभ्यर्चनम्, यदुक्तम्—

"लेखयन्ति नरा धन्या ये जिनागमपुस्तकम् ।
ते सर्वं वाङ्मयं ज्ञात्वा सिद्धिं यान्ति न संशयः" ॥ [योग.शा./३/१११वृ.]

लिखितानां च पुस्तकानां संविग्नगीतार्थेभ्यो बहुमानपूर्वकं व्याख्यानार्थं च दानम्, व्याख्यायमानानां च प्रतिदिनं पूजापूर्वकं श्रवणम्, तत्पाठकानां भक्तिपूर्वकं सम्माननं चेति । यदाह—

"पठति पाठयते पठतामसौ वसनभोजनपुस्तकवस्तुभिः ।
प्रतिदिनं कुरुते य उपग्रहं स इह सर्वविदेव भवेद् नरः" ॥ [ ]

साधुषु च जिनवचनानुसारेण सम्यक्चारित्रमनुपालयत्सु आ तीर्थकरगणधरेभ्यः, आ च तद्दिनदीक्षितेभ्यः सामायिकसंयतेभ्यो यथोचितप्रतिपत्त्योपकारिणां प्रासुकैष-णीयानां कल्पनीयानां चाशनादीनां, रोगापहारिणां च भैषजादीनां, शीतादिवारणार्थानां

---

१. कुर्यात्तस्मात्प्रतिमा जिनानां स्नानं प्रतिष्ठाबलिपूजायात्राः ।
अनर्चकानां च चिरंतनानां यथार्हं रक्षणवर्धनमिति ॥

२. दद्याद् द्रव्यं मण्डलगोकुलादि जीर्णानि शीर्णानि समारचयेत् ।
नष्टानि भ्रष्टानि समुद्धरेन्मोक्षाङ्गमेतत्खलु महाफलमिति ॥

च वस्त्रादीनां, प्रतिलेखनाहेतो रजोहरणादीनां, भोजनाद्यर्थं च पात्राणाम्, औपग्रहिकाणां च दण्डकादीनां, निवासार्थमाश्रयाणं च दानम्, साधुधर्मोद्यतस्य स्वपुत्रपुत्र्यादेरपि समपर्णमिति । यदुक्तम्—

"[१]**काले पत्ताण पत्ताण धम्मसद्धाकमाइणा ।**
असणाईण दव्वाणं दाणं सव्वत्थसाहणं ॥ [मू.शु./८२]

असणं खाइमं पाणं साइमं मेसहोसहम् ।
वत्थं पडिग्गहं चेव रओहरणकंबलं ॥ [मू.शु./८३]

पीढगं फलगं चेव सज्जा संथारयं तहा ।
धम्मोवगरणं नाउं नाणाईणं पसाहणं" ॥ [मू.शु./८४]

तथा रत्नत्रयधारिणीषु साध्वीषु साधुष्विव यथोचिताहारादिप्रदानम्, यदाह—

"[२]**साहूण जं पावयणे पसिद्धं तं चेव अज्जाण वि जाण किच्चं ।**
पाएण ताणं नवरं विसेसो वट्टावणाई बहुनिज्जरं ति" ॥ [ ]

कया ? 'भत्तीए' **भक्त्या** 'जं कयं च सम्माणं' **यत् कृतं च सन्मानं** वात्सल्यं श्रावकेष्विति मन्तव्यम् । साधर्मिकाः खलु श्रावकस्य श्रावकः, समानधार्मिकाणां च सङ्गमोऽपि महते पुण्याय, किं पुनस्तदनुरूपा भक्तिः ? । सा च स्वपुत्रादिजन्मोत्सवे विवाहेऽन्यस्मिन्नपि तथाविधे प्रकरणे साधर्मिकाणां निमन्त्रणम्, विशिष्टभोजनताम्बूलवस्त्राभरणादिदानम्, आपन्निमग्नानां च स्वधनव्ययेनाप्युद्धरणम्, अन्तरायदोषाच्च विभवक्षये पुनः पूर्वभूमिकाप्रापणम्, धर्मे च विषीदतां तेन तेन

---

१. काले प्राप्तेभ्यः पात्रेभ्यो धर्मश्रद्धाक्रमादिना ।
अशनादीनां द्रव्याणां दानं सर्वार्थसाधनम् ॥
अशनं खादिम पानं स्वादिमं भैषज्यौषधम् ।
वस्त्रं प्रतिग्रहं चापि रजोहरणकम्बलम् ॥
पीठकं फलकं चापि शय्या संस्तारकस्तथा ।
धर्म्मोपकरणं ज्ञात्वा ज्ञानदीनां प्रसाधनम् ॥

२. साधूनां यत्प्रवचने प्रसिद्धं तदेवार्याणामपि जानीहि कृत्यम् ।
प्रायेण तासां केवलं विशेषो वर्तनादि (?) बहुनिर्जरमिति ॥

प्रकारेण धर्मे स्थैर्यारोपणम्, प्रमाद्यतां च स्मारणवारणादिकरणम्, वाचना-प्रच्छना-परिवर्त्तना-ऽनुप्रेक्षाधर्मकथादिषु यथायोग्यं विनियोजनम्, विशिष्टधर्मानुष्ठानकरणार्थं च साधारणपौषधशालादेः करणमिति । श्राविकासु च सन्माननं श्रावकवदन्यूनातिरिक्तमुन्नेतव्यम्, यदुक्तम्—

"[१]**जं सावयाणं करणिज्जमुत्तं तं सावियाणं पि मुणेह सव्वं ।**
तित्थाहिवाणं वयणे रयाणं ताणं विभागेण विसेसकिच्चं" ॥ इति । [ ]

'जं विहियं सुहकिच्चं अन्नं पि मए' **मया यद् विहितं शुभकृत्यं** धर्मकार्यमन्यदपि । कोऽत्र भावः । अविचारितपात्रापात्रमविमृष्टकल्पनीयाकल्पनीयप्रकारं केवलयैव करुणाया दीनेष्वार्त्तेषु भीतेषु जीवितं याचमानेषु प्रतीकारकृते धनवितरणादि यत् कृतम् । किं स्वच्छन्दम् ? इत्याह—'जिणाण आणाए' **जिनानां** रागद्वेषविप्रमुक्तानामर्हतां **आज्ञया** "[२]**अणुकंपादाणं उण जिणवरेहिं न कयावि पडिसिद्धं**" इत्यादिरूपया शिक्षया । यद्वा, भगवन्तोऽपि हि निष्क्रमणकालेऽनपेक्षितपात्रापात्रविभागं करुणया सांवत्सरिकदानं दत्तवन्त इति । 'तं सव्वं पि' **तत्** पूर्वोक्तं **सर्वमप्यशेषमपि** 'अणग्घं' न विद्यतेऽन्यदर्घ्यं यस्मात् तदनर्घ्यं 'मम' इति स्पष्टं, 'हुज्जा' **भूयात्** । कीदृक् ? 'मुक्खसुक्खफलं' **मोक्षसौख्यमेव** निःश्रेयसशर्मैव **फलं** यस्य तत्तथेति ॥७०॥७१॥

अथानन्तरभवापराद्धं जन्तुजातं सप्तभिर्गाथाभिर्व्यक्त्योच्चार्य क्षमयन्नाह —

कालो अणाइ जीवो अणाइ तह भवपरंपराणाई ।
जे केवि तत्थ जीवा एगेंदियपमुहजाईसु ॥७२॥

[कालोऽनादिर्जीवोऽनादिस्तथा भवपरम्पराऽनादिः ।
ये केऽपि तत्र जीवा एकेन्द्रियप्रमुखजातिषु ॥]

व्याख्या । **कालः** समयावलिकादिरूपः, यदाहुः—

---

१. यत् श्रावकाणा करणीयमुक्तं तत् श्राविकाणामपि जानीत सर्वम् ।
तीर्थाधिपानां वचने रतानां तासां विभागेन विशेषकृत्यम् ॥

२. अनुकम्पादानं पुनर्जिनवैरर्न कदापि प्रतिषिद्धम् ।

"[1]समयावलीमुहुत्ता दिवसअहोरत्तपक्खमासाई ।
संवच्छरजुयपलियासागरओसप्पिपरियट्टा" ॥ [सू.प्र./४९]

तत्र समयो जीर्णपटपाटनादिदृष्टान्ताद् निर्विभागकालरूपः आवली तु असंख्यसमयसमितिसमुदयसमागमरूपा, मुहूर्त्तस्तु घटिकाद्वयरूपः, दिवसाहोरात्रपक्षमाससंवत्सरास्तु विदिता एव । युगं तु पञ्चवर्षमयम्, पल्योपमं तूद्धाराद्धाभेदाभ्यां द्विरूपं विदितमेव । सागरोपममपि च प्रख्यातम् । उत्सर्पिण्यवसर्पिणीपरावर्तास्तूच्यन्ते, यथा— 5

"सुषमसुषमानाम्नि सागराः कोटिकोटयः ।
चतस्रोऽरे प्रमा क्रोशत्रयीमानं च युग्मिनाम् ॥१॥ [ ]

आयुः पल्योपमानानि स्युस्त्रीण्याहारो दिनत्रयात् । 10
दश कल्पद्रुमा मत्तगजभृङ्गादयो मताः ॥२॥ [ ]

सुषमारे प्रमा त्र्यब्धिकोटिकोटी दश द्रुमाः ।
द्व्यहाशिता द्विपल्यायुः क्रोशौ मानं च युग्मिनाम् ॥३॥ [ ]

सुषमदुष्षमारे द्वे कोटाकोटिप्रमाब्धयः ।
क्रोशोच्चयुग्मिनामायुः पल्यं चान्नं दिनैकतः ॥४॥ [ ] 15

दुष्षमासुषमारे च द्विचत्वारिंशतोनकाः ।
सहस्रैः शारदां मानं कोटिकोटिपयोधयः ॥५॥ [ ]

पूर्वकोट्यायुषां नृणां धनुःपञ्चशती प्रमा ।
कल्पांह्रिपक्षयोऽर्हन्तः स्युस्त्रयोविंशतिः क्रमात् ॥६॥ [ ]

दुष्षमारे प्रमा वर्षसहस्रा एकविंशतिः । 20
सप्तहस्तनृणामायुः समा विंशोत्तरं शतम् ॥७॥ [ ]

द्विसप्ततिशरन्मानायुषो निर्वृतिरर्हतः ।
भस्मकोदयतो वर्षसहस्रौ द्वौ न यच्छिदा ॥८॥ [ ]

दुष्षमादुष्षमारे च शरदामेकविंशतिः ।
सहस्रा मानमायुश्च षोडशाब्दी करप्रमा ॥९॥ [ ] 25

वैताढ्यकन्दरे गङ्गासिन्धूभयतटीभुविः ।
बिलवासिमनुष्याणां युगलानि द्विसप्ततिः ॥१०॥ [ ]

अवसर्पिणीयं षड्भिररैरेतर्विलोमभिः ।
उत्सर्पिणी, तदानन्त्यात् परिवर्तः प्रकीर्त्तितः'' ॥११॥ [ ]

तदेवंविधः कालः । किंविशिष्टः ? 'अणाइ' न विद्यत आदि मूलं यस्येत्यसाव- **नादिः** । न केवलं कालः, 'जीवो अणाइ' **जीवोऽप्यनादिः** । 'तह' **तथा** 'भवपरम्पराणाई' **भवानां** जन्मनां **परम्परा** पद्धतिः **अनादिः** । 'जे केवि' **ये केऽपि** 'तत्थ' तत्र भवपरम्परायां **जीवाः** प्राणिनः 'एगिंदियपमुहजाईसु' एकमिन्द्रियं स्पर्शनं येषां त **एकेन्द्रियाः** पृथ्व्यवादयः **तत्प्रमुखाणां जातयो** निकायास्तत्तथा **तासु** ॥७२॥

अथ तान् व्यक्तोच्चरति–

एगिंदिया य बेइंदिया य तेइंदिया य चउरिंदी ।
पंचिंदिया य कत्थ वि असन्निपचिंदिया चेव ॥७३॥

[एकेन्द्रियाश्च द्वीन्द्रियाश्च त्रीन्द्रियाश्च चतुरिन्द्रियाः ।
पञ्चेन्द्रियाश्च कुत्राप्यसञ्ज्ञिपञ्चेन्द्रियाश्चापि ॥]

व्याख्या –

एकेन्द्रियाः पृथिव्यम्बुतेजोवायुमहीरुहः ।
द्वीन्द्रियाः कृमयः शङ्खा गण्डूपदजलौकसः ॥१॥ [ ]

त्रीन्द्रिया मत्कुणा यूका मत्कोटकपिपीलिकाः ।
चतुरिन्द्रियका भृङ्गमक्षिकाशलभादयः ॥२॥ [ ]

पञ्चेन्द्रिया जरापोताण्डजाः संमूर्च्छनोद्भिदः ।
गर्भजोद्भेदजास्तत्र संज्ञिनोऽसंज्ञिनः परे ॥३॥ [ ]

शिक्षोपदेशालापान् ये जानते संज्ञिनोऽत्र ते ।
संप्रवृत्तमनःप्राणास्तेभ्योऽन्ये स्युरसंज्ञिनः ॥४॥ [ ] ॥७३॥

देवनरतिरियनारयचउगइमग्गेसु परिभमंता य ।
तह ते वि पुढविकाया दगकाया वाउकाया य ॥७४॥

तेउक्काया वणस्सइकाया तसकाइया य सव्वे वि ।
इय छव्विहजीवनिकायलक्खणा निग्गुणेण मए ॥७५॥

[देवनरतिर्यङ्नारकचर्तुगतिमार्गेषु परिभ्रमन्तश्च ।
तथा तेऽपि पृथिवीकाया दककाया वायुकायाश्च ॥
तेजस्काया वनस्पतिकायास्त्रसकायिकाश्च सर्वेऽपि ।
इति षड्विधजीवनिकायलक्षणा निर्गुणेन मया ॥]

व्याख्या । किंस्वरूपा एते जीवाः ? 'परिभमंता य' **परिभ्रमन्तः** । **चः** समुच्चये। केषु ? 'देवनरतिरियनारयचउगइमग्गेसु' देवा भुवनपति-व्यन्तर-ज्योतिष्कवैमानिकाः, नरा मर्त्याः, तिर्यञ्चश्चतुष्पदपक्षिझषवृक्षादयः नारकाः नरकवासिनः, तेषां चतुर्णां गतयः संसरणानि **देवनतिर्यङ्नारकचतुर्गतयस्ता एव मार्गाः** पन्थानस्तेषु । 'तह ते वि' **तथा तेऽपि** पूर्वगाथोदिता एकेन्द्रियादयो जीवाः षट्कायभाषया भण्यन्ते, यथा, 'पुढविकाया' **पृथ्वीकायाः** —

प्रवालमणिरत्नानि रूप्यस्वर्णादिधातवः ।
स्फटिकाश्मखटीधातुहरितालमनः शिलाः ॥१॥ [ ]

गन्धकाभ्रकपालेवारणवृक्षारपारदाः ।
सौवीराञ्जनकासीसतुवर्याद्या भुवो भिदाः ॥२॥ [ ]

'दगकाया' **अप्कायाः** —

आकाशभूम्यवश्यायमिहकाकरका हिमम् ।
घनाम्भोधिहरतनुप्रमुखा जलजातयः ॥१॥ [ ]

'वाउकाया य' **चः** समुच्चये, **वायुकायाः** पवनाः, 'तेउकाया' **तेजस्काया** अग्नयः, तथा ह्युभयेऽपि—

वात्याघनतनूद्भ्रामोत्कुलीगुञ्जादयोऽनिलाः ।
अङ्गारमुर्मुरज्वालाकणोल्काविद्युतोऽनलाः ॥१॥ [ ]

'वणस्सइकाया' वनस्पतिकाया भूरुहः —

साधारणश्च प्रत्येका द्विप्रकारा महीरुहः ।
तत्र पूर्व बादराः स्युरुत्तरे सूक्ष्मबादराः ॥१॥ [ ]

सूक्ष्मासूक्ष्माः परे च्छिन्नप्ररोहाः समभङ्गकाः ।
अतन्तुत्वग्रसान्धिपर्वगुप्त्यादिलक्षणाः ॥२॥ [ ]

अनन्तात्माश्रयैकाङ्गा पनकस्थेगावास्थुलाः ।
कन्दाङ्कुरनवोद्गच्छत्पर्णानास्थिफलानि च ॥३॥ [ ]

गुडूचीगुग्गुलीमुस्ताविरूढानि शतावरी ।
भूस्फोटो लवणद्रुत्वक्कुमारीकोमलाम्लिका ॥४॥ [ ]

स्नुहीसूकरवल्ल्यश्च पल्यङ्कोऽमृतवल्लरी ।
शैवलं शणपत्राणि निगोदा बादरा इति ॥५॥ [ ]

प्रत्येकास्ते स्युरेकैकतनौ यत्रैकक: प्रभुः ।
मूलपल्लवकाष्ठत्वक्पुष्पबीजफलादयः ॥७॥ [ ]

'तसकाइया य' त्रसश्चलः कायो तेषां ते त्रसकायास्त एव ते स्वार्थे के सति **त्रसकायकाः, चः** समुच्चये, 'सव्वे वि' **सर्वेऽपि** चतुर्विधा अपीति भावः । तथा हि त्रसा द्वित्रिचतुष्पञ्चेन्द्रियत्वेन चतुर्विधाः । 'इय छव्विहजीवनिकायलक्खणा' **इत्य**मुना प्रकारेण पूर्वोदितेन **षड्जीवनिकायलक्षणाः** षट्प्रकारजीवनिकायसंज्ञाः प्राणिनः । 'निग्गुणेण मए' **निर्गुणेना**ऽज्ञानिना **मये**ति ॥७४॥७५॥

चुलसीइलक्खसंखासु जीवजोणीसु परिभमंतेण ।
तज्जिय वत्तिय दूमिय परिभाविया तह उवद्दविया ॥७६॥

निब्भच्छिय संघट्टिय विहडाविय पीलिया य वेलविया ।
परियाविया य तह जीवियाउ ववरोपिया चेव ॥७७॥

व्याख्या । 'मया' इति पूर्वसंबन्धः । किंविशिष्टेन ? 'परिभमंतेणं' **परिभ्रमता** संसरता । कासु ? 'जीवजोणीसु' **जीवानामे**केन्द्रियादीनां **योनयो** जन्मस्थानानि

तासु। कतिसंख्यासु ? 'चुलसीइलक्खसंखासु' **चतुरशीतिलक्षाः संख्या** प्रमाणं यासां **तासु** सम्प्रदायगम्यासु । तथाहि **योगशास्त्रे**–

"प्रत्येकं सप्त लक्षाणि पृथ्वीवार्यग्निवायुषु ।
प्रत्येकानन्तकायेषु क्रमाद् दश चतुर्दश ॥१॥ [यो.शा.]

षट् पुनर्विकलाक्षेषु मनुष्येषु चतुर्दश । 5
स्युश्चतस्रश्चतस्रश्च श्वभ्रतिर्यक्सुरेषु च ॥२॥ [यो.शा.]

एवं लक्षाणि योनीनामशीतिश्चतुरुत्तरा ।
सर्वज्ञोपज्ञमुक्तानि सर्वेषामपि जन्मिनाम्" ॥३॥ [यो.शा.]

तास्तथा तासु । **परिभ्रमता** मया कथं कथं कृतास्ते जीवाः ? 'तज्जिय वत्तिय दूमिय परिभाविया' **तर्जिता** मर्मोद्घट्टनात् तिरस्कृताः, **वर्त्तिताः** पुञ्जीकृता धूलि- 10 चिक्खल्लादिना स्थगिताः, **दूनाः** पीडिताः, **परिभूता** मानं त्याजिताः, एतत्परे प्राकृतत्वाल्लुप्तबहुवचनान्ताः शब्दाः । 'तह' **तथा** 'उवद्दविया' **उपद्राविता** उत्त्रासिताः । 'निब्भच्छिय संघट्टिय विहडाविय पीलिया य' **निर्भर्त्सिता** आक्रुष्टाः, **संघट्टिताः** स्पृष्टाः, **विघटिता** वियोजिताः, **पीलिताः** पिष्टाः । पीलितान् परे लुप्तबहुवचनान्ताः सर्वेऽप्यमी शब्दाः । **च** पुनरर्थे । 'वेलविया' **विप्लाविता** वञ्चिताः, 15 'परियाविया य' **परितापिताः** प्राणन्तिकीं ग्लानिमापादिताः । **चः** समुच्चये । 'तहा' **तथा** । 'जीवियाउ ववरोविया' **जीविताद् व्यपरोपिता** मारिता इत्यर्थः । **चः** समुच्चये । **एवो** निर्धारणे ॥७६॥७७॥

तं तिविहं तिविहेणं सव्वं खामेमि तह य अप्पाणं ।
निंदामि य गरिहामि य तहा मिच्छा दुक्कडं मज्झ ॥७८॥ 20

[तत्त्रिविधं त्रिविधेन सर्वं क्षमयामि तथा चात्मानम् ।
निन्दामि च गर्हामि च तथा मिथ्या दुष्कृतं मम ॥]

व्याख्या । **तत् त्रिविधं** कृतानुमतकारितरूपं **त्रिविधेन** मनसा वचसा कायेन 'सव्वं' **सर्वं** पूर्वोक्तमशेषं 'खामेमि' **क्षमयामि** । 'तह य अप्पाणं' **तथा चात्मानं**

'निंदामि य' अकृत्यकारिणमिति **निन्दामि** आत्मसाक्षिकं शोचामि । **चः** समुच्चये । 'गरिहामि य' **गर्हे** परसाक्षिक जुगुप्से । **चः** पुनरर्थे । 'तह' **तथा** 'मिच्छा दुक्कडं मज्झ' **मम मिथ्या दुष्कृतं** भूयादिति ॥७८॥

अथेहभवसम्बन्धिनः क्षमयन्नाह–

पियमाइमायबंधवपुत्तेसु मित्तवग्गेसु ।
उवयारिसु अवयारिसु सव्वेसु वि खमणा मज्झ ॥७९॥

[प्रियमातृभ्रातृबान्धवपुत्रकलत्रेषु मित्रवर्गेषु ।
उपकारिष्वकारिषु सर्वेष्वपि क्षमणा मम ॥]

स्पष्टा ॥७९॥

अथ बाहुल्येनापरमपि जीवजातं समस्तमपि क्षमयन्नाह–

खामेमि सव्वजीवे मज्झ सव्वे खमंतु ते ।
तेसु मज्झत्थभावो मे मित्ती व पारिणामिया ॥८०॥

[क्षमयामि सर्वजीवान्मां सर्वे क्षमन्तां ते ।
तेषु मध्यस्थभावो मे मैत्री वा पारिणामिकी ॥]

स्पष्टेयमपि, परं **मध्यस्थभावः** पितृमातृबन्धुसुहृदादिषूपकारिषु रागः, तथाऽपकारिषु द्वेषः, तदुभयविप्रमुक्तत्वं 'भवतु' इति शेषः । **अथवा मैत्री** भवतु । सा च लौकिकी लोकोत्तरा च । आद्या प्रसिद्धा । लोकोत्तरा तु–

"मा कार्षीत् कोऽपि पापानि मा च भूत् कोऽपि दुःखितः ।
मुच्यतां जगदप्येषा मतिर्मैत्री निगद्यते" ॥ [यो.शा./४/११८]

सा च 'पारि**णामिकी**' इत्युच्यते ॥८०॥

तामेवाह–

सुहिया आमरहिया धुयपावरया सुधम्मकम्मरया ।
दीहाऊ जिणमयन्नू हवंतु सव्वे वि इह जीवा ॥८१॥

[सुखिता आमयरहिता धुतपापरजसः सुधर्मकर्मरताः ।
दीर्घायुषो जिनमतज्ञा भवन्तु सर्वेऽपीह जीवाः ॥]

सुगमा ॥८१॥

अथोपसर्गतितिक्षामाह—

तिरियनरामरजणिया उवसग्गा के वि जे मए ते वि ।
खमियव्वा सहियव्वा सम्मं अहियासियव्वा य ॥८२॥

[तिर्यग्नरामरजनिता उपसर्गाः केऽपि ये मया तेऽपि ।
क्षन्तव्याः सोढव्याः सम्यगध्यासित्वायश्च ॥]

व्याख्या । **तिर्यञ्चः** कलभ-करभ-सरभ-वृषभ-विहग-भुजग-भषणादयः, **नरा**-श्वोर-चरटादयः, **अमरा** दुष्टव्यन्तरादयः, **तैर्जनिता उपसर्गाः केऽपि ये, मया तेऽपि क्षमितव्याः** समायान्त उपेक्षणीया इति भावः । **सोढव्या** आयाताः सन्तो ह्यदीनेन मनसाऽङ्गीकर्तव्या इत्यर्थः । **सम्यगधिसहितव्याश्च** "[१]सव्वो पुव्वकयाणं कम्माणं पावए फलविवागं" [भ.भा./१६९] इत्यनुध्यानेन तितिक्षणीया इति ॥८२॥

अथ वाक्कायमनःक्लृप्तात्मदुष्कर्मगर्हामाह—

जं वायाए भणियं देहेण कयं मणेण संकलियं ।
तमहं असुहं कम्मं सम्मं गरिहामि सव्वं पि ॥८३॥

[यद् वाचा भणितं देहेन कृतं मनसा संकलितम् ।
तदहमशुभं कर्म सम्यग् गर्हामि सर्वमपि ॥]

स्पष्टा ॥८३॥

अथ केवलिसमक्षमात्मदुष्कृतमालोचयन्नाह—

जाणंति जत्थ कत्थ वि केवलिणो मज्झ दूसणं किं पि ।
तं आलोएमि अहं तेसिं चिय सक्खियं इण्हिं ॥८४॥

---

१. सर्वः पूर्वकृतानां कर्मणां प्राप्नोति फलविपाकम् ।

[जानन्ति यत्र कुत्रापि केवलिनो मम दूषणं किमपि ।
तदालोचयाम्यहं तेषामेव साक्षिकमिदानीम् ॥]

स्पष्टेयमपि ॥८४॥

अष्टादश पापस्थानानि चतसृभिर्गाथाभिरुच्चार्य व्युत्सृजन्नाह–

सव्वं पाणाइवायं असच्चभासणमदत्तदाणं च ।
मेहुणपरिग्गहराइभत्तं कोहं च माणं च ॥८५॥

मायं लोहं कलहं परपरिवायं तहेव पेसुन्नं ।
अब्भक्खाणं मायामासं दोसं च पिम्मं च ॥८६॥

रइअरई तह मिच्छादंसणसल्लं च पावठाणाइं ।
अट्ठारस एयाइं पुव्वभवेसुं इहभवे वा ॥८७॥

कारवियाइं कयाइं तह अणुनायाइं जाइं ताइं अहं ।
तिविहेण वोसिरामी अरिहंताईण पच्चक्खं ॥८८॥

[सर्वं प्राणातिपातमसत्यभाषणामदत्तादानं च ।
मैथुनपरिग्रहरात्रिभक्तं क्रोधं च मानं च ॥
माया लोभं कलहं परपरिवादं तथैव पैशुन्यम् ।
अभ्याख्यानं मायामृषा द्वेषं च प्रेम च ॥
रत्यरतिं तथा मिथ्यादर्शनशल्यं च पापस्थानानि ।
अष्टादशैतानि पूर्वभवेष्विहभवे वा ॥
कारितानि कृतानि तथानुज्ञातानि यानि तान्यहम् ।
त्रिविधेन व्युत्सृजाम्यर्हदादीनां प्रत्यक्षम् ॥]

सर्वं प्राणातिपातमेकेन्द्रियादिपञ्चेनन्द्रियान्तं प्राणिवधम्, **असत्यभाषणम**लीकवचनम्, **अदत्तादानं** चौर्यम्, **मैथुनम्** अब्रह्म, **परिग्रहं** धनधान्यक्षेत्रवास्तुरूपसुवर्णकुप्यद्विपदचतुष्पदादिना नवधा वस्तुमूर्च्छा, 'सर्वम्' इति योज्यम्, **रात्रिभक्तं** निशाभोजनम्, एतत्पदत्रयस्य समाहारः । रात्रिभोजनं तु प्राणतिपातानुगमेव, परं

पृथगुच्चारोऽस्य बहुदोषत्वाद् गर्हार्थम् । अपि च, **क्रोधं** रोषं, **मानम**हङ्कारम् । **च**कारौ समुच्चये । **मायां** कपटं, **लोभं** लौल्यम्, **परपरिवादम्** अन्यकथाप्रप-ञ्चनम्, तथैव **पैशुन्यं** कर्णेजपत्वम्, **अभ्याख्यानम्** आलदानम्, **मायामृषाम्** इन्द्रजालादिकरणम्, **द्वेषं** मत्सरम्, **प्रेम** स्नेहरागम् । **च**कारौ समुञ्चये । **रत्यरतिः** रत्याऽसंयमासक्त्योपलक्षिताऽरतिः संयमानासक्तिस्तां तथा । **मिथ्यादर्शनशल्यं** मिथ्यैव मिथ्यात्वमेव दर्शनस्य सम्यक्त्वस्य शल्यं तत्तथा । **चः** समुच्चये । **पाप-स्थानानि** अष्टादश एतानि **पूर्वभवेषु,** अनन्तत्वाद् बहुवचनम्, **इहास्मिन्** भवे, वाऽनन्तरोक्तौ, **कारितान्यन्यैः, कृतानि** स्वयम्, तथाऽ**नुज्ञातानि** परैः क्रियामाण-न्यनुमोदितानि **यानि तान्यहं त्रिविधेन** मनोवचनकायेन **व्युत्सृजामि** । कथम् ? **अर्हदादीनां** पञ्चपरमेष्ठिनां **प्रत्यक्षं** समक्षमिति ॥८५॥८६॥८७॥८८॥

अथ गाथाचतुष्केण सावधयोगान् परिहरन्नाह—

कत्थ वि कयं कुतित्थं जं च कुसत्थं तहेव सत्थं च ।
निन्हविओ तह मग्गो पयासिओ वा अमग्गो य ॥८९॥

मुक्कं पावनिलुक्कं देहं दव्वं कुडंबसयणाइं ।
अहवा जीवेहिं समं कह वि निबद्धाइं वेराइं ॥९०॥

[कुत्रापि कृतं कृतीर्थं यच्च कुशास्त्रं तथैव शस्त्रं च ।
निह्नुतस्तथा मार्गः प्रकाशितो वाऽमार्गश्च ॥

मुक्तं पापलीनं देहं द्रव्यं कुटुम्बस्वजनादि ।
अथवा जीवैः समं कथमपि निबद्धानि वैराणि ॥]

व्याख्या । **'च** त्ति' अवधारणे । **यत् कुतीर्थं** शाक्यादि, **कुशास्त्रं** मोहजनकं शृङ्गारादि, **तथैव शस्त्रं** शस्त्रिकादि **'कृतम्'** इति सर्वत्र योज्यम्, **निह्नुतस्तथा मार्गो**ऽपलपितं सम्यक्त्वम्, **प्रकाशितो वाऽमार्गो** मिथ्यात्वमिति भावः । **चः** समुच्चये । **पापलीनं देहं द्रव्यं कुटुम्बं स्वजनादि मुक्तं** व्युत्सृष्टं 'मया सर्वम्' इत्यध्याहार्यम् । **अथवा प्राणिभिः समं** पूर्वं **निबद्धानि वैराणि** तान्यपि मुक्तानि व्युत्सृष्टानि ॥८९॥९०॥

मोहंधेण य रइयं हलउक्खलमुसलपमुहमहिगरणं ।
तं वोसिरियं सव्वं तिविहेणं पाणिवहकरणं ॥९१॥

[मोहान्धेन च रचितं हलोदूखलमुशलप्रमुखमधिकरणम् ।
तद् व्युत्सृष्टं सर्वं त्रिविधेन प्राणिवधकरणम् ॥]

स्पष्टा ॥९१॥

परिचत्ताइं पनरस कम्मादाणाइं जाइं विहियाइं ।
अन्नं पि मए चत्तं जं चिय मिच्छत्तवुड्ढिकरं ॥९२॥

[परित्यक्तानि पञ्चदश कर्मादानानि यानि विहितानि ।
अन्यदपि मया त्यक्तं यदेव मिथ्यात्ववृद्धिकरम् ॥]

व्याख्या । कर्मणां भवहेतूनामादानं ग्रहणं येभ्यस्तानि **कर्मादानानि** । कति ? 'पनरस' **पञ्चदश** । यदाहुः श्रीहेमसूरयः—

"अङ्गारभ्राष्ट्रकरणं कुम्भायः स्वर्णकारिता ।
ठठारत्वेष्टकापाकाविति ह्यङ्गारजीविका ॥१॥ [यो.शा./३/१०१]

छिन्नाच्छिन्नवनपत्रप्रसूनफलविक्रयः ।
कणानां दलनात् पेषाद् वृत्तिश्च वनजीविका ॥२॥ [यो.शा./३/१०२]

शकटानां तदङ्गानां घटनं खेटनं तथा ।
विक्रयश्चेति शकटजीविका परिकीर्तिता ॥३॥ [यो.शा./३/१०३]

शकटोक्षलुलायोष्ट्रखराश्वतरवाजिना ।
भारस्य वहनाद वृत्तिर्भेवेद् भाटकजीविका ॥४॥ [यो.शा./३/१०४]

सरःकूपादिखननशिलाकुट्टनकर्मभिः ।
पृथिव्यारम्भसंभूतैर्जीवनं स्फोटजीविका ॥५॥ [यो.शा./३/१०५]

दन्तकेशनखास्थित्वग्रोम्णां ग्रहणमाकरे ।
त्रसाङ्गस्य वणिज्यार्थं दन्तवाणिज्यमुच्यते ॥६॥ [यो.शा./३/१०६]

लाक्षामनःशिलानीलीघातकीटङ्कणादिनः ।
विक्रयः पापसदनं लाक्षावाणिज्यमुच्यते ॥७॥ [यो.शा./३/१०७]

नवनीतवसाक्षौद्रमद्यप्रभृतिविक्रयः ।
द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रसकेशयोः ॥८॥ [यो.शा./३/१०८]

विषास्त्रहलयन्त्रायोहरितालादिवस्तुनः । 5
विक्रयो जीवितघ्नस्य विषवाणिज्यमुच्यते ॥९॥ [यो.शा./३/१०९]

तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम् ।
दलतैलस्य च कृतिर्यन्त्रपीडा प्रकीर्त्तिता ॥१०॥ [यो.शा./३/११०]

नासावेधोऽङ्कनं मुष्कच्छेदनं पृष्ठगालनम् ।
कर्णकम्बलविच्छेदो निर्लाच्छनमुदीरितम् ॥११॥ [यो.शा./३/१११] 10

सारिकाशुकमार्जारश्वकुर्कुटकलापिनाम् ।
पोषो दास्याश्च वित्तार्थमसतीपोषणं विदुः ॥१२॥ [यो.शा./३/११२]

व्यसनात् पुण्यबुद्ध्या वा दवदानं भवेद् द्विधा ।
सरःशोष सरःसिन्धुह्रदादेरम्बुसंप्लवः" ॥१३॥ [यो.शा./३/११३]

इत्येवम्प्रकराणि यानि विहितानि यत्तदोर्नित्यसम्बन्धात् तानि 'परिचत्ताइं' 15 **परित्यक्तानि। अन्यदपि मया त्यक्तम्,** किम ? इत्याह—'जं चिय मिच्छत्त-वुड्ढिकरं' **यदेव मिथ्यात्ववृद्धिकर**मिति ॥९२॥

अथ वल्लभेभ्योऽत्यतिवल्लभं वपुर्व्युत्सृजन्नाह—

जं असुइदुसियं पि हु देहं बहु मन्नियं मए एयं ।
तं पि हु अंतिमऊसासेहिं तिकट्टु वोसिरियं ॥९३॥ 20

[यदशुचिदूषितमपि हि देहं बहु मतं मयैतत् ।
तदपि ह्यन्तिमोच्छ्वावसेषु त्रिकृत्वो व्युत्सृष्टम् ॥]

स्पष्टा; परं 'तिकट्टु त्ति' **त्रिकृत्वः** मनोवचनकायैः । अपि च, 'अंतिमऊ-सासेहिं' '**अन्तिमोच्छ्वासेषु**' इति व्याख्येयम् ॥९३॥

अथ सर्वयोगपरित्यागमाह—

तह सव्वदव्वजोगो सरीरजोगो य कम्मसंजोगो ।
सव्व इमे संजोगा जावज्जीवाइ वोसिरिया ॥९४॥

[तथा सर्वद्रव्ययोगः शरीरयोगश्च कर्मसंयोगः ।
सर्व इमे संयोगा यावज्जीवं व्युत्सृष्टाः ॥]

व्याख्या । यथा पूर्वोक्तं सावद्यमशेषं व्युत्सृष्टं तथा सर्वाणि सचित्ताचित्तानि च तानि द्रव्याणि च भोगोपभोगोपयोगीनि वस्तूनि **सर्वद्रव्याणि तैर्योगः** सम्बन्धः स तथा । न केवलमेतत्, **शरीरेण** वर्तमानेनौदारिकेण **योगः** स तथा । **चः** समुच्चये । कर्मणां ज्ञानावरणादीनां **संयोगः** । **सर्व इमे संयोगाः** 'जावज्जीवाइ वोसिरिया' यावज्जीवं, यावच्छब्दोऽवधारणे, जीवनं जीव इत्ययं क्रियाशब्दः प्राणधारणार्थः, ततश्च **यावज्जीवनं** तावद् **व्युत्सृष्टा** न मृत्योः परत इत्यर्थः ॥९४॥

अथ गाथायुगेन पर्यन्ताराधनाविधिमुच्चार्य तत्फलमाह—

पच्चक्खाइ चउव्विहमाहारं जो पुणो निरागारं ।
अणुमोयइ सुकयाइं आलोयइ पावकम्माइं ॥९५॥
अंते जो संथारपव्वज्जं वा पवज्जइ धीरो ।
सो परलोए सुहिओ हवइ नरो लहइ पुण बोहिं ॥९६॥

[प्रत्याख्याति चतुर्विधमाहारं यः पुनर्निराकारम् ।
अनुमोदते सुकृतान्यालोचयति पापकर्माणि ॥

अन्ते यः संस्तारप्रवज्यां वा प्रव्रजति धीरः ।
स परलोके सुखितो भवति नरो लभते पुनर्बोधिम् ॥]

स्पष्टे ॥९५॥९६॥

अथ लब्धबोधेर्जीवस्योत्कर्षमाह—

नाणदंसणचारित्तरयणत्तयभूसिओ ।
अदूसिओ य दोसेहिं जीवो होइ न दुक्खिओ ॥९७॥

[ज्ञानदर्शनचारित्ररत्नत्रयभूषितः ।
अदूषितश्च दोषैर्जीवो भवति न दुःखितः ॥]

व्याख्या । **जीवः** प्राणी **दुःखितो** दुःखपात्रं **न भवति** । किंरूपः सन् ? 'नाणदंस-ण त्ति' **ज्ञानं** जीवाजीवाश्रवसंवरनिर्जराबन्धमोक्षादिसप्ततत्त्वपरिज्ञानं, **दर्शनं** सम्यक्त्वम्, **चारित्रं** सर्वसावद्ययोगविरतिः, एतेषामेव **रत्नानां त्रयं** तत्तथा तेन **भूषितो**ऽलङ्कृतः । न केवलमित्थं, 'अदूसिओ य' **अदूषितश्च** । कैः ? 'दोसेहिं' दोषै रागा-दिभिः । अपि चोक्तमस्माभिः—

"जन्तो रत्नत्रयी यस्य चेतोग्रन्थावमूल्यका ।
सेवाहेवाकिनस्तस्य देवाः के वा, न किं परे ?" ॥ [ ]

॥ इत्याचार्यश्रीबालचन्द्रविरचितायां श्रीविवेकमञ्जरीवृत्तौ
दुष्कृतगर्हाविवरणं नाम तृतीयः परिमलः ॥

● ● ●

चण्डाश्वचण्डकरमण्डलगोलकाभ्यां विक्रीडतो नभसि कालकुमारकस्य ।
छायापथस्तदयनश्रियमेति यावत् तावज्जयं कलयतादिह जैत्रसिंहः ॥१॥

● ● ●

अथ भावनाद्वारं प्रस्तुवन्नाह–

चउसरणं पडिवन्नो जीवो संसारकज्जनिव्विन्नो ।
भावेइ भावणाओ अणिच्चआईओ सव्वाओ ॥९८॥

[चतुःशरणं प्रतिपन्नो जीवः संसारकार्यनिर्विण्णः ।
भावयेद् भावना अनित्यतादीः सर्वाः ॥]

व्याख्या । **जीवो** मुक्तिगमनयोग्यो जन्तुः 'भावेइ' **भावयति** संविग्नेन मनसाऽनुध्यायति । काः कर्मतापन्नाः ? 'भावणाओ' **भावनाः** । किंरूपाः ? 'अणिच्चयाईओ' **अनित्यताद्याः** । किं द्वे तिस्र ? इत्याह–'सव्वाओ' **सर्वा** द्वादशापीति भावः । इह त्रिष्वपि कर्मपदेषु **"स्त्रियामुदौतौ वा"** [है० प्रा० ३ । २७] इति प्राकृतलक्षणात् शसः स्थाने ओत् । किंविशिष्टोऽसौ ? 'चउसरणं पडिवन्नो' **चतुर्णामर्हदादीनां शरणं** चतुःशरणम्, उपलक्षणमेवेदं, सम्यग्गुणानुमोदना दुष्कृतगर्हाऽप्यत्र ज्ञेया, तत् **प्रतिपन्न**स्तदैकतामानस इति भावः । पुनः किंविशिष्टः ? 'संसारकज्जनिव्विन्नो' संसरणं **संसारः** पुनः पुनर्जन्मपरम्परा सैव कर्मपरतन्त्रस्य जन्तोः **कार्यं** ततो **निर्विण्ण** उद्विग्नः, यदुक्तम्–

"जरामरणदौर्गत्यव्याधयस्तावदासताम् ।
जन्मैव किं न धीरस्य भूयो भूयस्त्रपावहम् ?" ॥ [ ]

इति ॥९८॥

अथानित्यताभावनां गाथायुगेनाह–

विहवो सज्जणसंगो विसयसुहाइं विलासललियाइं ।
नलिनीदलग्गघोलिरजललवपरिचंचलं सव्वं ॥९९॥

[विभवः स्वजनसङ्गो विषयसुखानि विलासललितानि ।
नलिनीदलाग्रधूर्णमानजललवपरिचञ्चलं सर्वम् ॥]

स्पष्टा, परं 'घोलिर' इति **घूर्णमान**पर्यायः ॥९९॥

तं कत्थ बलं तं कत्थ जुव्वणं अंगचंगिमा कत्थ ? ।
सव्वमणिच्चं पिच्छह नट्ठं दिट्ठं कयंतेण ॥१००॥

[तत्कुत्र बलं तत्कुत्र यौवनमङ्गचङ्गिमा कुत्र ? ।
सर्वमनित्यं पश्यत नष्टं दृष्टं कृतान्तेन ॥]

स्पष्टेयमपि ॥१००॥

अथ गाथापञ्चकेनाशरणभावनामाह–

घणकम्मपासबद्धो भवनयरचउप्पहेसु विविहाओ ।
पावइ विडंबणाओ जीवो को इत्थं सरणं से ? ॥१०१॥

[घनकर्मपाशबद्धो भवनगरचतुष्पथेषु विविधाः ।
प्राप्नोति विडम्बना जीवः कोऽत्र शरणं तस्य ? ॥]

व्याख्या । कर्माणि ज्ञानावरणादीन्येव पाशाः **कर्मपाशाः, घनाश्चैते** तथा, **तैर्बद्धो** नियन्त्रितः सन् 'भवनयरचउप्पहेसु' **भवः** संसार एव चतुष्कषायगोपुरविराजमानं विशालविषयवासनाशालवलयसुस्थितं मिथ्यात्वनृपाधिष्ठितं चतुरशीतिलक्षयोनि-भवनं कुमतिविलासतलारक्षं चतुर्ध्यानमयवर्णप्रकृतिपौरप्रकरं **नगरं तस्य चत्वारो** देव-नर-तिर्यग्-नरकगतिनामानः **पन्थानस्ते** तथा **तेषु** 'विविहाओ' **विविधा** अनेकरूपाः 'पावइ' **प्राप्नोति** 'विडंबणाओ' **विडम्बनाः**, देवत्वे किल्बिषित्वा-भियोगिकत्वपरर्द्धिदर्शनेर्ष्याविषादक्रोधलोभासन्नच्यवनक्षोभाद्याः, मनुजत्वे च चिन्तासंतापस्वामिशापस्वजनमरणधनहरणजराज्वरादिरोगानिष्टसंप्रयोगाभीष्ट-विप्रयोगाद्याः, तिर्यक्त्वे च कशाङ्कुशप्राजनघातवातातपक्षुत्तृषासहनभारवहनरूपाः, नारकत्वे च च्छेदनभेदनतप्तत्रपुपानशाल्मलीवृक्षालिङ्गनवैतरणीतरणासिपत्रवन-विचरणाद्याः, इत्येता घनकर्मपाशबद्धा विडम्बनाः । कः प्राप्नोति ? इत्याह–'जीवो' **जीवः** प्राणी । 'को इत्थ सरणं से' **तस्य कः** शरणमिह ? न कोऽपीति तात्पर्यम् ॥१०१॥

जीवो वाहिविलुत्तो सफरो इव निज्जले तडप्फडइ ।
सयणो विमणो पिच्छइ को सक्को वेयणाविगमे ? ॥१०२॥

[जीवो व्याधिविलुप्तः शफर इव निर्जले चपलायते ।
स्वजनो विमनाः पश्यति कः शक्तो वेदनाविगमे ? ॥]

स्पष्टा ॥१०२॥

मा जाणसु जीव ! तुमं पुत्तकलताई मज्झ सुहहेऊ ।
निउणं बंधणमेय संसारे संसरंताणं ॥१०३॥

[मा जानीहि जीव ! त्वं पुत्रकलत्रादिर्मम सुखहेतुः ।
निपुणं बन्धनमेतत् संसारे संसरताम् ॥]

स्पष्टेयमपि ॥१०३॥

विसमिव मुहे महुरा परिणामनिकामदारुणा विसया ।
कालमणंतं भुत्ता अज्ज वि मुत्तुं न किं जुत्ता ? ॥१०४॥

[विषमिव मुखे मधुराः परिणामनिकामदारुणा विषयाः ।
कालमनन्तं भुक्ता अद्यपि मोक्तुं न किं युक्ताः ? ॥]

सुगमेयम् ॥१०४॥

विसयरसासवमत्तो जुत्ताजुत्तं न याणई जीवो ।
झूरइ कलुणं पच्छा पत्तो नरयं महाघोरं ॥१०५॥

[विषयरसासवमत्तो युक्तायुक्तं न जानाति जीवः ।
खिद्यते करुणं पश्चात् प्राप्तो नरकं महाघोरम् ॥]

व्याख्या । विषयरस इन्द्रियार्थास्वाद एव आसवो मद्यं **विषयरसासवस्तेन मत्तः** क्षीवः सन् **जीवो** भक्ष्याभक्ष्यपेयापेयगम्यागम्यादिरूपं **युक्तायुक्तं न जानाति** । 'पच्छा झूरइ' **पश्चात् खिद्यते** 'कलुणं' **करुणं** दीनं यथा भवतीति क्रियाविशेषणमिदम् । किम्भूतः 'पत्तो नरयं' **प्राप्तो नरकम्** । किंविशिष्टम् ? 'महाघोरं' अतिभयङ्करमिति ॥१०५॥

अथ गाथायुगेन संसारभावनामाह—

तह लालियं पि तह पालियं पि अंते मुहं विकूणेइ ।
फरिसंते पि कुडुंबं विडंबणा का न संसारे ? ॥१०६॥

[तथा लालितमपि तथा पालितमप्यन्ते मुखं विकूणयति ।
स्पृशदापि कुटुम्बं विडम्बना का न संसारे ? ॥]

व्याख्या । **संसारे का न विडम्बना** ? को न विगोपकः ? कथम् ? इत्याह— **अन्ते** वार्धक्ये 'अतीसारादिरोगाभिभूतं स्वामिनम्' इति गम्यम्, 'फरिसंतं पि' **स्पृशदपि कुटुम्बं** कर्तृ **मुखं विकूणयति** वक्रीकरोति । यदि न तस्य स्वार्थः कोऽप्येयन पूरितो भविष्यति ? इत्याह—'तह लालियं पि' **तथा** तेन प्रकारेण यथेप्सितवसनाशनशयनीयाभरणताम्बूलविलेपनमाल्यादिना **लालितमपि;** न केवलमित्थम्, 'तह पालियं पि' **तथा** शीतवातातपक्षुत्तृषारोगाद्यातङ्केभ्यः शुभोदर्कविधानेन **पालितमपि** परित्रातमपीति ॥१०६॥

जणणी जायइ जाया जाया माया पिया य पुत्तो य ।
अणवत्था संसारे कम्मवसा सव्वजीवाणं ॥१०७॥

[जननिर्जायते जाया जाया माता पिता च पुत्रश्च ।
अनवस्था संसारे कर्मवशात् सर्वजीवानाम् ॥]

स्पष्टा ॥१०७॥

अथ गाथाषट्केनैकत्वभावनामाह—

एगो बंधइ कम्मं एगो धणहरणमरणवसणाइं ।
विसहइ भवम्मि भमडइ एगु च्चिय कम्मवेलविओ ॥१०८॥

[एको बध्नाति कर्मैको धनहरणमरणव्यसनानि ।
विषहते भवे भ्राम्यत्येक एव कर्मविप्लावितः ॥]

व्याख्या । 'अकृत्यशतचतुरो नरः कुटुम्बार्थमर्थमर्जयन्' इत्यध्याहारः, **एकः कर्म**

दुर्गतिगमनौपयिकं पापं **बध्नाति** दृढीकरोति, नान्यः कश्चित् तदुपार्जितद्रव्यग्रासलालसः स्वजनादिषु, यदुक्तम्—

"धनं धर्मविलोपने परभोगाय केवलम् ।
दोषास्त्वात्मन एवैको हरेर्द्धिपवधादिव" ॥ [ ]

अन्यच्च, 'एगो धणहरणमरणवसणाइं विसहइ' **एको** 'राज-तस्कर-दायादेभ्यः' इति गम्यम्, **धनहरण-मरण-व्यसनानि विषहते** । "भवभ्मि भमडइ एगु च्चिय" **भवे** संसारे **भ्राम्यत्येक एव** यदाहुः—

"[१]अत्थो घरे नियत्तइ सयणजणो पिउवणा नियत्तेइ ।
देहं पि दहइ जीओ उण एक्कओ जाइ" ॥ [ ]

किंविशिष्टः ? 'कम्मवेलविओ' **कर्मभिर्**मोहनीयादिभि**र्विप्लावितो** विनटित इति ॥१०८॥

अन्नो न कुणइ अहियं हियं पि अप्पा कुणेइ न हु अन्नो ।
अप्पकयं सुहदुक्खं भुंजसि ता कीस दीणमुहो ? ॥१०९॥

[अन्यो न करोत्याहितं हितमप्यात्मा करोति न खल्वन्यः ।
आत्मकृतं सुखदुःखं भुङ्क्षे तस्मात् कस्माद्दीनमुखः ? ॥]

सुगमा ॥१०९॥

बहुआरंभविढत्तं वित्तं विलंसति जीव ! सयगणा ।
तज्जणियपावकम्मं अणुहवसि पुणो तुमं चेव ॥११०॥

[बह्वारम्भार्जितं वित्तं विलसन्ति जीव ! स्वजनगणाः ।
तज्जनितपापकर्मानुभवसि पुनस्त्वमेव ॥]

स्पष्टा ॥११०॥

---

१. अर्थो गृहे निवर्तते स्वजनजनः पितृवनाद् निवर्तते ।
देहमपि दहति दहनो जीवः पुनरेकको याति ॥

अह दुक्खियाइं तह भुक्खियाइं जइ चिंतियाइं डिंभाइं ।
तह थोवं पि न अप्पा विचिंतिओ जीव ! किं भणिणो ? ॥१११॥

[अथ दुःखितास्तथा बुभुक्षिता यथा चिन्तिता डिम्भाः ।
तथा स्तोकमपि नात्मा विचिन्तितो जीव ! किं भणामः ? ॥]

स्पष्टेयमपि ॥१११॥

वीसरइ सयणलोगो तुह संबंधं मुहुत्तकयसोगो ।
जीव ! सुहासुहकम्मं वच्चइ एगं तए सरिसं ॥११२॥

[विस्मरति स्वजनलोकस्तव संबन्धं मुहूर्त्तकृतशोकः ।
जीव ! शुभाशुभकर्म व्रजत्येकं त्वया समम् ॥]

सुगमा ॥११२॥

तह परिचयघट्ठाइं अणंतसो जीव ! जम्ममरणाइं ।
ता मरणे वि तुमं कह हद्धी धीरत्तणं मुयसि ? ॥११३॥

[तथा परिचयघृष्टान्यनन्तशो जीव ! जन्ममरणानि ।
तस्मान्मरणेऽपि त्वं कतं हा धिग् धीरत्व मुञ्चसि ? ॥]

सुगमेयमपि, परं 'हद्धी' **हाधिक्**पर्यायः ॥११३॥

अथ गाथायुगेनान्यत्वभावनामाह—

खणभंगुरं सरीरं जीवो अन्नो य सासयसहावो ।
कम्मवसा संबंधो निब्बंधो इत्थ को तम्हा ? ॥११४॥

[क्षणभङ्गुरं शरीरं जीवोऽन्यश्च शाश्वतस्वभावः ।
कर्मवशात् संबन्धो निर्बन्धोऽत्र कस्तस्मात् ? ॥]

व्याख्या । **शरीरं क्षणविनाशि** । 'जीवो अन्नो य' समुच्चये, **जीवोऽन्यः** शरीरात् पृथक्, एतद्विलक्षणगुणत्वात् । कथम् ? इत्याह—'सासयसहावो' **शाश्वतो**

नित्योऽच्छेद्याभेद्यरूपः **स्वभावः** प्रकृतिर्यस्येति स तथा । एतयोरनित्यनित्ययोस्तर्हि **संबन्धः** कथमभूद् ? इत्याह–'कम्मवसा' **कर्मवशात्** नामानुपूर्वीगत्यायुःकर्मपारवश्यात् । 'निब्बंधो इत्थ को तम्हा' **तस्मादत्र** शरीरे **को निर्बन्धः ?** कः प्रतिबन्ध इति ॥११४॥

कह आयं कह चलियं तुमं पि कह आगओ कहं गमिही ।
अन्नुन्नं पि न याणह जीव ! कुडुंबं कओ तुज्झ ? ॥११५॥

[कथमागतं कथं चलितं त्वमपि कथमागतः कथं गमिष्यसि ।
अन्योन्यमपि न जानीथो जीव ! कुटुम्बं कुतस्तव ? ॥]

व्याख्या । **हे जीव** ! 'तुज्झ' **तव** तावकमिति भावः 'कओ कुडुंबं' **कुतः** कस्माद् हेतोः **कुटुम्बम्** । कथम् ? इत्याह–'अन्नुन्नं पि न याणह' **अपी**ति विस्मये, **अन्योन्यं न जानीथः** परस्परं न वित्थः । कोऽत्र भावः ? त्वं कुटुम्बं न जानासि । कीदृग् ? 'कह आयं' **कुत आगतम्,** 'कह चलियं' **कुत्र चलितं** क्व यास्यतीत्यर्थः । त्वमपि कुटुम्बेन न ज्ञायसे । कीदृशः ? 'कह आगओ' **कुत आगतः,** 'कहं गमिही' **कुत्र गमिष्यसी**ति ॥११५॥

अथाशुचित्वभावनामाह–

असुइसमवायजायं असुइरसाहारबद्धसंठाणं ।
असुईण जम्मभूमी तं देहं कह सुई होइ ? ॥११६॥

[अशुचिसमवायजातमशुचिरसाहारबद्धसंस्थानम् ।
अशुचीनां जन्मभूमिस्तद् देहं कथं शुचि भवति ? ॥]

व्याख्या । **तद् देहं कथं केन प्रकारेण शुचि भवति ?** अपि तु न केनापीत्यर्थः । शुचित्वे तस्यासाध्यतां विशेषणैराह–किंविशिष्टं देहम् ? 'असुइसमवायजायं' **अशुचिनोः** शुक्र-शोणितयोः **समवायः** संयोगस्**तस्माज्जातं** निष्पन्नं तत्तथा, यदुक्तम्–

"शुक्रशोणितसंभूतो मलनिस्यन्दवर्धितः ।
गर्भे जरायुसंछन्नः शुचिः कायः कथं भवेत् ?" ॥ [ ]

पुनः किंविशिष्टम् ? 'असुइरसाहारबद्धसंठाणं' अशुचयो मातृभुक्तपीतान्नपयसो रसा **अशुचिरसास्तेषामाहारस्तेन बद्धं** संस्थानमङ्गोपाङ्गादि यस्य तत्तथा । अपि चोक्तम्—

"मातृभुक्तान्नपानोत्थरसं नाडीक्रमागतम् ।
पायं पायं विवृद्धः सन् शौचं मन्येत कस्तनोः ?" ॥ [ ] 5

पुनरपि किंविशिष्टम् देहम् ? 'असुईण जम्मभूमी' **अशुचीनां** रसासृग्मांसादीनां **जन्मभूमिः** उत्पत्तिस्थानम् । यदुक्तम्—

"रसासृग्मांसमेदोऽस्थिमज्जाशुक्रान्त्रवर्चसाम् ।
अशुचीनां पदं कायः शुचित्वं तस्य तत्कुतः ?" ॥ [यो.शा./४/७२]

इति ॥११६॥ 10

अथ गाथायुगेनाश्रवभावनामाह—

पंचेंदियाइं चउरो तह कसाया य तिन्नि दंडा य ।
पंचप्पाणिवहाई सत्तरसासवदुवाराइं ॥११७॥

एएहिं मुक्कलेहिं जीवतलायं समंतओ एयं ।
निच्चं आऊरिज्जइ कम्ममहावारिपूरेण ॥११८॥ 15

[पञ्चेन्द्रियाणि चत्वारस्तथा कषायाश्च त्रयो दण्डाश्च ।
पञ्च प्राणिवधादयः सप्तदशाश्रवद्वाराणि ॥

एतैर्मुत्कलैर्जीवतडागं समन्तत एतत् ।
नित्यमापूर्यते कर्म्ममहावारिपूरेण ॥]

स्पष्टे ॥११७॥११८॥ 20

अथ संवरभावनामाह—

एयाइं जो निरुंभइ पडिसेहइ सो तमित्थ पविसंतं ।
जं च पुराणं तं पि हु कमेण सोसेइ अपमत्तो ॥११९॥

[एतानि यो निरुणद्धि प्रतिषेधति स तदत्र प्रविशत् ।
यच्च पुराणं तदपि हि क्रमेण शोषयत्यप्रमत्तः ॥]

व्याख्या । **य एतानि** पूर्वोदितानि सप्तदशाश्रवद्वाराणि **निरुणद्धि** पिधत्ते, **स तदत्र** जीवतडागे **प्रविशत्** कर्मजलं **प्रतिषेधयति, यच्च पुराणं** पुरातनमग्रे प्रविष्टं **तदपि क्रमेण** मन्दं मन्दं, युद्धा विशुद्धध्यानमयार्कतेजसेति भावः 'सोसेइ' **शोषयति** । किम्भूतः ? 'अपमत्तो **अप्रमत्तोऽ**प्रमद्वर इति ॥११९

अथ निर्जराभावनामाह–

बारसभेयविसिट्ठं सब्भिंतरबाहिरो जिणुद्दिट्ठो ।
ताविओ तवो विसुद्धो कम्ममसेसं पि निज्जरइ ॥१२०॥

[द्वादशभेदविशिष्टं साभ्यन्तरबाह्यं जिनोद्दिष्टम् ।
तप्तं तपो विशुद्धं कर्माशेषमपि निर्जरयति ॥]

व्याख्या । तपोऽशेषं समस्तं बद्ध-स्पृष्ट-निधत्त-निकाचितादिचतूरूपं कर्म निर्जरयति परिशाटयति । किंविशिष्टं तपः ? 'बारसभेयविसिट्ठो' नपुंसकलिङ्गस्यापि तपःशब्दस्यात्र प्राकृतत्वाद् बाहुल्यात् पुंलिङ्गता, **द्वादशभिर्भेदैर्विशिष्टं** प्रधानं तत्तथा । अत एव 'सब्भिंतरबाहिरो' आभ्यन्तरेण भेदषट्केन सह वर्तते **साभ्यन्तरं** तच्च तद् **बाह्यं** च तत्तथा । पुनरपि किंविशिष्टम् ? 'जिणुद्दिट्ठो' **जिनेन** भगवता वीतरागे**णोपदिष्टं** तत्तथा । किं स्मृतमात्रमेवैवंविधं **तपः कर्माशेषं निर्जरयतीत्य**-शङ्क्याह–'तविओ' **तप्तम्** आचीर्णम् । किंविशिष्टम् ? 'विसुद्धो' **विशेषेण** मनोवाक्कायैः **शुद्धं** निरतिचारमिति ॥१२०॥

अथ गाथायुगेन लोकभावनामाह–

धम्माहम्मा पुग्गलजीवाकासा य पंच सुपसिद्धा ।
अत्थिकाया तम्मयमेयं लोयं वियाणाहि ॥१२१॥

[धर्माधर्मौ पुद्गलजीवाकाशाश्च पञ्च सुप्रसिद्धाः ।
अस्तिकायास्तन्मयमेतं लोकं विजानीहि ॥]

व्याख्या । धर्मश्चाधर्मश्च **धर्माधर्मौ**, पुद्गलश्च जीवश्च आकाशश्च **पुद्गलजीवाकाशाः** पञ्च सुप्रसिद्धा जिनसमये विदिताः, तथाहि—

"**स्वयं गन्तुं प्रवृत्तेषु जीवाजीवेषु सर्वतः ।**
सहकारी भवेद् धर्मः पानीयमिव यादसाम् ॥१॥ [ ]

जीवानां पुद्गलानां च प्रपन्नानां स्वयं स्थितिम् ।
अधर्मः सहकार्येष यथा छायाध्वयायिनाम् ॥२॥ [ ]

पुद्गलाः स्युः स्पर्शरसगन्धवर्णस्वरूपिणः ।
तेऽणुस्कन्धतया द्वेधा तत्राबद्धाः किलाणवः ॥३॥ [ ]

बद्धाः स्कन्धा गन्धशब्दसूक्ष्मस्थूलाकृतिस्पृशः ।
अन्धकारातपोद्द्योतभेदच्छायात्मका अपि ॥४॥ युग्मम् ॥ [ ]

एकाक्षाः स्थूलसूक्ष्माख्याः पञ्चाक्षाः संज्ञ्यसंज्ञिनः ।
विकलाक्षाश्च पर्याप्ता अपर्याप्ताश्चतुर्दश ॥५॥ [ ]

जीवो जिनोदितैरेभिर्भेदौर्भिन्नोऽत्र संसृतौ ।
ज्ञेयोऽयं रक्षणीयोऽयं मान्योऽयं तत्त्वसंपदः ॥६॥ युग्मम् ॥ [ ]

सर्वगं स्वप्रतिष्ठं स्यादाकाशमवकाशदम् ।
लोकालोकौ स्थितं व्याप्य तदनन्तप्रदेशभाक्" ॥७॥ [ ]

इति पञ्चैते 'अत्थिकाया' **अस्तिकायाः** 'तम्मयमेयं वियाणाहि' तैरस्तिकायैः स्थित्युत्पत्तिव्ययात्मकैः कालेन सह द्रव्यापरनामभिर्निर्वृतं **तन्मयमेतं लोकं** विश्वं **विजानीहि**, यदुक्तम्—

"**कटिस्थकरवैशाखस्थानकस्थनराकृतिम् ।**
द्रव्यैः पूर्णं स्मरेल्लोकं स्थित्युत्पत्तिव्ययात्मकैः" ॥ [यो.शा./४/१०३]

इति ॥१२१॥

चउदसरज्जुपमाणे लोए ठाणं पि तिलतुससमाणं ।
तं नत्थि जत्थ जीवा न य पत्ता जम्ममरणाइं ॥१२२॥

[चतुर्दशरज्जुप्रमाणे लोके स्थानमाप तिलतुषसमानम् ।
तन्नास्ति यत्र जीवा न च प्राप्ता जन्ममरणानि ॥]

व्याख्या । **लोके** जगति **तिलतुषसमानमपि स्थानं तद् नास्ति यत्र जीवाः** प्राणिनो **जन्ममरणानि न च प्राप्ता** नाधिगतवन्तः । किंविशिष्टे लोके ? **चतुर्दश-रज्जुप्रमाणे,** एकोद्देशेन लोकप्रमाणस्योपलक्षणमात्रमेवेदम् । रज्जुसञ्ज्ञापि संप्रदायगम्या, तथाहि–

"**कश्चिल्लोकाग्रमारुह्य देवो दिव्यानुभावतः ।**
श्रितं भारसहसेण लोहगोलमधः क्षिपेत् ॥१॥ [ ]

स गोलो निपतन् मासैः षड्भिर्यावत् खमाक्रमेत् ।
तावता जायते रज्जुरेकेति कथितं जिनैः ॥२॥ [ ]

लोकाग्रादप्रतिष्ठानतलं यावच्चतुर्दश ।
रज्जवोऽत्र पुनस्तिर्यक् सप्तोर्ध्वं क्रमहानितः ॥३॥ [ ]

भूतले रज्जुरेकास्ति तदूर्ध्वं क्रमवृद्धितः ।
पञ्च पञ्चमकल्पे स्युस्तदूर्ध्वं क्रमहानितः ॥४॥ [ ]

एका सिद्धिशिलासीम्नि रज्जुः, संपिण्डितास्त्विमाः ।
शतानि त्रीणि लोके त्रिचत्वारिंशच्च कीर्तिताः ॥५॥ [ ]

एतत्प्रमाणं लोकेऽत्र स्थानं तन्नास्ति किञ्चन ।
यत्र जीवा न जन्मानि मरणानि च लेभिरे" ॥६॥ [ ]

इति ॥१२२॥

अथ बोधिभावनामाह–

अन्नाणेण कुसंगेण य कत्थ वि कुमयवासणाए य ।
दुलहा भवम्मि बोहि विसयपसत्ताण सत्ताण ॥१२३॥

[अज्ञानेन कुसङ्गेन च कुत्रापि कुमतवासनाया च ।
दुर्लभो भवे बोधिर्विषयप्रसक्तानां सत्त्वानाम् ॥]

व्याख्या । **अज्ञानेन** जडतया, **कुसङ्गेन** मिथ्यादृष्टिसंसर्गेण, **चः** समुच्चये, 'कत्थ वि' **क्वापि** व्रतादिप्राप्तावपि 'कुमयवासणाए य' **चः** पुनरर्थे, कुत्सितं मतं द्वादशाङ्गीतः पदाक्षरादेरप्यन्यथा प्ररूपणं **कुमतम्,** यदाहुः—

"[1]**पयमक्खरं पि एक्कं जो न रोएइ सुत्तनिद्दिट्ठं ।**
सेसं रोयंतोऽवि हु मिच्छादिट्ठी मुणेयव्वो" ॥ [र.स./५०४]

अपि च, आ **सुधर्म**स्वाम्यविच्छिन्नगुर्वाज्ञाप्रवर्तमानगणभृत्परम्पराभिरशठाभिराचीर्णविधेर्विप्रतिपत्तिकरणं कुमतम्, यदाहुः—

"[2]**आयरियपरंपरेणं समागयं जो य छेयबुद्धीए ।**
कोवेइ छेयवाई जमालिनासं स नासिज्जा" ॥ [ ]

एतदादिरूपस्य तस्य **वासना** मिथ्याभिनिवशमतिस्**तया,** 'दुलहा भवम्मि बोही' **भवे**ऽस्मिन् संसारे बोधि**र्जिनधर्मावाप्तिर्दुर्लभा** । केषाम् ? 'सत्ताण' **सत्त्वानां** प्राणिनाम् । किंविशिष्टानाम् ? 'विसयपसत्ताण' **विषया** इन्द्रियार्थास्**तेषु प्रसक्ता** निबद्धवृत्तयस्तेषामिति ॥१२३॥

अथ द्वादशीं स्वाख्यातधर्मभावनामाह—

अइदुल्लहो य धम्मायरिओ जीवाण मोहमूढाण ।
जो साहइ जिणधम्मं अंधाण व मग्गसंचारं ॥१२४॥

[अतिदुर्लभश्च धर्माचार्यो जीवानां मोहमूढानाम् ।
यः कथयति जिनधर्ममन्धानामिव मार्गसंचारम् ॥]

व्याख्या । दुर्गतौ नरक-तिर्यग्लक्षणायां पतन्तो ये प्राणिनस्तेषां धरणाद् हेतोर्धर्मः, यद्वा, धत्ते नरसुरमोक्षस्थानेषु जन्तूनिति निरुक्ताद् धर्मः यदाह—

---

१. पदमक्षरमप्येकं यो न रोचयति सूत्रनिर्दिष्टम् ।
शेषं रोचयन्नपि मिथ्यादृष्टिर्ज्ञातव्यः ॥

२. आचार्यपारम्पर्येण समागतं यश्च च्छेदबुद्ध्या ।
प्ररूपयति च्छेदवादी जमालिनाशं स नश्येत् ॥

"दुर्गतौ सृताज्जन्तून् यस्माद् धारयते ततः ।
धत्ते चैतान् शुभे स्थाने तस्माद् धर्म इति स्मृतः" ॥ [ ]

तस्याचारं सुष्ठु आख्यातीति **धर्माचार्यः** सैष **दुर्लभो** दुष्प्रापः । **चः** पूर्वभावनापेक्षया समुच्चये । यः किम् ? 'जो साहइ जिणधम्मं' **यो जिनधर्मं** जीवदयात्मकं **कथयति**। केषाम् ? 'जीवाण' **जीवानां** प्राणिनाम् । किंविशिष्टानाम् ? 'मोहमूढाण' **मोहेन** मिथ्यात्वमोहनीयेन कर्मणा **मूढा** हेयोपादेशविवेकविकलास्ते तथा **तेषाम्** । केषामिव किम् ? '**अंधाण व मग्गसंचारं**' स्पष्टम् ॥१२४॥

धम्मायरिएण विणा जाणंति न मोहनिग्गहोवायं ।
धम्माभिमुहा वि पुणो पुणो वि जीवा भमंति भवे ॥१२५॥

[धर्म्माचार्येण विना जानन्ति न मोहनिग्रहोपायम् ।
धर्माभिमुखा अपि पुनः पुनरपि जीवा भ्रमन्ति भवे ॥]

व्याख्या । **धर्माचार्येण विना** जीवा मोहनिग्रहोपायं **न जानन्ति** । ततः किं स्याद् ? इत्याह–'पुणो पुणो वि भमंति भवे' **भवे** संसारे **पुनः पुनरपि भ्राम्यन्ति**। किमधर्माभिमुखाः ? इत्याह–'धम्माभिमुहा वि' **धर्माभिमुखा अपि तामल्यादि**वत् तत्त्वबहिर्भूताः प्रभूताज्ञानकष्टपटिष्ठा अपि स्वल्पफलभाक्त्वेन न मुक्तिमाप्नुवन्तीति भावा ॥१२५॥

अथ गाथाचतुष्कोण धर्ममहिमोत्कीर्तनेन स्वजीवं बोधयन्नाह–

रे जीव ! कह णु चिंतसि चिंतामणिकामधेणुकप्पतरू ।
धम्मेणं चिय सव्वाइं हुंति कज्जाइं सज्जाइं ॥१२६॥

[रे जीव ! कथं नु चिन्तयसि चिन्तामणिकामधेनुकल्पतरवः ।
धर्मेणैव सर्वाणि भवन्ति कार्याणि सज्जानि ॥]

व्याख्या । 'रे' इत्यामन्त्रणार्थाभिद्योतकं पदमिह महदज्ञानतासूचकम् । **जीव** आत्मन्! 'नु' इति वितर्के । **कथं चिन्तामणि-कामधेनु-कल्पतरून् चिन्तय-**

स्यनुध्यायसि ? अजागलस्तनप्रासवनमिवार्थकमेवेदमिति भावः । तर्हि जर्जरितात्मकार्यसंधानविधावुपायः कः स्याद् ? इत्याशङ्क्याह—'धम्मेणं ति' 'चिय ति' अवधारणे **धर्मेण** जिनप्रणीताचारेण **सर्वाणि**-ऐहिकामुष्मिकाणीति भावः **कार्याणि** कृत्यानि **सज्जानि** प्रगुणानि भग्नान्यप्यस्थीनीव सर्पिषा संनद्धानि भवन्ति, यदुक्तमस्माभिः—

"कल्पद्रुमो द्रुमः सोऽपि कामदुधापि सा ।
दृषच्चिन्तामणिः सोऽपि विनैतं धर्ममङ्गिनाम्" ॥ [ ]

अपि च ।

"का कामधेनुरिह कश्चिन्तामणिरपि च कल्पशाखी कः ।
सर्वाण्यमूनि भुवने पर्यायवचांसि धर्मस्य" ॥ [ ]

इति ॥१२६॥

भमिहिसि भवम्मि निग्गुण ! जम्मजरामरणपरवसो जीव ! ।
न कया कया वि तुमए जिणवययरसायणे तण्हा ॥१२७॥

[भ्रमिष्यसि भवे निर्गुण ! जनजरामरणपरवशो जीव ! ।
न कृता कदापि त्वया जिनवचनरसायने तृष्णा ॥]

व्याख्या । **हे जीव । नितरां गतो** विनष्टो **गुणः** संज्ञानरूपो यस्य स तथा **तस्य संबोधनं,** भ्राम्यसि तैलिकवृषभ इव च्छन्नदर्शनः पर्यटसि । किम्भूतः सन् ? 'जम्मजरामरणपरवसो' जन्म च जरा च मरणं च **जन्मजरामरणानि तैः** क्रियासमभिहारप्रवर्तमानैः **परवशः** परायत्तः सन् । कथम् ? इत्याह—'तुमए तण्हा न कयावि कया' त्वया **तृष्णा** रुचिर्न **कदापि कृता** । क्व ? 'जिणवयणरसायणे' **जिनानाम**र्हतां **वचनं** सम्यक्त्वमूलमहिंसादिव्रतानुष्ठानरूपं शासनं तदेव **रसायनम्** अजरामरत्वदायि महौषधं तत्तथा । आयुर्वेदोक्तं रसायनमन्यत् फल्गुवल्गितमेव, एतज्जिनवचनरसायनं त्वजरामरत्वाद्वैतवाहि **तस्मिन्** । अन्यत्तु रसायनमनुभुतं सदजरामरत्वं कुर्याद् न वा, अस्मिज्जिनवचनरसायने त्वनुभवस्य किमुच्यते, तृष्णापि, **पुण्डरीका**दीनामिवाजरामरत्वहेतु : । तच्च सम्प्रदायगम्यम्, तथाहि—

"निस्तुषं समभागं च तत्त्वत्रितयमादितः ।
महाव्रतानि पञ्चैषु भावनाः पञ्च पञ्च च ॥१॥ [ ]
तपश्च द्वादशविधं तत्र द्वादश भावना : ।
अष्टौ स्पष्टौजसः किञ्च दर्शनस्य प्रभावनाः ॥२॥ [ ]
गुरूपदेशतो बद्ध्वा स्वमनःपारदं ततः ।
तेनैता योजयेत् प्राज्ञास्तत्त्वमुख्या महौषधीः ॥३॥ [ ]
मिथ्यात्ववमनं मोहलङ्घनं मलपातनम् ।
कृत्वा पूर्वं ततः कुर्यादिदं धर्मरसायनम् ॥४॥ [ ]
न जन्म न जरा नापि मरणं तस्य कहिर्चित् ।
इदं यः कार्यवित् कुर्याज्जिनवाक्यरसायनम्" ॥५॥ [ ]

इति ॥१२७॥

जइ मुणसि पावकम्मं सम्मं दुक्खाण कारणं जीव ! ।
तह वि हु जुज्झ पमाओ निद्धंधस ! धम्मकज्जेसु ॥१२८॥

[यदि जानासि पापकर्म सम्यग् दुःखानां कारणं जीव ! ।
तथापि हि तव प्रमादो निर्लज्ज ! धर्मकार्यषु ॥]

व्याख्या । हे 'निद्धंधस' **निर्लज्ज** आत्मन् ! यदि **पापकर्म** भावकर्मरोगममुं **सम्यग् दुःखानां** जन्मजरामरणादीनां **कारणं** हेतुं जानासि, 'तह वि हु' **तथापि खलु** तव **प्रमादो**ऽनादरः । केषु ? **धर्मकार्येषु** सत्क्रियासु । तास्तु सम्प्रदायगम्याः, तथाहि —

"केशोत्तारणमल्पमल्पमरसं निर्व्यञ्जनं भोजनं ।
निद्रावर्जनमह्नि मज्जनवेधित्यागश्च भोगोज्झनम् ॥ [ ]
पानं संस्कृतपाथसामविरतं येषां किलेत्थं
क्रियास्तेषां स्फुटमयं पुष्टोऽपि हि क्षीयते" ॥ [ ]

इति ॥१२८॥

अथ तदविघटनया जीवस्य धर्मं प्ररोचयन्नाह–

विहडइ विहवो विहडइ बंधवो विहडए सरीरं पि ।
तणुपरिचओ वि अंते विहडेइ न जीव ! तुह धम्मो ॥१२९॥

[विघटते विभवो विघटते बान्धवो विघटते शरीरमपि ।
तनुपरिचयोऽप्यन्ते विघटते न जीव ! तव धर्मः ॥]

व्याख्या । **हे जीव** ! 'तुह' **तव विभवो** द्रव्यमनेककष्टकृत्योपार्जितो रक्ष्यमाण- **श्चान्ते** परलोकप्रस्थाने 'विहडइ' **न सहयायी**ति भावः । द्रव्यं ह्यचेतनं न जानीते कृतस्येत्याशङ्क्याह–**बान्धवः** स्वजनो यः सचेतनः कृतवेदी सोऽपि **विघटते** । न केवलमयम्, **शरीरमपि** देवगुरुबान्धवाद् यदधिकवाल्लभ्यात् पोषितं तदपि **विघटते** । अत एव कृतघ्नत्वागसि वह्निना दाहशिक्षां लभते । **धर्मस्तु तनुप- रिचयोऽपि** स्वल्पसेवितोऽपि **न विघटते,** यदुक्तम्–

"गृहेष्वर्था निवर्तन्ते श्मशानेषु च बान्धवाः ।
वह्निना दह्यते देहः स्वं कर्मैव सह व्रजेत्" ॥ [ ]

इति ॥१२९॥

अथान्तरङ्गकुटुम्बगुणकदम्बपरिमलोद्गारेण जीवस्य बहिरङ्गकुटुम्बमोहमल- वासमुज्जासयन्नाह–

धम्मो चिय तुह जणओ जणणी तुह जीव ! सव्वजीवदया ।
तुह बंधवो विवेगो परमं मितं च सम्मतं ॥१३०॥

मणसुद्धी पुण दइया उवसमपमुहा गुणा य तुह सयणा ।
इंदियजओ य पुत्तो सुहबुद्धी तुह पुणो धूया ॥१३१॥

एयं चेव कुडुंबं धरिज्ज हियए करिज्ज मह वयणं ।
परलोए वि पउत्थं तं न मुयइ जं खणद्धं पि ॥१३२॥

[धर्म एव तव जनको जननी तव जीव ! सर्वजीवदया ।
तव बान्धवो विवेकः परमं मित्रं च सम्यक्त्वम् ॥

मनःशुद्धिः पुनर्दयितोपशमप्रमुखा गुणाश्च तव स्वजनाः ।
इन्द्रियजयश्च पुत्रः शुभबुद्धिस्तव पुनर्दुहिता ॥

एतदेव कुटुम्बं धरेर्ह्यदये कुर्या मम वचनम् ।
परलोकेऽपि प्रोषितं त्वां न मुञ्चति यत्क्षणार्धमपि ॥]

व्याख्या । **हे जीव** ! 'चिय त्ति' अवधारणे, **तव धर्मो जनकः**, नान्यः सांसारिकः, यदयं संसारनाट्ये कर्मसूत्रभृत्परतन्त्रो गृहीतमुक्तान्यान्यज्ञातेयनेपथ्यो नट इव विचेष्टते, धर्मस्तु तत्तादृक्कुलजातिरूपचिद्रूपतारोग्यभाग्यसौभाग्याधिपत्यादेः प्रतिभवं जनक त्वादेकान्तेन जनकः । जननी च तव का नाम ? 'सव्वजीवदया' **सर्वे** च ते **जीवा** एकेन्द्रियादयस्ते तथा **तेषु दया** कृपा । अन्या हि जननी पूर्वोक्त-बहिरङ्गपितृवद् भवनाटकनटी, इयं तु सर्वजीवदया रूपायुरारोग्यादिजननाद्वैतादात्मनः सनातनैव जननी, यदुक्तम्—"**मातेव सर्वभूतानामहिंसा हितकारिणी**" । [**यो.शा.२/५०**] इति । जनकस्य जननी प्रसत्तिपात्रं स्यात्, तदियमपि धर्मस्य तद्वत् । तथाहि—

"**चराचरेषु जीवेषु रक्षा धर्मप्रसत्तये ।**
तपोदानजपध्यानजातमस्याः परिच्छदः" ॥ [ ]

बान्धवस्तव को नाम ? **विवेको** हेयोपादेयकृत्यविवेचनम् । सांसारिको हि बध्नाति सुखेनेति बान्धव इति व्युत्पत्त्या वीक्ष्यमाण एकभविकऋणवैरशब्ददातापि द्रव्यादिविभागत्वाद् दुःखद एव । अयं त्वनन्तभवप्रवर्धितकर्मऋणमोचयिता रागादिवैरिवारनिवारकत्वादुत्तरोत्तरवैभवासंविभागित्वाच्चेहामुत्र च प्राणिनं सुखेन बध्नन् विवेक एवैको बान्धवः । **परमं** प्रकृष्टं **मित्रं** च तव । किं तत् ? **सम्यक्त्वम्**। यतः, मेद्यति स्निह्यतीति मित्रमिति व्युत्पत्त्या विचार्यमाणमिदमेव जाघटिति, यत् कर्मबन्धकारणमिथ्यात्वनिवर्तकत्वात् प्राणिनः प्रीतिं वर्धयति, यदुक्तम्—"**किं मित्रं, यद् निवारयति पापात्**" [ ] अन्यश्च सांसारिकं मित्रं

सहखेलनादिभिः पापहेतुरेवेति । **दयिता** च तव का नाम ? 'मणसुद्धी' मनसो विकल्परूपस्य शुद्धिर्निर्विकल्पता **मनःशुद्धिः**, यतो 'दयते दत्ते सदाऽऽनन्दमिति **दयिता**' इति व्युत्पत्त्या विचिन्त्यमाना सैव संगतिमङ्गति। अपरा तु सांसारिकी क्षणिकानन्ददायित्वादिह, अमुत्र तु निरयनिपातनिमित्तत्वाददयितैव। स्वजनाश्च तव के ? **उपशमप्रमुखा गुणाः**, यतः 'जनयन्ति प्रतिबन्धमिति जनाः, स्वस्यात्मनो जनाः **स्वजनाः**' इति व्युत्पत्त्या निर्धार्यमाणा अमी एवेहामुत्र च प्राणिनः प्रतिबन्धमनुज्झन्तः स्वकाः अपरे तु सांसारिकाः प्रान्ते प्रेतवनानुप्रयाणप्रवासावधिप्रीतय एवेति । **पुत्रश्च** तव को नाम ? 'इंदियजओ' **इन्द्रियाणां** स्पर्शनादीनां **जयो** वशीकरणमिन्द्रियजयः, यतः '**पुंनाम्नो नरकात् त्रायते**' इति लौकिकव्युत्पत्त्यापि विचार्यमाणोऽयमेव युक्तिमनक्ति । अपरस्तु सांसारिकः पुत्रो विषयवासनापास्तसमस्तशस्ताचारतया न तथेति । 'तुह पुणो धूय त्ति' **तव** पुन**र्दुहिता** का ? 'सुहबुद्धी' शुभा सावद्यविरत्वा शोभमाना बुद्धिः **शुभबुद्धिः**, यतः 'दोग्धि प्रमोदेन पितरं पूरयतीति दुहिता' इति व्युत्पत्त्या सत्याप्यमानेयमेव घटाकोटिमाटीकते । अन्या तु सांसारिकी दुहिता शोकसंतापनिबन्धनमेवेति । 'एयं चेव कुडुंबं' इत्येषा गाथा स्पष्टैव, परं 'पउत्थं' **प्रोषितम्**, 'तं' **त्वामि**ति पर्यायः ॥१३०॥१३१॥१३२॥

अथ धर्मविषयप्रमादेऽनुशयान आह—

साहम्मियसम्माणं न कयं जिणमंदिरं न उद्धरियं ।
न य जिणवरवरबिंबं कारवियं जम्म हारवियं ॥१३३॥

[साधर्मिकसम्मानं न कृतं जिनमन्दिरं नोद्धृतम् ।
न च जिनवरवरबिम्बं कारितं जन्म नाशितम् ॥]

स्पष्टा ॥१३३॥

पत्ते घरम्मि पत्ते सव्वविसुद्धं विसुद्धसद्धाए ।
जेण न दिन्नं दाणं कह होही तस्स कल्लाणं ? ॥१३४॥

[पात्रे गृहं प्राप्ते सर्वविशुद्धं विशुद्धश्रद्धाया ।
येन न दत्तं दानं कथं भविष्यति तस्य कल्याणम् ? ॥]

व्याख्या । **पात्रं** ज्ञानदर्शनचारित्रात्मकं **तस्मिन्** 'घरम्मि पत्ते' "**द्वितीयातृतीययोः सप्तमी**" [है० प्रा० ३ । १३५] इति प्राकृतलक्षणत्वाद् **गृहं प्राप्ते** 'सव्वविसुद्धं' सर्वैः सचित्तक्षेपण-सचित्तपिधान-कालल्लङ्घन-मत्सरा-ऽन्यापदेशादिभिः पञ्चभिरप्यतिथिसंविभागव्रतातीचारैर्विशुद्धं विप्रमुक्तं **सर्वविशुद्धं** 'विसुद्धसद्धाए' **विशुद्धा**तिनिर्मला चासौ **श्रद्धा**

"कृतकृत्योऽस्मि धन्योऽस्मि पुण्यवानस्म्यहं यतः ।
चित्तं वित्तं च पात्रं च त्रिवेणीसङ्गमोऽद्य मे" ॥ [ ]

इत्यादिरूपा वासना **विशुद्धश्रद्धा तयो**पलक्षितेन **जीवेन** प्रासुकाशनपान-खादिमस्वादिमवस्त्रपात्ररजोहरणकम्बलपीठफलकशय्यासंस्तारकादिरूपं **दानं न दत्तं**, "कह होही तस्स कल्लाणं **कथं भविष्यति तस्य कल्याणं** मुक्तिः ? ननु "[१]**दाणेणं हुंति उत्तमा भोगा**" [ ] कथं मुक्तिरिति ब्रूषे ? तन्न, यदाह भगवान्—

"[२]**समणोवासए णं भंते ! तहारूवं समणं वा माहणं वा फासुएणं एसणिज्जेणं असण-पाण-खाइम-साइमेणं वत्थ-पडिग्गह-कम्बल-पायपुंछणेणं पीढफलग-सिज्जा-संथारएणं पडिलाभेमाणे किं लहइ ?" "गोयमा ! समणोवासए णं तहारूवं समणं वा माहणं वा जावपडिलाभेमाणे तहारूवस्स समणस्स वा माहणस्स वा समाहिमुप्पाएइ, समाहिकारणेणं तहमेव समाहिं पडिलंभइ" । "समणोवासए णं भते ! तहारूवं समणं वा माहणं वा जाव पडिलाभेमाणे किं चयह ?" । "गोयमा ! जीवियं चयइ, दुच्चरियं चयइ, दुच्चरियं चइत्ता दुक्करं करइ, दुल्लहं लहइ, बोहिं लहइ, तओ पच्छा सिज्झइ, बुज्झइ, मुच्चइ, जाव अंत करेइ" ॥ [ ] इति ॥१३४॥

---

१. दानेन भवन्त्युत्तमा भोगाः ।

२ "श्रमणोपासको भगवन् ! तथारूपं श्रमणं वा पासुकेनैषणीयेनाशनपानखादिमस्वादिम्नावस्त्रप्रति-ग्रहकम्बनपादप्रोच्छनेन पीठफलकशय्यासंस्तारकेण प्रतिलम्भयन् किं लभते ?" । "गौतम ! श्रमणोपासकस्तथारूपं श्रमणं वा ब्राह्मणं वा यावत्प्रतिलभ्भयंस्तथारूपस्य श्रमणस्य वा ब्राह्मणस्य वा समाधि-मुत्पादयति, समाधिकारणेन तथैव समाधिं प्रतिलभते" । "श्रमणोपासको भगवन् ! तथारूपं श्रमणं वा ब्राह्मणं वा यावत्प्रतिलभ्भयन् किं त्यजति ?" । "गौतम ! जीवितं त्यजति, दुश्चरितं त्यकत्वा दुष्करं करोति, दुर्लभं लभते, बोधिं लभते, ततः पश्चात् सिध्यति, बुध्यते, यावदन्तं करोति ॥

दीणुद्धरणम्मि धणं न पउत्तं सज्जिओ न सीलगुणो ।
न कयं जिणउवएसाणुस्सरणं तस्स किं सरणं ? ॥१३५॥

[दीनोद्धरणे धनं न प्रयुक्तं सज्जितो न शीलगुणः ।
न कृतं जिनोपदेशानुसरणं तस्य किं शरणम् ? ॥]

सुगमा ॥१३५॥

अथानादिभवाभ्यस्तमिथ्यात्वं स्वजीवं हितोपदेशेन प्रीणयन्नाह–

आमयकारि विसायं मिच्छत्तं कयसणं व जं भुत्तं ।
तं वमसु विवेगोसहमुवभुंजिय जीव ! कुसलकए ॥१३६॥

[आमत(य)कारि विसातं (विस्वादं) मिथ्यात्वं कदशनमिव यद्भुक्तम् ।
तद् वम विवेकौषधमुपभुज्य जीव ! कुशलकृते ॥]

व्याख्या । **हे जीव** ! सुदेव-सुगुरुसेवामये सद्धर्ममोदके सत्यपि त्वया यद् मिथ्यात्वमज्ञानत्वं भुक्तम् । किंविशिष्टम् ? 'आमयकारि' आ सामस्त्येन मतानि निजकुमतिकल्पितान्याचरणानि **जमालि-गोष्ठामाहिल-त्रैराशिक-द्विक्रिय**क्रिया-रूपाणि करोतीत्येवंशीलम् **आमतकारि**। पुनः किंरूपम् ? 'विसायं' इह विग्रह-विवादरुचितया कुल-गण-सङ्घबहिष्कृतत्वात्, कष्टानुष्ठानानुभावाद् दिवि किल्बि-षिकत्वमात्रमापन्नस्य सुरसभातिरस्कृतत्वात् परत्र च विगतं सातं सुखं यस्य तद् **विसातम्** यदाहुः–

"[1]**विग्गहविवायरुइणो कुलगणसंघेण बाहिरकायस्स ।**
नत्थि किर देवलोगे वि देवसमिईसु ओगासो" ॥ [उव.मा./७०]

किमिव 'कयसणं व' **कदशनमिव**। तच्च किंरूपम् । **आमयकारि** रोगकारि, 'विसायं' **विस्वादम्** । 'तं' वमसु **तद् वम** । किं कृत्वा ? 'विवेगोसहमुवभुंजिय' विवेको राग-द्वेष-मोहादिदोषेभ्यः पृथग्भावरूपः स एव औषधं **विवेकौषधम्**

---

१. विग्रहविवादरुचेः कुलगणसंघेन बहिष्कृतस्य ।
नास्ति किल देवलोकेऽपि देवसमितिष्ववकाशः ॥

उपभुज्य । कस्मै ? 'कुसलकए' **कुशलकृते** जन्म-जरा-मरणहरणकारणायेति भावः ॥१३६॥

अथोपायान्तरेण स्वजीवं प्रति तत्त्वतात्पर्यमाह—

विसएसु परिभमंतं अइदुस्सहकम्मधम्मपरिसंतं ।
वीसामसु मणपहियं जिणधम्मतरुम्मि तं जीव ! ॥१३७॥

[विषयेषु परिभ्रमन्तमतिदुस्सहकर्मधर्मपरिश्रान्तम् ।
विश्रामय मनःपथिकं जिनधर्मतरौ त्वं जीव ! ॥]

व्याख्या । **हे जीव** ! **त्वं मनःपथिकं** चित्ताध्वगं 'विसएसु परिभमंतं' **विषयेष्विन्द्रियार्थेषु** देशेषु वेति संश्लिष्टं पदम्, **परिभ्रमन्तम्** । 'अइदुस्सह त्ति' **अतिदुस्सहानि** तीव्राणि **कर्माण्येव धर्म** आतपः स तथा तेन **परिश्रान्तं** खिन्नम् । 'वीसामसु' **विश्राामयस्व** । क्व ? 'जिणधम्मतरुम्मि' **जिनस्या**र्हतो **धर्मः** शासनं स एव **तरुर्वृक्षस्तस्मिन्नि**ति ॥१३७॥

अथान्यतमोपायेन जीवस्य मनःशुद्धिमुपदिशन्नाह—

नीरागमणगुरुसरोवराउ गहिऊण देसणासलिलं ।
तं कुणसु चित्तनिवसणमवणियनीसेसदोसमलं ॥१३८॥

[नीरागमनो(मन)गुरुसरोवराद् गृहीत्वा देशनासलिलम् ।
त्वं कुरु चित्तनिवसनमपनीतनिःशेषदोषमलम् ॥]

व्याख्या । **हे जीव** ! **त्वं चित्तनिवसनं** मनोवस्त्रं 'अवणिय त्ति' निःशेषाश्च ते दोषा रागद्वेषादयश्च मलः पूर्वबद्धं कर्म निःशेषदोषमलाः, तेऽपनीता यस्मात् तद् **अपनीतनिःशेषदोषमलं कुरुष्व** । किं कृत्वा ? 'गहिऊण' **गृहीत्वा** । किम् 'देसणसलिलं' **देशनाजलम्** । कस्मात् ? 'नीरागमणगुरुसरोवराउ' नीरागमनाश्चासौ गुरुश्च **नीरागमनोगुरुः** स एव **सरोवरं तस्मात्,** अथवा, नीरस्य जलस्यागमनं यत्र तद् **नीरागमनं** तच्च तत् **सरोवरं** च **तस्मादिति** श्लिष्टपदम् ॥१३८॥

अथ सर्वधर्मोपदेशमज्जया स्वजीवं शिक्षयन्नाह—

रक्खेज्जसु जीव ! तुमं हियए निहिऊण जच्चरयणं व ।
भवजलहिजाणवत्तं पत्तं पुन्नेण सम्मत्तं ॥१३९॥

[रक्षेर्जीव त्वं हृदये निधाय जात्यरत्नमिव ।
भवजलधियानपात्रं प्राप्तं पुण्येन सम्यक्त्वम् ॥]

व्याख्या । **हे जीव** ! 'तुमं' **त्वं** 'सम्मत्तं' **सम्यक्त्वं** "[1]**अरिहं देवो गुरुणो सुसाहुणो जिणमयं तत्तं**" [ ] इतिरूपं दर्शनम्, 'हियए निहिऊण' **हृदये निधाय** दृढं धृत्वा 'जच्चरयणं व' **जात्यरत्नमिव** 'रक्खिज्जसु' **रक्षेः** । किंविशिष्टम् ? 'पत्तं पुन्नेण' **प्राप्तं पुण्येन** पूर्वसुकृतकृतकर्मलाघवेनेत्यर्थः । पुनः किंविशिष्टम् ? 'भवजलहिजाणवत्तं' **भवः** संसार एव **जलधिस्तत्र यानपात्रं** प्रवहणम्, तदम-ज्जनविधावेकहेतुत्वादस्येति ॥१३९॥

अथ यद्यपि संसारपारावारतरणतरकाण्डमेकं सम्यक्त्वम्, तथापि चारित्रादि-क्रियाकौशलमन्तरेण न परं पारमधिगन्तुं पार्यते, अतस्तदुपदेशमाह—

जइ इच्छसि लंघेउं संसारं दुत्तरं पि ता कुणसु ।
तव-नियमसमायारं मायारंभं पमुत्तूण ॥१४०॥

[यदीच्छसि लङ्घितुं संसारं दुस्तरमपि तदा कुरु ।
तपोनियमसमाचारं मायारम्भं प्रमुच्य ॥]

स्पष्टा ॥१४०॥

इति सोपालम्भं सकरुणं स्वजीवमभिधायोपदेशवर्गसंवर्गणमाह —

इय सुणिऊण पसत्थं जीव ! तुम जाणिऊण परमत्थं ।
सुहकज्जेसु पमायं असुहसहायं इमं मुयसु ॥१४१॥

[इति श्रुत्वा प्रशस्तं जीव ! त्वं ज्ञात्वा परमार्थम् ।
शुभकार्येषु प्रमादमशुभसहायमिमं मुञ्च ॥]

---

१. अर्हन् देवो गुरवः सुसाधवो जिनमतं तत्त्वम् ।

व्याख्या । **इति** पूर्वोक्तं चतुःशरणप्रतिपत्ति-सम्यग्गुणानुमोदन-दुष्कृतगर्हा-भावनादिचतुष्प्रकारमुपदेशं **प्रशस्तं** सर्वोत्तमं **श्रुत्वा परमार्थं** "[1]**तमेव सच्चं निस्संकं जं जिणेहिं पवेइयं**" [ ] इति तत्त्वं **ज्ञात्वा शुभकार्येषु प्रमादमा**लस्यम् **अशुभ-सहायम्** अधर्मप्रकृतिपुरुष**मिमं** मुञ्चस्व परिहरेति ॥१४१॥

अथैतत्प्रकरणप्रसादोपरि कलशमिवोपदेशरहस्यमाह—

तं जीव ! सुणसु सव्वं फुरंतरोमंचकंचुओ निच्चं ।
जिणपवयणस्स सारं भाविज्ज मणे नमोक्कारं ॥१४२॥

[त्वं जीव ! शृणु सर्वं स्फुरद्रोमाञ्चकञ्चुको नित्यम् ।
जिनप्रवचनस्य सारं भावयेर्मनसि नमस्कारम् ॥]

अस्यां व्याख्यानं कर्पूरकलिकायां वासदानमिव निरर्थकमिति ॥१४२॥

अथ ग्रन्थसमाप्तौ मङ्गलगाथामाह—

रइयं पगरणमेयं जिणपवयणसारसंगहेण मया ।
सम्मं सम्मत्तवियासडंबरं दिसउ भवियाणं ॥१४३॥

[रचितं प्रकरेणमेतज्जिनप्रवचनसारसंग्रहेण मया ।
सम्यक् सम्यक्त्वविकासडम्बरं दिशतु भव्यानाम् ॥]

व्याख्या । **एतत् प्रकरणं मया रचितम्** । केन कृत्वा ? 'जिणपवयणसार-संगहेण' जिनानां प्रवचनं सिद्धान्तस्तत्र सारभूतानां चतुःशरणप्रतिपत्तिप्रभृतीनां चतुर्णामुपदेशानां संग्रह एकत्र मीलनं **जिनप्रवचनसारसंग्रहस्तेन,** अन्यदपि प्रकरणमुत्सवो विवाहादिः सारसंग्रहेण द्रव्योच्चयेन क्रियत इत्युक्तिलेशः । किं करोतु ? 'दिसउ' **दिशतु** 'सम्मं' **सम्यक्** । किं तत् ? 'सम्मत्तवियासडंबरं' **सम्यक्त्वस्य** सुदेव-सुगुरु-सुधर्मप्रतिपत्तिरूपस्य **विकासडम्बरो** विज्ञानविस्तरस्तम् । केभ्यः ? 'भवियाणं' **भविकेभ्य** इति कवेरुक्तिः । वयं तु ब्रूमः—**एतत् प्रकरणं भविकेभ्य** 'आसडं' **आसड**नामानं सुकविं **वरं** प्रधानं **दिशतु** कथयतु, यतः कवयः काव्य-

---

१. तदेव सत्यं निःशङ्कं यज्जिनैः प्रवेदितम् ।

कीर्तनैरेव परां प्रसिद्धिमायान्तीति । किंविशिष्टमिदं प्रकरणम् ? 'सम्मत्त वि' **"वी प्रजन-कान्त्य-ऽसन-खादनेषु"** इत्यनेन सम्यक्त्वं वेति समुद्दीपयति अवगमयति वा **सम्यक्त्वावि** क्विपा सिद्धमिति ॥१४३॥

अथ प्रशस्तिगाथामाह—

सिरिभिल्लमालनिम्मलकुलसंभवकडुयरायतणएण ।
इय आसडेण रइयं वसुजलहिदिणेसवरिसम्मि ॥१४४॥

[श्रीभिल्लमालनिर्मलकुलसंभवकटुकराजतनयेन ।
इत्यासडेन रचितं वसुजलधिदिनेशवर्षे ॥]

व्याख्या । **एतद् विवेकमञ्जरी**नामधेयं प्रकरणम् **आसडेन रचितं** रचनामानीतम् । किंविशिष्टेन ? 'सिरिभिल्लमाल त्ति' निर्मलं निर्दूषणां च तत्कुलं निर्मलकुलं, श्रियोपलक्षितं च भिल्लमालाख्यं निर्मलकुलं च तत्तथा, तस्मात् संभवतीति **श्रीभिल्लमालनिर्मलकुलसम्भवः**, स चासौ **कटुकराजस्तस्य तनयः** पुत्रो यः स तथा **तेन** । कदेत्याह—'वसुजलहि त्ति' वसवोऽष्टौ, जलधयश्चत्वारो, दिनेशा द्वादश तैर्निर्मितं वर्ष **वसुजलधिदिनेशवर्षं** तत्रेति संक्षेपार्थः । व्यासार्थस्तूच्यते—

श्री**भिल्लमाला**भिधया प्रसिद्धो वंशोऽवतंसो जगतीतलस्य ।
समस्ति पाथोधिरिवाच्युतश्री**सरस्वती**वासनिवास एकः ॥१॥

तस्मिन् नवो रजनिजानिरिवाजनिष्ट
भासा पटुः **कटुकराज** इति प्रतीतः ।
यो जैनदर्शनलयो भवमूर्ध्नि चक्रे
लीलास्पदं पदमखण्डिततवृत्त एव ॥२॥

सुधांशो रोहिणीवास्य बुधपुत्रप्रसुः प्रियाः ।
बभू**वानलदेवी**ति सतीजनमतील्लका ॥३॥

तयोरजनिषातां द्वौ सुता**वासडजासडौ** ।
सत्पथं न व्यलङ्घेतां धुर्यौ धर्मरथस्य यौ ॥४॥

आसडः कालिदासस्य यशोदीपमदीपयत् ।
मेघदूतमहाकाव्यटीकास्नेहनिषेचनात् ॥५॥

श्रुत्वा नवरसोद्गारकिरोऽस्य कवितागिरः ।
राजसभ्याः कविसभाशृङ्गार इति यं जगुः ॥६॥

जिनस्तोत्रस्तुतीः पद्यगद्यबन्धैरनेकशः ।
चक्रे यः क्रूरकर्माहिजाङ्गुलीमन्त्रसंनिभाः ॥७॥

येनो**पदेशकन्दल्या**ह्वानप्रकरणच्छलात् ।
कृतं मोक्षाध्वनीनेभ्यः पाथेयातिथ्यमक्षयम् ॥८॥

आसडस्य मृडस्येव गौरीगङ्गे बभूवतुः ।
पृथिवीदेवी-जैतल्लदेव्यौ द्वे तस्य वल्लभे ॥९॥

जैतल्लदेव्यां तनयावभूतां द्वावेतयो **राजड**नामधेयः ।
ज्येष्ठः कनिष्ठः कलिकालकुम्भिद्विड्जैत्रसिंहः किल **जैत्रसिंहः** ॥१०॥

अरिसिंह इति च **पृथिवीदेव्यां** करपुष्करस्रवद्दानः ।
गुरुगिरिपरिणतकर्मा गज इव कलभोऽङ्गजः समभूत ॥११॥

पुत्रे **राजड**नाम्नि बालकदलीकाण्डोपमे स्वःपुरीं,
याते **बालसरस्वती**ति विदिते तच्छोकमूढाशयः ।
संबुद्धोऽ**भयदेवसूरि**सुगुरोर्यैरेव वाक्यैरसौ,
तैरेवेदमसूत्रयत् प्रकरणं श्री**आसडः** सत्कविः ॥१२॥

एता**मासडिजैत्रसिंह**सचिवेनात्यर्थमभ्यर्थितो,
वृत्तिं श्री**हरिभद्रसूरि**सुगुरोः शिष्यः प्रशिष्यावधिः ।
वाग्देवीप्रतिपन्नसूनुरकृत श्री**बालचन्द्रा**ख्यया,
विख्याताऽधिपतिर्गणस्य गणिनी**रत्नश्रियो** धर्मजः ॥१३॥

देवानन्दमुनीन्दुगच्छगगनालङ्कारशीतद्युतेः,
शिष्यः श्री**कनकप्रभा**भिधगुरोस्त्रैवैद्यचूडामणेः ।
वाग्देवीसुत**बालचन्द्र**सुकवेरासप्रतिष्ठः सुधी-
रेतस्यां सहकारिकारणमभूत **प्रद्युम्नसूरिः** पुनः ॥१४॥
नागेन्द्रगच्छार्णवपार्वणेन्दुरेतां **बृहद्गच्छ**नभोरविश्च । 5
श्रीमान् विपूर्वो **जयसेनसूरिः श्रीपद्मसूरिः** समशोधयेताम् ॥१५॥
उत्सूत्रं यदसूत्रि सूत्रविकलेनालक्षणं लक्षणन्यूनेन-
शिष्यः श्लथीरीति-रीतिरिपुणा व्यर्थं हतार्थेन च ।
किञ्चित् क्वापि मया वचः प्रलपितं स्वच्छन्दमच्छदसा,
तच्छोध्यं विबुधैः परैरपि परं कृत्वा प्रसादं मयि ॥१६॥ 10
श्रीधातुर्लेखशाली त्रिदशपथमहालेखनीदण्डशाली,
सायं सायं किलायं सितकरखटिनीपात्रमादाय कालः ।
यावद् द्यौपट्टिकायामुडुलिपिविपुलं हस्तलेखं विधते,
तावद् वावाच्यमाना कृतिभिरतितरां वर्ततां वृत्तिरेषा ॥१७॥

इत्याचार्यश्रीबालचन्द्रकृतायां विवेकमञ्जरीवृत्तौ 15
भावनाविधिविवरणं नाम चतुर्थः परिमलः ॥

● ● ●

उद्दण्डशेषशयदण्डधृतस्य धात्रीच्छत्रस्य वारिधिदुकूलवृतस्य मौलो ।
स्वर्णाचलः कलशतामयमेति यावत्तावज्जयं कलयतादिह जैत्रसिंहः ॥

● ● ●

अष्टावनुष्टुभामत्र सहस्राणि भवन्ति हि । प्रत्याक्षरं गणनया ग्रन्थमाने विनिश्चिते ॥

परिशिष्टानि

परिशिष्टम्

[१]

विवेकमञ्जरीमूलगाथा ॥

सिद्धिपुरसत्थवाहं वीरं नमिऊण चरिमजिणनाहं ।
सवणसुहारससरिअं वुच्छामि विवेगमंजरिअं ॥१॥

दुट्ठट्ठकम्मवसगा भमंति भीमे भवम्मि निस्सीमे ।
भट्ठविवेगपईवा जीवा न मुणंति परमत्थं ॥२॥

इह जीवाण विवेगो परमं चक्खू अकारणो बंधू ।
जइ कहमवि पाविज्जइ असरिसकम्मक्खओवसमा ॥३॥

तस्स विभूसणमेगं मणसुद्धी मंजरीव रुक्खस्स ।
तीइ समिद्धो एसो सुहफलरिद्धिं पयच्छेइ ॥४॥

तम्हा खलु आयहियं चिंतंतेणं विवेगिणा एसा ।
कायव्वा मणसोही न होइ जह दुल्लहा बोही ॥५॥

चउसरणे पडिवत्ती सम्मं अणुमोअणा गुणाण तहा ।
दुक्कडगरिहा सह भावणा य मणसुद्धिबीआइं ॥६॥

निट्ठवियअट्ठकम्मा देसियदुल्लक्खमुक्खपुरमग्गा ।
तेलुक्कपरमबंधू अरहंता मंगलं पढमं ॥७॥

सिद्धा य मंगलं सव्वे साहू मंगलमुत्तमं ।
धम्मो केवलिपन्नत्तो सव्वजीवाणं मंगलं ॥८॥

अरहंता लोगुत्तमा सिद्धा लोगुत्तमा तहा ।
साहू लोगुत्तमा एसो धम्मो लोगाणमुत्तमो ॥९॥

अरहंता मम सरणं सरणं सिद्धा य साहुणो सरणं ।
धम्मो करुणारम्मो सरणं जिणनाहनिद्दिट्ठो ॥१०॥

सिरिरिसहअजियसंभवअभिनंदणसुमइपउमपहनाहा ।
जिणवरसुपासचंदप्पहसुविहिसीअलसिज्जंसा ॥११॥

वासुपुज्जविमलसामिअअणंतपहुधम्मसंतिकुंथुजिणा ।
अरमल्लिसुव्वयनमी नेमी पासो अ वद्धमाणो अ ॥१२॥

इअ चउवीसं तिहुयणनमंसिआ वट्टमाणतित्थयरा ।
केवलनाणदिणेसा हरंतु मम मोहतिमिरोहं ॥१३॥

केवलनाणिपमुहा अईअतित्थंकरा य चउवीसं ।
तह पउमनाहपमुहा मम सरणमणागया अरिहा ॥१४॥

सिरिउसभवद्धमाणयचंदाणणवारिसेणनामाणो ।
सासयजिणालयेसुं वंदे हं सासए जिणिंदे ॥१५॥

पुव्वविदेहे सीमंधरसामी विहरमाणतित्थयरो ।
अवरविदेहे जुगमंधरसामी मम सिवं दिसउ ॥१६॥

मुक्खपहं पयडंतो बाहुजिणिंदो तहा सुबाहू य ।
अन्ने वि अरहंता हरंतु दुरिआइं विहरंता ॥१७॥

नंदीसरअट्ठावयसत्तुंजयउज्जयंतसम्मेअपमुहाइं ।
अहं वंदे तित्थाइं परमभत्तीए ॥१८॥

सासयजिणालयाइं असासयाइं पि जाइं सव्वाइं ।
उड्ढमहतिरियलोए तेसिं पणमामि भावेण ॥१९॥

अड्ढाइज्जा दीवा पन्नरस तेसु कम्मभूमीओ ।
जे के वि तत्थ साहू पंचमहव्वयधरा धीरा ॥२०॥

अट्ठारससीलंगसहस्सधुराधरणलद्धमाहप्पा ।
कंदप्पदप्पदलणा तेसिं चलणा सुहं दिंतु ॥२१॥

सिद्धंतसुत्तहारो पयडियवरचरणकरणववहारो ।
भवियाण भवभयहरो सिरिगोयमगणहरो जयइ ॥२२॥

सिरिपुंडरीयगोयमपमुहा गणहारिणो महामुणिणो ।
तिहुयणपणमियचरणा सरणं मम मोहनिट्ठवणा ॥२३॥

भरहो सणंकुमारो सगरो मघवं जओ य हरिसेणो ।
तह सुपउमो य सत्त वि चक्कवईमुणिवई सरणं ॥२४॥

तिव्वतवखग्गखंडियभवपायववियडपयडियपहावा ।
सरणं नवबलदेवा वरगुणरयणायरा मज्झ ॥२५॥

भरहाईण मुणीणं गुणगारववण्णणेण पावमलं ।
पक्खालेमि य सव्वं पवित्ततित्थोदएणं व ॥२६॥

विहियं वेयावच्चं विहिणा साहूण सुद्धसीलाण ।
सिरिरिसहसुओ भरहो जाओ भरहाहिवो तेणं ॥२७॥

सो पढमचक्कवट्टी भरहो भवियाण कुणउ कल्लाणं ।
आयरिसघरे केवललच्छीए जो सयं वरिओ ॥२८॥

बालाण तवस्सीण य थविरगिलाणाण जेण साहूणं ।
वीसामणयं काही बाहुबली तेण बाहुबली ॥२९॥

सु च्चिय सणंकुमारो सलहिज्जइ जो तहा समत्थो वि ।
मोत्तूण दव्वरोगे चिगिच्छगो भावरोगाणं ॥३०॥

जस्स जलणेण सीसं झाणेण य झत्ति कम्म नीसेसं ।
पज्जलियं समकालं गयसुकुमालं च तं नमिमो ॥३१॥

घोरंतरायकम्माणुसएणं सो वि ढंढणकुमारो ।
उम्मूलइ उज्जुत्तो सव्वाइं चेव कम्माइं ॥३२॥

उब्भडवेसा वेसा सा कोसा तस्स थूलभद्दस्स ।
किं कुणइ जस्स न मणं मणं पि धीरत्तणं मुअइ ? ॥३३॥

जं दुक्करदुक्करकारउ त्ति भणिओ सि थूलभद्द ! तुमं ।
मयणभडवायभंजण ! तं छज्जइ तुज्झ गुरुवयणं ॥३४॥

छम्मासनिराहारो तवसोसियघोरकम्मपब्भारो ।
सिद्धिसुहं संपत्तो दढप्पहारी महासत्तो ॥३५॥

खंदगसीसेहिं तहा पीलिज्जंतेहिं अहह जंतेहि ।
जं तेहिं पीलियाइं नियकम्माइं तमच्छेरं ॥३६॥

सोणियगंधविणिग्गयपिवीलिया वज्जकीलियाउ व्व ।
जस्स पविट्ठा चलणेहिं णिग्गया सीसदेसम्मि ॥३७॥

अहह ! मह पावदुव्विलसियाणमेयं कियत्ति चितंतो ।
पत्तो चिलाइपुत्तो सुरलोअं निच्चउज्जोयं ॥३८॥

जं दुट्ठसिगालीए ववसिअमसमंजसं तए सहियं ।
तं मह सुअं पि सामिय ! अवंतिसुउमाल ! भयजणयं ॥३९॥

जणणी जाया वग्घी तीए तह दारिओ वि मुणिवसहो ।
अहियासिंतो अहिअं सुकोसलो निव्वुइं पत्तो ॥४०॥

तह सुकुमालो तह भोगलालसो सालिभद्द ! कह णु तुमं ।
दुद्धरनियमधुरं पडिवन्नो नमिऊण वीरजिणं ? ॥४१॥

तरुणीजणेण धणसंचएण तह गुरुअबंधुनेहेण ।
न विलुद्धं जस्स मणो तस्स नमो वयरसामिस्स ॥४२॥

दिढसिरवेढनिपीडणनिग्गयनयणो वि जं न परिकुविओ ।
मेअज्जखमासमणो मे अज्ज वि तं चमक्केइ ॥४३॥

भवभमणनिब्भयाए अभयाए पाडिओ वि तह विसमे ।
निव्वूढो सि सुदंसण ! तुह कित्ती तेण महमहइ ॥४४॥

वंदे दसन्नभद्दं समसीसीए अहो सुरिंदस्स ।
घित्तूण तहा विरइं जेण पइन्ना सुनिव्वूढा ॥४५॥

तह सत्तमीए बद्धं कम्ममसेसं पि जेण तह खवियं ।
कह न कुणइ अच्छरिअं पसन्नचंदस्य सच्चरियं ? ॥४६॥

सा कावि खमा तं किं पि मद्दवं अज्जवं च तं किं पि ।
जह कूरगडुयमहेसिणो समत्ताइं कज्जाइं ॥४७॥

खंडियमोहपगारं अभयकुमारं नमामि अणगारं ।
अज्ज वि जस्स मईओ जणस्स चित्ते चमक्कंति ॥४८॥

नवनवइकणयकोडी चइऊणं तह य अट्ठ रमणीउ ।
गहिऊण संजमं जंबूसामिणा साहिअं कज्जं ॥४९॥

धन्नो तह कयपुन्नो विण्हुकुमारो य अन्नियाउत्तो ।
जसभद्द-भद्दबाहू अइमुत्तो नागदत्तो य ॥५०॥

सिज्जंभवो अ पभवो सिरिओ उदायणो अ मासतुसो ।
केसी इलाइपुत्तो मेहकुमारो अ पुंडरीओ ॥५१॥

अद्दयकुमारसाहू कित्तिधरो नंदिसेण-करकंडू ।
हल्ल-विहल्लमुणिंदा साल-महासाल-सीहगिरी ॥५२॥

अज्जमहागिरि-अज्जसुहत्थी तह अज्जरक्खिओ संबो ।
पज्जुन्नमुणी कुम्मापुत्तो तह भद्दगुत्तो य ॥५३॥

विसमभवभमणनासणजिणसासणगयणमंडणमियंका ।
अन्ने वि महामुणिणो गुणिणो मम दिंतु सिद्धि सुहं ॥५४॥

जणविम्हयजणणीओ जयंति तित्थंकराण जणणीओ ।
पसवंति पुत्तरयणं जाओ तेलुक्कसिरितिलयं ॥५५॥

सीयादेवी सुलसा राइमई मयणरेह दमयंती ।
अज्जा चंदणबाला मणोरमा तह विलासवई ॥५६॥

अंजणासुंदरी चेव नम्मयासुंदरी सिवा ।
धारिणी चिल्लणादेवी पभावई कलावई ॥५७॥

रेवई देवई जिट्ठा सुजिट्ठा पउमावई ।
नंदा भद्दा सुभद्दा य रिसिदत्ता मिगावई ॥५८॥

इयमाइ सलहणिज्जा महासई जाण सुद्धचरियाण ।
वाइज्जइ सीलगुणो पयडु व्व जयम्मि जसपडहो ॥५९॥

गुणगारवं जिणाणं सिद्धसरूवं च सव्वसिद्धाणं ।
आयरियाणायारं उज्झायाणं च अज्झयणं ॥६०॥

सच्चरियं साहूणं जं सुहकिच्चं च सावयाणं पि ।
अणुमोएमि सहरिसं तं चिय उल्लसियरोमंचो ॥६१॥

अरहंतसिद्धचेईयसिद्धंताईण जयपवित्ताणं ।
जं आसाईयमिण्हिं मह मिच्छा दुक्कडं तत्थ ॥६२॥

पयअक्खरमत्ताए अहियं हीणं च जं मए गुणियं ।
तं तित्थयरपयासियवाणीए मज्झ खमियव्वं ॥६३॥

जयइ सुरासुरनमिओ गुणरयणमहोयही सुहावासो ।
तित्थयरमाणणीओ चउविहसिरिसमणसंघो य ॥६४॥

तं भगवंतं अणहं नियसत्तीए अणग्धभत्तीए ।
सक्कारेमि य संमाणेमि य सिरसा नमंसामि ॥६५॥

जं तस्स मए कत्थ वि पडिकूलं कह वि विप्पियं विहियं ।
आसायणा तह कया कया वि खामेमि तं सव्वं ॥६६॥

अहिंसालक्खणो धम्मो गुणाण रयणायरो ।
भासिओ वीअराएहिं मुक्खसुक्खाण कारणं ॥६७॥

दहभेओ जइधम्मो सावयधम्मो य बारस वयाइं ।
भणिओ थूलगपाणाइवायविरमणपुरोगाइं ॥६८॥

संकाकंखविगिच्छा मिच्छादिट्ठिस्स संथवपसंसा ।
आसायणं च कत्थ वि कयं तं खमावेमि ॥६९॥

जिणसमयपसिद्धेसु सत्तसु गुणसमिद्धेषु ।
जं चिय दिन्नं दाणं भत्तीए कयं च सम्माणं ॥७०॥

जं विहियं सुहकिच्चं अन्नं पि मए जिणाण आणाए ।
तं सव्वं पि अणग्घं मम हुज्जा मुक्खसुक्खफलं ॥७१॥

कालो अणाइ जीवो अणाइ तह भवपरंपराणाई ।
जे केवि तत्थ जीवा एगेंदियपमुहजाईसु ॥७२॥

एगिंदिया य बेइंदिया य तेइंदिया य चउरिंदी ।
पंचिंदिया य कत्थ वि असन्निपचिंदिया चेव ॥७३॥

देवनरतिरियनारयचउगइमग्गेसु परिभमंता य ।
तह ते वि पुढविकाया दगकाया वाउकाया य ॥७४॥

तेउक्काया वणस्सइकाया तसकाइया य सव्वे वि ।
इय छव्विहजीवनिकायलक्खणा निग्गुणेण मए ॥७५॥

चुलसीइलक्खसंखासु जीवजोणीसु परिभमंतेण ।
तज्जिय वत्तिय दूमिय परिभाविया तह उवद्दविया ॥७६॥

निब्भच्छिय संघट्टिय विहडाविय पीलिया य वेलविया ।
परियाविया य तह जीवियाउ ववरोपिया चेव ॥७७॥

तं तिविहं तिविहेणं सव्वं खामेमि तह य अप्पाणं ।
निंदामि य गरिहामि य तहा मिच्छा दुक्कडं मज्झ ॥७८॥

पियमाइमायबंधवपुत्तेसु मित्तवग्गेसु ।
उवयारिसु अवयारिसु सव्वेसु वि खमणा मज्झ ॥७९॥

खामेमि सव्वजीवे मज्झ सव्वे खमंतु ते ।
तेसु मज्झत्थभावो मे मित्ती व पारिणामिया ॥८०॥

सुहिया आमरहिया धुयपावरया सुधम्मकम्मरया ।
दीहाऊ जिणमयन्नू हवंतु सव्वे वि इह जीवा ॥८१॥

तिरियनरामरजणिया उवसग्गा के वि जे मए ते वि ।
खमियव्वा सहियव्वा सम्मं अहियासियव्वा य ॥८२॥

जं वायाए भणियं देहेण कयं मणेण संकलियं ।
तमहं असुहं कम्मं सम्मं गरिहामि सव्वं पि ॥८३॥

जाणंति जत्थ कत्थ वि केवलिणो मज्झ दूसणं किं पि ।
तं आलोएमि अहं तेसिं चिय सक्खियं इण्हिं ॥८४॥

सव्वं पाणाइवायं असच्चभासणमदत्तदाणं च ।
मेहुणपरिग्गहराइभत्तं कोहं च माणं च ॥८५॥

मायं लोहं कलहं परपरिवायं तहेव पेसुन्नं ।
अब्भक्खाणं मायामासं दोसं च पिम्मं च ॥८६॥

रइअरई तह मिच्छादंसणसल्लं च पावठाणाइं ।
अट्ठारस एयाइं पुव्वभवेसुं इहभवे वा ॥८७॥

कारवियाइं कयाइं तह अणुनायाइं जाइं ताइं अहं ।
तिविहेण वोसिरामी अरिहंताईण पच्चक्खं ॥८८॥

कत्थ वि कयं कुतित्थं जं च कुसत्थं तहेव सत्थं च ।
निन्हविओ तह मग्गो पयासिओ वा अमग्गो य ॥८९॥

मुक्कं पावनिलुक्कं देहं दव्वं कुडंबसयणाइं ।
अहवा जीवेहिं समं कह वि निबद्धाइं वेराइं ॥९०॥

मोहंधेण य रइयं हलउक्खलमुसलपमुहमहिगरणं ।
तं वोसिरियं सव्वं तिविहेणं पाणिवहकरणं ॥९१॥

परिचत्ताइं पनरस कम्मादाणाइं जाइं विहियाइं ।
अन्नं पि मए चत्तं जं चिय मिच्छत्तवुड्ढिकरं ॥९२॥

जं असुइदुसियं पि हु देहं बहु मन्नियं मए एयं ।
तं पि हु अंतिमऊसासेहिं तिकट्टु वोसिरियं ॥९३॥

तह सव्वदव्वजोगो सरीरजोगो य कम्मसंजोगो ।
सव्व इमे संजोगा जावज्जीवाइ वोसिरिया ॥९४॥

पच्चक्खाइ चउव्विहमाहारं जो पुणो निरागारं ।
अणुमोयइ सुकयाइं आलोयइ पावकम्माइं ॥९५॥

अंते जो संथारपव्वज्जं वा पवज्जइ धीरो ।
सो परलोए सुहिओ हवइ नरो लहइ पुण बोहिं ॥९६॥

नाणदंसणचारित्तरयणत्तयभूसिओ ।
अदूसिओ य दोसेहिं जीवो होइ न दुक्खिओ ॥९७॥

चउसरणं पडिवन्नो जीवो संसारकज्जनिव्विन्नो ।
भावेइ भावणाओ अणिच्चआईओ सव्वाओ ॥९८॥

विहवो सज्जणसंगो विसयसुहाइं विलासललियाइं ।
नलिनीदलग्गघोलिरजललवपरिचंचलं सव्वं ॥९९॥

तं कत्थ बलं तं कत्थ जुव्वणं अंगचंगिमा कत्थ ? ।
सव्वमणिच्चं पिच्छह नट्ठं दिट्ठं कयंतेण ॥१००॥

घणकम्मपासबद्धो भवनयरचउप्पहेसु विविहाओ ।
पावइ विडंबणाओ जीवो को इत्थं सरणं से ? ॥१०१॥

जीवो वाहिविलुत्तो सफरो इव निज्जले तडप्फडइ ।
सयणो विमणो पिच्छइ को सक्को वेयणाविगमे ? ॥१०२॥

मा जाणसु जीव ! तुमं पुत्तकलताई मज्झ सुहहेऊ ।
निउणं बंधणमेय संसारे संसरंताणं ॥१०३॥

विसमिव मुहे महुरा परिणामनिकामदारुणा विसया ।
कालमणंतं भुत्ता अज्ज वि मुत्तुं न किं जुत्ता ? ॥१०४॥

विसयरसासवमत्तो जुत्ताजुत्तं न याणई जीवो ।
झूरइ कलुणं पच्छा पत्तो नरयं महाघोरं ॥१०५॥

तह लालियं पि तह पालियं पि अंते मुहं विकूणेइ ।
फरिसंते पि कुडुंबं विडंबणा का न संसारे ? ॥१०६॥

जणणी जायइ जाया जाया माया पिया य पुत्तो य ।
अणवत्था संसारे कम्मवसा सव्वजीवाणं ॥१०७॥

एगो बंधइ कम्मं एगो धणहरणमरणवसणाइं ।
विसहइ भवम्मि भमडइ एगु च्चिय कम्मवेलविओ ॥१०८॥

अन्नो न कुणइ अहियं हियं पि अप्पा कुणेइ न हु अन्नो ।
अप्पकयं सुहदुक्खं भुंजसि ता कीस दीणमुहो ? ॥१०९॥

बहुआरंभविढत्तं वित्तं विलंसति जीव ! सयगणा ।
तज्जणियपावकम्मं अणुहवसि पुणो तुमं चेव ॥११०॥

अह दुक्खियाइं तह भुक्खियाइं जइ चिंतियाइं डिंभाइं ।
तह थोवं पि न अप्पा विचिंतिओ जीव ! किं भणिणो ? ॥१११॥

वीसरइ सयणलोगो तुह संबंधं मुहुत्तकयसोगो ।
जीव ! सुहासुहकम्मं वच्चइ एगं तए सरिसं ॥११२॥

तह परिचयघट्टाइं अणंतसो जीव ! जम्ममरणाइं ।
ता मरणे वि तुमं कह हद्धी धीरत्तणं मुयसि ? ॥११३॥

खणभंगुरं सरीरं जीवो अन्नो य सासयसहावो ।
कम्मवसा संबंधो निब्बंधो इत्थ को तम्हा ? ॥११४॥

कह आयं कह चलियं तुमं पि कह आगओ कहं गमिही ।
अन्नुन्नं पि न याणह जीव ! कुडुंबं कओ तुज्झ ? ॥११५॥

असुइसमवायजायं असुइरसाहारबद्धसंठाणं ।
असुईण जम्मभूमी तं देहं कह सुई होइ ? ॥११६॥

पंचेंदियाइं चउरो तह कसाया य तिन्नि दंडा य ।
पंचप्पाणिवहाई सत्तरसासवदुवाराइं ॥११७॥

एएहिं मुक्कलेहिं जीवतलायं समंतओ एयं ।
निच्चं आऊरिज्जइ कम्ममहावारिपूरेण ॥११८॥

एयाइं जो निरुंभइ पडिसेहइ सो तमित्थ पविसंतं ।
जं च पुराणं तं पि हु कमेण सोसेइ अपमत्तो ॥११९॥

बारसभेयविसिट्ठं सब्भिंतरबाहिरो जिणुद्दिट्ठो ।
ताविओ तवो विसुद्धो कम्ममसेसं पि निज्जरइ ॥१२०॥

धम्माहम्मा पुग्गलजीवाकासा य पंच सुपसिद्धा ।
अत्थिकाया तम्मयमेयं लोयं वियाणाहि ॥१२१॥

चउदसरज्जुपमाणे लोए ठाणं पि तिलतुससमाणं ।
तं नत्थि जत्थ जीवा न य पत्ता जम्ममरणाइं ॥१२२॥

अन्नाणेण कुसंगेण य कत्थ वि कुमयवासणाए य ।
दुलहा भवम्मि बोहि विसयपसत्ताण सत्ताण ॥१२३॥

अइदुल्लहो य धम्मायरिओ जीवाण मोहमूढाण ।
जो साहइ जिणधम्मं अंधाण व मग्गसंचारं ॥१२४॥

धम्मायरिएण विणा जाणंति न मोहनिग्गहोवायं ।
धम्माभिमुहा वि पुणो पुणो वि जीवा भमंति भवे ॥१२५॥

रे जीव ! कह णु चिंतसि चिंतामणिकामधेणुकप्पतरू ।
धम्मेणं चिय सव्वाइं हुंति कज्जाइं सज्जाइं ॥१२६॥

भमिहिसि भवम्मि निग्गुण ! जम्मजरामरणपरवसो जीव ! ।
न कया कया वि तुमए जिणवययरसायणे तण्हा ॥१२७॥

जइ मुणसि पावकम्मं सम्मं दुक्खाण कारणं जीव ! ।
तह वि हु जुज्झ पमाओ निद्धंधस ! धम्मकज्जेसु ॥१२८॥

विहडइ विहवो विहडइ बंधवो विहडए सरीरं पि ।
तणुपरिचओ वि अंते विहडेइ न जीव ! तुह धम्मो ॥१२९॥

धम्मो चिय तुह जणओ जणणी तुह जीव ! सव्वजीवदया ।
तुह बंधवो विवेगो परमं मितं च सम्मतं ॥१३०॥

मणसुद्धी पुण दइया उवसमपमुहा गुणा य तुह सयणा ।
इंदियजओ य पुत्तो सुहबुद्धी तुह पुणो धूया ॥१३१॥

एयं चेव कुडुंबं धरिज्ज हियए करिज्ज मह वयणं ।
परलोए वि पउत्थं तं न मुयइ जं खणद्धं पि ॥१३२॥

साहम्मियसम्माणं न कयं जिणमंदिरं न उद्धरियं ।
न य जिणवरवरबिंबं कारवियं जम्म हारवियं ॥१३३॥

पत्ते घरम्मि पत्ते सव्वविसुद्धं विसुद्धसद्धाए ।
जेण न दिन्नं दाणं कह होही तस्स कल्लाणं ? ॥१३४॥

दीणुद्धरणम्मि धणं न पउत्तं सज्जिओ न सीलगुणो ।
न कयं जिणउवएसाणुस्सरणं तस्स किं सरणं ? ॥१३५॥

आमयकारि विसायं मिच्छत्तं कयसणं व जं भुत्तं ।
तं वमसु विवेगोसहमुवभुंजिय जीव ! कुसलकए ॥१३६॥

विसएसु परिभमंतं अइदुस्सहकम्मधम्मपरिसंतं ।
वीसामसु मणपहियं जिणधम्मतरुम्मि तं जीव ! ॥१३७॥

नीरागमणगुरुसरोवराउ गहिऊण देसणासलिलं ।
तं कुणसु चित्तनिवसणमवणियनीसेसदोसमलं ॥१३८॥

रक्खेज्जसु जीव ! तुमं हियए निहिऊण जच्चरयणं व ।
भवजलहिजाणवत्तं पत्तं पुन्नेण सम्मत्तं ॥१३९॥

जइ इच्छसि लंघेउं संसारं दुत्तरं पि ता कुणसु ।
तव-नियमसमायारं मायारंभं पमुत्तूण ॥१४०॥

इय सुणिऊण पसत्थं जीव ! तुम जाणिऊण परमत्थं ।
सुहकज्जेसु पमायं असुहसहायं इमं मुयसु ॥१४१॥

तं जीव ! सुणसु सव्वं फुरंतरोमंचकंचुओ निच्चं ।
जिणपवयणस्स सारं भाविज्ज मणे नमोक्कारं ॥१४२॥

रइयं पगरणमेयं जिणपवयणसारसंगहेण मया ।
सम्मं सम्मत्तवियासडंबरं दिसउ भवियाणं ॥१४३॥

सिरिभिल्लमालनिम्मलकुलसंभवकडुयरायतणएण ।
इय आसडेण रइयं वसुजलहिदिणेसवरिसम्मि ॥१४४॥

● ● ●

परिशिष्टम्

[२]

विवेकमञ्जरीमूलगाथानामकाराद्यनुक्रमः ॥

कथा	गा./पृ.क्र.	कथा	गा./पृ.क्र.
अंजणासुंदरी चेव	५७-३४१	इह जीवाण विवेगो	३-५
अंते जो संथारपव्वज्जं	९६-६१०	उब्भडवेसा वेसा सा	३३-९१
अइदुल्लहो य धम्मायरिओ	१२४-६२४	एएहिं मुक्कलेहिं	११८-६१९
अड्ढाइज्जादीवा	२०-११	एगिंदिया य बेइंदिया य	७३-६००
अट्ठारससीलंगसहस्स	२१-११	एगो बंधइ कम्मं	१०८-६१५
अन्नाणेण कुसंगेण य	१२३-६२२	एयं चेव कुटुंबं	१३२-६२७
अन्नो न कुणइ अहियं	१०९-६१६	एयाइं जो निरुंभइ	११९-६१९
अरहंत सिद्धचेईय	६२-५९०	कत्थ वि कयं कुतित्थं	८९-६०७
अरहंता मम सरणं	१०-८	कह आयं कह चलियं	११५-६१८
अरहंता लोगुत्तमा	९-८	कारवियाइं कयाइं	८८-६०६
असुइसमवायजाय	११६-६१८	कालो अणाइ जीवो	७२-५९८
अह दुक्खियाइं तह	१११-६१७	केवलनाणिपमुहा	१४-९
अहिंसालक्खणो धम्मो	६७-५९२	खंडियमोहपगारं	४८-२०४
अहह ! मह पाव	३८-११६	खंदगसीसेहिं तहा	३६-११२
आमयकारि विसायं	१३६-६३१	खणभंगुरं सरीरं	११४-६१७
इअ चउवीसं तिहुयण	१३-९	खामेमि सव्वजीवे	८०-६०४
इय सुणिऊण पसत्थं	१४१-६३३	गुणगारवं जिणाणं	६०-५८८
इयमाइ सलहणिज्जा	५९-५८८	घणकम्मपासबद्धो	१०१-६१३

घोरंतरायकम्माणुसएणं	३२-८८
चउसरणं पडिवन्नो	९८-६१२
चउदसरज्जु पमाणे लोए	१२२-६२१
चुलसीइलक्खसंखासु	७६-६०२
चउसरणे पडिवत्ती	६-७
छम्मासनिराहारो	३५-१०७
जं असुइदुसियं पि हु	९३-६०९
जं तस्स मए कत्थ वि	६६-५९१
जं दुक्करदुक्करकारउ त्ति	३४-३१
जं दुट्ठसिगालीए	३९-१२०
जं वायाए भणियं	८३-६०५
जं विहियं सुहकिच्चं	७१-५९३
जइ इच्छसि लंघेउं	१४०-६३३
जइ मुणसि पावकम्मं	१२८-६२६
जणणी जायइ जाया	१०७-६१५
जणणी जाया वग्घी	४०-१२६
जणविम्हयजणणीओ	५५-३४१
जयइ सुरासुरनमिओ	६४-५९०
जस्स जलणेण सीसं	३१-८६
जाणंति जत्थ कत्थ वि	८४-६०५
जिणसमयपसिद्धेसु	७०-५९३
जीवो वाहिविलूत्तो	१०२-६१३
तं कत्थ बलं तं कत्थ	१००-६१३
तं जीव ! सुणसु सव्वं	१४२-६३४
तं तिविहं तिविहेणं	७८-६०३
तं भगवंतं अणहं	६५-५९१
तम्हा खलु आयहियं	५-७
तरुणीजणेण धणसंचएण	४२-१४३
तस्स विभूसणमेगं	४-६
तह परिचयघट्टाइं	११३-६१७
तह लालियं पि तह	१०६-६१५
तह सत्तमीए बद्धं	४६-१९२
तह सव्वदव्वजोगो	९४-६१०
तह सुकुमालो तह	४१-१३१
तिरियनरामरजणिया	८२-६०५
तिव्वतवखग्गखंडिय	२५-१५
तेउक्काया वणस्सइकाया	७५-६०१
दहभेओ जइधम्मो	६८-५९२
दिढसिरवेढनिपीडण	४३-१६९
दीणुद्धरणम्मि धणं	१३५-६३१
दुट्ठट्ठकम्मवसगा	२-५
देवनरयतिरियनारय	७४-६००
धन्नो तह कयपुन्नो	५०-२५८
धम्मायरिएण विणा	१२५-६२४
धम्माहम्मा पुग्गल	१२१-६२०
धम्मो चिय तुह जणओ	१३०-६२७
नंदीसरअट्ठावय	१८-१०
नवनवइकणयकोडी	४९-२४३
नाणदंसणचारित्त	९७-६११
निट्ठवियअट्ठकम्मा	७-८
निब्भच्छिय संघट्टिय	७७-६०२
नीरागमणगुरुसरोवराउ	१३८-६३२
पंचिंदियाइं चउरो	११७-६१९
पच्चक्खाइ चउव्विह	९५-६१०
पत्ते धरम्मि पत्ते	१३४-६२९
पयअक्खरमत्ताए	६३-५९०
परिचत्ताइं पनरस	९२-६०८
पियमाइमायबंधव	७९-६०४

पुव्वविदेहे सीमंधरसामी	१६-१०
बहुआरंभविढत्तं	११०-६१६
बारसभेयविसिट्ठं	१२०-६२०
बालाण तवस्सीण य	२९-१८
भमिहिसि भवम्मि निग्गुण !	१२७-६२५
भरहाईण मुणीणं	२६-१७
भरहो सणंकुमारो	२४-१५
भवभमणनिब्भयाए	४४-१७३
मणसुद्धी पुण दइया	१३१-६२७
मा जाणसु जीव ! तुमं	१०३-६१५
मायं लोहं कलहं	८६-६०६
मुक्कं पावनिलुक्कं	९०-६०७
मुक्खपहं पयडंतो	१७-१०
मोहंधेण य रइयं	९१-६०८
रइअरई तह मिच्छादंसण	८७-६०६
रइयं पगरणमेयं	१४३-६३४
रक्खेज्जसु जीव ! तुमं	१३९-६३३
रे जीव ! कह णु चिंतसि	१२६-६२४
रेवई देवई जिट्ठा	५८-३४१
वंदे दसन्नभद्दं	४५-१८६
वासुपुज्जविमलसामिअ	१२-९
विसएसु परिभमंतं	१३७-६३२
विसमभवभमणनासण	५४-३३८
विसमिव मुहे महुरा	१०४-६१४
विसयरसावमत्तो	१०५-६१४
विहडइ विहवो विहडइ	१२९-६२७
विहवो सज्जणसंगो	९९-६१२
विहियं वेयावच्चं	२७-१७
वीसरइ सयणलोगो	११२-६१७
संकाकंखविगिंछा	६९-५९३
सच्चरियं साहूणं	६१-५८८
सव्वं पाणाइवायं	८५-६०६
सा कावि खमा	४७-१९८
सासयजिणालयाइ	१९-१०
साहम्मियसम्माणं	१३३-६२९
सिज्जंभवो अ पभवो	५१-२५८
सिद्धंतसुत्तहारो	२२-१२
सिद्धिपुरसत्थवाहं	१-४
सिद्धा य मंगलं	८-८
सिरिउसभवद्धमाण	१५-९
सिरिपुंडरीयगोयमपमुहा	२३-१४
सिरिभिल्लमालनिम्मल	१४४-६३५
सिरिरिसहअजियसंभव	११-९
सीयादेवी सुलसा	५६-३४१
सु च्चिय सणंकुमारो	३०-६६
सुहिया आमरहिया	८१-६०४
सो पढमचक्कवट्टी	२८-१८
सोणियगंधविणिग्गय	३७-११६

● ● ●

परिशिष्टम्

[३]

विवेकमञ्जरीवृत्तिगतप्राकृतउद्धरणानामकाराद्यनुक्रमः ॥

उद्धरणांशः	स्थानम्	गा.क्र/पृ.क्र.
अडवीसा (बत्तीसा) अडयाला	[बृ.सं./२५७]	६०/६१-५८९
अणसणमूणोयरिया	[सं.प्र./१२६५]	२२-१३
अणुमाणहेउदिट्ठंतसाहिया	[उ.प./४८]	४८-२०४
अत्थो घरे नियत्तइ	[ ]	१०८-६१६
अरिहं देवो गुरुणो	[ ]	१३९-६३३
असणं खाइमं पाणं	[मू.शु./८३]	७०/७१-५९७
आयरियपरंपरेण	[ ]	१२३-६२३
इग दिट्ठी छप्पुरिमा	[ ]	२२-१४
उप्पत्तिया वेणइया	[उ.प./३८]	४८-२०४
उवओगदिट्ठसारा	[उ.प./४६]	४८-२०४
ओहा सुउवउत्तो	[ ]	७०/७१-५९५
करिज्ज तम्हा पडिमो	[ ]	७०/७१-५९६
काले पत्ताण पत्ताण	[मू.शु./८२]	७०/७१-५९७
खंती य मद्दवज्जवमुत्ती	[प्र.सा./५५४]	६८-५९२
जं सावयाणं करुणिज्झमुत्तं	[ ]	७०/७१-५९८
तमेव सच्चं निस्संकं	[ ]	१४१-६३४
ता एवं मे वित्तं	[पं.व./११२८]	७०/७१-५९४

दाणेण हुंति उत्तमा भोगा	[ ]	२७-१८
दाणेण हुंति उत्तमा भोगा	[ ]	१३४-६३०
दिज्जा दवं मंडलगोउलाइं	[ ]	७०/७१-५९६
नमो त्थु ते रयणकुक्खिधारिए	[ ]	५५-३४९
पडिबुज्झिस्संति इण्हिं	[पं.व./११२७]	७०/७१-५९४
पयमक्खरं पि एक्कं	[र.स./५०४]	१२३-६२३
पाणिवहमुसावाए	[सं.प्र./११२१]	६८-५९३
पायच्छित्तं विणओ	[सं.प्र./११६६]	२२-१३
पाविंति निव्वुइपुरं	[आ.नि./९०६]	१-४
पासाईया पडिमा	[व्य.भा./उ./६/१८९]	७०/७१-५९४
पिंड वत्थं च सेज्जं च	[द.वै./६/४८]	२२-१३
पिंडविसोही समिई	[आ.नि./७३७]	२२-१३
पिच्छिस्सं इत्थ अहं	[पं.व./११२६]	७०/७१-५९४
पीढगं फलगं चेव	[मू.शु./८४]	७०/७१-५९७
पुव्वमदिट्ठमसुयमवेइअ	[उ.प./३९]	४८-२०४
बारस बाहिं ठाणा	[ ]	२२-१४
भरनित्थरणसमत्था	[उ.प./४३]	४८-२०४
भावे खओवसमिए	[आ.नि./१०४]	३-६
मासाई सत्तंता	[सं.प्र./७३८]	२२-१४
वयसमणधम्मसंजम	[सं.प्र./९३६]	२२-१२
वसहिकहनिसिज्जिंदिय	[सं.प्र./११५६]	२२-१३
विग्गहविवायरुइणो	[उव.मा./७०]	१३६-६३१
वुब्भंति नाम भारा	[ ]	२१-१२
समणह कोडिसहस्सदुअ	[जग.सूत्रे]	५४-३३८
समयावलीमुहुत्ता	[सू.प्र./४९]	७४-५९९
सव्वो पुव्वकयाणं	[भ.भा./१६९]	८२-६०५
साहूण जंपावयणे	[ ]	७०/७१-५९७
सुयनाणम्मि नेउन्नं	[ ]	७०/७१-५९५

● ● ●

परिशिष्टम्

[४]

विवेकमञ्जरीवृत्तिगतसंस्कृतउद्धरणानामकाराद्यनुक्रमः ॥

उद्धरणांशः	स्थानम्	गा.क्र/पृ.क्र.
अङ्गारभाष्ट्रकरणं	[यो.शा./३/१०१]	९२-६०८
अन्तात्माश्रयैकाङ्गा	[ ]	७४/७५-६०२
अवसर्पिणीयं षड्भि-	[ ]	७२-६००
आकाशभूम्यवश्याय	[ ]	७४/७५-६०१
आयुः पल्योपमानानि	[ ]	७२-५९९
एकं हि चक्षुरमलं	[ ]	३-६
एका सिद्धिशिलासीम्नि	[ ]	१२२-६२२
एकाक्षाः स्थूलसूक्ष्माख्याः	[ ]	१२१-६२१
एकापराधे तद्गोत्रं	[ ]	३२-८८
एकेन्द्रियाः पृथिव्यम्बु-	[ ]	७२-६००
एतत्प्रमाणं लोकेऽत्र	[ ]	१२२-६२२
कटिस्थकरवैशाख-	[यो.शा./४/१०३]	१२१-६२१
कल्पद्रुमो द्रुमः सोऽपि	[ ]	१२६-६२५
कल्याणवर्णिकावृद्ध्यै	[ ]	३६-११२
कश्चित्लोकाग्रमारुह्य	[ ]	१२२-६२२
का कामधेनुरिह	[ ]	१२६-६२५
किं मित्रं यद् निवारयति	[ ]	१३०-६२८

कृतकृत्योऽस्मि धन्योऽस्मि	[ ]	१३०-६३०
केशोत्तारणमल्पमल्प	[ ]	१२८-६२६
गन्धकाभ्रकपालेवारण-	[ ]	७४/७५-६०१
गुडूचीगुग्गुलीमुस्ता	[ ]	७४/७५-६०२
गुरुपदेशतो बद्ध्वा	[ ]	१२७-६२६
गृहेष्वर्था निवर्तन्ते	[ ]	१२७-६२७
चराचरेषु जीवेषु	[ ]	१३०-६२८
छिन्नाच्छिन्नवनपत्र-	[यो.शा./३/१०२]	९२-६०८
जन्तो रत्नत्रयी यस्य	[ ]	९७-६११
जरामरणदौर्गत्य-	[ ]	९८-६१२
जीवानां पुद्गलानां च	[ ]	१२१-६२१
जीवो जिनोदितैरेभि-	[ ]	१२१-६२१
तपश्च द्वादशविधं	[ ]	१२७-६२६
तिलेक्षुसर्षपैरण्ड-	[यो.शा./३/१०६]	९२-६०९
त्रीन्द्रिया मत्कूणा यूका	[ ]	७२-६००
दन्तकेशनखास्थित्व-	[यो.शा./३/१०६]	९२-६०८
दुर्गतौ सृताज्जन्तून्	[ ]	१२४-६२४
दुष्षमादुष्षमारे च	[ ]	७२-५९९
दुष्षमारे प्रमा वर्ष-	[ ]	७२-५९९
द्विसप्ततिशरन्मानायुषो	[ ]	७२-५९९
धनं धर्मविलोपने	[ ]	१०८-६१६
धर्माद् भूम्यादीन्द्रिय-	[प्र.र./२४४]	२०/२१-११
न जन्म न जरा नापि	[ ]	१२७-६२६
नवनीतवसाक्षौद्र-	[यो.शा./३/१०८]	९२-६०९
नासावेधोऽङ्कनं	[ ]	९२-६०९
निर्वाणसाधकान् साधून्	[ ]	७०/७१-५९५
निस्तुषं समभागं च	[ ]	१२७-६२६
पञ्चेन्द्रिया जरापोताण्डजाः	[ ]	७२-६००
पठति पाठयते पठतामसौ	[ ]	७०/७१-५९६

पद्माश्रय इति पद्मं	[ ]	३-६
पानं संस्कृतपाथसा-	[ ]	१२८-६२६
पुद्गलाः स्युः स्पर्श-	[ ]	१२१-६२१
पूर्वकोट्ययुषां नृणां	[ ]	७२-५९९
प्रत्येकास्ते स्युरेकैक-	[ ]	७४/७५-६०२
प्रवालमणिरत्नानि	[ ]	७४/७५-६०१
बद्धा स्कन्धा गन्ध-	[ ]	१२१-६२१
बाल्ये न मातृवचनैरति	[ग.व.]	४२-१४३
भूतले रज्जुरेकास्ति	[ ]	१२२-६२२
मा कार्षीत् कोऽपि	[यो.शा./४/११८]	८०-६०४
मातृभुक्तान्नपानोत्थ-	[ ]	११६-६१९
मातेव सर्वभूतानामहिंसा	[ ]	१३०-६२८
मिथ्यात्ववमनं मोह-	[ ]	१२७-६२६
रसासृग्मांसमेदोस्थि-	[यो.शा./४/७२]	११६-६१९
लाक्षामनःशिलानीली	[यो.शा./३/१०७]	९२-६०९
लेखयन्ति नरा धन्या	[यो.शा./३/१११ वृ.]	७०/७१-५९६
लोकाग्रादप्रतिष्ठानतलं	[ ]	१२२-६२२
वात्याघनतनूद्भ्रामो	[ ]	७४/७५-६०१
विषयगणः कापुरुषं	[ ]	३३-९१
विषास्त्रहलयन्त्रायो-	[यो.शा./३/१०९]	९२-६०९
वैताढ्यकन्दरे गङ्गा	[ ]	७२-५९९
व्यसनात् पुण्यबुद्ध्या वा	[यो.शा./३/११३]	९२-६०९
शकटानां तदङ्गानां	[यो.शा./३/१०३]	९२-६०८
शकटोक्षलुलायोष्ट्र-	[यो.शा./३/१०४]	९२-६०८
शिक्षोपदेशालापान् ये	[ ]	७२-६००
शुक्रशोणितसंभूतो	[ ]	११६-६१८
श्रद्धालुताश्रान्तपदार्थचिन्तनाद्	[ ]	७०/७१-५९५
श्रीमाननेकपभटैकपति-	[ग.व.]	२०/२१-१२
स गोलो निपतन् मासैः	[ ]	१२२-६२२

सरःकूपादिखनन-	[यो.शा./३/१०५]	९२-६०८
सर्वगं स्वप्रतिष्ठं	[ ]	१२१-६२१
सह कलेवरखेदमचचिन्तयन्	[ ]	४०-१२६
साधरणश्च प्रत्येका	[ ]	७४/७५-६०२
सारिकाशुकमार्जार-	[यो.शा./३/११२]	९२-६०९
सुषमदुष्षमारे च	[ ]	७२-५९९
सुषमसुषमानाम्नि	[ ]	७२-५९९
सुषमारे प्रमा त्र्यब्धि-	[ ]	७२-५९९
सूक्ष्मासूक्ष्माः परे	[ ]	७४/७५-६०२
स्नुहीसूकरवल्ल्यश्च	[ ]	७४/७५-६०२
स्वयं गन्तुं प्रवृत्तेषु	[ ]	१२१-६२१

● ● ●

परिशिष्टम्

[५]

विवेकमञ्जरीकथागतसुक्तीनामकाराद्यनुक्रमः ॥

पद्यांशः	कथा	श्लो./पृष्ठ.
अङ्गुल्यो मुष्टिबन्धाय, विनाङ्गुष्ठं भवन्ति किम् ? ॥	[वज्रस्वामिकथा]	१३/१४४
अचिन्त्यं चरितं स्त्रीणां ही विपाको विधेरिव ॥	[अञ्जनासुन्दरीकथा]	९६/४८४
अथवा 'ज्ञानवानेव भवेद्, मुनिजनोऽखिलः' ।	[विलासवतीकथा]	२११/४५०
अधुनापि प्रियं किञ्चित्तादृशं तद् भविष्यति ॥	[ऋषिदत्ताकथा]	३०४/५६७
अनेदीयोऽपि नेदीयः कुरुते भवितव्यता ॥	[अभयकुमारकथा]	१४०/२२१
अवग्रहादिवाम्भोदो, भीष्मग्रीष्मद्रुतां लताम् ॥	[दवदन्तीकथा]	३९/४२९
अवध्या हि सतामेते नारीगोद्विजलिङ्गिनः ॥	[ऋषिदत्ताकथा]	३८७/५७६
अवश्यमेव भोक्तव्यं, कर्माधीने सुखासुखे ॥	[सीतादेवीकथा]	३०/३७३
अवश्यमेव हि भोक्तव्यं, भोग्यं तीर्थकृतामपि ॥	[अभयकुमारकथा]	६२/२३१
असारेऽमुत्रे संसारे, सारेयं हि तपःक्रिया ॥	[ऋषिदत्ताकथा]	४३९/५८०
अस्मादृशां कलङ्को यत्, तत्र किं नाम कौतुकम् ॥	[सुभद्राकथा]	२५/५४०
अहो ! विचित्रता कापि, कर्मणामवलोक्यते ॥	[करकण्डुकथा]	६३/३२६
अहो स्नेहविमूढानां, न किमप्यस्ति दुष्करम् ॥	[विलासवतीकथा]	३७०/४६३
अहो मायाविता स्त्रीणाम्, अहो विलसितं विधेः ॥	[विलासवतीकथा]	११८/४४२
आप्तो भवामि स ह्याप्तो, योऽग्रिमो धर्मवर्त्मनि ॥	[अभयकुमारकथा]	२३/२२८
इतो व्याघ्र इतस्तटी ॥	[ऋषिदत्ताकथा]	२३०/५६३
इष्टोऽपि त्यज्यते दुष्टः, शटदङ्गप्रदेशवत् ॥	[ऋषिदत्ताकथा]	२१३/५६१
ईदगेव हि संसारः, कुशाग्रजलचञ्चलः ॥	[विलासवतीकथा]	२२३/४५१
ईश्वरेच्छा हि यत्कृत्यविधावस्खलिता खलु ॥	[करकण्डुकथा]	९३/३२८

उद्योगेन तदानीमुद्वेगो, भूभुजां क इव ॥	[सीतादेवीकथा]	४६/३६१
उपेक्षैवास्य युज्येत, कृतघ्नस्य विनाशिनः ॥	[नागदत्तकथा]	८०/२८४
ऋते व्रतं मनुष्यत्वे, नान्यत् किमपि सुन्दरम् ॥	[पुण्डरीककथा]	२४/३१२
एकधर्मे प्रपन्नाः स्युर्मिथो बन्धव एव यत् ॥	[सीतादेवीकथा]	९२/३७८
कर्पूरपूरः किमहो, जायते लवणाकरे ॥	[ऋषिदत्ताकथा]	६४/५४१
कल्पते पशुधर्माय, पशुरेव न तादृशाः ॥	[कूर्मापुत्रकथा]	५७/३३५
कल्पद्रूणां सुवर्णाद्रौ, दृश्यते संभवः परम् ॥	[अभयकुमारकथा]	१६४/२२३
कालो हि सुखनिर्मग्नैर्गच्छन्नपि न लक्ष्यते ॥	[अभयकुमारकथा]	१३१/२२०
किं करे किङ्करेन्द्रस्य, तिष्ठेच्चिन्तामणिः क्वचित् ? ॥	[राजीमतीकथा]	७३/३९५
किमपि स्थानमस्थानं, भानोर्भासयतो भुवम् ॥	[दृढप्रहारिकथा]	३१/१०९
कीदृशी हि प्रभा भानोः, प्रतिबिम्बमुपेयसः ॥	[कलावतीकथा]	६९/५१७
कुटुम्बे देहिनां योगः, पक्षिणामिव शाखिनि ॥	[मदनरेखाकथा]	३६/४००
कुर्वते प्रार्थनाभङ्गं त्वादृशा अपि किं प्रभो ! ॥	[ऋषिदत्ताकथा]	३२३/५७०
कुलाङ्गनानां हि शिवाय पालितं, भवेदिहामुत्र च भर्तृशासनम् ॥	[दवदन्तीकथा]	२३/४२०
कृतेऽन्नपाके स्वयमात्मनीनैः, किं स्वाश्रयाग्निः प्रशमं न नेयः ? ॥	[विष्णुकुमारकथा]	७४/२६५
कैवर्तेनैव शफरी, कृता धात्राऽमृताद् बहिः ॥	[करकण्डुकथा]	२९/३२३
को नाम म्रियते नास्याः, कृतेऽतिमधुराकृतेः ॥	[ऋषिदत्ताकथा]	३७९/५७५
क्रमते तिमिरस्य विक्रमः, कुत एव प्रतपत्यहर्पतौ ॥	[भरतकथा]	२१/४२
गुणानामाकृतेश्चाद्य, सदृशोऽभूत् समागमः ॥	[वज्रस्वामिकथा]	१४४/१५५
गुरुणां विनयान्तो हि, कोपः शिशुषु जायते ॥	[नर्मदासुन्दरीकथा]	५८/४९८
गृह्यतां जिनधर्मस्तत्, शुभोदर्के भवे भवे ॥	[अञ्जनासुन्दरीकथा]	१२५/४८७
गेहदाहसमुद्भूतम्, उद्योतं कः समीहते ॥	[मदनरेखाकथा]	७१/४०३
चाण्डालकूपिका क्वापि, गम्यते तृषितैरपि ॥	[इलातीपुत्रकथा]	२०/३०२
चित्तं पात्रं च मे वित्तं, त्रिवेणीसङ्गमोऽद्य तत् ॥	[शालिभद्रकथा]	१०३/१४०
जितो भवान् भयं चास्ति, तस्माद् मा हन मा हन ॥	[भरतकथा]	५९/५९
जिनेशमुनयः प्राणहृतामपि शपन्ति न ॥	[नर्मदासुन्दरीकथा]	५९/४९८
जीवन् हि नरो भद्राणि पश्यति ।	[शय्यम्भवकथा]	२०/२८९

ज्ञातोदन्तः क्षितेरिन्दुरपि, स्वागसि लज्जितः ॥	[ऋषिदत्ताकथा]	४०/५७७
ज्योतिश्चक्रस्य नेताऽस्ति ध्रुवोऽणुरपि किं न हि ॥	[वज्रस्वामिकथा]	१०४/१५२
तद् योजनशते वैद्यः, सर्पोऽस्त्युच्छीर्षके पुनः ॥	[मृगावतीकथा]	३५/५८३
तद्भुतमपि किं पुष्पं वृक्षेभ्यो नातिरिच्यते ॥	[वज्रस्वामिकथा]	१००/१५१
तपनो हि तुलाविशुद्धिमानपि, कन्यां गत इत्यतादृशः ॥	[भरतकथा]	३०/४३
तपसा हन्यतेऽनन्तभवसम्भृतमप्यदः ॥	[दृढप्रहारिकथा]	३३/१०९
तपोभिर्दुस्तपैः किं किं, नासाध्यमपि साध्यते ? ॥	[प्रसन्नचन्द्रराजर्षिकथा]	२३/१९४
दयितोत्कण्ठितानां हि, कालक्षेपः सुदुःसहः ॥	[अञ्जनासुन्दरीकथा]	१९/४७८
दाहे चर्मैव दुर्गन्धं, सुगन्धस्त्वगरुर्यतः ॥	[मेघकुमारकथा]	२०/३०८
दुग्धे स्युः पूतराः क्वापि, श्यामिकापि च काञ्चने ॥	[अञ्जनासुन्दरीकथा]	३१/४७९
दुष्प्राप्यं च शिवं तावद्, धीरा यावदुदासते ॥	[पुण्डरीककथा]	३३/३१३
देवस्येव हि दिव्यस्य, प्रायेण विषमा गतिः	[सीतादेवीकथा]	१९४/३८७
देहिनां गतयो भिन्नाः, परलोकजुषां यतः ॥	[ऋषिदत्ताकथा]	३५५/५७३
धर्म एव हि जन्तूनां, पिता माता सुहृत् प्रभुः ॥	[ऋषिदत्ताकथा]	१७५/५५८
धर्मध्वंसे पतिध्वंसे, किं जीवन्ति कुलस्त्रियः ॥	[सुदर्शनकथा]	१२२/१८३
धर्मो यस्याङ्गरक्षोऽस्ति, जागरुकः सनातनः ॥	[सुदर्शनकथा]	१२९/१८४
धिक् सांसारिकमैश्वर्यं, यद् ममाप्यपरः प्रभुः ॥	[शालिभद्रकथा]	४०/१३४
धिगहो ! चरितं विधेः ॥	[ऋषिदत्ताकथा]	२६९/५६६
न पश्यति पयःपायी बिडालो लगुडं यथा ॥	[मृगावतीकथा]	४९/५८५
न मानं हि मनस्विनः ॥	[अञ्जनासुन्दरीकथा]	३७/४८०
न मुनेरन्यथा गिरः ॥	[नर्मदासुन्दरीकथा]	११२/५०३
न वेत्सि मानिनी तुष्टाऽमृतं रुष्टा विषं पुनः ॥	[सुदर्शनकथा]	९७/१८१
नादरः सहकारोऽपि, पुंसामात्तफलोत्करे ॥	[अभयकुमारकथा]	१३३/२२०
नान्यथा महतां गिरः ॥	[नर्मदासुन्दरीकथा]	८२/३२७
नार्थं ददाति यत्कोऽपि, निःश्रीके सवितर्यपि ॥	[अभयकुमारकथा]	९५/२१७
नार्हन्तोऽप्यायुः सन्धातुमीशते	[कूर्मापुत्रकथा]	२९/३३३
नाहं कस्यापि मे कोऽपि, न च मुक्त्वा जिनेश्वरम् ॥	[नागदत्तकथा]	९०/२८५
निरागस्यापि निर्बुद्धे ! हा विधे ! किं कृतं मयि ॥	[ऋषिदत्ताकथा]	३००/५६८
न्याय्य एव सरोजिन्याः, सङ्कोचस्तपनं विना ॥	[मदनरेखाकथा]	७२/४०३

पटुः कर्मणि कुग्रामे, कुविन्दः किं नु विन्दति ॥	[ऋषिदत्ताकथा]	६५/५४९
पन्थानः सन्तु ते शिवाः ॥	[अञ्जनासुन्दरीकथा]	५०/४८१
परलोकहितेन, इहलोकं सफलयिष्यति ॥	[विलासवतीकथा]	२४८/४५३
पारदारिकदस्यूनां, तृष्णीकत्वं हि लक्षणम् ॥	[सुदर्शनकथा]	१०९/१८२
प्रतारणविधीन् नैकान्, जानते ह्याशु पांशुलाः ॥	[अञ्जनासुन्दरीकथा]	९०/४८४
प्रतिबोधयिता यो मां, स बन्धुः स गुरुश्च मे ॥	[अभयकुमारकथा]	४४/२२९
प्रसाददृष्टिदानेऽपि, किं कापि स्याद् व्रतक्षितिः ? ॥	[भरतकथा]	१२/५५
प्रायः प्रमैतिदुस्त्यजम् ॥	[सीतादेवीकथा]	४४/३७४
प्रायेण निद्रा सुलभैव तेषां, येषां विकल्पा हृदये न केऽपि ॥	[अभयकुमारकथा]	३१/२४०
फणामणिं समादित्सेत को हि जाग्रति पन्नगे ॥	[दवदन्तीकथा]	१६/४२७
फलवत्त्वं मधूकद्रोः पत्रद्रोहि स्तवीति कः ॥	[भरतकथा]	२/५४
बद्ध्वाऽऽनीतो नदीपूरः, प्रजाशाः किं न पूरयेत् ॥	[सुदर्शनकथा]	९०/१८०
बलीयान् बहिरङ्गाद्, यदन्तरङ्गो विधिः स्मृतः ॥	[शालिभद्रकथा]	७७/१३७
बहुरत्ना हि भूरियम् ॥	[विलासवतीकथा]	४९९/४७४
बालस्त्रीणां हि रुदितं बलम् ॥	[कलावतीकथा]	१६६/५२५
भग्नालानः करी, विन्ध्याटवीमेवाभिधावति ॥	[जम्बूस्वामिकथा]	१४/२४४
भाग्येरुज्जागरैर्जन्तून्, अभ्यागच्छति वाञ्छितम् ॥	[अभयकुमारकथा]	१२१/२१९
भाग्यैः किं नाम दुर्घटम् ॥	[अभयकुमारकथा]	१६५/२२३
भुजखर्जुभिदे स्वबन्धुना रणकामः किमु लज्जसे न तत् ॥	[भरतकथा]	१००/४९
महतां न, हि कृत्यवस्तुषु, स्मृतिवैकल्यमिहोपजायते ॥	[भरतकथा]	४०/४४
मिथ्यापि सत्यसन्धाया, यद् तथ्याद् नातिरिच्यते ॥	[मदनरेखाकथा]	७३/४०४
मुनिर्जगाद् जननीतुल्या, व्रतिजनोऽङ्गिनाम् ॥	[विलासवतीकथा]	३६०/४६२
मृगनाभौ गता धूलिरप्यहो सुरभीभवेत् ॥	[ऋषिदत्ताकथा]	१६७/५५७
मृणालमृदुलः शेषः, क्षमाभारं दधाति यत् ॥	[शालिभद्रकथा]	६३/१३६
मोदन्ते कुमुदानीन्दौ, कमलानि तु भास्करे ॥	[ऋषिदत्ताकथा]	३१८/५७०
यत क्षैरेयीं विना घृष्टिरपि प्रीतिकरी न किम् ॥	[ऋषिदत्ताकथा]	३३८/५७२
यतः संयमिनां देव ! दूष्यते राजसङ्गतिः ॥	[ऋषिदत्ताकथा]	३२२/५७०

यतो विद्याधराः स्वामिकार्येऽभुवन् कृतोद्यमाः ॥	[विलासवतीकथा]	३८२/४६४
यथा तथापवादिता, यदबद्धमुखो जनः ॥	[सीतादेवीकथा]	५४/३७५
यदिक्षून् स्वादति क्रोडः, कुट्यते सैरिभाननम् ॥	[ऋषिदत्ताकथा]	२२६/५६२
यदुज्झिता भाद्रपदस्य गोमयं, यथा निषिद्धा न कदाग्रहीत्ततः ॥	[दवदन्तीकथा]	१७/४२०
यशः सारमसारेणार्जयन्त वपुषाऽमुना ॥	[विलासवतीकथा]	४४५/४७०
यादगेवोप्यते पूर्वं तादृगेव हि भूयते ॥	[ऋषिदत्ताकथा]	२७७/५६७
येन संजायते पुंसां, बुद्धिः कर्मानुसारिणी ॥	[मदनरेखाकथा]	२०/३९९
येनापकारिकाभ्योऽपि, सन्तो हन्तोपकारिणः ॥	[सुदर्शनकथा]	१०८/१८२
यो यस्य शश्वदासन्नः, प्रकृतिज्ञो हि तस्य सः ॥	[अम्बिकापुत्रकथा]	८१/२७२
राजतेजो हि दुस्सहम् ॥	[सीतादेवीकथा]	३४/३७३
राहोराहारितोऽपीन्दुर्गलादपि पलायते ॥	[राजीमतीकथा]	७४/३९५
रुद्रस्नात्रमिवालङ्घ्यं भाषितं हि पितुः सताम् ॥	[ऋषिदत्ताकथा]	२९४/५६८
रूपसम्पदपापाय, यदहो श्रूयते श्रुतौ ॥	[ऋषिदत्ताकथा]	२०४/५६०
वचनापि विवेकज्ञा, ज्ञातु न ह्यवजानते ॥	[ऋषिदत्ताकथा]	२९०/५६८
वरं स्तोकोऽपि कर्पूरो, न पूरोऽपि तु भस्मनः ॥	[अञ्जनासुन्दरीकथा]	२४/४७८
वर्षासरित्परीरब्धः, किमब्धिस्तरलायते ॥	[सुदर्शनकथा]	८७/१८०
वस्तुना रुचिरेणापि किमुच्छिष्टेन धीमताम् ? ॥	[राजीमतीकथा]	८६/३९६
विचित्रा कर्मणां गतिः	[विलासवतीकथा]	१६४/४४६
विचित्रा कर्मणां गतिः	[विलासवतीकथा]	३१९/४५९
विधुः संतप्यते क्वापि, दूयमानोऽपि राहुणा ॥	[ऋषिदत्ताकथा]	१७४/५५८
विना भानुप्रभां नैशं, तमो नश्यति कर्हिचित् ॥	[विष्णुकुमारकथा]	५६/२६३
विनाशिनोऽमेध्यमयेन साध्यते, परोपकारो यदि वर्ष्मणाऽमुना ॥	[दवदन्तीकथा]	३३/४२१
विनिहन्ति पतङ्गिपुङ्गवः फणिनः किं फणरत्नवाञ्छया ॥	[भरतकथा]	३३/४३
विरोधिन्यामपि मनोवृत्तिस्स्था कृपावती ॥	[ऋषिदत्ताकथा]	३९५/५७६
विवेकिनोऽपि यत् पूज्या नापराधमवेविचुः ॥	[अञ्जनासुन्दरीकथा]	१०८/४८५
विशदापि सदापि शेमुषी न हि कार्ये भवतीह संमुखी ॥	[भरतकथा]	११७/५०
वीरा अपि हि कामेन, क्रियन्ते भीरुकिङ्कराः ॥	[मृगावतीकथा]	३७/५८४

वेश्या धनस्य वश्यां स्मो, मन्मस्यापपि नान्यथा ॥	[स्थूलभद्रकथा]	९४/९९
श्रेयस्यपि सकर्णोऽपि, किमद्यापि प्रमाद्यसि ॥	[वज्रस्वामिकथा]	२५२/१६४
संघटन्तेऽसवः क्वापि, जीवतां मृतिमीयुषः ॥	[ऋषिदत्ताकथा]	३५७/५७३
संपद्यापदि वा पत्यौ, समाः खलु कुलस्त्रियः ॥	[अभयकुमारकथा]	१४५/२२१
संसारे नास्ति तद्, यद् न विज्ञायेत जिनागमात् ॥	[अन्निकापुत्रकथा]	६०/२७०
सकृत् कन्याः प्रदीयन्ते, इति तात् ! न किं श्रुतम् ॥	[अभयकुमारकथा]	७७/२३२
सतां चिन्तायिकः संपत्स्वापत्सु विधिरेव यत् ॥	[कलावतीकथा]	३८/५१४
समये मुखरागो हि, नृणामाख्याति पौरुषम् ॥	[अभयकुमारकथा]	३८/२०८
समस्तदुःखार्णवपारगामिनी, यदर्चनेच्छापि सुदुर्लभाङ्गिनाम् ॥	[दवदन्तीकथा]	४०/४२२
सर्वं काले फलेग्रहि	[नन्दिषेणकथा]	१०/३१८
सर्वङ्कषा हि गुर्वाज्ञा, दृश्यते चेदवज्ञया ॥	[अभयकुमारकथा]	१२८/२२०
सर्वलोकविरुद्धं तु, त्याज्यमेव यशस्विना ॥	[सीतादेवीकथा]	५६/३७५
सलक्ष्मणि विधौ किं न जाघटीति जनोदितम् ॥	[ऋषिदत्ताकथा]	२०९/५६१
सिंहीसुतो याति न किं वनान्तं, सिंही तु किं ताम्यति लेशताऽपि ॥	[सीतादेवीकथा]	२४/३५२
सुहृदां हि सुहृत्त्वस्य, कषो विषमकर्मणि ॥	[विलासवतीकथा]	५१/४३७
स्त्रीणां पतिगृहादन्यत्, पदं भ्रातृनिकेतनम् ॥	[सीतादेवीकथा]	९३/३७८
स्त्रीणां पतिरेव हि दैवतम् ॥	[कलावतीकथा]	११९/५२२
स्त्रीणां शीलं त्विहामुत्र, सिद्धिसंवननौषधम् ॥	[नर्मदासुन्दरीकथा]	१५१/५०६
स्नानेन तेन किं, हस्तिस्नानायेत पुरैव यत् ॥	[अभयकुमारकथा]	६३/२३१
स्नेहलं दधि मथ्नाति, पश्य मन्थानको न किम् ॥	[सुदर्शनकथा]	१३९/१८४
स्फरे वैरं स्फुरेद् न हि ॥	[नर्मदासुन्दरीकथा]	२०३/५१०
स्मरोन्मादपरीणामं, जनो जानाति पृष्ठतः ॥	[अभयकुमारकथा]	९७/२१७
स्याद्विचित्रा कर्मणां गतिः ॥	[पुण्डरीककथा]	४८/३१४
स्वार्थं विनाऽत्र संसारे, न स्वः कस्यापि कोऽपि यत् ॥	[भरतकथा]	१२९/२९
हरेर्दृष्टाङ्कुरा किञ्चन, निघ्नन्तीन्दुकलाकलाः ॥	[स्कन्दककथा]	२३/११४
हितं यत् परिणामे हि, हितं तत् पारमार्थिकम् ॥	[राजीमतीकथा]	६२/३९४
हृदि मत्सरपूरितेऽप्यहो ! न हि नाभिः प्रतिबन्धचौरिका	[भरतकथा]	१३६/५२

● ● ●

परिशिष्टम्

[६]

विवेकमञ्जरीकथागतताात्त्विकपद्यानामकाराद्यनुक्रमः ॥

पद्यांशः	श्लो./पृष्ठ.	पद्यांशः	श्लो./पृष्ठ.
अग्निकर्मविना कर्म	५३/७०	इयं हि प्रतिमा	२४/२८९
अचिन्तयच्च रे जीव !	५२/७०	ऋते पतिं सुशीलानां	७२/४०३
अथवा मयि मुक्तायामेव	१७१/५२६	कदाचित् कर्मणा	६३/७१
अथाह मुनिरीदृक्षः	३६०/४६२	कराभ्यां मोदकानेष	२७/९०
अनालोच्यात्मनो वीक्षा-	३५/१७६	कारुण्यसिन्धवो विश्व-	५६/४९८
अन्यच्च कारणं	२०/८७	किमन्यदथ स प्राप	२८/९०
अन्यत्र कारणं	१९/८७	किमेकमुच्यते पञ्च-	१४/१७४
अन्वर्था नन्दनास्ते	६६/२४	कुमारमहिलामात्रकृते	३५३/५७३
अस्मिन्नसारे संसारे	३/३१८	केनापि पुण्ययोगेन	१११/२३५
अहं दोषं न वेद्मि	१७०/५२६	को देवः सर्वज्ञः	१०७/५२१
अहिंसा सत्यमस्तेयं	२९/२९०	गृहस्थानां विषयिणां	२५/५४०
अहो ! कष्टमहो !	६/२८८	जले स्थले सुखे दुःखे	६९/४९९
अहो ममाविमर्शत्वम्	२०६/५२९	तत्रापि भावनाशुद्धं	५०/१३०
अहो मे मन्दभाग्यत्वम्	२०७/५२७	तदीर्ष्याजनितं कर्म	२४/२१
आख्याति स्मान्त्रिकापुत्रो	६२/१७१	त्यक्तोऽनया यथा	३७/६९
आत्मन् कर्म तदायातं	११३/५०३	दया जीवेषु सत्योक्ति-	११२/२३६
आधिबीजमसौ स्नेहः	३७१/४६३	दान-शील-तपो-भाव-	४९/१३०
इन्द्रायुधमिव स्वप्न-	२२४/४५१	धिक् पाषाणमिमं पिण्डं	२८१/१६६

धिगमी विषया येषाम्	१८१/५२७	वर्षिष्यति विषं चन्द्रः	१५/४२७
न द्रुह्यन्ति न मुह्यन्ति	५७/४९८	विद्वद्गोष्ठी क्वचित्	११६/२८७
न युक्तं कृतवानेष	११५/१८२	विना पुमांसं नायान्ति	१३/१४४
न सर्वकामदं तीर्थम्,	३७३/४६४	विभवो वैभवं बन्धु-	१११/३३०
नार्योऽनार्यौचितीशीला	४४/१७७	विभूतयोऽपि मा भूवन्	७१/४०३
निश्चिन्ता मुक्तिहेतूनि	६७/२४	विवोढुं प्रौढिमा कस्य	१६/४२७
परार्थकर्मठेनाद्य	३९२/५७६	व्यधा निरपराधायां	२६४/५६६
प्रभो ! के ते महापुण्या	५८/१३६	शुभस्याप्यशुभस्यापि	३०१/५३७
प्रमादे संयमो न स्यात्	२७०/१६६	संसारसागरे मर्त्य-	४२/६९
प्रायः संपाकमधुरा	२८०/५६७	संसारसुखापातमधुरं	६१/३९४
भवती स्वयमेवेति	२४५/५३२	संसारे चिक्लिशेऽमुष्मिन्	२५१/५५३
मा भूः सुखे च दुःखे च	१७५/५५८	संसारो दुस्त्यजस्तावद्	३३/३१३
मुनयो निर्ममा	१५/२८९	सज्जनाकृतयः कुर्युः	२३/११४
मृतस्यवल्लभासङ्ग	३५६/५७३	सर्वदुःखक्षयोपायं	३६१/४६३
यत् पुनः कथमप्यत्र	२६/५४०	सर्वेषां तत् प्रियाकर्तुं	६२/३९४
यदि निर्वादभीतस्त्वं	७५/३७७	सुरिराह जिने देवे	६८/७१
रे जीव ! भवता पाप !	२६३/५६५	सुवंशजोऽप्यकृत्यानि	१३९/१८४
रे जीव यत्कृते	३६/६९	स्नेहमूर्च्छां तदुत्सृज्य	३७२/४६३
रोगैरिवाहिभोगैर्वा	४१/१३४	स्वामिन् ! मामपहायैव	७१/३९४

● ● ●

परिशिष्टम्

[७]

विवेकमञ्जरीवृत्तिगतकथानामकाराद्यनुक्रमः ॥

कथा	गा./पृ.क्र.	कथा	गा./पृ.क्र.
अञ्जनासुन्दरीकथा	५७/४७७-४९३	पुण्डरीककथा	५१/३११-३१७
अतिमुक्तककथा	५०/२७४-२७७	प्रसन्नचन्द्रराजर्षिकथा	४६/१९२-१९७
अन्निकापुत्रकथा	५०/२६६-२७३	भरत-बाहुबलिकथा	२९/१९-६५
अभयकुमारकथा	४८/२०५-२४२	मदनरेखाकथा	५६/३९८-४०५
अवन्तीसुकुमालकथा	३९/१२०-१२५	माषतुषमुनिकथा	५१/२९४-२९६
इलातीपुत्रकथा	५१/३०१-३०६	मृगावतीकथा	५८/५८१-५८७
ऋषिदत्ताकथा	५८/५४४-५८०	मेघकुमारकथा	५१/३०७-३१०
करकण्डुकथा	५२/३२१-३३०	मेतार्यमुनिकथा	४३/१६९-१७२
कलावतीकथा	५७/५१२-५३७	राजीमतीकथा	५६/३८९-३९७
कूरगडुमुनिकथा	४७/१९८-२०३	वज्रस्वामिकथा	४२/१४३-१६८
कूर्मापुत्रकथा	५३/३३१-३३७	विलासवतीकथा	५६/४३३-४७६
केशिगणधरकथा	५१/२९७-३००	विष्णुकुमारकथा	५०/२५८-२६५
गजसुकुमालकथा	३१/८६-८७	शय्यंभवसूरिकथा	५१/२८८-२९३
चिलातीपुत्रकथा	३७-३८/११६-११९	शालिभद्रमुनिकथा	४१/१३१-१४२
जम्बूस्वामिकथा	४९/२४३-२५७	सनत्कुमारकथा	३०/६६-८५
ढण्ढणकुमारकथा	३२/८८-९०	सीतादेवीकथा	५६/३४२-३८८
दवदन्तीकथा	५६/४०६-४३२	सुकोशलमुनिकथा	४०/१२६-१३०
दशार्णभद्रकथा	४५/१८६-१९१	सुदर्शनश्रेष्ठिकथा	४४/१७३-१८५
दृढप्रहारीमुनिकथा	३५/१०७-१११	सुभद्राकथा	५८/५३८-५४३
नन्दिषेणकथा	५२/३१८-३२०	स्कन्दकाचार्यकथा	३६/११२-११५
नर्मदासुन्दरीकथा	५७/४९४-५११	स्थूलभद्रमुनिकथा	३३-३४/९२-१०६
नागदत्तकथा	५०/२७८-२८७		

● ● ●

परिशिष्टम्

[८]

विवेकमञ्जरीवृत्तिगतप्रशस्तीनामकाराद्यनुक्रमः ॥

पद्यांशः	श्लो./पृष्ठ.
अरिसिंह इति य पृथिवी	११/६३६
आसडः कालिदासस्य	५/६३६
उत्सूत्रं यदसूत्रि सूत्र-	१६/६३७
एतामासडिजैत्रसिंह	१३/६३६
जिनस्तोत्रस्तुतिः पद्य-	७/६३६
जैतल्लदेव्यां तनयावभूतां	१०/६३६
तयोरजनिषातां द्वौ	४/६३५
तस्मिन् नवो रजनिजानि-	२/६३५
देवानन्दमुनीन्दुगच्छ-	१४/६३७
नागेन्द्रगच्छार्णवपार्व-	१५/६३७
पुत्रे राजडनाम्नि बाल-	१२/६३६
येनोपदेशकन्दल्याह्वान	८/६३६
श्रीधातुर्लेखशालीत्रिदश-	१७/६३७
श्रीभिल्लमालाभिधया	१/६३५
श्रुत्वा नवरसोद्गार-	६/६३६
सुधांशो रोहिणीवास्य	३/६३५

● ● ●

परिशिष्टम्

[९]

विवेकमञ्जरीवृत्तिगतविशेषनाम्नामकाराद्यनुक्रमः ॥

विशेषनामः	पृष्ठाङ्कम्
[अ]	
अगन्धन [कुल]	१९९
अग्निकुमार [भवनपतिदेव]	११५,
अग्निशर्मा [विप्र]	७०
अङ्कुश [रामपुत्र]	३८०, ३८१, ३८३, ३८४, ३८७
अङ्ग [देश]	१७३
अङ्गद [नृप]	३६५, ३६७, ३६९ ३७१, ३८४
अचल [बलदेव]	१५
अचल [सार्थवाह]	४५३
अचलपत्तन [नगर]	५१३
अजितनाथ [तीर्थंकर]	३
अजितबल [विद्याधर]	४७५
अजितबला [विद्यादेवी]	४६६, ४६८, ४६९, ४७०, ४७२
अजितसेन [हरिषेणपुत्र]	५५२
अञ्जना / अञ्जनसुन्दरी / अञ्जनासुन्दरी	[महेन्द्रपुत्री-पवनञ्जयप्रिया] ४७८, ४७९, ४८०, ४८१, ४८३, ४८४ ४९०, ४९२
अतिमुक्तक [श्रीदेवीपुत्र मुनि]	२७४, २७५, २७६, २७७
अनङ्गनन्दन [उद्यान]	४३५
अनङ्गरति [खेचरेन्दु]	४७२, ४७३, ४७४, ४७५
अनङ्गलवण [सीतापुत्र]	३७९
अनङ्गवती [नृपनितम्बिनी]	४३९, ४४२
अनङ्गसुन्दरी [विलासवतीसखी]	४३४, ४३६ ४३८, ४३९, ४४०, ४४१
अनङ्गसेना [वेश्या]	२१५, २१६, २१७, २२४
अनलदेवी [कटुकराजप्रिया]	६३५
अनादृत [देव]	२५६

अनुत्तर [देवलोक] १९५
अम्बिका [जयसिंहकन्या] २६६, २६७
अम्बिकानाथ / अम्बिकापुत्र / अम्बिकासूनु २६७, २७१, २७३
अपरविदेह [क्षेत्र] ५११
अपराजिता [राममाता] ३५१, ३५२, ३५३, ३७२
अप्रतिचक्रा [विद्या] ४६४
अप्रतिष्ठान [नरक] १९५, ३१६
अभय / अभयकुमार [श्रेणिकपुत्र-अनगार] २०४, २०६, २०७, २०८, २०९, २१०, २११, २१२, २१३, २१४, २२२, २२३, २२५, २२७, २२८, २२९, २३०, २३१, २३७, २३८, २४१, ३१८, २४२, २५८, २९४, ३८९, ५१७
अभयदेव [सूरि] ४, ६३६
अभया [दधिवाहनप्रिया] १७३, १७७, १७८, १७९, १८०, १८१, १८४
अभीचिग [नक्षत्र] ६०
अमरपुरी [देवनगरी] ४३३
अमरावती [देवनगरी] ५५२
अमितगति [मुनि] ४८६
अमिततेजा [तपोधन] ५३०, ५३४, ५३७
अमृतवती [राज्ञी] ३८०
अमृतसागर [गुरु] २४५
अयोध्या [पुरी] १९, ३१, ३७, ५५, ५८, ६२, ३४३, ३७१, ३७२, ३७६, ३७७, ३८१, ३८२, ३८५
अरनाथ [तीर्थनाथ] १५
अरिकेसि [क्षोणिपति] ४०८
अरिदमन [नृप] १९९, ५४५, ५४६
अरिमर्दन [नृप] ३०३
अरिसिंह [जितशत्रुसूनु] ४०८
अर्चिमाली [विद्याधर] ७६
अर्धबर्बर [देश] ३४४
अर्हद्दासी [श्रेष्ठिप्रिया] १७३, १७५
अवन्तिनाथ [प्रद्योत] ५८२
अवन्ती [देश] १२०, १२५, १४३, १४९, १५२, १६२, ३९८
अवन्तीसुकुमाल [इभ्यपुत्र-मुनि] १२०, १२१, १२३, १२४
अवटलङ्का [नगरी] ३५९
अशनिवेग [खेचरेन्द्र] ७९
अशोक [अनोकहस्] ३६३
अशोकचन्द्र [नृप] २१४
अशोकवनिका / अशोकवनी [वाटिका] ७३, ७५
अष्टापद [पर्वत] ३८, ३९, ५७, ५८, ५९, ६५, १४३, १८९, ४३१
असिताक्ष [यक्ष] ७१, ७५, ७६
अहीन्दु [इन्द्र] २६

[आ]

आतङ्क [म्लेच्छराज] ३४४, ३४५
आदित्य [ ] ५१६
आदित्यपुर [पुर] ४७७, ४९०
आदिनाथ / आदिनाथ [प्रथम तीर्थंकर] ६१, २२९, २३०, २४३

आनन्द [बलदेव] १५
आनन्दपुर [नगर] ४४५
आर्द्रक [देश] २२६
आर्द्रक / आर्द्रकराज / आर्द्रकेन्द्र / आर्द्रकेश [नृप] २२६, २२७, २३०
आर्द्रकुमार [नगर] २२६
आर्द्रकुमार / अर्द्रककुमार / आर्द्रकसुनु / आर्द्रकासुत / आर्द्रकि / आर्द्रकेय [राजकुमार] २२६, २२७, २२८, २२९, २३०,२३१, २३५, २३७, ३१८
आर्द्रका [देवी] २२६
आर्यरक्षित [विप्रसुत-मुनि] १५९, १६०, १६१, १६२, १६३, १६४, १६५, ३३१
आर्यसमित [मुनि] १४४, १४५
आर्यसुहस्ति [आचार्य-गुरु] १२१, ५०९ ५११
आर्षदत्त [पुत्र] ४९७
आर्षभि [ऋषभसुत] ३५, ३६, ४५, ४७, ४८, ५९, ६३
आसड [अनलदेवीपुत्र-कवि] ४, ६३५, ६३६

[इ]

इक्ष्वाकु [वंश] २०, २३, २५८ ३५१, ४०८
इन्द्रजित [नृप] ३६६
इन्द्रभूति [गौतमगणधर] १२
इलातीतनय / इलातीपुत्र / इलासूनु / इलातीपुत्र [श्रेष्ठीपुत्र] ३०१, ३०२, ३०३, ३०४, ३०५, ३०६
इलावती [पूरदेवी] ३०१
इलावर्धन [पुरी] ३०१

[ई]

ईशान [देवलोक] ८०, ५८०
ईशानचन्द्र [राजा] ४३३, ४५३
ईश्वरदत्त [सांयात्रिक] ४४५

[उ]

उग्रसेन [नृप] ३८९, ३९१, ३९२, ३९३, ३९६
उज्जयिनी [पुरी] १२०, १४९, १५२, २०९
उत्तरकोशला [नगरी] ४६
उत्तराषाढा [नक्षत्र] २५, २७
उदग्मथुरा [नगरी] २६७
उदय / उदयन / उदायन [नृप] २०९, २३७, २९४, ५८३, ५८५, ५८६
उन्मग्ना [नदी] ३४
उपकोशा [कोशा] ९५, ९६
उपदेशकन्दली [ग्रन्थ] ६३६

[ऋ]

ऋतुपर्ण [भूपति] ४२३, ४२४, ४२९, ४३०
ऋषभ / ऋषभसेन [सार्थवाह-मुनि] ५९, ४९४, ५०९

ऋषभकूट [कूट] ३६
ऋषभदास [श्रेष्ठी] १७५, १७६
ऋषभदास [सार्थवाह] ५०९
ऋषिदत्ता [ऋषभसेनपुत्री] ४९४, ४९५, ४९६, ५१०, ५११
ऋषिदत्ता [प्रीतिमतीसुता-मुनि] ५४४, ५५६, ५५८, ५५९, ५६०, ५६१, ५६९, ५७०, ५७१, ५७२, ५७३, ५७५, ५७६, ५७७, ५७८, ५८०

[ए]

एकादशी [तिथि] २७

[ऐ]

ऐक्ष्वाक [नृप] ३४४, ३५०
ऐरावत [क्षेत्र] ११

[औ]

औद्रायण [राजा] १५९

[क]

कच्छ [भूप] २५, २६, ५५२
कटुकराज [नृप] ६३५
कण्डरीक [महापद्मपुत्र] ३११, ३१२, ३१३, ३१४, ३१५
कनकध्वज [विद्याधराधीश] ४७०
कनकपुर [पुर] ६६, ४८६
कनकप्रभ [गुरु] ६३७
कनकमाला / कनकमालिका [राजपुत्री] ३८०, ३८१
कनकरथ [नृप] ४८६
कनकरथ [हेमरथसुत] ५४४, ५७७
कनकवती [जम्बुभार्या] २४६, २५४
कनकवती [दशारानुजस्त्री] ४३२
कनकश्री [जम्बुभार्या] २४६, २५३
कनकसेना [जम्बुभार्या] २४६
कनकोदरी [कनकरथप्रिया] ४८६
कपिकेतु [नृप] ३६०
कपि / कपिपति / कपिमहीनाथ / कपीन्द्र / कपीश्वर [नृप] ३६०, ३६१, ३६२, ३६४, ३६६, ३६९, ३७१, ३८४, ३८५
कपिल [पुरोहित] १७५, १७५
कपिला [द्विजप्रिया] १०७
कपिला [पुरोहितपत्नी] १७६, १७७, १७८
कमला [स्त्री] ३३४, ३३६
कमलावती [मणिचूडप्रिया] ४०३
कम्बु [द्वीप] ३६०
करकण्डु [दधिवाहनपुत्र] ३२२, ३२६, ३२७, ३२८, ३३०, ५३८
कलावती [राजपुत्री-शङ्खप्रिया] ५१७, ५१८, ५१९, ५२०, ५२१, ५२२, ५२३, ५२४, ५२६, ५२८, ५३०, ५३२, ५३३, ५३४, ५३७
कलिङ्ग [देश] ३२१
काकुत्स्थ [राम] ३६६, ३६८, ३७४, ३८६
काञ्चनपुर [नगर] ३२८
काम्पिल्य [पत्तन] ४७५
काम्बोज [देश] ३४४

कालिक [आचार्य] ५९५
कालिदास [कवि] ६३६
कालिन्दी [महेन्द्रसिंहपिता] ७२
कावेरी [पुरी] ५४४, ५५९, ५६७, ५६८, ५७१, ५७३, ५७७
काश्यपी [नृप] ५१७
किष्किन्धा [नगरी] ३६०, ३६४
किष्किन्धेश [नृप] ३६७
कीर्त्तिधर [नृप] १२६, १२७, १२८, १२९, १३०, ३१८
कुण्डग्राम [ग्राम] २१०
कुण्डनपुर / कुण्डिनपुर [पत्तन] ४०६, ४१२, ४२४, ४२५, ४२६, ४२७, ४३०
कुण्डिनेश्वर [नृप] ४२५
कुन्थु [तीर्थनाथ] १५
कुबेरदत्त [वणिकपुत्रसुहृद्] ४९४
कुम्भ [नृप] ३६७
कुम्भकर्ण [नृप] ३६६, ३६७
कुम्भकारकृत [नगर] ३५३
कुरु [मण्डल-वंश-देश] ७१, ७७, २५८
कुशस्थल [ग्राम] १०७, ११०
कुसीलव [रामपुत्र] ३७९
कुसुमाकर [उद्यान] ५३५, ५३६, ५७८
कूणिक [श्रेणिकपुत्र] २१४
कूपचन्द्र [पुर] ४९४
कूबर [निषधपुत्र] ४०९, ४१०, ४११, ४१८, ४२४, ४३०
कूरगडुक [महर्षि] १९८, २०२, २०३
कूर्मादेवी [राज्ञी] ३३४
कूर्मापुत्र [राजपुत्र-केवली] ३३१, ३३६, ३३७
कृतपुण्य / कृतपुण्यक [सार्थवाहपुत्र] २१४, २१५, २१६, २१७, २१९, २२३, २२४, २२५, २२६, २५८
कृतमाल [यक्ष] ३४
कृतान्त / कृतान्तवदन [सेनानी] ३७५
कृष्ण [देवकीपुत्र] ८६, ८८, ९०, ३३१, ३८७, ३९०, ३९१, ३९३, ३९४
कृष्णा [ढण्ढणमाता] ८९
कैकय [नृप] ३५०, ३५२
केतुमती [प्रह्लादप्रिया] ४७७, ४८४, ४८५, ४९०, ४९३
केश [उदायनपुत्र] २३७
केशव [कृष्ण] ३९०, ४५७
केशी [गणधर-आचार्य] २९७, २९८
कैकेयी [दशरथप्रिया] ३४४, ३५०, ३६८, ३८४
कैलाश [पर्वत] ३४४
कैलास [भूधर] ७१
कैशर [विमान-सुर] ४२९
कोटिशिला [शिला] ३६१
कोणप [कुल] ३६२
कोशल [देश] ४०८, ४३०
कोशला [नगरी] ४१०, ४१४
कोशा [वेश्या] ९१, ९६, ९८, ९९, १००
कौशल्या [दशरथप्रिया] ३४४
कौशाम्बी [नगरी] २०९, ५८१, ५८३

[क्ष]

क्षपक [मुनि] १९८

क्षितिप्रतिष्ठित [पुर] ११६, १९८
क्षीर [त्रिदश] ४३१, ४३२
क्षुद्रहिमवद्गिरि [पर्वत] १५८
क्षुल्ल / क्षुल्लक [मुनि] १६७ १९८, १९९, २६०, १९८, १९९, २६०

[ख]

खण्डप्रपाता [गुफा] ३७
खर [पातललङ्काधिपति] ३५४, ३५५, ३६०, ३६६

[ग]

गगनवल्लभ [पुर] ४७०
गङ्गदत्त [भूमीपति] ५७८
गङ्गसेना [गङ्गाकन्या] ५७९
गङ्गा [नदी] २६, ३७, ९२, ९३, २६९, २७३, ३७६, ४०२
गङ्गापुर [पुर] ५७८, ५७९
गज [गङ्गदत्तप्रिया] ५७९
गज [देवकीपुत्र] ८७
गज [श्रेष्ठि] ५१२, ५३०
गजवाहन [राजा] ३७८
गजसुकुमाल [देवकीपुत्र] ८७
गणधरावली [ग्रन्थनाम] १२
गन्धसमृद्ध [नगर] ४५०
गरुडध्वज
गान्धार [देश] ४०३
गायत्री [विरिञ्चिनपत्नी] २०
गिरिपुर [नगर] ३८९
गुणशिल [उद्यान] ३०७
गोभद्र [श्रेष्ठी] १३१, १३२, १४०
गौतम [गणधर] १२, १३, १४, १४३, २७४, २७५
ग्रैवेयक [देवलोक] २७१

[घ]

घातकीखण्ड [द्वीप] ११

[च]

चक्रसेन [खेचर] ४६४, ४६५, ४६६
चण्डप्रद्योत / चण्डप्रद्योत [नृप] ५१२, ५८३, ५८४
चन्दनबाला / चन्दना [वीरशिष्या] ४३३, ५१२, ५८५, ५८६, ५८७
चन्द्र [गच्छकन्दल] १६६
चन्द्रकिरीट [नृप] ४०८
चन्द्रगति [विद्याधरनृप] ३४२, ३४६, ३४७, ३४८
चन्द्रणखा [खरकान्ता] ३५४, ३५५, ३६०
चन्द्रमति [राजपुत्री] ४२३
चन्द्रयशस् [नृप] ४२४
चन्द्रयशा [मदनरेखापुत्र] ३९८, ४०१
चन्द्रयशा [राज्ञी] ४२३, ४२४
चन्द्रराज [चन्द्राङ्गपुत्र] ४०८
चन्द्रवेग [खेचराधिप] ७८, ७९, ८०
चन्द्रसेन [खेचर] ७८, ७९
चन्द्राङ्ग [नृप] ४०८
चपलगति [विद्याधर] ३४६
चम्पेश / चम्पेन्द्र [दधिवाहननृप] ३२४, ३२९
चम्पा [नगरी] १७३, २९१, ३२१, ३२८, ५३८

चम्पेश्वर [नृप] ४०८
चित्र [मन्त्री] २९८
चित्रभानु [नृप] ४८८
चित्रमाला [सुकोशलप्रिया] १२८
चित्राङ्ग / चित्राङ्गद [चारणश्रमण] ४७६
चिलाती [चेटी] ११७
चिलातीतनय / चिलातीपुत्र / चैलातेय [चेटीपुत्र] ११६, ११७, ११८, ११९, १३१, १३३, २०९, २१०, २११, २१३, २१४, २३९, २४१, ५१२
चिल्लणा [श्रेणिकप्रिया-चेटकपुत्री] १३१, १३३, २०९, २१०, २११, २१३, २१४, २३९, २४१, ५१२
चैत्र [मास] २५

[ज]

जगदुत्तम [धर्मचक्री] ३३६
जटायू [पक्षी] ३५३, ३६५, ३५६, ३५७, ३५८, ३४२, ३४३, ३४४, ३४५, ३४६, ३४८, ३४९, ३६८, ३५०, ३७१, ३८८
जनक [नृप] ३४२, ३४३, ३४४, ३४५, ३४६, ३४८, ३४९, ३६८, ३५०, ~~३७१~~, ३८८
जम्बू [द्वीप] ११, २७६, ३११, १५७
~~जम्बूकुमार~~ [श्रेष्ठीपुत्र-मुनि] २४६, २४७, २४८, २४९, २५०, २५१, २५२, २५३, २५४, २५५, २५६, २५७, २९४
जय [वैमानिकसुर] ६६, ८१, ८४
जयपुर [नगर] २४९
जयश्री [जम्बुभार्या] २४६, २५४
जयश्री [गणिनी] ४८६
जयसिंह [वणिक्] २६६, २६८
जयसेन [विजयसूनु] ५१५, ५१६ ५१९, ५२२, ५२३, ५२६, ५२८, ५३३
जयसेन [सूरि] ६३७
जयसेना [जम्बूभार्या] २५२
जयस्थल [पुर] ४४१, ४४२
जवनद्वीप [द्वीप] ४९९, ५०१
जानकी [राघवप्रिया] २०९, ३४५, ३४९, ३५८, ३५९, ३६०, ३७१, ३७३, ३७४, ३७९, ३८१, ३८२, ३८५
जानकीजानि [राम] ३७५
जामदग्न्य [ ] २००
जाम्बव [नृप] ३६१, ३६५
जासड [अनलदेवीपुत्रकवि] ६३५
जितशत्रु [नृप] ११२, २७८, २९७, ४०८, ५३८
जिनदत्त [श्रेष्ठी] १६६
जिनदत्त [धनी] ५३८, ५३९
जिनदेव [श्रावक] ५०६, ५०७, ५०८, ५०९
जिनदास [श्रेष्ठिभ्राता] २४६
जिनधर्म [श्रेष्ठिन्] ७०
जीवन्तस्वामी [जिन] १२१
जृम्भक [देव] १४९, १५८
जैतल्लदेवी [आसडप्रिया] ६३६

जैत्रसिंह [जैतल्लदेवीपुत्र] १६, ५८९, ६११, ६३६, ६३७
ज्येष्ठा [चेटकपुत्री] २०९, ५३८
ज्योतिष्क [देवलोक] १९९, २००
ज्वाला [पद्मोत्तरप्रिया] २५९, २६०

[ड]

डिण्डीर [त्रिदश] ४३१, ४३२

[ढ]

ढङ्कर [श्रावक] १६१
ढण्ढण [कृष्णपुत्र] ८८, ८९, ९०
ढण्ढणकुमार [कृष्णपुत्र] ८८, ८९, ९०
ढण्ढणा [कृष्णराज्ञी] ८८

[त]

तक्षशिला [नगरी] ४१, ५५
तमिस्रा [गुफा] ३४, ४१०
तापसपत्तन [नगर] ४२४
तामलिप्ती [नगरी] ४३३, ४४८, ४५२, ४५३
तारापीठ [भूप] ४७५
तुम्बवन [पुर] १४३
तोसलिपुत्र [आचार्य] १६०, १६३
त्रिकूटपुरी [पुरी] ३६२

[द]

दक्षिणापथ [नगर] १६५
दण्डका [अरण्य] ३५४, ३५५, ३५८
दण्डकी [भूपति] ११२, ११४
दत्त [श्रेष्ठिसुत] ५१२, ५१३, ५१८, ५२३, ५३२
दधिपर्ण [राजा] ४०८, ४१६, ४१८, ४१९, ४२५, ४२६, ४२७, ४२८, ४२९
दधिवाहन [नृप] १७३, १७५, १८४, ३२१, ३२२, ३२८
दन्तपुर [नगर] ३२४
दन्तिगिरि [गिरि] ४७७
दमयन्ती [भैमी] ४२३
दवदन्ती [भीमपुत्री-नलप्रिया] ४०६, ४१८, ४२६, ४३०
दशकन्धर / दशमस्तक / दशवदन / दशानन / दशास्य [दशग्रीवा] ३५५, ३५६, ३५७, ३६०, ३६१, ३६३, ३६५, ३६६, ३६७, ३६८, ३७०, ३७४, ४८०, ४८३, ४८९
दशपुर [नगर] १५२, १५३, १५९, १६५
दशरथ [नृप] ३४३, ३४९
दशवैकालिक [सूत्र] २९२, २९३
दशार [ ] ८६, ४३२
दशार्णपुर [पुर] १८६, १९१
दशार्णभद्र / दशार्णेन्द्र / दशार्णेश [नृप-मुनि] १८६, १९०, १९१
दधिवाहनि [करकण्डु] ३२६
दामोदर [वासुदेव] ३९२
दाशरथि [राम-लक्ष्मण] ३५४, ३५५, ३५६, ३६०, ३६१, ३६३, ३६५, ३६६
दुर्गिल [उद्यान] ३५१, ३३३
दुर्मुख [सैनिक] १९२, १९३
दुर्लभ [द्रुमापुत्र] ३३१, ३३२, ३३३
दुर्गमपुर [नगर] ३३१, ३३३

दूषण [नृप] ३६६
दृढप्रहारी [द्विजपुत्र-मुनि] १०७, १०९, १११
दृष्टिवाद [द्वादशाङ्ग] १०१, १५२, १५९, १६०, १६१, १६२
देवकी [वसुदेवप्रिया] ८६, ८७, ५३८
देवदत्ता [वणिक] २६६, २६७
देवरमण [उद्यान] ३६३
देवशर्मा [ब्राह्मण] १०७, १०८
देवशाल / देवशालपुर [पुर] ५१२, ५१३, ५१४, ५१६, ५१९, ५२३, ५२८
देवादित्य [चक्री] ३३६
देवानन्द [मुनीन्दु] ४५१, ६३७
देवेन्द्र [गुरु] ४
द्रुमा [देवी] ३३१, ३३३
द्रोण [नरेश्वर] ३३१, ३३३
द्वारका [नगरी] ८८, ८९
द्वारवती [पुरी] ८६
द्वारिका [नगरी] ३८९

[ध]

धन [सार्थपति] ११७, ११८, ३२१
धन [श्रेष्ठी] १५४, १५६, १५७, ३०१
धनगिरि [श्रेष्ठी-मुनि] १४३, १४४, १४५, १४६, १४७, १४८, १५८
धनदत्त [श्रेष्ठी] २३१, २७८, २८१, २८३, २८४, २८६, २८७
धनदेव [स्थूलभद्रसुहृत्त] १०४, १०५
धनपाल [इभ्य] १४३
धनश्री [श्रेष्ठीप्रिया] २७८
धनावह [सार्थवाह] २१४
धनेश्वरी [धनदेवप्रिया] १०४, १०५
धन्य [शालिभद्रस्वसृपति] १३६, १३७, १३८, १३९, २५८
धन्य [आचार्य] २९४
धन्य [आभीर] ४३१
धन्या [उच्छन्नवंशिका] १३९, १४०
धरणेन्द्र [नृप] ४०८
धर्मघोष [नृप] ४०८
धर्मदेव [कूर्मापुत्र] ३३५
धर्मरुचि [मुनि] ५०९
धान्यपुर [पुर] ८९
धारिणी [जितशत्रुप्रिया] ११२
धारिणी [श्रेष्ठिप्रिया-श्रेणिकप्रिया] २४६, ३०१, ३०७, ३१०
धारिणी [उग्रसेनप्रिया] ३८९, ३९५
धारिणी [चन्दनबालामाता] ५१२
धारिणी [वेत्रधारिणी] ५२०
धूसरी [आभीरप्रिया] ४३१

[न]

नन्द [भूपति] ९२, ९५
नन्दन [बलदेव] १५
नन्दन [उद्यान] ७६, ३४२, ५३०
नन्दा [श्रेष्ठिपुत्री-श्रेणिकप्रिया] २०६, २०७, २०८, २०९, ५३८
नन्दिवर्धन [भूभुज] २०९
नन्दिषेण [श्रेणिकसुत] ३१८, ३२०
नन्दीश्वर [द्वीप] ६१
नभसेना [जम्बुभार्या] २४६, २५३
नमि [ऋषभसुत] २६, ३६, ३७

नमि [जिनदत्तसुता-बुद्धदासप्रिया] ५४७
नमुचि [मन्त्री] २५९, २६०, २६२, २६३, २६४, २६५
नरवाहन [नृप] ६९
नरविक्रम [नृपति] ५३४
नर्मदा [सुन्दरीपुत्री] ४९४, ४९६, ४९७, ४९८, ४९९, ५००, ५०१, ५०४, ५०५, ५०६, ५०७, ५०८, ५०९, ५१०, ५११
नल [नृप] ३६५, ३६७
नल [निषधपुत्र] ४०९, ४१०, ४११, ४१२, ४१३, ४१४, ४१५, ४१६, ४१७, ४१८, ४१९, ४२०, ४२१, ४२३, ४२५, ४२६, ४२८, ४२९, ४३०
नलकान्ता | [दवदन्ती] ४२२, ४२३, ४२९
नलप्रिया | ४२२, ४२३, ४२९
नलभीमजा [नल-दमयन्ती] ४२४
नलिनीगुल्म [अध्ययन-विमान] १२१, १२२
नाग [रथिक] २१२, २१४, ३८९
नागकुमार [भवनपतिदेव] २७९
नागदत्त [ईभ्य] ६६, ६७, ७०
नागदत्त [राजपुत्र] २००, २०१
नागदत्त [श्रेष्ठिपुत्र] २७८, २७९, २८०, २८१, २८२, २८३, २८४, २८५, २८६, २८७
नागदेवी [कुलदेवता] २७८
नागपुरी [पुरी] १५८, १५९
नागवसु [सार्थवाहनन्दनी] २७९, २८०, २८४, २८५, २८७
नागश्री [सार्थवाहप्रिया] २८०
नागिला [भद्रदेवप्रिया] २४४
नागेन्द्र [गच्छकन्दल] १६६
नागेन्द्र [गच्छ] ६३७
नाट्यमाला [यक्ष] ३७
नान्देय [अभयकुमार] २०७
नाभि [ऋषभपिता] २१
नाभिनन्दन | [ऋषभजिन] ३, ११, २६, ६२, ६५, ३९०, ५५०, ५५३
नाभिप्रसू |
नाभेय |
नाभेयप्रभु |
नाभेयजन्मा | [भरत] ३२, ३३, ३७
नाभेयसू |
नारद [सिद्धपुत्र] २८९, ३४५, ३४६, ३८१, ३८३, ३८४, ३८७
नारायण [वासुदेव] ३४४, ३७०
निर्घृण [शय्यापालक] ५२५, ५२६
निर्वृत्ति [गच्छकन्दल] १६६
निर्वृत्तिकर [तट] ४६५
निषध [नृप] ४०८, ४०९
नील [नृप] ३६५, ३६७
नेपाल [देश] १००, ५०७
नेमि [जिनश्वर] ८६, ९०, १०१, ३३१, ३८९, ३९०, ३९१, ३९२, ३९३, ३९४, ३९५, ३९६, ३९७
नैगमेषिन् [देव] ८६
नैषधि [नल] ४१०, ४१९, ४२८, ४२९, ४३०

[प]

पञ्चवटी [स्थल] ३५४

पण्डिता [दासी] १७८, १७९, १८०, १८४, १८५
पद्म [बलदेव] १५
पद्म [निधि] ८३
पद्म [हली] ३४४
पद्मनाभ [राम] ३८४
पद्मरथ [नृप] २४५
पद्मश्री [जम्बुभार्या] २४६, २५१
पद्मसेना [जम्बुभार्या] २४६, २५२
पद्मावती [चेटकपुत्री-दधिवाहनप्रिया] २०९, ३२१, ३२२, ३२३, ३२४, ३२३, ३२८
पद्मावती [महापद्मप्रिया] ३११, ५३८
पद्मोत्तर [क्षोणीपति] २५८, २६१, २६२
परासर [विप्र] २५८, २६२, २६२
पवन, पवनञ्जय, पवनतनय [प्रह्लादपुत्र-हनुमन्पित्रा] ३६२, ३६४, ३६७, ४७७, ४७८, ४७९, ४८३, ४८५, ४८९, ४९०, ४९१, ४९२
पवनगति [विद्याधर] ४५०, ४७२, ४७३
पाटलीपुत्र [पुर] ९२, १०१, १०२, १०५, १५४, १५९, १८४
पातालललङ्का [नगरी] ३५४, ३५५, ३६०
पार्श्वनाथ [तीर्थंकर] २९७
पालक [मन्त्री] ११२, ११३, ११४, ११५, ३५३
पावनञ्जयी [हनुमन्पिता] ३६३
पिङ्गल [स्तेन] ४२४, ४२५
पीठ [मुनि] २१
पुण्डरीक [ऋषभगणधर] ३१
पुण्डरीक [अध्ययन] १४३
पुण्डरीक [महापद्मपुत्र-नृप] ३११, ३१३, ३१६, ३१७, ६२५
पुण्डरीकपुर [पुरी] ३७८, ३८१, ३८५
पुण्डरीकिणी [नगरी] २४५, ३११, ३१४
पुण्यविनय [कुमार] ४३९
पुरन्दरपुर [नगरी] १२०
पुरन्दरयशा [स्कन्दकभगिनी] ११३, ११४
पुलस्त्य [नृप] ३५७
पुष्करवर [द्वीप] ११
पुष्कर [विमान] ४९९
पुष्कल [नलपुत्र] ४३२
पुष्फल [विजय] २४५
पुष्कलावती [विजय] ३११
पुष्पक [विमान] ३५५, ३८४, ३८५, ३८८
पुष्पकेतु [नृप] २६९, २७०
पुष्पचूल [पुष्पवतीपुत्र] २६९, २७०
पुष्पचूला [पुष्पवती-साध्वी] २६९, २७०, २७१, २७२
पुष्पभद्र [नगर] २६९
पुष्पवती [पुष्पकेतुप्रिया] २६९, २७०
पुष्पवती [चन्द्रगतिप्रिया] ३४२
पूर्णकलश [शङ्खपुत्र] ५३३
पृथिवीदेवी [आसडप्रिया] ६३६
पृथु [राजा] ३८०, ३८१
पृथ्वीपुर [पुरी] ३८०
पृष्ठचम्पा [नगरी] ३३१
पोतनपुर [नगर] १९२
पोतनाधिपति [प्रसन्नचन्द्रनृप] १९२

पोलास | पोलासपुर [नगर] २७४
पौलस्त्य [नृप] ३६९, ३७०, ३८१
प्रज्ञप्ति [विद्या] ७५, ७९, ४०३
प्रतिचन्द्र [खेचर] ३६९
प्रतिसूर्य [खेचर] ४८८, ४८९, ४९२, ४९३
प्रदेशी [नरेश्वर] २९७, ३००
प्रद्युम्न [कृष्णसुत] ३३१
प्रद्योत [नृप] २०९, ५८२, ५८३, ५८४, ५८५
प्रभव [जयपुरेश्वरपुत्र-स्वामी] २४९, २५०, २५१, २५५, २५७, २८८, २८९, २९४
प्रभावती [चेटकपुत्री] २०९, ५१२
प्रभावती [उदायनप्रिया] २३७
प्रभास [तीर्थ] ३३
प्रयाग [तीर्थ] २७३
प्रसन्न | प्रसन्नचन्द्र [राजर्षि] १९२, १९४, १९५, १९६, १९७
प्रसन्न [मुनि] २९४
प्रसन्न [महेन्द्रपुत्री-पवनञ्जयप्रिया] ४७७, ४८५
प्रसेनजित [नृप] २०५, २०६, २१२
प्रहलाद [भूपति] ४७७, ४७८, ४७९, ४८०
प्रहसित [पवनञ्जयमित्र] ४७८, ४७९, ४८१, ४९०, ४९२
प्रहस्त [नृप] ३६७
प्रहस्त [गणेश] ३६५, ३६७
प्रियदर्शन [क्षोणीदयित] ५५४
प्रियदर्शना [हरिषेणप्रिया] ५५२
प्रियमित्र [सार्थवाह] २७९, २८०,
प्रीतिमती [प्रियदर्शनपुत्री] ५५४, ५५६, ५८०

[फ]

फणिपति | फणीन्द्र [इन्द्र] २६, २७
फल्गुरक्षित [विप्रसुत-मुनि] १५९, १६४, १६५
फाल्गुन [मास] २७

[ब]

बकुलमती [सनत्कुमारदेवी] ७५, ८०
बन्धुदेवी [राज्ञी] ३७८
बन्धुमती [भार्या] २२९
बर्बर [कूल] ४५४, ५०३
बृहद्गच्छ [गच्छ] ६३७
बहली [देश] ४१, ४६
बहुशाल [वट] ३३२
बालचन्द्र [सूरि] ६३६, ६३७
बालसरस्वती [बिरुद्ध] ६३६
बाहु [मुनि] २०, २१
बाहुबली [ऋषभसुत] १८, २१, २३, २४, २५, ४०, ४१, ४२, ४४, ४५, ४६, ४७, ४९, ५०, ५५, ६००, ३८३
बिभिषण [नृप] ३६२, ३६३, ३६६, ३६७, ३६८, ३६९, ३७१, ३८४, ३८५
बुद्धदास [बुद्धभक्त] ५३८, ५३९
बेन्नातट [पुर] २०५, २०८, ३०३

ब्रह्म [देवलोक] २४६, ४०५
ब्रह्मदत्त [चक्रवर्ती] १५
ब्रह्मदत्त [भूपति] ४७५
ब्रह्मलोक [देवलोक] २४६, ४०५
ब्राह्मी [सुमङ्गलासुता] २१, २३, ३१, ५६, ५७

[भ]

भद्र [बलदेव] १५
भद्र [श्रेष्ठी] २०५, २०७
भद्रगुप्त [दशपूर्वधर] १५२, १५३, १६२, १६३, ३३७
भद्रबाहु [स्वामी-आचार्य] ४, १०१, १०२, १०४, २७४
भद्रमुखी [यक्षिणी] ३३१
भद्रयशा [आचार्य] ५७७, ५७८
भद्रा [धनभार्या] ११७
भद्रा [इभ्यप्रिया] १२०, १२१, १२४, १२५
भद्रा [गोभद्रप्रिया] १३१, १३३, १३४, १३५, १३६, १३८, १३९, १४०, १४२, ५३८
भद्रा [सार्थवाहपत्नी] २१४
भद्राचार्य [आचार्य] ५७७, ५७८
भद्रेश्वर [सूरि] ४
भय [नृप] ३६७
भरत | [क्षेत्र-चक्र] ९, ११, १७, ५८, ७१, १०३, ११, २९७, ३०९, ३३६, ३८३
भारत |
भरत [ऋषभसुत-मुनि-प्रथमचक्रवर्ती] १७,
भरताधिनाथ | १८, २१, २३, २४, २५,
भरताधिपति | २७, २८, ३०, ३१, ३२,
भरताधीश | ३३, ३८, ३९, ४०, ४३,
भरताधीश्वर | ४४, ४९, ५०, ५५, ५७,
भरतेश्वर | ६०, ६१, ६५, ५५६
भरत [दशरथपुत्र] ३४४, ३४५, ३५०, ३५१, ३७१, ३७२
भरतवैताढ्य [पर्वत] ३३६
भरतार्ध [क्षेत्र] ३४
भवदत्त [रेवतीपुत्र] २४४, २४५
भवदेव [रेवतीपुत्र] २४४, २४५
भागीरथी [गङ्गानदी] ३७
भाद्रेय [अवन्तीसुकुमाल] १२२
भानुदेव [कुमार] ४५८
भानुवेग [विद्याधरपति] ७६, ७८
भामण्डल [जनकपुत्र] ३४३, ३४६, ३४७, ३४८, ३४९, ३५०, ३५७, ३६०, ३६२, ३६५, ३६७, ३६९, ३७१, ३७८, ३८३, ३८४, ३८७
भामा [कृष्णप्रिया] ३९१
भारतवैताढ्य [पर्वत] ३३६
भारती [भरतपृथिवी] ५८
भिल्लमाल [कुल] ६३५
भीम [नृप] ४०६, ४०८, ४०९, ४११, ४२६, ४२८, ४२९
भीमजा | [दवदन्ती] ४१८, ४२१, ४२२, ४२५, ४२८, ४२९, ४३०
भीमनन्दिनी |
भीमसुता |
भूतदत्ता [शकटालपुत्री] ९२
भूतशर्मा [द्विज] १०७

भूता [शकटालपुत्री] ९२
भृगुकच्छ [नगर] ४०८, ५०८, ५०९
भृगुपत्तन [पुर] ५०८, ५०९
भैमी [दवदन्ती] ४०६, ४०७, ४०८, ४०९, ४१०, ४११, ४२१, ४२४, ४२५, ४२६, ४३०, ४३२
भोजनन्दनी [राजीमती] ३९६
भोजवृष्णि [नृप] ३८९
भद्दिलापुर [पुर] ५८०
भ्रमर [सूरि] ३३४, ३३६

[म]

मगध [देश] ८९, २२९, २३०, २३८, २४४
मगधपति, मगधभूपति, मगधाधिप, मगधेशितृ, मगधेश्वर [श्रेणिक] १९७, २११, २१२, २१३, २१४, २२६, २२७
मङ्कनक [देश] ३४४
मङ्गाल [देश] ५१२
मङ्गलावती [विजय] ३३६
मङ्गलावती [नगरी] ५५४
मणक [शय्यम्भवपुत्र-मुनि] २९१, २९२
मणिचूड [खगेन्दु] ४०३
मणिप्रभ [मणिचूडपुत्र] ४०३, ४०४
मणिबल [गन्धर्व] ४८७
मणिरथ [नृप] ३९८, ३९९
मतिसिंह [मन्त्री] ४८५
मथुरा [नगरी] २६६
मदनमञ्जरी [शुभासुता] ४५०
मदनरेखा [युवराजप्रिया] ३९८, ३९९, ४००, ४०१, ४०२, ४०४, ४०५
मदनाङ्कुश [सीतापुत्र] ३७९
मध्यदेश [देश] ५४४
मनोरमा [सुदर्शनप्रिया] १७५, १७७, १८३, ४३३
मन्त्रितानगरी [नगरी] ५५२
मन्थरा [दासी] ३५०
मन्दाकिनी [गङ्गा] ९३
मन्दिर [विमान] ३३४
मन्दिर [उद्यान] ४३८
मम्मण [राजा] ४३१, ४३२
मय [गणश] ३६५
मय [नृप] ३६७
मरुदेवा [ऋषभमाता] २०, २१, २८, २९
मलय, मलयाचल [अद्रि] ४५८, ४६३, ४६७, ४७२
महाकच्छ [भूप] २५, २६, ५५२
महाकाल [प्रासाद] १२५
महागिरि [स्थूलभद्रशिष्य] १०६, ३३१
महादेव [पुत्र] ४९६
महापद्म [ज्वालापुत्र] २५९, २६०, २६१, २६२, २६३, २६५
महापद्म [नृप] ३११, ३१३
महापीठ [मुनि] २१
महाविदेह [क्षेत्र] ११, २४५, ३१०, ५३४
महावीर [तीर्थंकर] ४, १३८, १९३, २३५, २३७, ३८९
महाशाल [युवराज] ३३१

महाशुक्र [देवलोक] ३३४, ३३७
महेन्द्र [सनत्कुमारमित्र] ७२
महेन्द्र [विद्याधरेन्द्र] ४७७, ४७८, ४८७, ४९३
महेन्द्रपुर [पुर] ४७७, ४८४, ४८९
महेन्द्रसिंह [सनत्कुमारमित्र] ७२
महेन्द्रसिंह [नृप] ३३४
महेन्द्रोदय [उद्यान] ३८५
महेश्वर / महेश्वरदत्त [अङ्गज] ४९५, ४९६, ४९९, ५००, ५१०
मागध [तीर्थ] ३२
मागधेश [मागधतीर्थेश] ३३
माघ [मास] ६०
माणवक [स्तम्भ] ६१
मानवती [मानुषी] ३३१, ३३२
मानस [सरोवर] ४७८
मानसवेगा [महेन्द्रप्रिया] ४७७, ४८८, ४९३
मानुषोत्तर [पर्वत] १५७
मायूरमाल [नगर] ३४४
मारीच [गणश] ३६५
मालवेश [प्रद्योत] ५८५
माषतुष [मुनि] २९४, २९५, २९६
माहेन्द्र [पत्तन] ५३४
माहेश्वरी [पुरी] १५८
मित्रभूति [महल्लक] ४३९
मिथिला [पुरी] ३४२, ३४८, ३७८, ४०३, ४०५
मिश्रकेशी [अञ्जनासखी] ४७८
मुकुटेश्वर [नृप] ४०८
मुनिसुव्रत [देव] ४८७
मृगावती [चेटकपुत्री] २०९
मृगावती [शतानीकप्रिया-चन्दनाशिष्या] ४३३, ५८१, ५८२, ५८३, ५८४, ५८६, ५८७
मेघ / मेघकुमार [धारिणीपुत्र] ३०७, ३०८, ३१०
मेघमुख [सुर] ३४, ३५
मेतार्य [क्षमाश्रमण] १६९, १७१
मेरु [पर्वत] ४९३, ५१९
मेरुप्रभ [करी] ३०९
मैथिल [नृप] ३४४, ३४७, ३४८
मैथिली [सीता] ३८६

[य]

यक्षदत्ता [शकटालपुत्री] ९२
यक्षा [शकटालपुत्री-आर्या] ९२, १०३, १०६
यज्ञदेव [द्विज] ११६, ११७
यदु [वंश] ८६, ३९२
यशोधरा [चक्रिप्रिया] २४५
यशोभद्र [मुनि-गुरु] २७४, २९२, २९३ ४२२, ४२३, ४२४
यशोवर्मा [सनत्कुमारसुत] ४३४, ४३७, ४४१, ४४३, ४५३, ४५७
यादव [यदुवंशीया] ३९१
युगबाहु [युवराज] ३९८, ३९९, ४००, ४०१, ४०४, ४०५
युगादिजगदीशितृ / युगादिजिन / युगादितीर्थकृत् / युगादिदेव / युगादिनाथ [प्रथमजिन] १७, २८, ३७, ३८, ५७, ४०८

योगशास्त्र [ग्रन्थ] ६०३
यौगबाह्वी [मुद्रिका] ४०२
रक्षोद्वीप [द्वीप] ३७३, ५००

[र]

रघुनाथ / रघुपुत्र [राम] ३६३, ३७३
रत्नजटी [ ] ३६०, ३६१
रत्नपुर [पुर] ६९, २९४
रत्नश्री [गणिनी] ६३६
रत्नसञ्चया [नगरी] ३३६
रत्नावह [पुर] ४०३
रथनूपुर [विद्याधरनगर] ३४२, ३४६, ४७२
रथनेमि [नेमिभ्राता] ३९५, ३९६, ३९७
रथमर्दन [पुर] ५६०, ५६७
रथावर्त [गिरि] १६८
राघव [राम] २०९, ३४९, ३५०, ३५४, ३६१, ३६९, ३७३, ३७७, ३८५, ३८६, ३८८
राजगृह [पुर] ११७, १३१, १३८, १३९, १९३, २०५, २१०, २३५, २४३, २८८, २९१, ३०७, ३१८, ३३४, ३३७, ३८९
राजड [जैतल्लदेवीपुत्र] ६३६
राजीमती [उग्रसेनपुत्री] ३९१, ३९२, ३९४, ३९५, ३९७
राम [बलदेव-दशरथपुर] ३४४, ३४५, ३४७, ३४८, ३४९, ३५०, ३५१, ३५२, ३५३, ३५४, ३५५, ३५६, ३५७, ३५८, ३५९, ३६०, ३६१, ३६२, ३६३, ३६४, ३६५, ३६६, ३६७, ३६८, ३६९, ३७२, ३७३, ३७५, ३७६, ३७७, ३७८, ३७९, ३८१, ३८२, ३८३, ३८४, ३८५, ३८६, ३८७
राम [वासुदेव] ३९२, ३९३
रामगुप्त [सुन्दरीपुत्र] ४७५
रावण [लङ्काधिपति] ३५७, ३६०, ३६१, ३६५, ३६७, ३६९, ३७०, ३७४, ३७५, ३८७, ४७२, ४८०
राष्ट्रकूट [अन्वयी] २४४
रुक्मिणी [धनश्रेष्ठिपुत्री] १५४, १५५, १५७
रुक्मिणी [कृष्णप्रिया] ३९१, ४५७
रुक्मिणी [वासुलापुत्री] ५४४, ५५९, ५६०, ५६८, ५६९, ५७१, ५७२, ५७५, ५७६
रुद्रदत्त [वणिकपुत्र] ४९४, ४९६
रुद्रसोमा [विप्रप्रिया] १५९, १६०, १६१
रेणा [शकटालपुत्री] ९२
रेवती [राष्ट्रकूटप्रिया] २४४
रेवती [वीरश्राविका] ५३७
रैवत [गिरि-उद्यान] ३८९, ३९४
रैवताचल [अचल] ८९
रोहीतक [देश] ४०८

[ल]

लक्ष्मण [दशरथपुत्र] ३४४, ३४५, ३४९, ३५६, ३५८, ३५९, ३६०, ३६२, ३६४, ३६८, ३६९, ३७१, ३७५, ३७९, ३८१, ३८२, ३८३, ३८४, ३८५

लक्ष्मी [पद्मोत्तरप्रिया] २५९, २६०, २६२
लक्ष्मीवती [राज्ञी] ३८०
लक्ष्मीवती [कनकरथप्रिया] ४८६
लङ्का [नगरी] ३५४, ३५५, ३५७, ३५८, ३६१, ३६२, ३६५, ३६६, ३६७, ३६८, ३७१, ४८०
लङ्केश्वर [रावण] ३६३, ३७१
लवण [रामपुत्र] ३८०, ३८१, ३८३, ३८४, ३८७
लीलावती [नरविक्रमप्रिया] ५३४
लोकान्तिक [सुर] २३, ३९४
लोहार्य [मुनि] ५३७

[व]

वज्र / वज्रस्वामी [धनगिरिपुत्र-मुनि] १४३, १४६, १४७, १४८, १४९, १५०, १५१, १५२, १५३, १५४, १५५, १५६, १५७, १५८, १५९, १६२, १६३, १६४, १६५, १६६, १६७, १६८, २७४, ३३१, ३३७
वज्रजङ्घ [पुण्डरीकपुरेश्वर] ३७८, ३७९, ३८०, ३८१, ३८२, ३८४
वज्रदत्त [चक्री] २४५
वज्रनाथ [मुनीश्वर] २१
वज्रसेन [वज्रशिष्य] १६६
वज्रावर्त [धनुष] ३४७, ३४८, ३४९
वत्स [देश] ५८१
वत्सराज [नृप] ५८६
वनमाला [पद्मरथप्रिया] २४५
वरदास [तीर्थ] ३३
वररुचि [द्विज] ९२, ९३, ९४, ९६, ९७
वरुण [नृप] ४८०
वर्धमान [जिन] ५
वर्धमानपुर [पुर] ४९४, ४९५
वसन्त [सार्थवाह] ४२१, ४२२, ४२४, ४२९
वसन्ततिलका [अञ्जनासखी] ४७८, ४८४, ४८६, ४८८, ४९०
वसन्तपुर [पुर] १९९, २३१, ३०१
वसुदत्त [श्रेष्ठी] २८१, २८२, २८३, २८४, २८६, २८७
वसुदेव [दशमदसार] ८६
वसुभूति [यशोवर्ममित्र] ४३५, ४३६, ४३८
वह्निकुमार [देव] ३५३
वाग्देवी [श्रुतदेवी] ६३६
वाग्देवीसुत [बालचन्द्र] ६३७
वाटधानक [पाटक] ३२६
वाणारसी [नगरी] २७८
वामासुत [पार्श्वजिन] ३
वारि [भूपति] ५४६
वाल्हीक [देश] ३४४
वासुदेव [कृष्ण] ९०
वासुला [राज्ञी] ५४४
विक्रमयशा [रसापति] ६६
विजय [बलदेव] १५
विजय [वैमानिकसुर] ६६, ८१, ८४
विजय [आचार्य] १२७
विजय [पार्थिव] २७४

विजय [विमान] ३१०
विजय [महत्तर] ३७३
विजय [राजा] ४४२
विजयवर्मा [राजा] ५१४, ५१५, ५२१, ५२६
विदर्भ [देश] ४०६, ४०७, ४०८, ४०९, ४११, ४१४
विदर्भजा [दवदन्ती] ४१९, ४२२, ४२५
विदर्भनाथ / विदर्भराज / विदर्भराट् [नृप] ४०७, ४०९, ४१९, ४२८
विदेह [क्षेत्र] ३११
विदेहा [जनकप्रिया] ३४२, ३४६, ३५०
विद्याभृत् [गच्छकन्दल] १६६
विद्युत्प्रभ [विद्याधरपुत्र] ४७७, ४७८, ४७९
विद्युत्प्रभा [प्रियदर्शनप्रिया] ५५४
विद्युद्वेग [सन्ध्यावतीभ्राता] ७८
विद्युन्माली [देव] २४६
विनमि [ऋषभसुत] २६, ३६, ३७, ५५६
विनयन्धर [तलारक्ष] ४४१, ४४२, ४४४
विन्ध्य [पर्वत-अचल] ११६, ३०८, ३०९, ५०९
विन्ध्य [तीर्थ] २४९
विमलाचल [तीर्थ] ५९
विदर्भजानल [दमयन्ती-नल] ४२४
विराध [नृप] ३५८, ३५९, ३६०, ३६५
विरिञ्चन [सावित्रीप्रिय] २०
विलासपुर [पुर] ४५०
विलासवती [ईशानचन्द्रपुत्री] ४३३, ४३६, ४४७, ४४८, ४५०, ४५७, ४५८, ४६०, ४६७, ४६८, ४७१, ४७३
विवेकमञ्जरी [ग्रन्थनाम] ३, ४, ५
विशल्या [राजपुत्री] ३६९
विशालेश [वैशालीनृप] २११
विश्वभूति [यशोवर्ममित्र] ४३५, ४३९, ४४०, ४४२, ४४४, ४४६, ४६६, ४६७, ४६८, ४७१, ४७२
विश्वभूति [कुलपति] ५५२, ५५३, ५५४, ५५५, ५५६
विश्वसेन [नरेश्वर] ७१, ७७
विश्वसेन [नृप] ७१, ७२, ७४, ३९१
विष्णु [कृष्ण-वासुदेव] ८९, ३८९, ५३८
विष्णु [ज्वालापुत्र] २५९, २६१, २६२, २६३, २६४, २६५
विष्णुकुमार [ज्वालापुत्र] २५९, २६१, २६२, २६३, २६४, २६५
विष्णुश्री [इभ्यपत्नी] ६६, ६७, ६८, ६९
विहल्ल [श्रेणिकपुत्र] २१४, ३३१
वीतभय [नगर] २१४, ३३१
वीतशोका [नगर] २०९, २३८
वीर [तीर्थंकर] ५, १०४, १३१, १३२, १३८, १३९, १४१, १४२, १८६, १९३, २१०, २२६, २३७, २३८, २४१, २४२, २४३, २५७, २७४, २७५,

२७६, ३०७, ३१८, ३३१, ५८४, ५८५
वीरदास [ऋषभसेनपुत्र] ४९४, ५०३, ५०४, ५०५, ५०६, ५०८, ५०९
वीरमती [राजप्रिया] ४३१, ४३२
वीरमती [सार्थवाहभार्या] ४९४
वीरसेन [राजपुत्री] ४४१
वृषभध्वज [विभु] ३८९, ५५३
वृषभ [प्रथमजिन] ४८
वृषभदास [श्रेष्ठि] १७३
वेणा [शकटालपुत्री] ९२
वेलन्धर [सुर] ३३१
वेलन्धर [नगर] ३६५
वैताढ्य [पर्वत] २७, ३३, ७९, ८०, ३४२, ३४४, ३४६, ४०२, ४५०, ४७०, ४७७
वैताढ्यकुमार [देव] ३३
वैदग्धी [दमयन्ती] ४२८
वैदेही [सीता] ३४९, ३५९, ३६०, ३७१, ३७९, ३८१, ३८५, ३८७, ४७२
वैभार | वैभारगिरि | वैभारोदय [अद्रि] १४०, १४१, १६९, १९३, २२५, २४३, २४७
वैमानिक [देव] ८१, १३०
वैरङ्गिक [रथी] २१३
वैशाली [पुरी] २०९, २११
वैश्रवण [यक्ष] १४३
वैश्वानर [वन] १५८

[श]

शकटाल [स्थूलभद्रपिता] ९१, ९४, ९७
शक्तिचूला [राजपुत्री] ३८०
शङ्ख [नृप] ५१२, ५१८, ५१९, ५२०, ५२१, ५२२, ५२३, ५२४
शङ्खपुर [पुर] ५१२, ५१४, ५२२
शङ्खलक्ष्म [नेमिजिन] ३
शतानीक [नृप] २०९, ५८१, ५८२, ५८३
शत्रुघ्न [दशरथपुत्र] ३४४, ३७२, ३८७
शत्रुञ्जय [गिरि] ३३१
शम्भु [नृप] ३६७
शय्यम्भव [सूरि] २७४, २८८, २८९, २९०, २९१, २९२, २९३
शान्ति | शान्तिनाथ [तीर्थकर] ३, १५, ४०६, ४२२, ४२३
शाम्ब [कृष्णसुत] ३३१
शारदा [श्रुतदेवी] ३
शाल [राजा] ३३१
शालिग्राम [ग्राम] १३९
शालिभद्र [श्रेष्ठिपुत्र-मुनि] १३१, १३२, १३३, १३४, १३५, १३६, १३७, १३८, १३९, १४२, २५८, ५३८
शिवकुमार [पद्मरथपुत्र] २४५
शिवा [चेटकपुत्री] २०९, ५१२
शिवा | शिवादेवी [नेमिमाता] ३९१, ३९३
शीतल [तीर्थेश] ५८०
शुक [देश] ३४४
शुभा [नृपप्रिया] ४५०

शूर [महेन्द्रसिंहपिता] ७२
शूरनन्दन | शूरसू | शूरसूनु [महेन्द्रसिंह] ७३, ७४, ७५
शृङ्गारमञ्जरी [राज्ञी] ४३३, ४३७
शौरि [महेन्द्रसिंह] ७४, ८०
श्रावस्ती | श्रावस्ती [नगरी] १०४, १११, ११३, २९७, २९८
श्रीदेवी [देवी] १५८
श्रीदेवी [विजयप्रिया] २७४
श्रीदेवी [राज्ञी] ५१७
श्रीपति [वणिक्सुत] २९४
श्रीपद्म [सूरि] ६३७
श्रीपुर [नगर] २९४
श्रीमती [बन्धुमतीजीव] २३१, २३२, २३३, २३४, २३५
श्रीमती [राज्ञी] ५२६
श्रीयक [शकटालसुत] ९२, ९४, ९५, ९६, ९७, १०२, २९४
श्रीवर्मा [पार्थिव] २५९
श्रेणिक [नृप] १३१, १३३, १३४, १४०, १४१, १६९, १९६, २०५, २०६, २०८, २१०, २११, २१२, २१३, २२५, २२६, २२७, २३०, २३७, २३८, २३९, २४१, २४३, २४४, २४६, ३०७, ३१८, ३८९
श्रेयांस [नृप] २७
श्वेत [द्वीप] ४५२
श्वेतवी [पुरी] ४३४, ४४१, ४४२ ४४८, ४५२, ४५४, ४५५, ४६२
श्वेताम्बी [पुरी] २९७

[स]

सम्भूति | सम्भूतिविजय [आचार्य] ९१, ९६, ९७
सङ्गम [देव] ८०, १८५
सङ्गमक [बाल] १३९
सङ्गरपुर [पुर] ४३१
सङ्गा [यतिनी] ५७९
सङ्गापुरीन्द्र [नृप] ४२२
सज्जन [वणिक्सुत] २९४
सत्यभामा [कृष्णप्रिया] ३९१
सनत्कुमार [राजर्षि-चक्रिवर्ती] ६६, ७२, ७३, ७४, ७७, ७८, ८०, ८१, ८४
सनत्कुमार [नृप] ४३४, ४३६, ४४०, ४४२, ४५३, ४५८, ४७३
सन्ध्यावली [सनत्कुमारदेवी] ७८, ७९
समुद्र [नृप] ३६५
समुद्र [नेमिपिता] ३९१, ३९३
समुद्रदत्त [प्रवहणेश] ४४४
समुद्रविजय [बलदेव] ३९१, ३९३
समुद्रश्री [जम्बुभार्या] २४६, २५१
सम्प्रति [नृप] ४९४
सम्बूक [खरपुत्र] ३५४, ३५५
सम्मेत [शैल] ३७३, ३७५, ३७६
सरस्वती [वाग्देवी] २१०, ६३५
सर्वार्थसिद्ध [विमान] २१, १४२, ३१७
सहदेव [ऋषभसेनपुत्र] ४९४, ४९५, ४९६, ४९७

सहदेवी [विश्वसेनदेवी] ७२
सहदेवी [कीर्त्तिधरदेवी] १२६, १२७, १२८, १२९
सहसाम्र [वण] २७९, २८२, २८४
सहस्रबल [नृप] ४५०
साकेत [पुर-यक्ष] १२६, १२७, ५८१, ५८२
सागर [चक्रिपुत्र] २४५
सामायिक [कुटुम्बी] ५१६
सारण [गणश] ३६५
सावित्री [विरिञ्चनपत्नी] २०
सिंह [नृप] ३६७
सिंहकेशरी [कुबेराङ्गज-मुनि] ४२२
सिंहगिरि [मुनि] १४४, १४५, १५३, १५४
सिंहनिनाद [अरण्य] ३७६
सिंहनिषद्या [प्रासाद] ६१
सिंहपुर [नगर] ७०
सिंहबल [भूपति] २६०
सिंहरथ [ऋषिदत्तासुत] ५७७, ५८०
सिंहल [द्वीप] ४४४, ४४५, ४४८, ४५५
सिद्ध [पर्वत] ४५४
सिद्धकूट [कूट] ४५१
सिद्धपुत्र [नारद] २८९
सिद्धसेन [सिद्धविद्य] ४४५
सिद्धार्थ [देव] २५
सिद्धार्थ [वीरपिता] २२५
सिद्धिनिलया [मलयाद्रिगुहा] ४६४
सिन्दु [नदी] ३३, ३४, ३६, ३७
सिप्रा [नदी] १२५
सीता [जनकपुत्री-रामप्रिया] ३४३, ३४५, ३४६, ३४७, ३४८, ३४९, ३५२, ३५३, ३५४, ३५५, ३५६, ३५७, ३५८, ३६०, ३६१, ३६२, ३६३, ३६४, ३६५, ३६७, ३७१, ३७२, ३७३, ३७४, ३७५, ३७६, ३७७, ३७८, ३७९, ३८२, ३८३, ३८४, ३८५, ३८६, ३८७, ३८८
सीमन्धर [जिन] १०३, ५०३, ५३५, ५३६
सीमाल [नगर] २६०
सुंसमा [धनपुत्री] ११७, ११८, ११९
सुंसुमार [पुर] ४०८, ४१५, ४१९, ४२६
सुकोशल [कीर्तिधरपुत्र-मुनि] १२६, १२७, १२८, १२९, ३१८
सुग्राम [ग्राम] २४४
सुग्रीव [नृप] ३६०, ३६१, ३६४, ३६५, ३६८, ३६९, ३८५, ३८७
सुज्येष्ठा [चेटकपुत्री] २०९, २१०, २११, २१२, २१३, ५३८
सुदर्शन [बलदेव] १५
सुदर्शन [श्रेष्ठिपुत्र] १७३, १७५, १७६, १७७, १७८, १७९, १८०, १८१, १८३, १८४, १८५, ४३३
सुदर्शनपुर [पुर] ३९८
सुधर्मस्वामी [स्वामी] २४७, २५०, २५६, २५७
सुधर्मा [सभा] ७३, ८४, ८५
सुधर्मा [स्वामी] २४७, २५०, २५६, २५७

सुनन्दा [ऋषभपत्नी] २०, २१
सुनन्दा [स्त्रीरत्न] ७८, ८३
सुनन्दासुत [बाहुबली] ५४
सुन्द [खरसूनु] ३६०
सुन्दरपाणि [पृथिवीपति] ५४४, ५५९
सुन्दरी [सुनन्दासुता] २१, २३, ३१, ३८, ५६, ५७
सुन्दरी [भूपप्रिया] ४७५
सुन्दरी [सहदेववल्लभा] ४९५, ४९६
सुन्दरीमाला [राज्ञी] ४८८
सुप्रभ [बलदेव] १५
सुप्रभा [दशरथप्रिया] ३४४
सुबाहु [मुनि] २०, २१
सुबाहु [नृप] ४०८
सुबुद्धि [अमात्य] ४०
सुभग [महिषीपाल] १७३, १७५
सुभद्रा [जिनदत्तसुता-बुद्धदासप्रिया] ५३८, ५३९, ५४०, ५४१, ५४२, ५४३
सुभूम [चक्रवर्ती] १५
सुमङ्गला [ऋषभपत्नी] २०, २१
सुमति [मन्त्री] ३७८
सुमन्त्र [मन्त्री] ५३०
सुमालि [नृप] ३६७
सुमित्रा [दशरथप्रिया] ३४४, ३५३, ३५६, ३५८, ३५९, ३६८
सुमुख [सैनिक] १९३
सुमेरुप्रभ [करी] ३०८
सुयशा [हेमरथप्रिया] ५४४
सुलसा [नागप्रिया] २१२, २१४, ३८९
सुलसा [योगिनी] ५५९, ५६०, ५६२, ५६३, ५६७, ५७६
सुलोचन [सूरि] ३३१
सुलोचना [नरविक्रमपुत्री] ५३४, ५३५, ५३६, ५३७
सुवेग [दूत] ४२
सुवेल [वेलन्धरवल्लभा] ३३१
सुवेल [अद्रि-नृप] ३६५
सुव्रत [स्वामी-आचार्य] ६९, ११३, ११५, २५९, २६१, २६२
सुषेण [सेनापति] ३३, ३४, ३६, ३७
सुसीमन् [ग्राम] १०७
सुसेना [अभयप्रिया] २०९
सुस्थित [आचार्य] ८३, २२९, २४४, २८७
सुहस्ति [स्थूलभद्रशिष्य] १०६, ३३१
सूर्यहास [खड्ग] ३५४
सेचनक [हस्तिन्] २२२
सेणा [शकटालपुत्री] ९२
सेतु [नृप] ३६५
सोम [नैमित्तिक] ४४२
सोमदेव [विप्र] १५९
सोमभु [आर्यरक्षित] १६०, १६१
सोमयशा [बाहुबलिसूनु] ५५
सोमशर्मन् [ब्राह्मण] ८७
सोमा [द्विजप्रिया] ८७
सोमिला [विप्रप्रिया] ३०१
सौधर्म [देवलोक] ७१, ८०, २४४, २८७, ३०१, ४२२, ४८७, ५३६

सौधर्मेन्द्र [इन्द्र] ८०
सौपारक [पुर] १६६
सौमित्रि [लक्ष्मण] ३५२, ३५३, ३५५, ३५९, ३६०, ३६१, ३६२, ३६७, ३६८, ३७०, ३७२, ३७५, ३८४, ३८६, ३८७
सौराष्ट्र [देश] ४०८
सौलसेय [सुलसापुत्र] २१३
सौव [मित्र] ४३६
स्कन्दक [राजपुत्र-आचार्य] ११२, ११३, ११४, ११५
स्कन्दकाचार्य [सूरी] ३५३
स्थविर [आचार्य] ३११
स्थूलभद्र [शकटालसुत] ९१, ९२, ९५, ९७, ९८, ९९, १००, १०१, १०२, १०३, १०४, १०५, १०६, २९४
स्मरलेखा [सखी] ४३७
स्वर्णभूमि [ ] ४४४
स्वस्तिमती [ग्राम] ४४१

[ह]

हंस [द्वीप] ३६५
हंसरथ [नृपति] ३६५
हनुपुर [पुर] ४८८, ४८९, ४९३
हनुमान् [पवनञ्जयसूनु] ३६२, ३६३, ३६४, ३६५, ३६९, ३७१, ३८४, ४८९, ४९३
हरि [कृष्ण] ३९०, ३९१, ३९२
हरिचन्द्र [खेचर] ७८
हरिचन्द्र [कृष्ण] ९०
हरिणी [वेश्या] ५०४, ५०५, ५०६
हरिप्रभा [रामगुप्तप्रिया] ४७५
हरिमित्र [द्विजन्मा] ४७५
हरिवर्ष [क्षेत्र] ५६६
हरिषेण [नृप-मुनि] ५५२, ५५५, ५७०, ५८०
हल्ल [श्रेणिकपुत्र] २१४, ३३१
हस्त [नृप] ३६७
हस्त [गणश] ३६५, ३६७
हस्तिनागपुर / हस्तिनाग्रपुर / हस्तिनापुर [पुर] ८०, ८१, २५८, २६०, २६२
हस्तिनपुर [नगर] ७१
हिमवत् [पर्वत] २६४, ४३१
हिमवत्कुमार [पर्वतेश] ३६
हिमालय [पर्वत] ३६
हुताशन [देव] १५८
हृषीकेश [ ] १२६
हेमरथ [नृप] ५४४, ५७७

● ● ●

नवीनसंस्करणप्रकाशकः
श्रुतरत्नाकर
अहमदाबाद